# संस्कृतभाषाव्याकरणम्

## कक्षा ११

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

प्रकाशकः

नेपालसर्वकारः

शिक्षाविज्ञानप्रविधिमन्त्रालयः

पाठ्यक्रमविकासकेन्द्रम्

सानोठिमी-भक्तपुरम्

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति। लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य अथवा एकांशस्य यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०७७

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाचरणस्य विकासोऽप्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षाद् निर्मितं २०७७ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते ।

शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं शिक्षातो नैतिकाचरणप्रदर्शिकायाः, सामाजिकसद्भावप्रवर्धिकायाः, पर्यावरणस्य सन्तोलनेन प्रयोगं कर्तुं संवेदनशीलायाः, दृढशान्तिं प्रति प्रतिबद्धायाश्च व्यक्तेरपेक्षां समाजो विदधाति । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनो, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवमेव कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य ११ कक्षायाः संस्कृतभाषाव्याकरणविषयकपाठ्यक्रमस्याधारेण पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं सहप्रा. ध्रुवप्रसादः भट्टराई, सहप्रा. डा. गुरुप्रसादः सुवेदी, डा. वैकुण्ठः घिमिरे, निश्चलः अधिकारी, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन लिखितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य लेखने पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः अणप्रसादः न्यौपाने,

केशवप्रसाददहालः, प्रा.डा. माधवशरणोपाध्यायः, प्रा.डा. नारायणप्रसादगौतमः, प्रा. पद्मप्रसादः भट्टराई, प्रा. ध्रुवप्रसादः ज्ञवाली, डा. मुकुन्दप्रसादः लामिछाने, शिवराजः लामिछाने, टुकराजः अधिकारी, केशवशरणः अर्याल, रोहिणीराजः तिमिल्सिना, पर्वतः घिमिरे-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य चित्राङ्कनं टङ्कणं रूपसज्जा च खडोससुनुवार इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधानां स्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत एतेषु विषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

शिक्षाविज्ञानप्रविधिमन्त्रालयः

पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | शीर्षकम् | पृष्ठसङ्ख्या |
|---|---|---|
| भाषाखण्डः | | १-८० |
| प्रथमः पाठः | नेपालगौरवम् | ३ |
| द्वितीयः पाठः | सुभाषितसप्तकम् | १८ |
| तृतीयः पाठः | मम दैनन्दिनी | ३४ |
| चतुर्थः पाठः | दाननिधिर्दधीचिः | ४६ |
| पञ्चमः पाठः | गुरुविद्या वरीयसी | ६० |
| न्यायखण्डः | | ८१-१७८ |
| प्रथमः पाठः | मङ्गलश्लोकार्थविवरणम् | ८३ |
| द्वितीयः पाठः | मङ्गलेश्वरवादौ | ९० |
| तृतीयः पाठः | द्रव्यादिसामान्यान्तपदार्थपरिचयः | १०० |
| चतुर्थः पाठः | विशेषाद्यभावान्तपदार्थनिरूपरणम् | ११६ |
| पञ्चमः पाठः | साधर्म्यवैधर्म्यनिरूपरणम् | १२८ |
| षष्ठः पाठः | शेषसाधर्म्यवैधर्म्यनिरूपरणम् | १४५ |
| सप्तमः पाठः | पृथिवीनिरूपरणम् | १५८ |
| अष्टमः पाठः | पारिभाषिकपदपरिचयः | १७२ |
| व्याकरणखण्डः | | १७९-३६६ |
| प्रथमः पाठः | भूधातोर्लटि रूपसाधनम् | १८५ |
| द्वितीयः पाठः | भूधातोर्लिटि लुटि लृटि च रूपसाधनम् | १९२ |
| तृतीयः पाठः | भूधातोर्लोटि लङि विधिलिङि च रूपसाधनम् | १९९ |

| | | |
|---|---|---|
| चतुर्थः पाठः | भूधातोः लिङि लुङि लृङि च रूपसाधनम् | २०८ |
| पञ्चमः पाठः | अतप्रभृतीनां परस्मैपदिधातूनां प्रयोगसिद्धिनिदर्शनम् | २१७ |
| षष्ठः पाठः | क्षिप्रभृतीनां धातूनां रूपसिद्धिप्रक्रियानिदर्शनम् | २२४ |
| सप्तमः पाठः | स्मृप्रभृतीनां धातूनां रूपसिद्धिप्रक्रियानिदर्शनम् | २४५ |
| अष्टमः पाठः | आत्मनेपदिनोः एध्-कम्-धात्वोः प्रयोगसिद्धिनिदर्शनम् | २५७ |
| नवमः पाठः | क्षमूष्प्रभृतीनां धातूनां रूपसिद्धिनिदर्शनम् | २६९ |
| दशमः पाठः | श्रिञादीनामुभयपदिधातूनां रूपसिद्धिनिदर्शनम् | २७५ |
| एकादशः पाठः | अथ अदादिप्रकरणम्- १ | २८५ |
| द्वादशः पाठः | अदादिप्रकरणम्- २ | २९३ |
| त्रयोदशः पाठः | अथ जुहोत्यादिप्रकरणम् | ३०८ |
| चतुर्दशः पाठः | अथ दिवादिप्रकरणम् | ३१४ |
| पञ्चदशः पाठः | अथ स्वादिप्रकरणम् | ३२१ |
| षोडशः पाठः | अथ तुदादिप्रकरणम् | ३२५ |
| सप्तदशः पाठः | अथ रुधादिप्रकरणम् | ३३१ |
| अष्टादशः पाठः | अथ तनादिप्रकरणम् | ३३४ |
| ऊनविंशः पाठः | अथ क्र्यादिप्रकरणम् | ३३८ |
| विंशः पाठः | कारकप्रकरणम् - १ | ३४६ |
| एकविंशः पाठः | कारकप्रकरणम् - २ | ३५५ |
| द्वाविंशः पाठः | कारकप्रकरणम् - ३ | ३६१ |

# भाषाखण्डः

## प्रथमः पाठः

# नेपालगौरवम्



१. नेपालदेशे हिमभूधराङ्के बुद्धस्तपस्वी भरतश्च जातौ ।
ययोः सुशिक्षावचनामृतेन सन्तृप्तलोकः कृतकृत्य आस्ते ॥

२. महान् 'महाभारत' सार्थनामा नेपालराज्यस्थगिरिर्विभाति ।
यः पर्वतक्षेत्र-तराइभागौ विभाजयन् भ्राजति मध्यवर्ती ॥

३. स्थले स्थले मञ्जुलमन्दिराणि पदे पदे प्राकृतवैभवानि ।
अनन्तवैशिष्ट्यसमन्वितानि मनो हरन्त्यत्र दृशि स्थितानि ॥

४. यो ब्रह्मचारीति षडाननाख्यो विद्यातपोज्ञानगुणैर्वरिष्ठः ।
संस्थाप्य विद्यालयमन्दिराणि सिद्धेः प्रभावं समदर्शयच्च ॥

### पद्यानुशीलनम्

अस्य पाठस्य पद्येषु उपजातिवृत्तं वर्तते । उपेन्द्रवज्रेन्द्रवज्रावृत्तयोर्मेलनेनोपजातिवृत्तं भवति । कुत्रचिद् वंशस्थेन्द्रवंशावृत्तयोरन्ययोर्वा कयोश्चिद् द्वयोर्वृत्तयोः सङ्घटनेनापि उपजातिर्जायते । तल्लक्षणं यथा- अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ।

५. नेपालदेशे हिमवत्प्रदेशे योगाग्निभस्मीकृतकल्मषारिः ।
यः खप्तडस्वामिपदाख्यसिद्धः स सच्चिदानन्द इति प्रसिद्धः ॥

६. पन्तोपनामा सुकृतिः कृतिज्ञः श्रीसोमनाथः कुलचन्द्र एतौ ।
नैपालकाः संस्कृतकाव्यकारा वैचित्र्यपूर्णा रचना विदध्युः ॥

७. नराश्च नार्यश्च कतीह जाता नानाकलाज्ञानविधिप्रवीणाः ।
त्यागेन शौर्येण सुविद्यया च सदानुकार्याः परमादृताश्च ॥

(माधवभट्टराईविरचितस्य 'सत्य-साई-चरितम्' इति महाकाव्यस्य प्रथमसर्गात्)

## व्याख्या

(१.) **अन्वयः**

हिमभूधराङ्के नेपालदेशे बुद्धः तपस्वी भरतश्च जातौ ययोः सुशिक्षावचनामृतेन सन्तृप्तलोकः कृतकृत्यः आस्ते ।

**विग्रह-पर्याय-पदार्थाः**

हिमभूधराङ्के - हिमस्य भूर्हिमभूः, तां धरतीति भूधरः, हिमस्य भूधरः हिमभूधरः, हिमभूधरस्याङ्को हिमभूधराङ्कः, तस्मिन् = तुहिनगिरिक्रोडे, नेपालदेशे - नेपालनामा देशस्तस्मिन् = (अस्माकम्) नेपालराष्ट्रे, बुद्धः = सिद्धार्थगौतमबुद्धः, तपस्वी = तपश्चारी, भरतश्च = जडभरतोऽपि, जातौ = प्रादुर्भूतौ, ययोः = पूर्वोक्तयोर्बुद्धजडभरतयोरित्यर्थः, सुशिक्षावचनामृतेन - सुशिक्षाया वचनं सुशिक्षावचनम्, तस्यामृतं सुशिक्षावचनामृतम्, तेन = सदुपदेशवाणीसुधया, सन्तृप्तलोकः - सन्तृप्तो लोकः= सन्तुष्टजननिचयः, कृतकृत्यः - कृतं कृत्यं येन = कृतार्थः, आस्ते = वर्तते ।

## कोशः

**हिमम् -** तुषारस्तुहिनं **हिमम्** ।
**वचनम् -** व्याहार उक्तिर्लपितं भाषितं **वचनं** वचः ।
**अमृतम् -** पीयूष**ममृतं** सुधा ।
**लोकः -** त्रिष्वथो जगती **लोको** विष्टपं भुवनं जगत् । इत्यमरः ।

**सरलार्थः**

हिमालयस्याङ्केऽवस्थितायां नेपालभूमौ सिद्धार्थगौतमबुद्धस्तपस्वी जडभरतश्च जनिं लब्धवन्तौ । तयोऽमृतमयोपदेशेन लोकः परितुष्टः कृतार्थश्च विद्यते ।

(२.) **अन्वयः**

'महाभारत' सार्थनामा नेपालराज्यस्थः महान् गिरिः विभाति यः पर्वतक्षेत्रतराइभागौ विभाजयन् मध्यवर्ती भ्राजति ।

**विग्रह-पर्याय-पदार्थाः**

**'महाभारत'** = महाभारतनामधेयः, **सार्थनामा** = सार्थं नाम यस्य, **सः** = नामानुरूपः, **नेपालराज्यस्थः** - नेपालस्य राज्यं नेपालराज्यम्, **तत्र स्थितः** = नेपालदेशविराजमानः, **महान्** = विशालः, **गिरिः** = पर्वतः, **विभाति** = शोभते, **यः** = महाभारतगिरिः, **पर्वतक्षेत्रतराइभागौ** - पर्वतस्य क्षेत्रं पर्वतक्षेत्रम्, तराइप्रदेशस्य भागस्तराइभागः, **पर्वतक्षेत्रं तराइभागश्च पर्वतक्षेत्रतराइभागौ** = पर्वतीयभूभागतराइभूखण्डौ, **विभाजयन्** = आवण्टयन्, **मध्यवर्ती** - मध्ये वर्तत इति = मध्यभागेऽवस्थितः (सन्), **भ्राजति** = संराजते ।

**कोशः**

**नाम** - आख्याह्वे अभिधानं च नामधेयं च **नाम** च ।

**गिरिः** - अद्रिगोत्र**गिरि**ग्रावाचलशैलशिलोच्चयाः । इत्यमरः ।

**सरलार्थः**

'महाभारत' इत्यभिधेयो महत्त्वात् सार्थकनामा विशालगिरिर्नेपालदेशे विद्यते । गिरिरसौ पर्वतीयक्षेत्रं तराइभूभागञ्च पृथक्कृत्य तयोर्मध्यस्थले सुशोभते । महाभारतगिरिर्नामानुसारेण महानेवास्तीत्यभिप्रायः ।

(३.) **अन्वयः**

अत्र स्थले स्थले अनन्तवैशिष्ट्यसमन्वितानि मञ्जुलमन्दिराणि पदे पदे प्राकृतवैभवानि दृशि स्थितानि मनः हरन्ति ।

**विग्रह-पर्याय-पदार्थाः**

**अत्र** = अस्यां भूमौ, **स्थले स्थले** = स्थाने स्थाने, **अनन्तवैशिष्ट्यसमन्वितानि** - न अन्तमनन्तम्, अनन्तं यद् वैशिष्ट्यमनन्तवैशिष्ट्यम्, तेन समन्वितानि अन्तवैशिष्ट्यसमन्वितानि, अपरिमितविशेषतायुतानि, **मञ्जुलमन्दिराणि** - मञ्जुलानि यानि मन्दिराणि मञ्जुलमन्दिराणि, सुन्दरदेवसदनानि, **पदे पदे**= प्रत्येकं पादचालने, **प्राकृतवैभवानि** - प्राकृतानि वैभवानि प्राकृतवैभवानि, नैसर्गिकवसूनि, **दृशि** = नयने, **स्थितानि** = विद्यमानानि (सन्ति), **मनः** = मानसम्, **हरन्ति** = आवर्जयन्ति ।

## कोशः

**मञ्जुलम्** - कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु **मञ्जुलम्** ।

**मन्दिरम्** - निशान्तपस्त्यसदनं भवनागार**मन्दिरम्** ।

**मनः** - चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं **मनः** ।

**दृक्** - **दृग्**दृष्टी (चास्रु नेत्राम्बु रोदनं चास्रमश्रु च) । इत्यमरः ।

**सरलार्थः**

एतस्यां नेपालभूमौ बहुषु स्थानेषु विविधविशेषतायुतानि सुन्दराणि मन्दिराणि सन्ति । प्रतिपदं प्राकृतसम्पदश्च तादृश्य एव विभान्ति । एता दर्शनमात्रेणापि मनः समाकर्षन्ति ।

(४.) **अन्वयः**

विद्यातपोज्ञानगुणैः वरिष्ठः षडाननाख्यः ब्रह्मचारी इति यः विद्यालयमन्दिराणि संस्थाप्य सिद्धेः प्रभावं च समदर्शयत् ।

**विग्रह-पर्याय-पदार्थाः**

**विद्यातपोज्ञानगुणैः** - विद्या च तपश्च ज्ञानञ्च विद्यातपोज्ञानानि, तेषां गुणाः विद्यातपोज्ञानगुणाः, तैः = शास्त्राध्ययनतपस्याप्रबोधनसामर्थ्यैः, **वरिष्ठः** = नितरां श्रेष्ठः, **षडाननाख्यः** - षड् आननानि यस्य 'षडानन' इति आख्या यस्य सः = षडानन्दः षडाननो वा, **ब्रह्मचारी** - ब्रह्मणि चरतीति ब्रह्मचारी = ब्रह्मचर्यव्रती, **इति** = इत्थमासीदित्यर्थः, **यः** = षडाननः, **विद्यालयमन्दिराणि** - विद्यालयश्च मन्दिराणि विद्यालयमन्दिराणि, तानि = पाठशालादेवसदनानि, संस्थाप्य = स्थापयित्वा, **सिद्धेः** = साधनाशक्तेः, **प्रभावम्** = सामर्थ्यम्, **च** = अपि, **समदर्शयत्** = प्रकटितवान् ।

## कोशः

**मन्दिरम्** - निशान्तपस्त्यसदनं भवनागार**मन्दिरम्** ।

**आलयः** - गृहाः पुंसि च भूम्न्येव निकाय्यनिलय**आलयाः** । इत्यमरः ।

**सरलार्थः**

विद्यायास्तपसो ज्ञानस्य च गुणैर्वरिष्ठः षडाननमा ब्रह्मचारी आसीत् । स विद्यालयान् मन्दिराणि च समस्थापयत् । सिद्धपुरुषः स साधनाशक्तेः प्रभावञ्च प्रादर्शयत् ।

(५.) **अन्वयः**

हिमवत्प्रदेशे नेपालदेशे योगाग्निभस्मीकृतकल्मषारिः यः खप्तडस्वामिपदाख्यसिद्धः सः सच्चिदानन्दः इति प्रसिद्धः ।

**विग्रह-पर्याय-पदार्थाः**

**हिमवत्प्रदेशे -** हिमवान् प्रदेशो हिमवत्प्रदेशः, तस्मिन् = तुहिनभरितभूभागे, **नेपालदेशे** = नेपालराष्ट्रे, **योगाग्निभस्मीकृतकल्मषारिः** - योग एवाग्निर्योगाग्निः, तेन भस्मीकृतः कल्मषरूपोऽरिर्येन, सः = चित्तवृत्तिनिरोधानलविध्वंसितपापशत्रुः, **यः** = वक्ष्यमाणः, **खप्तडस्वामिपदाख्यसिद्धः** - खप्तडस्य स्वामी खप्तडस्वामीति पदेनाभिहितेन प्राप्ता सिद्धिर्येन सः = खप्तडस्वामिनामधेयसिद्धपुरुष आसीदित्यर्थः, **सः** = स्वामी, **सच्चिदानन्दः** - सँश्चासौ चिच्चासौ आनन्दः = नित्यज्ञानानन्दस्वरूपः (सरस्वती), **इति**= इति नाम्ना, **प्रसिद्धः** = विख्यातोऽभवदिति शेषः ।

## कोशः

योगः - **योगः** सन्नहनोपायध्यानसङ्गतियुक्तिषु ।

अग्निः - **अग्नि**र्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः ।

कल्मषम् - अस्त्री पङ्कं पुमान् पाप्मा पापं किल्विष**कल्मषम्** ।

अरिः - रिपौ वैरिसपत्ना**रि**द्विषद्द्वेषणदुर्हृदः ।

स्वामी - इभ्य आढ्यो धनी **स्वामी** त्वीश्वरः पतिरीशिता । इत्यमरः ।

**सरलार्थः**

अस्माकं हिमालयीये नेपालदेशेऽग्नितुल्येन योगबलेन पापरूपशत्रोर्दाहकः खप्तडस्वामिनामधेयः सिद्ध आसीत् । स सच्चिदानन्दसरस्वतीनाम्ना प्रख्यातोऽभवत् ।

(६.) **अन्वयः**

पन्तोपनामा कृतिज्ञः सुकृतिः श्रीसोमनाथः कुलचन्द्रः एतौ नैपालकाः संस्कृतकाव्यकाराः वैचित्र्यपूर्णाः रचनाः विदध्युः ।

**विग्रह-पर्याय-पदार्थाः**

**पन्तोपनामा** - पन्त उपनाम यस्य सः = पन्तवंशीयः, **कृतिज्ञः** - कृतिं जानातीति = विद्वान्, **सुकृतिः** = सुकृतिदत्तः, **श्रीसोमनाथः** = पण्डितराज इत्युपाधिना परिचितः सोमनाथनामा बुधः, कुलचन्द्रः = विद्वच्छिरोमणिरित्युपाधिना प्रसिद्धः कुलचन्द्रनामधेयो विद्वद्वरः, **एतौ** = अमू, **नैपालकाः** = नेपालदेशीयाः, **संस्कृतकाव्यकाराः** - संस्कृतस्य काव्यं संस्कृतकाव्यं तत्कुर्वन्तीति = संस्कृतकाव्यकर्तारः, **वैचित्र्यपूर्णाः** - विचित्रस्य भावो वैचित्र्यम्, तेन पूर्णाः = विचित्रताभरिताः, **रचनाः** = काव्यकृतीः, **विदध्युः** = कृतवन्तः ।

### कोशः

**कृती -** धीमान्सूरिः **कृती** कृष्टिर्लब्धवर्णो विचक्षणः । इत्यमरः ।

कृती 'कृतिन्' इति शब्दान्निष्पद्यते । 'कृतिज्ञः' पदे एतदेवावधेयम् ।

**सरलार्थः**

विद्वांसः सुकृतिदत्तपन्तः सोमनाथसिग्द्यालः कुलचन्द्रगौतमश्च नेपालस्य संस्कृतकाव्यकारा अभवन् । इमे विचित्रताभरिताः काव्यकृतीर्व्यरचयन् । एतेषां संस्कृतकाव्येष्वद्भुतवैशिष्ट्यानि विलसन्तीति भावः ।

(७.) **अन्वयः**

इह कति नानाकलाज्ञानविधिप्रवीणाः नराः च नार्यः च जाताः त्यागेन शौर्येण सुविद्यया च सदा अनुकार्याः परमादृताः च ।

**विग्रह-पर्याय-पदार्थाः**

**इह** = एतस्यां भूमौ, **कति** = सङ्ख्यातीताः, **नानाकलाज्ञानविधिप्रवीणाः** - न सहति पृथक् भावमिति नाना, नाना कला ज्ञानं विधिश्च नानाकलाज्ञानविधयः, तेषु प्रवीणाः = विविधशिल्पशास्त्रप्रबोधरीतिकुशलाः, **नराः** = पुरुषाः, **च** = अपि, **नार्यः** = महिलाः, **च** = अपि, **जाताः** = उद्भूताः, (ये) **त्यागेन** = उत्सर्गेण, **शौर्येण** = पराक्रमेण, **सुविद्यया** = सच्छास्त्रज्ञानेन, **च** = अपि, **सदा** = सर्वदा, **अनुकार्याः** = अनुसरणीयाः, **परमादृताः** = परमादरणीयाः, **च** = अपि, अजायन्तेति ।

### कोशः

**नराः -** मनुष्या मानुषा मर्त्या मनुजा मानवा **नराः** ।

नार्यः - स्त्री योषिदबला योषा **नारी** सीमन्तिनी वधूः ।

**प्रवीणः - प्रवीणे** निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ।

**शौर्यम् -** द्रविणं तरः सहोबल**शौर्याणि** स्थाम शुष्मं च । इत्यमरः ।

**सरलार्थः**

अस्यां भूमौ असङ्ख्या नरा नार्यश्चाजायन्त, ये विविधकलासु ज्ञानेषु प्रवधिषु च निपुणा आसन् । ते त्यागेन शौर्येण सद्विद्यया च सदैवानुकरणीयाः परमादरणीयाश्चाभवन् ।

## अभ्यासः

### श्रवणं भाषणञ्च

१. **अधस्तनपदानामनूच्चारणं कुरुत**

(क) हिमभूधराङ्के (ख) सुशिक्षावचनामृतेन (ग) भ्राजति

(घ) प्राकृतवैभवानि (ङ) ब्रह्मचारीति (च) समदर्शयच्च

(छ) सच्चिदानन्दः (ज) सुविद्यया (झ) परमादृताः

(ञ) वैचित्र्यपूर्णाः

२. **शिक्षकाच्छ्रुत्वा पद्यमनुवाचयत**

नेपालदेशे हिमवत्प्रदेशे योगाग्निभस्मीकृतकल्मषारिः ।
यः खप्तडस्वामिपदाख्यसिद्धः स सच्चिदानन्द इति प्रसिद्धः ॥

३. **यति-गति-लयनिर्धारणपुरःसरमधोऽङ्कितं पद्यं वाचयत**

नराश्च नार्यश्च कतीह जाता नानाकलाज्ञानविधिप्रवीणाः ।
त्यागेन शौर्येण सुविद्यया च सदानुकार्याः परमादृताश्च ॥

४. **अधस्तनश्लोकस्थपदानां शुद्धोच्चारणं कृत्वा प्रतिपदमर्थं श्रावयत**

पन्तोपनामा सुकृतिः कृतिज्ञः श्रीसोमनाथः कुलचन्द्र एतौ ।
नैपालकाः संस्कृतकाव्यकारा वैचित्र्यपूर्णा रचना विदध्युः ॥

५. **पाठस्य प्रथमस्य श्लोकस्यान्वयं सहपाठिनं पृच्छत ।**

६. **निर्दिष्टपदानां पर्यायान् कोशात् सङ्कलय्य कक्षायां श्रावयत**

(क) नारी (ख) नरः (ग) शौर्यम् (घ) अग्निः (ङ) मन्दिरम्

७. **पुस्तकमवलम्ब्य षष्ठस्य श्लोकस्य सरलार्थं शिक्षकं श्रावयत ।**

८. **राष्ट्रगौरवभरितं श्रुतपूर्वं श्लोकं विशिष्टवाक्यं वा कक्षायां श्रावयत ।**

### पठनम्

१. **लयमनुसृत्य अधस्तनं पद्यं सस्वरं वाचयत**

स्थले स्थले मञ्जुलमन्दिराणि पदे पदे प्राकृतवैभवानि ।
अनन्तवैशिष्ट्यसमन्वितानि मनो हरन्त्यत्र दृशि स्थितानि ॥

२. **प्रदत्तश्लोकस्य मौनपठनं विधायान्वयं प्रस्तुत**

यो ब्रह्मचारीति षडाननाख्यो विद्यातपोज्ञानगुणैर्वरिष्ठः ।
संस्थाप्य विद्यालयमन्दिराणि सिद्धेः प्रभावं समदर्शयच्च ॥

३. **अधस्तनश्लोकं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

महान् 'महाभारत' सार्थनामा नेपालराज्यस्थगिरिर्विभाति ।
यः पर्वतक्षेत्र-तराइभागौ विभाजयन् भ्राजति मध्यवर्ती ॥

(क) 'महाभारत' इति कस्य नाम वर्तते ?

(ख) गिरिरयं कौ विभाजयति ?

(ग) महाभारतगिरिः कुत्रावस्थितो वर्तते ?

(घ) 'महान्' इति पदं कस्य विशेषणम् ?

(ङ) 'सार्थनामा' इति पदस्य विग्रहवाक्यं किम् ?

(च) 'गिरिर्विभाति' इत्यस्य सन्धिविच्छेदं विधत्त ।

(छ) 'भ्राजति' इति क्रियापदस्य धातुं लकारं प्रत्ययञ्च निर्दिशत ।

(ज) 'मध्यवर्ती' इत्यस्यार्थं प्रकाशयत ।

(झ) 'गिरिः' इति पदस्य कोशनिर्देशं कुरुत ।

(ञ) 'विभाति' इत्यस्य पर्यायं निर्दिशत ।

(ट) श्लोकेऽस्मिन् कस्य वृत्तस्य प्रयोगो विद्यते ?

(ठ) अस्य श्लोकस्य सरलार्थं निदर्शयत ।

४. **पाठं पठित्वा समस्तपदानि चिह्नीकुरुत ।**

५. **पाठस्य पञ्चमस्य श्लोकस्य सरलार्थं पठित्वा तत्र समाविष्टविषयान् सूत्ररूपेण कथयत ।**

६. **प्रदत्तं गद्यांशं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

## हिमालयः

हिमालयो विश्वस्य सर्वोन्नतं गिरिशिखरं वर्तते । नेपालस्योत्तरस्यां दिशि चिरकालतो विराजमानो हिमालयो गिरिराजनाम्ना विख्यातोऽस्ति । गिरिरयमस्माकं देशस्य सीमानं रक्षति, नैकविधाभ्यः प्राकृतविपद्भ्यो नस्त्रायते च । जलवाय्योरनुकूलने हिमालयस्य महद्योगदानमस्तीति विज्ञानविशारदानां सम्मतिर्विद्यते । अत्रैव महौषधानामक्षयराशिरस्ति । काव्यप्रभृतिषु वाङ्मयेषु हिमालयस्य महिम्नः प्रभूतं वर्णनं लभ्यते । नगाधिराजोऽसौ पौराणिकं सांस्कृतिकञ्च महत्त्वं बिभर्ति । इयं गिरीशगिरिजयोर्निवासस्य लीलाविलासस्य च भूर्वर्तते । निखिलकल्मषापहारिणी गङ्गा हिमालयादेव प्रभवति । तत्त्वदर्शिनां महामनीषिणामृषिमहर्षीणां तपःस्थल्यपि एषा एव भूमिः । धनपतेः कुबेरस्य राजधानी एतस्यां पावनभूमावस्तीति जना विश्वसन्ति । हिमालयः सौन्दर्यसञ्चयस्य सार इव प्रतिभाति । अयं मानुषमानसं सततं समाकर्षति । हिमालयः पर्यटनोद्योगस्य सबलाधारो विद्यते ।

सगरमाथा-गौरीशङ्कर-कुम्भकर्ण-काञ्चनजङ्घान्नपूर्ण-मत्स्यपुच्छ-ल्होत्से-चोयु-सैपालप्रभृतीनि बहूनि शिखराणि नेपालस्य सम्पदः सन्ति । इमानि शिखराणि नेपालस्य विपुलधनार्जनस्याखण्डस्रोतांसि वर्तन्ते । हिमालयाधृतेन पर्यटनोद्योगेन राष्ट्रस्यार्थतन्त्रं सुदृढायते । विपुलहिमसम्पदः कारणेनैव देशोऽयं जलसम्पदापि धनी वर्तते । कृषेरुर्जसश्च विकासाय हिमालयतोऽनवरततया प्रवहन्तीनां नदीनां महत्त्वं वर्णनातीतं वर्तते । हिमालयाल्लाभाप्तये एतस्य प्राकृतस्वरूपस्य संरक्षणमावश्यकं भवति । तत्रावकरजातं प्रदूषणमपि निराकर्तव्यम् । ततोऽस्माकं प्राचीनगौरवं चिराय सुरक्षितं भविष्यति ।

## प्रश्नाः

**(अ) एकवाक्येनोत्तरयत**

(क) विश्वस्योन्नततमं शिखरं किम् ?

(ख) गङ्गा किमपहरति ?

(ग) गिरीशगिरिजे कयोर्नामनी वर्तेते ?

(घ) गिरिराजो नेपालस्य कस्यां दिशि विराजते ?

(ङ) विश्वस्योन्नततमशिखरेषु कञ्चनजङ्घायाः स्थानं कतमम् ?

**(आ) सङ्क्षेपेण प्रश्नानामुत्तरं दत्त**

(क) हिमालयस्य महिमानं पञ्चसु वाक्येषु वर्णयत ।

(ख) अनुच्छेदात् पञ्चविशेषणपदानि तद्विशेष्यपदैः सह मेलयत ।

(ग) राष्ट्रस्यार्थतन्त्रस्य सम्बलनाय हिमशिखराणां योगदानं सूत्ररूपेण लिखत ।

(घ) नदीनां महत्त्वं प्रदर्श्य अनुच्छेदमेकं रचयत ।

(ङ) नेपालस्य भौगोलिकस्य राजनीतिकस्य च मानचित्रस्य सहयोगेन प्रमुखहिमशिखराणि तत्स्थितजनपदाँश्चान्विष्य तालिकायां प्रदर्शयत ।

## लेखनम्

**१. अधस्तनपदानां विग्रहवाक्यं पाठाधारेण लिखत**

(क) हिमवत्प्रदेशे

(ख) योगाग्निभस्मीकृतकल्मषारिः

(ग) खप्तडस्वामिपदाख्यसिद्धः

(घ) सच्चिदानन्दः

(ङ) नानाकलाज्ञानविधिप्रवीणाः

(च) हिमभूधराङ्के

(छ) मञ्जुलमन्दिराणि

(ज) अनन्तवैशिष्ट्यसमन्वितानि

(झ) विद्यातपोज्ञानगुणैः

(ञ) विद्यालयमन्दिराणि

२. **सन्धिविच्छेदं कुरुत**

(क) नराश्च (ख) कतीह (ग) परमादृताः (घ) मनो हरन्त्यत्र (ङ) समदर्शयच्च

३. **अधस्तनपद्यस्यान्वयं प्रदर्शयत**

पन्तोपनामा सुकृतिः कृतज्ञः श्रीसोमनाथः कुलचन्द्र एतौ ।
नैपालकाः संस्कृतकाव्यकारा वैचित्र्यपूर्णा रचना विदध्युः ॥

४. **गुरोः सहपाठिनां कोशस्य वा साहाय्येन प्रदत्तेषु प्रतिपदं द्वौ पर्यायौ निर्दिशत**

(क) मनः (ख) विद्या (ग) आलयः (घ) कल्मषम् (ङ) प्रवीणः

५. **अधस्तनपद्यस्य भावार्थं प्रकाशयत**

नराश्च नार्यश्च कतीह जाता नानाकलाज्ञानविधिप्रवीणाः ।
त्यागेन शौर्येण सुविद्यया च सदानुकार्याः परमादृताश्च ॥

६. **प्रदत्तगद्यांशतो दश बोधप्रश्नान् निर्माय तेषामुत्तराणि लिखत**

व्यक्तिं स्थानं वा परितो दक्षिणभागेन परिभ्रमणं परिक्रमा निगद्यते । पिप्पलवृक्षस्य मन्दिरस्य स्तूपस्य विहारस्य कूटस्यान्येषां पवित्रधार्मिकस्थानानां वा परिभ्रमणमपि परिक्रमा भवति । परिक्रमा षोडशोपचारस्याङ्गं मन्यते । गणेशस्य पार्वतीपरमेश्वरयोः परिक्रमा प्रसिद्धा वर्तते । कैलाशपर्वत-मानसरोवर-पाशुपतक्षेत्र-गोसाइँकुण्ड-लुम्बिनी-बौद्धनाथ-स्वयम्भूनाथप्रभृतितीर्थस्थलानाञ्च परिक्रमा विधीयते । गोवर्धनपर्वतस्य चित्रकूटस्य कामदगिरेः व्रजमण्डलस्य नर्मदानद्या अमरकण्टकादासमुद्रं प्रसृतस्य च परिक्रमणस्य महत्त्वं वर्णितमस्ति । एतेषु मिथिलाक्षेत्रस्य परिक्रमा सर्वाधिकप्रसिद्धा वर्तते । इयं मिथिलापरिक्रमा इति नाम्ना परिचितास्ति । नेपालस्य जनकपुरं नैकविधं धार्मिकं पौराणिकं सांस्कृतिकञ्च महत्त्वं बिभर्ति । नगरमेतत् सीताया जन्मभूरपि वर्तते । अस्यामेव नगर्यां पार्श्ववर्तिक्षेत्रेषु च यात्रेयं लोकप्रिया वर्तते । विश्वस्यैव दीर्घतमा धार्मिकपदयात्रेयं पञ्चदशदिनानि यावच्चलति । यात्रायां नेपालस्य सप्तोत्तरशतम्, भारतस्य षड्विंशतिश्चेति कृत्वा त्रयस्त्रिंशदुत्तरशतकिलोमिटरमिता पदयात्रा प्रपूर्यते । शिवरात्रेरनुपदमेव मिथिलाया राजधान्या जनकपुरधाम्नोऽग्निकुण्डात्कचरीमठाच्च सविधि परिक्रमा प्रारभते । यात्रायां भारतस्यायोध्या-मथुरा-हरिद्वार-दरभङ्गा-सीतामढी-वैजनाथधामादिस्थानानां साधवः सम्मिलन्ति । धार्मिकप्रदर्शन-भजन-कीर्तनैर्यात्रा विधीयते । एषा यात्रा मटिहानी-जलेश्वर-मडै-ध्रुवकुण्ड-कञ्चनवन-धनुषाधामौरहि-विशौलस्थानानि परिक्रम्य फाल्गुनपूर्णिमाया दिवसे जनकपुरं प्रत्यावर्तते । तस्मिन् दिने प्रत्यूष एव जनकपुरस्य पञ्चक्रोशीं परिक्रम्य यात्रा पूर्णतामेति । यात्रायां जना विविधोपायैर्यात्रिणः सेवन्ते । इयं परिक्रमा न केवलं धार्मिकविश्वासमभिव्यनक्ति परं नेपालभारतयोर्मध्ये विद्यमानं सौहार्दपूर्णसम्बन्धञ्च द्रढयति ।

७. **सान्वयं व्याख्यात**

यो ब्रह्मचारीति षडाननाख्यो विद्यातपोज्ञानगुणैर्वरिष्ठः ।
संस्थाप्य विद्यालयमन्दिराणि सिद्धेः प्रभावं समदर्शयच्च ॥

८. **अधस्तनपद्यस्य सप्रसङ्गं व्याख्यां कुरुत**

स्थले स्थले मञ्जुलमन्दिराणि पदे पदे प्राकृतवैभवानि ।
अनन्तवैशिष्ट्यसमन्वितानि मनो हरन्त्यत्र दृशि स्थितानि ॥

९. **अधो लिखितपद्यस्य वृत्तनिर्देशनं कुरुत**

क्षेत्रं शुभं पाशुपतं वरेण्यं श्रीमुक्तिनाथो जगतां शरण्यः ।
शुद्धिप्रदा चक्रनदी च यत्र नेपालदेशोऽयमहो विचित्रः ॥

## अनुप्रयुक्तव्याकरणम्

**आशीर्वादार्थप्रयोगः**

१. **अधस्तनपद्यद्वयं पठित्वा यथानिर्देशं कुरुत**

लक्ष्मीस्ते पङ्कजाक्षी निवसतु भवने भारती कण्ठदेशे
वर्धन्तां बन्धुवर्गाः सकलरिपुगणा यान्तु पातालमूलम् ।
देशे देशे सुकीर्तिः प्रसरतु भवतां कुन्दपुष्पेन्दुशुभ्रा
जीव त्वं पुत्रपौत्रस्वजनपरिवृतो हायनानां शतञ्च ॥
दुर्जनः सज्जनो भूयात् सज्जनः शान्तिमाप्नुयात् ।
शान्तो मुच्येत बन्धेभ्यो मुक्तश्चान्यान् विमोचयेत् ॥

**(अ) प्रथमपद्यतोऽधस्तनकार्यकलापं कुरुत**

(क) उदाहरणमनुसृत्य प्रथमश्लोकाद् वाक्यानि लिखत ।

यथा - भवतां भवने पङ्कजाक्षी लक्ष्मीर्निवसतु ।
भवतां कण्ठदेशे भारती निवसतु ।
त्वं पुत्रपौत्रस्वजनपरिवृतो हायनानां शतञ्जीव ।

(ख) 'वर्धन्ताम्', 'जीव' इत्येतयोः क्रियापदयोर्धातु-लकार-पद-पुरुष-वचनानि निर्दिशत ।

(ग) 'प्रसरतु', 'निवसतु' इत्येतयोः कावुपसर्गौ कौ च धातू ?

(घ) 'यान्तु' इत्यस्य वचननिर्देशं कुरुत ।

(ङ) श्लोकस्थानां क्रियापदानां पुरुष-वचनान्तरं कृत्वा वाक्येषु योजयत ।

(च) या-धातोर्लोटि रूपाणि लिखत ।

(छ) श्लोके प्रयुक्तमात्मनेपदस्य क्रियापदं परिचित्य वचनपरिवर्तनं कुरुत ।

**(आ) द्वितीयं पद्यमवलम्ब्य निर्दिष्टकार्याणि कुरुत**

(क) श्लोकस्थानि आशीर्वादात्मकानि वाक्यानि लिखत ।

(ख) भूयात्, आप्नुयात् अनयोः क्रियापदयोर्लकारं निर्दिशत ।

(ग) श्लोकस्थक्रियापदानां धातु-लकार-पद-पुरुष-वचनानि निदर्शयत ।

(घ) आप्नुयात् इत्यस्य स्वशब्दैर्वाक्ये प्रयोगं कुरुत ।

उपर्युक्तयोः पद्ययोराशीर्वचनात्मकानां वाक्यानां प्रयोगो विद्यते । अप्राप्तस्य प्राप्तेरिच्छा आशीर्वादो निगद्यते । लोट्लकारस्य प्रयोग आशीर्वादेऽर्थे विध्यादिष्वर्थेषु च भवति । आशीर्वादेऽर्थे लोट्-लकारस्य आशीर्लिङ्लकारस्य च प्रयोगो विधीयते ("आशिषि लिङ्लोटौ" इति पाणिनिसूत्रम्) । अत आशीषि आशीर्लोडाशीर्लिङोर्मध्ये यस्य कस्यापि प्रयोगः प्रयोक्तुर्विवक्षाधीनो भवति ।

**२. उदाहरणमनुसृत्य आशीर्लिङि वाक्यान्तरणं कुरुत**

यथा - भवतां भवने पङ्कजाक्षी लक्ष्मीर्निवसतु ।

भवतां भवने पङ्कजाक्षी लक्ष्मीर्न्युष्यात् ।

(क) तव कण्ठदेशे भारती निवसतु ।

(ख) त्वं शतवर्षाणि यावज्जीव ।

(ग) आयुष्मान् भव ।

(घ) जनाः सत्कर्म कुर्वन्तु ।

(ङ) तव ज्ञान-धन-सुकीर्तयो वर्धन्ताम् ।

(च) नैपालकाः संस्कृतकाव्यकारा वैचित्र्यपूर्णा रचना विदधतु ॥

(छ) यूयं साफल्यं लभध्वम् ।

**३. अधस्तनवाक्यान्याशिष्यर्थे लोट्-लकारे परिवर्तयत**

यथा - दुर्जनः सज्जनो भूयात् ।

दुर्जनः सज्जनो भवतु/भवतात् ।

(क) सज्जनाः शान्तिमाप्यासुः ।

(ख) त्वं परीक्षायां साफल्यं लप्सीष्ठाः ।

(ग) तव आयुर्वर्धिषीष्ट ।

(घ) काले जलं वृष्यात् ।

(ङ) भगवान् तुभ्यं सन्मतिं देयात् ।

**४. 'डुकृञ् करणे' इति धातोरुभयोरेव पदयोर्लोट्याशीर्लिङि च रूपाणि लिखत ।**

**५. उदाहरणमनुसृत्य अधस्तनवाक्यानि आशिषि परिवर्तयत**

यथा - सर्वं मङ्गलं भवति ।

सर्वं मङ्गलं भवतु/भवतात् ।

सर्वं मङ्गलं भूयात् ।

(क) असत्यं कदापि न जयति ।

(ख) स्वदेशः सर्वथा विजयते ।

(ग) सर्वे रोगा यथासमयं विनश्यन्ति ।

(घ) दुष्टाः शत्रवः पातालमूलं यास्यन्ति ।

(ङ) यूयं सकलबन्धेभ्यो मोक्ष्यथ ।

**६. पञ्चसु वाक्येषु अनुजायै आशीर्वचनानि प्रयच्छत ।**

## कारकप्रयोगः

**७. वाक्यानि पठित्वा निर्दिष्टकार्यकलापान् कुरुत**

- माता कथामकथयत् ।
- गुरुश्छात्रं प्रश्नं पृच्छति ।
- भक्तैस्त्रिदेवाः सेव्यन्ते ।
- मया तण्डुला ओदनं पच्यन्ते ।
- भगिनी देवं पूजयितुं मन्दिरं गच्छति ।
- अनुजो गृहकार्यं समाप्य चलचित्रं पश्यति ।
- वयं श्व आपणं गत्वा वस्त्राणि क्रेतास्मः ।
- मम भ्राता वेदमधीतवान् ।
- वरदराजेन मध्यसिद्धान्तकौमुदी कृता ।

- शङ्करो हिमालयमधितिष्ठति ।

- शिक्षकं परितो विद्यार्थिन उपविशन्तः सन्ति ।

- अहं मातरं पितरमन्तरा सुरक्षितो नानुभवामि ।

**(क) उपरितनवाक्यानां वाच्यपरिवर्तनं कुरुत ।**

**(ख) कर्मपदेषु एकैकं विशेषणपदं योजयित्वा प्रदत्तवाक्यानामनुलेखनं कुरुत ।**

**(ग) प्रदत्तपदान्याधृत्य कर्मकारकस्य द्वितीयाविभक्तेर्वा प्रयोगं वाक्येषु दर्शयत**

अपठन्, भज्यते, अवचिनोति, दुह्यते, खादितुम्, आनीय, श्रुत्वा, दृष्टा, पठितौ, भक्षितानि, लिखितवन्तः, कृतवती, अभितः, समया, निकषा, हा, प्रति, अन्तरेण, उभयतः, सर्वतः, धिक्, अधिशेते, अध्यास्ते, उपवसति, अधिवसति, आवसति, पाठयति ।

**८. वाक्यानि पठित्वा अधस्तनप्रश्नानुत्तरयत**

- कृषकः हलेन क्षेत्रं कर्षति ।
- बालको मधुरया गिरा वदति ।
- क्रीडकाः कन्दुकेन क्रीडन्ति ।
- षडाननो विद्यातपोज्ञानगुणैर्वरिष्ठ आसीत् ।
- ज्ञानिनस्त्यागेन सुविद्यया चानुकरणीया अभवन् ।
- परिपिधानावधौ जनाः पादाभ्यामेव कार्यालयं गच्छन्ति स्म ।
- स वर्णेन कृष्णोऽस्ति ।
- कृष्णेन चक्रेण शिशुपालो हतः ।
- नायको नायिकया सह नृत्यति ।
- विद्यया विना जनः सतोरक्षिणोरपि दृष्टिहीनो भवति ।
- सती पत्या साकं निवसति ।
- पादेन खञ्जस्सन्नपि स स्वावलम्बी वर्तते ।
- विद्वान् श्रिया हीनोऽपि प्रकाशते ।

**(क) उपर्युक्तेषु वाक्येषु करणपदानि उपपदत्वेन तृतीयान्तपदानि च परिचित्य लिखत ।**

**(ख) करणभिन्नानि तृतीयान्तपदानि कुत्र केषां योगे कस्मिन्नर्थे वा प्रयुक्तानि सन्ति ?**

**(ग) अनभिहिते कर्तरि तृतीयाया उदाहरणं दर्शयत ।**

**(घ) उपरितनवाक्येषु सकर्मकक्रियापदानि तेषां कर्माणि चान्विषत ।**

(ङ) **प्रदत्तवाक्यानि बहुवचने परिवर्तयत ।**

(च) **प्रदत्तपदानां वाक्येषु योजनेन करणकारकस्योपपदतृतीयाविभक्तेर्वा प्रयोगं दर्शयत**

लेखन्या, हस्ताभ्याम्, जटाभिः, सह, सार्धम्, समम्, तुल्यम्, विना, ऋतः, काणः, गीयते, क्रीडति, बाणेन, पुण्येन, हीनः ।

९. **कोष्ठस्थप्रातिपदिकस्य समुचितविभक्त्यन्तरूपं संस्थाप्य रिक्तस्थानं पूरयत**

(क) धिक् ................. ! तस्य जीवितेन किम् ? (परपीडक)

(ख) अहं पितृचरणौ ................. नमामि । (शिरस्)

(ग) बालकाः ................. सह रज्ज्वा क्रीडन्ति । (सखि)

(घ) ................. अभितः सहपाठिनौ स्तः । (अस्मद्)

(ङ) खप्तडस्वामिना योगाग्निना ................. भस्मीकृतः । (कल्मषारि)

(च) व्यवसायी ................. विदेशं भ्रमति । (वायुयान)

(छ) हरिः ................. अधिवसति । (वैकुण्ठ)

(ज) बालिका ................. अधिशेते । (खट्वा)

(झ) कृषकः ................. पयो दोग्धि । (गो)

(ञ) आचार्यः ................. वेदमध्यापयति । (अधीतव्याकरण, शिष्य)

१०. **पाठस्थपद्येषु प्रयुक्तानि कर्मपदानि करणपदानि च सङ्कलय्य प्रतिपदमेकैकं वाक्यं रचयत ।**

११. **एकस्मिन्ननुच्छेदे पदान्याश्रित्य उपजीव्यमानयोर्द्वितीयातृतीयाविभक्त्योः प्रयोगं दर्शयत ।**

-o-

## द्वितीयः पाठः

# सुभाषितसप्तकम्



१. चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः ।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसङ्गतिः ॥

२. सर्पाणाञ्च खलानाञ्च परद्रव्याऽपहारिणाम् ।
अभिप्राया न सिद्ध्यन्ति तेनेदं वर्तते जगत् ॥

३. स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ॥

४. न लोके राजते मूर्खः केवलात्मप्रशंसया ।
अपि चेह श्रिया हीनः कृतविद्यः प्रकाशते ॥

५. असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति ॥

६. यः प्रीणयेत् सुचरितैः पितरं स पुत्रो यद् भर्तुरिव हितमिच्छति तत् कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यदेतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

७. निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥

## व्याख्या

(१.) अन्वयः

लोके चन्दनम् शीतलम् चन्दनात् अपि चन्द्रमाः चन्द्रचन्दनयोः मध्ये साधुसङ्गतिः शीतला ।

### विग्रह-पर्याय-पदार्थाः

**लोके** = भुवने, **चन्दनम्** = मलयजः, **शीतलम्** = शैत्यकारकम्, **चन्दनात्** = मलयजात्, **अपि** = च, **चन्द्रमाः** = इन्दुः, इतोऽपि शीतल इत्यर्थः, **चन्द्रचन्दनयोः** = चन्द्रश्च चन्दनञ्च चन्द्रचन्दने तयोः हिमांशुमलयजयोः, **मध्ये** = अन्तराले, **साधुसङ्गतिः** = साधूनां सङ्गतिः = सज्जनसङ्गः, शीतला = शैत्यदा (आनन्ददा भवतीत्यर्थः) ।

### कोशः

**चन्दनम्** - गन्धसारो मलयजो भद्रश्रीश्**चन्दनो**ऽस्त्रियाम् ।

**शीतलम्** - तुषारः **शीतलः** शीतो हिमः ।

**चन्द्रमाः** - हिमांशुश्**चन्द्रमा**श्चन्द्र इन्दुः कुमुदबान्धवः ।

**साधुः** - महाकुलकुलीनार्यसभ्यसज्जन**साधवः** । इत्यमरः ।

### सरलार्थः

लोके चन्दनं शीतलं भवतीति प्रसिद्धम् । चन्दनादपि चन्द्रमाः शीतलतर इत्यपि प्रसिद्धिरेव परं चन्दनाच्चन्द्रमसश्च शीतलस्तु साधुभिस्सह सङ्गमो भवति । सर्वेषु शीतलकारकेषु साधुसङ्गमः शीतलतम इति भावः ।

(२.) अन्वयः

सर्पाणाम् खलानाम् च परद्रव्यापहारिणाम् च अभिप्रायाः न सिद्ध्यन्ति तेन इदम् जगत् वर्तते ।

**विग्रह-पर्याय-पदार्थाः**

**सर्पाणाम्** = भुजङ्गानाम्, **खलानाम्** = दुष्टानाम्, **च** = अपि, **परद्रव्यापहारिणाम्** - परेषां द्रव्यं परद्रव्यम्, तस्यापहारिणः परद्रव्यापहारिणः, तेषाम् = अन्यधनावलुण्ठकानाम्, **च** = अपि, अभिप्रायाः = उद्देश्यानि, **न सिद्ध्यन्ति** = पूर्णतां नाप्नुवन्ति, **तेन** = असिद्धतया, अभिप्रायाणामपूर्णत्वेनेत्यर्थः, **इदम्** = एतत्, **जगत्** = भुवनम्, **वर्तते** = अस्ति, सुरक्षितं सञ्चलितञ्चास्ते इति भावः ।

**कोशः**

**सर्पः - सर्पः** पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः ।

**खलः** - कर्णेजपः सूचकः स्यात् पिशुनो दुर्जनः **खलः** ।

**अभिप्रायः - अभिप्राय**श्छन्द आशयः ।

**जगत् -** त्रिष्वथो जगती लोको विष्टपं भुवनं **जगत्** । इत्यमरः ।

**सरलार्थः**

सर्पाणां खलानामन्येषां धनहरणपरायणानाञ्च प्रयोजनं सर्वत्र सदैव पूर्णं न भवति । तेनैव कारणेन जगदिदं सञ्चलदस्ति सुरक्षितञ्च वर्तते ।

(३.) **अन्वयः**

स्वभावः उपदेशेन अन्यथा कर्तुम् न शक्यते सुतप्तम् अपि पानीयम् पुनः शीतताम् गच्छति ।

**विग्रह-पर्याय-पदार्थाः**

**स्वभावः** = सहजगुणः, **उपदेशेन** = सद्वचनेन, **अन्यथा** = अन्यरूपः, **कर्तुम्** = विधातुम्, **न शक्यते** = न पार्यते, यतो हि, **सुतप्तम्** = सन्तप्तम्, **अपि** = च, **पानीयम्** = जलम्, **पुनः** = भूयः, **शीतताम्** = शैत्यम्, **गच्छति** = प्रयाति, पुनः शीतलं भवतीति भावः ।

**कोशः**

**स्वभावः** - स्वरूपं च **स्वभाव**श्च निसर्गश्चाथ वेपथुः ।

**पानीयम् -** अम्भोऽर्णस्तोय**पानीय**नीरक्षीराम्बुशम्बरम् । इत्यमरः ।

**सरलार्थः**

सुतप्तमपि जलं कतिचित्कालानन्तरं पुनः शीतलं भवति । अनयैव रीत्या उपदेशेन कस्यापि जनस्य स्वभावः परिवर्तयितुं न शक्यते । जलस्य जनस्य च प्रकृतिरपरिवर्तनीया भवति यां परिवर्तयितुं न कोऽपि प्रभवतीत्यभिप्रायः ।

**(४.) अन्वयः**

लोके, केवलात्मप्रशंसया, मूर्खः, न राजते, अपि, च, इह, श्रिया हीनः, कृतविद्यः, प्रकाशते ।

**विग्रह-पर्याय-पदार्थाः**

**लोके** = भुवने, **केवलात्मप्रशंसया-** केवलमात्मन एव प्रशंसा केवलात्मप्रशंसा **तया** = स्वगुणकीर्तनमात्रेण, **मूर्खः** = मूढः, **न राजते** = न शोभते, **अपि** = च, इह = लोके, **श्रिया हीनः** = धनेन रहितः, **कृतविद्यः** - कृता विद्या येन सः = विद्वान्, **प्रकाशते** = चकास्ति ।

**कोशः**

**मूर्खः -** अज्ञे मूढयथाजात**मूर्ख**वैधेयबालिशाः । इत्यमरः ।

**सरलार्थः**

लोके केवलमात्मप्रशंसया मूर्खः शोभां न प्राप्नोति । तद्वैपरीत्यं धनेन हीनोऽपि विद्वज्जनोऽत्र सुशोभते ।

**(५.) अन्वयः**

हेममृगस्य जन्म असम्भवं तथापि रामः मृगाय लुलुभे प्रायः समापन्नविपत्तिकाले पुंसाम् धियः अपि मलिनाः भवन्ति ।

**विग्रह-पर्याय-पदार्थाः**

**हेममृगस्य** - हेम्नो मृगो हेममृगः, **तस्य** = सुवर्णकुरङ्गस्य, **जन्म** = जननम्, असम्भवम् - न सम्भवम्, **तथापि** = तदपि, **रामः** = दशरथसूनुः, **मृगाय** = कुरङ्गाय, **लुलुभे** = लुलोभ, **प्रायः** = बहुशः, समापन्नविपत्तिकाले - सम्यगापन्नः समापन्नः, विपत्तेः कालो विपत्तिकालः, समापन्नो विपत्तिकालः समापन्नविपत्तिकालः, **तस्मिन्** = निकटापत्समये, **पुंसाम्** = जनानाम्, **धियः** = बुद्धयः, **अपि** = च, **मलिनाः** = अस्वच्छाः/मन्दाः, **भवन्ति** = जायन्ते ।

**कोशः**

**हेम -** स्वर्णं सुवर्णं कनकं हिरण्यं **हेम** हाटकम् ।

**मृगः - मृगे** कुरङ्गवातायुहरिणाजिनयोनयः ।

**जन्म -** जनुर्जनन**जन्मानि** जनिरुत्पत्तिरुद्भवः ।

**विपत्तिः - विपत्त्यां** विपदापदौ ।

**धीः -** बुद्धिर्मनीषा धिषणा **धीः** प्रज्ञा शेमुषी मतिः ।

**पुंस् -** स्युः **पुमांसः** पञ्चजनाः पुरुषाः पूरुषा नरः । इत्यमरः ।

**सरलार्थः**

स्वर्णमृगस्य जन्म असम्भवं सदपि सीतापती रामो लोभवशान्मृगमन्वधावत् । अनेन ज्ञायते आसन्नविपत्तिसमये प्रायो जनानां बुद्धिर्मन्दतामेति ।

(६.) **अन्वयः**

यः सुचरितैः पितरं प्रीणयेत् स पुत्रः यत् भर्तुः एव हितम् इच्छति तत् कलत्रं यत् आपदि सुखे च समक्रियं तत् मित्रम् एतत्त्रयं जगति पुण्यकृतः लभन्ते ।

**विग्रह-पर्याय-पदार्थाः**

**यः** = वक्ष्यमाणः, **सुचरितैः** - सुष्ठु चरितं सुचरितम्, **तैः** = सदाचरणैः, **पितरम्** = जनकम्, **प्रीणयेत्** = प्रसादयेत्, **सः** = मनुष्यः, **पुत्रः** = सूनुः, **यत्** = वक्ष्यमाणम्, **भर्तुः** = पत्युः, **एव** = केवलम्, **हितम्** = कल्याणम्, **इच्छति** = अभिलषति, **तत्** = तादृशम्, **कलत्रम्** = पत्नी, **यत्** = वक्ष्यमाणम्, **आपदि** = विपत्तौ, **सुखे** = सम्पत्तौ, **च** = अपि, समक्रियम् - समाना क्रिया यस्य **तत्** = एकव्यवहारि, **तत्** = तथाविधम्, **मित्रम्** = सुहृच्चेति, **त्रयम्** = पुत्र-पत्नी-मित्रवृन्दम्, **जगति** = भुवि, पुण्यकृतः - पुण्यं **कुर्वन्तीति** = शुभकर्मिणः, **लभन्ते** = प्राप्नुवन्ति ।

**कोशः**

**पिता** - मातापितरौ **पितरौ** मातरपितरौ प्रसूजनयितारौ ।

**पुत्रः** - आत्मजस्तनयः सूनुः सुतः **पुत्रः** स्त्रियां त्वमी ।

**भर्ता** - धवः प्रियः पति**र्भर्ता** ।

**कलत्रम् - कलत्रं** श्रोणिभार्ययोः ।

**मित्रम्** - स्निग्धो वयस्यः सवया अथ **मित्रं** सखा सुहृत् ।

**सुखम्** - स्यादानन्दथुरानन्दः शर्मसात**सुखानि** च । इत्यमरः ।

**सरलार्थः**

यः सच्चरित्रेण पितरं प्रसादयति स पुत्रो भवति । या पत्युरेव कल्याणं कामयते सा पत्नी भवति । सम्पत्तौ विपत्तौ च यः समानमाचरति स सखा भवति । एतादृशं जनत्रयं भुवने पुण्यशालिन एवाप्नुवन्ति, नेतरे इति भावः ।

(७.) **अन्वयः**

नीतिनिपुणाः निन्दन्तु यदि वा स्तुवन्तु लक्ष्मीः समाविशतु वा यथेष्टं गच्छतु अद्य एव वा मरणम् अस्तु वा युगान्तरे धीराः न्याय्यात् पथः पदं न प्रविचलन्ति ।

**विग्रह-पर्याय-पदार्थाः**

**नीतिनिपुणाः** - नीतौ निपुणाः = नयविचक्षणाः, **निन्दन्तु** = दूषयन्तु, **यदि वा** = अथवा, **स्तुवन्तु** = प्रशंसन्तु, **लक्ष्मीः** = श्रीः, **समाविशतु** = समायातु, **वा** = अथवा, **यथेष्टम्** - इष्टमनतिक्रम्य **गच्छतु** = निर्यातु, **अद्य एव** = एतस्मिन् दिवसे एव, **वा** = अथवा, **मरणम्** = निधनम्, **अस्तु** = भवतु, अथवा युगान्तरे - अन्यद्युगं युगान्तरम्, **तस्मिन्** = कल्पान्तरे, अस्तु इति शेषः, **धीराः** = धैर्यशालिनः, महापुरुषा इत्यर्थः, **न्याय्यात्**= नयसिद्धान्तात्, **पथः** = मार्गात्, **पदम्** = चरणम्, अपीत्यर्थः, **न प्रविचलन्ति** = न भ्रश्यन्ति ।

## कोशः

**निपुणः - प्रवीणे निपुणा**भिज्ञविज्ञनिष्णातशिक्षिताः ।

**लक्ष्मीः - लक्ष्मीः** पद्मालया पद्मा कमला श्रीर्हरिप्रिया ।

**मरणम् -** अन्तो नाशो द्वयोर्मृत्यु**र्मरणं** निधनोऽस्त्रियाम् ।

**न्याय्यम् - न्याय्यं** च त्रिषु ।

**पथः -** अयनं वर्त्ममार्गाध्व**पन्थानः** पदवी सृतिः ।

**पदम् -** पादाग्रं प्रपदं पादः **पद**ङ्घ्रिश्चरणोऽस्त्रियाम् ।

**धीरः - धीरो** मनीषी ज्ञः प्राज्ञः सङ्ख्यावान्पण्डितः कविः । इत्यमरः ।

**सरलार्थः**

मनस्विपुरुषाः परकृतां निन्दां स्तुतिं वा न गणयन्ति । लक्ष्मीरपि आयातु वा निर्यातु न चिन्तयन्ति । मृत्युरद्यैव कल्पान्तरे वा कदा भवतीत्यपि न विचारयन्ति परन्तु न्यायमार्गं कदापि न परित्यजन्ति । ते सर्वं परित्यज्य केवलं न्यायमार्गमवलम्बन्ते ।

## पद्यानुशीलनम्

अस्मिन् पाठे प्रथम-द्वितीय-तृतीय-चतुर्थपद्यानि अनुष्टुब्वृत्ते वर्तन्ते ।

तल्लक्षणं यथा-

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥

पञ्चमे पद्ये उपजातिवृत्तस्य प्रयोगोऽस्ति । षष्ठ-सप्तमपद्ययोर्वसन्ततिलकावृत्तं विद्यते ।

वसन्ततिलकाया लक्षणं यथा- ज्ञेया वसन्ततिलका तभजा जगौ गः ।

## अभ्यासः

### श्रवणं भाषणञ्च

**१. शिक्षकस्य साहाय्येन पद्यस्यानुवाचनं कुरुत**

असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति ॥

**२. अधस्तनपदानां शुद्धोच्चारणं विधाय लघु-गुरुनिर्धारणं कुरुत**

(क) चन्द्रचन्दनयोः (ख) साधुसङ्गमः (ग) परद्रव्यापहारिणाम्
(घ) कर्तुमन्यथा (ङ) पुनर्गच्छति (च) स्तुवन्तु
(छ) धियोऽपि (ज) प्रीणयेत् (झ) न्याय्यात्पथः
(ञ) सुचरितैः

**३. अधस्तनपद्यं यति-गति-लयानुकूल्येन वाचयत**

न लोके राजते मूर्खः केवलात्मप्रशंसया ।
अपि चेह श्रिया हीनः कृतविद्यः प्रकाशते ॥

**४. पाठस्य द्वितीयस्य पद्यस्य मूलसन्देशं कक्षायां श्रावयत ।**

**५. पाठस्थश्लोकानां वैयक्तिकं सामूहिकञ्च वाचनं कुरुत ।**

**६. प्रतिपदमेकैकं पर्यायं कथयत**

(क) चन्दनम् (ख) खलः (ग) जगत् (घ) सिद्ध्यन्ति (ङ) हेम

**७. पुस्तकमवलम्ब्य पञ्चमस्य श्लोकस्य अन्वयं सस्वरं वाचयत ।**

**८. श्रुतपूर्वं सुभाषितं कक्षायां संश्राव्य तस्य सन्देशं वर्णयत ।**

**९. पाठस्थपद्यानि कण्ठस्थानि कृत्वा श्रावयत ।**

**१०. अधस्तनगद्यांशं पठित्वा तदनुवर्तिनां प्रश्नानामुत्तराणि कथयत**

देउडा नृत्यगीतमस्ति । नेपालस्य सुदूरपश्चिमप्रदेशे कर्णालीप्रदेशे च इदं प्रसिद्धं वर्तते । नृत्यगीतमिदं प्रायो यात्रा-जन्म-मेल-विवाह-पर्वोत्सवादीनां प्रमोदावहेऽवसरे प्रस्तूयते । हर्षस्य मनोरञ्जनस्य च क्षणेऽपि देउडाप्रदर्शनं भवति । देउडापदस्यार्थो भवति- समर्पणम् । देउडानृत्यगीते देवेभ्यः जन्मभूम्यै समाजाय च समर्पणभावोऽभिव्यज्यते । अस्मिन् प्रीति-व्यथा-हास-शृङ्गार-सौन्दर्य-करुणा-वियोग-वैराग्यभावाश्चोल्लसन्ति । सम्प्रति विसङ्गतप्रसङ्गान् लक्ष्यीकृत्यापि एतन्नृत्यगीतं प्रस्तूयते । देउडा द्वितयं सामूहिकं वा नृत्यगीतमस्ति । एतस्मिन् पुरुषाणां नारीणाञ्च पृथक्पृथक् समूहो मिश्रितसमूहो वा नृत्यति गायति च । पूर्वं

वाद्योपकरणानि न प्रयुज्यन्ते स्म परमिदानीमेतेषां प्रयोगश्च दृश्यते । जना नृत्यगीतमेतत् कुत्रचिद् गोलाकारेण कुत्रचिच्चार्धगोलाकारेण हस्तौ निगृह्य पङ्क्तिबद्धतया पादशरीरयोः सन्तुलनं संस्थाप्य प्रस्तुवन्ति । पादद्वयमग्रे प्रचाल्यार्धपादं पश्चादपसार्य च नर्तका गायकाश्च कलाकौशलं दर्शयन्ति । गीतमिदं प्रश्नोत्तरात्मकसंरचनया गीयते । देउडानृत्यगीतं लोकगीतस्य लयप्रभेदोऽपि मन्यते । इदं स्वल्प-मध्यम-दीर्घलयेषु गातुं शक्यते इत्यतो लयगतं वैविध्यमस्य वैशिष्ट्यं भवति । प्रकृतिवर्णनमस्य गीतस्य भावसौन्दर्यं निकामं द्योतयति । स्थानीयभूगोल-रीति-संस्कृति-परम्पराणां सुखदुःखावस्थायाश्चाभिव्यञ्जनमेतस्मिन् नृत्यगीते बाहुल्येन भवति । देउडानृत्यगीतं देउडाक्रीडा न्याउलगीतञ्च कथ्यते । पर्वविशेषेषु राजधान्यामपि देउडानृत्यगीतं प्रस्तूयते । तत्र समाजस्य विविधक्षेत्राणां नरा नार्यश्च सम्मिलन्ति । राजनेतारोऽपि सम्मिल्यायोजकानामुत्साहवर्धनं कुर्वन्ति । कस्यापि भेदभावस्य लेशोऽपि नानुभूयते । नेपालिनां राष्ट्रियैकतायाः प्रवर्धने देउडानृत्यगीतं सबलभूमिकां निर्वहति ।

## प्रश्नाः

(क) किन्नाम देउडा ?

(ख) देउडा विशेषेण कुत्र कुत्र नृत्यते ?

(ग) देउडानृत्यगीतस्य प्रदर्शनं कदा भवति ?

(घ) देउडानृत्यगीते कीदृशा भावा उल्लसन्तो दृश्यन्ते ?

(ङ) संस्कृतिरियं विशेषेण कस्य क्षेत्रस्य परिचायिका मन्यते ?

(च) नृत्यमिदं कथं प्रस्तूयते ?

(छ) नृत्यगीतस्यास्य प्रस्तुतौ कीदृशं वैविध्यं दृश्यते ?

(ज) गीतमिदं कैर्नामभिः प्रसिद्धं वर्तते ?

(झ) अस्याः संस्कृतेर्वैशिष्ट्यं प्रकाशयत ।

(ञ) देउडानृत्यगीतस्य महत्त्वं त्रिषु वाक्येषु वर्णयत ।

(ट) स्थानीयभाषायां देउडापदस्य कोऽर्थः ? तच्च देउडाप्रस्तुतौ कथं परिलक्ष्यते ?

(ठ) देउडासंस्कृतेः संरक्षणाय प्रवर्धनाय च अस्माभिः किं करणीयम् ?

(ड) स्वसंस्कृतेः संरक्षणस्यात्यावश्यकत्वमवलम्ब्य स्वल्पां वक्तृतां प्रस्तुत ।

## पठनम्

१. **यतिं निर्धार्य अधस्तनं पद्यं प्रवाचयत**

न लोके राजते मूर्खः केवलात्मप्रशंसया ।
अपि चेह श्रिया हीनः कृतविद्यः प्रकाशते ॥

२. **यथालयं पद्यं वाचयित्वा कुत्र कुत्र यतिर्जायत इति चिह्नीकुरुत**

यः प्रीणयेत् सुचरितैः पितरं स पुत्रो यद् भर्तुरिव हितमिच्छति तत् कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यदेतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

३. **प्रदत्तस्य पद्यस्य मौनपठनं विधाय पदच्छेदं कुरुत**

स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ॥

४. **पद्यं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

सर्पाणाञ्च खलानाञ्च परद्रव्यापहारिणाम् ।
अभिप्राया न सिद्ध्यन्ति तेनेदं वर्तते जगत् ॥

(क) 'अपहारिणाम्' इति पदस्य प्रातिपदिकविभक्ती निर्दिशत ।

(ख) 'तेनेदम्' इति पदस्य सन्धिं विच्छेदयत ।

(ग) 'जगत्' इत्यस्य विशेषणपदं किम् ?

(घ) श्लोकेऽस्मिन् कति अव्ययपदानि सन्ति ? कानि च तानि ?

(ङ) 'परद्रव्यापहारिणाम्' इति पदस्य विग्रहवाक्यं किम् ?

(च) 'अभिप्रायः' इत्यस्यार्थापनं विधत्त ।

(छ) 'सिद्ध्यन्ति' इति क्रियापदस्य धातु-लकार-पद-वचन-पुरुषान् निर्दिशत ।

(ज) 'सर्पाणाम्' इति पदस्य पर्यायं लिखत ।

(झ) 'खलः' इति पदस्य कोशनिर्देशं कुरुत ।

(ञ) केषां अभिप्रायाः सर्वदा न सिद्ध्यन्ति ?

(ट) जगदिदं केन सुरक्षितमस्ति ?

(ट) श्लोकेऽस्मिन् कस्य वृत्तस्य प्रयोगो विद्यते ? तल्लक्षणं किम् ?

(ठ) अस्य सुभाषितस्याशयं स्वशब्दैर्विलिखत ।

५. पाठं पठित्वा सन्धियुतानि समस्तानि च पदानि चिह्नीकुरुत ।

६. पाठस्य प्रथमं श्लोकं तदन्वयं सरलार्थञ्च पठित्वा सारवाक्यमन्विषत ।

७. अधस्तनं गद्यांशं पठित्वा तदनुवर्तिनां प्रश्नानामुत्तराणि दत्त ।

## सत्सङ्गतिः

सद्भिः सज्जनैर्वा समं सङ्गतिः सत्सङ्गतिरुच्यते । सज्जनाः साधवः सदाचारवन्तः पवित्रात्मानश्च भवन्ति । सज्जना गुणवन्तो भवन्ति, ये मनोवाक्कायकर्मभिः परोपकारं कुर्वन्ति । साधून् विचित्रा शक्तिरधितिष्ठति । साधवस्तादृशा जना ये पतनं विनाशं वा प्रयान्तं दुर्जनं सन्मार्गे प्रेरयन्ति । सङ्गतिर्दोषकारिणी गुणवर्धिनी वा भवति । दुःसङ्गतिर्दोषकारिणी सत्सङ्गतिर्गुणवर्धिनी भवति । सज्जनैस्सह उपविशन्त उत्तिष्ठन्तः प्रचलन्तो वदन्तः पिबन्तो दुर्जनाश्चात्मानं परिवर्त्य सज्जना जायन्ते । सत्सङ्गेन दोषिणो गुणवन्तो भवन्ति । उक्तञ्च - 'संसर्गजा दोषगुणा भवन्ति ।' बाल्यकाले संसर्गस्य प्रभावो नितरां बलवान् दृश्यते । बालका यादृशैः सखिभिस्सह सङ्गतिं कुर्वते, तादृशा एव भवन्ति । दुर्जनसंसर्गाद् बह्व्यो हानयो जायन्ते । दुर्जनसंसर्गस्य परिणामा दुर्विचारदुर्व्यसनासद्व्यवहारा भवन्ति । दुर्जनस्य कीर्तिर्विनश्यति, सर्वत्रानादरो वर्धते, कुलप्रतिष्ठायां कलङ्कोऽप्युद्भवति । ततस्तान् संरक्ष्य सत्सङ्गतौ प्रेरयितुं गुरुजनैर्मान्यवरैश्च सततं यतनीयम् । सत्सङ्गतेरुदाहरणं प्रकृतेरपि ज्ञातुं शक्यते । क्षुद्राः कीटा यदि पुष्पाणि समाश्रयन्ति तर्हि सतां शिरः समारोहन्ति । त एव यदा मलमाश्रयन्ते तदा तिरस्कारेण जुगुप्सया च विनाश्यन्ते दूरं प्रक्षिप्यन्ते वा । अत एव नीतिकारैरुपदिष्टम् - 'सद्भिरेव सहासीत, सद्भिः कुर्वीत सङ्गतिम्' इति । नीतिकथासु पौराणिकवृत्तेषु च सत्सङ्गत्या आत्मोन्नतिं कृतवन्ति बहूनि प्रेरकचरितानि प्राप्यन्ते । जन्मना न कोऽपि दुर्जनः सज्जनो वा जायते । तयोर्हेतुः संसर्ग एव भवति । अस्माभिर्दुःसङ्गतिं परित्यज्य सत्सङ्गतिरवलम्बनीया । सत्सङ्गतिः पुंसां सर्वाणि कर्माणि साधयति ।

### प्रश्नाः

**(अ) एकवाक्येनोत्तरं दत्त**

(क) सत्सङ्गतिः का ?

(ख) साधवः कीदृशा भवन्ति ?

(ग) अस्माभिः कैः सह सङ्गतिः कार्या ?

(घ) दोषगुणाः कस्माज्जायन्ते ?

(ङ) कीटाः कथं सतां शिर आरोहन्ति ?

**(आ) अधस्तनप्रश्नान् सङ्क्षेपेणोत्तरयत**

(क) साधूनां स्वभावं पञ्चभिर्वाक्यैः निदर्शयत ।

(ख) बालानां कृते सङ्गतेः कीदृशः प्रभावो जायते ?

(ग) दुःसङ्गतेर्हानीर्वर्णयत ।

(घ) दुर्जना अपि कथं सन्मार्गमनुसर्तुं प्रभवन्ति ?

(ङ) सत्सङ्गतेर्महत्त्वं वर्णयित्वा स्वशब्दैरनुच्छेदमेकं विलिखत ।

## लेखनम्

**१. सन्धिं विच्छेदयत**

(क) चन्दनादपि (ख) अद्यैव (ग) यथेष्टम् (घ) भर्तुरिव

(ङ) धियोऽपि (च) तथापि (छ) चेह (ज) पुनर्गच्छति

(झ) नोपदेशेन (ञ) सर्पाणाञ्च

**२. पाठाधारेण प्रदत्तसमस्तपदानां विग्रहवाक्यं प्रदर्शयत**

(क) चन्द्रचन्दनयोः (ख) परद्रव्यापहारिणाम् (ग) केवलात्मप्रशंसया

(घ) साधुसङ्गतिः (ङ) कृतविद्यः (च) हेममृगस्य

(छ) नीतिनिपुणाः (ज) समक्रियम् (झ) पुण्यकृतः

(ञ) समापन्नविपत्तिकाले

**३. अधस्तने पद्ये वर्तमानानि सप्तम्यन्तपदानि विलिखत**

यः प्रीणयेत् सुचरितैः पितरं स पुत्रो यद् भर्तुरिव हितमिच्छति तत् कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यदेतत्त्रयं जगति पुण्यकृतो लभन्ते ॥

**४. पर्यायान् निर्दिशत**

(क) शीतलम् (ख) जन्म (ग) उपदेशेन (घ) पानीयम् (ङ) धियः

**५. सन्देशं प्रकाशयत**

चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः ।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसङ्गतिः ॥

**६. सान्वयं व्याख्यात**

न लोके राजते मूर्खः केवलात्मप्रशंसया ।
अपि चेह श्रिया हीनः कृतविद्यः प्रकाशते ॥

७. **वृत्त-कोश-व्युत्पत्त्यादिनिदर्शनपूर्वकमधस्तनपद्यस्य सम्यग्व्याख्यानं कुरुत**

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥

## अनुप्रयुक्तव्याकरणम्

### विध्याद्यर्थप्रयोगः

१. **अधस्तनपद्यद्वयं पठित्वा निर्दिष्टकार्यकलापान् कुरुत**

नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत् ।
न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ॥
नाश्नीयात् सन्धिवेलायां न गच्छेन्नापि संविशेत् ।
न चैव प्रलिखेद् भूमिं नात्मनोपहरेत्स्रजम् ॥

(क) **श्लोकयोः प्रयुक्तानां क्रियापदानां लकारः कः ? तेषां प्रयोगः कस्मिन्नर्थे विहितो वर्तते ?**

(ख) **'उपहरेत्' इत्यत्र धातूपसर्गौ कौ ?**

(ग) **'कुर्वीत' इत्यस्य पद-पुरुष-वचनानि पदान्तरस्य रूपञ्च निर्दिशत ।**

(घ) **उदाहरणमनुसृत्य उपरितनश्लोकास्थानि वाक्यानि विलिख्य विध्याद्यर्थे लोटि परिवर्तनं कुरुत**

यथा - एकवासा अन्नं न अद्यात् ।
- एकवासा अन्नं न अत्तु ।

गोव्रजे मूत्रं न कुर्वीत ।
- गोव्रजे मूत्रं न कुरुताम् ।

सन्धिवेलायां न संविशेत् ।
- सन्धिवेलायां न संविशतु ।

(ङ) **पठ्, याच् इत्येतयोर्धात्वोर्विधिलिङि लोटि च रूपाणि लिखत ।**

२. **प्रदत्तानि वाक्यानि पठित्वा तेषां विधिलिङि प्रयोगं दर्शयत**

(क) भवान् तत्रैव तिष्ठतु ।

(ख) (त्वं) शतरूप्यकाणि गृहाण ।

(ग) (यूयं) सर्वेषां प्रश्नानामुत्तरं लिखत ।

(घ) भो गुरवः ! (अहं) भवदर्थं किं करवाणि ?

(ङ) भवन्तो ममानुजं गीतामध्यापयन्तु ।

(च) छात्राः ! भवन्तो व्याकरणं तर्कशास्त्रं वा अधीयताम् ?

(छ) भवती मह्यं भिक्षां यच्छतु ।

(ज) श्राद्धकर्ता दौहित्रं वदति, "इह श्राद्धे भवान् भुङ्क्ताम् ।"

(झ) स्वामी भृत्यं वदति, "मम वस्त्रं प्रक्षालय" ।

(ञ) हे शारदे ! विद्यां मे देहि ।

**विधिः -** निमन्त्रणम्, आमन्त्रणम्, अधीष्टः, सम्प्रश्नः, प्रार्थना इत्येते षड् विध्यादयः कथ्यन्ते । एतेष्वर्थेषु द्योत्येषु (धातुभ्यः) विधिलिङ्लकारस्य लोट्-लकारस्य वा प्रयोगो भवति । लोट्-लकारस्य आशीर्वादेऽर्थे जायमानानि वैकल्पिकरूपाणि (तातङ्विशिष्टानि) तु एतेष्वर्थेषु नैव प्रयोक्तव्यानि ।

**विध्यर्थः -** प्रेरणम् अर्थात् भृत्यादेर्निकृष्टस्य प्रवर्तनं विधिः । यथा- (भृत्यं प्रति) भवान् वस्त्रं क्षालयेत् । त्वं गृहस्य स्वच्छीकरणं कुरु ।

**निमन्त्रणार्थः -** निमन्त्रणं नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् । यथा- (दौहित्रादीन् प्रति) इह श्राद्धे भवान् भुञ्जीत भुङ्क्तां वा । 'त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलः' इति श्राद्धे दौहित्रस्योपस्थितिरनिवार्यत्वेन स्वीक्रियते ।

**आमन्त्रणार्थः -** आमन्त्रणं कामचारानुज्ञा अर्थाद् यथेच्छं क्रियतामित्यभ्यनुज्ञानम् । निमन्त्रणे उपस्थितेरनिवार्यतामपेक्षते परन्तु आमन्त्रणे तन्न, आमन्त्रितो यथेच्छं व्यवहर्तुं शक्नोति । यथा- भवान् इह आसीत । भवन्तः सायं प्रवचनश्रवणाय आगच्छन्तु । (स्वेच्छया कुर्वतामित्यर्थः)

**अधीष्टार्थः -** अधीष्टः सत्कारपूर्वको व्यापारः । अत्र सत्कृत्य कार्ये प्रवर्तनाय अनुरुध्यते । यथा- भवान् मम पुत्रमध्यापयेत् । भवन्तो मे मन्त्रदानं कुर्वन्तु ।

**विध्यादिचतुरर्थाः** 'प्रवर्तना' इति नाम्नापि व्यवह्रियन्ते । प्रवृत्त्यनुकूलो व्यापारः प्रवर्तना ।

**सम्प्रश्नार्थः -** इदं कार्यं न वेति विचार्य निर्धारणं सम्प्रश्नः । यथा- किं भो भवान् व्याकरणमधीयीत ? त्वं स्वगृहे आश्रमे वा निवस ?

**प्रार्थना -** प्रार्थनं याच्ञा । यथा- भवान् मेऽन्नं दद्यात् । भो ! (अहं) भोजनं लभै ।

शास्त्रीयदृष्ट्या विध्यादिषड्भेदेषु सत्स्वपि भाषिकव्यवहारे आज्ञार्थ-इच्छार्थनामभ्यां विध्याद्यर्थयोर्लोड्लिङ्लकारयोः प्रयोगबाहुल्यं दृश्यते ।

**३. द्वितीये प्रश्ने प्रदत्तेषु वाक्येषु कतमं वाक्यं शास्त्रदृष्ट्या कस्मिन्नर्थे वर्तत इति निर्दिशत ।**

**४. कोष्ठस्थसङ्केतमनुसृत्य रिक्तस्थानं पूरयत**

(क) भो देव ! मां ............... । (परि-त्रा (त्रैङ्) - लोटि)

(ख) त्वं प्रकोपादसहायं ............... । (रक्ष् - विधिलिङि)

(ग) अहं दुःखिनामुपकारको ............... । (भू - लोटि)

(घ) गुरवो नः क्षमां ............... । (कृ - विधिलिङि)

(ङ) भवान् मां कौटल्यनीतिं ............... । (पठ् (णिच्) - लोटि)

(च) यूयं यथास्थानं ............... । (अधि-आस् - विधिलिङि)

**५. 'डुपचष् पाके' इति धातोरुभयोरेव पदयोर्लोटि विधिलिङि च रूपाणि लिखत ।**

**६. उदाहरणमनुसृत्य अधस्तनवाक्यानि आज्ञार्थे इच्छार्थे वा परिवर्तयत**

यथा - त्वं जलमानयसि ।

त्वं जलमानय ।

त्वं जलमानयेः ।

(क) जनाः संस्कृतभाषया संवदन्ति ।

(ख) पितरौ मां पठनाय आदिशतः ।

(ग) वयं सङ्क्रामकरोगं जेष्यामः ।

(घ) त्वं परीक्षायां साफल्यं लप्स्यसे ।

(ङ) सर्वे शत्रवः शीघ्रं पराजयन्ते ।

(च) यूयं रामकथां शृणुथ ।

(छ) भवान् मोक्षं प्राप्नोति ।

**७. लोट्-लकारस्य क्रियापदानि प्रयुज्य स्वीयामिच्छां वर्णयत ।**

**८. सत्कर्मसु प्रवर्तनाय स्वानुजमादिश्य पत्रमेकं रचयत ।**

## कारकप्रयोगः

७. **वाक्यानि पठित्वा निर्दिष्टकार्यकलापं कुरुत**

- भवान् छात्राय पुस्तकं ददातु ।
- सरस्वति ! विद्यां मे देहि ।
- जगद्गुरवे श्रीकृष्णाय नमः ।
- माता पुत्रेभ्यः स्निह्यति ।
- सैनिकाः शत्रुभ्यः क्रुध्यन्ति ।
- साधोः शक्तिः परेषां रक्षणाय भवति ।
- दैत्येभ्यो हरिरलम् ।
- रक्तं वस्त्रं मह्यं न रोचते ।
- भक्तो मुक्तये हरिं भजति ।
- छात्रः प्राचार्याय निवेदनं लिखति ।
- सर्वकारः प्रकोपपीडितेभ्यः खाद्यान्नं प्रेषयति ।

(क) उपरितनवाक्येषु चतुर्थ्यन्तपदानि परिचित्य तेषां प्रातिपदिकं निर्दिशत ।

(ख) द्वितीये वाक्ये प्रयुक्तस्य 'मे' इति पदस्य कोऽर्थः ? वाक्यादौ तस्य प्रयोगः सुलभो निषिद्धो वा ?

(ग) उपरितनवाक्येषु कुत्र कुत्र सम्प्रदानत्वाभावेऽपि चतुर्थीविभक्तेः प्रयोगो दृश्यते ?

(घ) चतुर्थ्यन्तपदेषु एकैकं विशेषणपदं संयोज्य उपरितनवाक्यानामनुलेखनं कुरुत ।

(ङ) स्वशब्दैर्निर्मितेषु चतुर्षु वाक्येषु उपपदचतुर्थीविभक्तेः प्रयोगकौशलं प्रदर्शयत ।

८. **प्रदत्तानि पदान्यासृत्य सम्प्रदानकारकस्य चतुर्थीविभक्तेर्वा प्रयोगं वाक्येषु दर्शयत**

अदात्, देहि, यच्छतु, दद्युः, यच्छति, दद्मः, रोचन्ते, श्लाघते, शपते, स्पृहयति, क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति, स्निह्यति, साफल्याय, पित्रे, देवेभ्यः, पितृभ्याम्, तस्यै, तुभ्यम्, ते, वः, नः, नौ, वाम्, नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, वषट्, शक्तः, वरदः

९. **प्रदत्तश्लोकाच्चतुर्थीविभक्तेः प्रयोगद्योतकानि षड् वाक्यानि रचयत**

विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतद् ज्ञानाय दानाय च रक्षणाय ॥

१०. रिक्तस्थानेषु कोष्ठस्थप्रातिपदिकानां समुचितविभक्त्यन्तरूपाणि विलिख्य वाक्यानि पूरयत

(क) यजमानो ................ गां यच्छति । (विप्र)

(ख) दैत्या ................ क्रुध्यन्ति । (हरि)

(ग) अहं मार्गे ................ ................ क्रीडतोऽपश्यम् । (चतुर्, बालक)

(घ) ................ स्वस्ति । (पितृ)

(ङ) युष्माभिः ................ ................ पठितानि । (बहु, शास्त्र)

(च) दुराचारिणां ................ केशवः प्रादुरभवत् । (विनाश)

(छ) बालिका ................ उपवसति । (मातृ)

(ज) पितामहः प्रतिदिनं ................ ................ स्नाति । (मन्दोष्ण, अप्)

(झ) स ................ संयच्छते । (स्वभार्या)

(ञ) वयं प्रातः ................ नमस्कुर्मः । (इष्टदेव)

(ट) ................ अहमेकाकी समर्थोऽस्मि । (युष्मद्-द्वित्वसङ्ख्या)

(ठ) सर्वभूतेषु या विद्यारूपेण संस्थिता ................ ................ नमो नमः । (तद्, देवी)

(ड) त्वं ................ भिक्षां प्रदाय आगच्छ । (भिक्षु)

(ढ) निर्धनोऽहं ................ इदानीं किमपि दातुं न पारयामि । (भवत्)

(ण) माता ................ दुग्धं सङ्कलयति । (दधि)

(त) अनुजा ................ पत्रं विलिख्य ................ प्रेषयति । (भ्रातृ, अन्तर्जाल)

-०-

## तृतीयः पाठः

# मम दैनन्दिनी

२०७७/५/१० गौरापर्वदिवसः



प्रतिदिनमिव प्रातश्चतुर्वादनेऽजागरिषम् । हस्तौ विलोक्य इष्टदेवमस्मार्षम् । नित्यकर्माकार्षम् । तदनु पूजाप्रकोष्ठं प्रविश्य देवानवन्दिषि । मातापितरौ च प्राणंसिषम् । तौ आशीर्वचांसि अदाताम् । तानि अग्रहीषम् । पञ्चवादनतः षड्वादनं यावद्योगध्यानव्यायामेषु संलग्नोऽभूवम् । अद्य गौरापर्व । विशेषतः कर्णालीप्रदेशसूदूरपश्चिमप्रदेशयोर्नार्यः पर्वेदं सप्ताहावधि सोल्लासं समायोजयन्ति । तत्र पुरुषाश्च सहर्षं सम्मिलन्ति । पर्वेदं नो मौलिकसंस्कृतिं द्योतयति । व्यायामावधौ दशककलावधि दूरदर्शनेऽस्य पर्वणो महत्त्वं वैशिष्ट्यञ्चाश्रौषम् । युगपदेव शारीरिको बौद्धिकश्च व्यायामः पूर्णतां गतः । समयश्च सदुपयुक्त इति मन्ये । तदनन्तरं माता ऊष्णाजलमानीतवती । तदपाम् ।

सप्तवादनान्नववादनपर्यन्तं मम स्वाध्यायकालः । एतदवधावहं प्रतिदिनं स्थिरासनो भूत्वा स्वाध्यायनं करोमि । व्यर्थमितस्ततो न चलामि न च केनापि सह वच्मि । चलभाषञ्च पठनाय एव चालयामि ।

अपरे यत् किमपि ब्रूयुरेष मम कठोरनियम आत्मानुशासनञ्चान्यथा कथमध्ययनमुन्नमेत् ?

नववादने भोजनमभौक्षम् । वस्त्राणि परिधाय लेखनी-पुस्तकाभ्यासपुस्तिका आदाय च विद्यालयमगमम् । दशवादने तत्र प्रापम् । विद्यालयेऽद्य स्वल्पाहारकालपूर्वमेव कक्षाश्चलितास्तदनु प्रवचनकार्यक्रमोऽभूत् । विद्यालयेन निमन्त्रितोऽतिथिगुरुः प्रवचनमदात् । तद्दत्तावधानेन सर्वमश्रौषम् । अतिथिर्दिनचर्या-भोज्यपदार्थ-भोजनकाल-स्वास्थ्यरक्षादिविषयान् समाश्रित्य प्रवचनमकार्षीत् । स तेषां सम्बन्धञ्च प्रतिपादितवान् । ततोऽहं स्वाध्यायनस्य महत्त्वमपि अज्ञासिसम् । तेन उपनिषदः 'स्वाध्यायान्मा प्रमदितव्यम्' इत्युपदेशः सरलगिरा सम्यग्व्याख्यातः । तच्छ्रुत्वा नितराममोदिषि । जागरणम्, नित्यकर्मसम्पादनम्, इष्टवन्दनम्, स्वाध्ययनम्, भोजनम्, क्रीडनम्, शयनञ्च सर्वाणि कर्माणि यथासमयं कर्तव्यानीति तेनोदीरितम् । सोऽवादीत् - य एतदनुसारेणाचरति सोऽरुग्भवति । अतिथिर्नितरां प्रेरकवचनमगादीत् । प्रवचनादनुशासनपालनस्य स्वास्थ्यरक्षाया विद्याभिवर्धनस्य च निखिलोपायानहं ज्ञातवान् । प्रवचनसमाप्तिमनु घण्टावधिं यावन्मित्रैस्सहाक्रीडिषम् । दीपप्रज्वालनात् प्राग् गृहं प्रत्यागतवान् । पाणिपादं प्रक्षाल्याध्ययनकोष्ठं प्राविक्षम् । स्वल्पाहारं कृत्वा विद्यालये पाठितान् पाठानपठिषम्, गृहकार्यञ्चाकार्षम् । अस्माकं परिवारेऽष्टवादनं रात्रेर्भोजनकालः । तदनु दूरदर्शने सूचनामयं ज्ञानवर्धकञ्च कार्यक्रमं समैक्षिषि ।

इदानीमपि ममालिखिता दैनन्दिनी वर्तत एव । श्व इमां लेखितास्मि । मातापितरौ कथयितास्मि, "लिखितां समयकार्यतालिकां निर्माय अध्ययनकक्षे संस्थाप्य च भविष्यत्यपि तामेवानुसृत्य चलिष्यामि । अनुजानुजाँश्च तामनुगन्तुं प्रेरयिष्यामि ।" हितवचनं सर्वेषु श्रावयितव्यमिति नीतिमनुसृत्य मित्राण्यपि एतद् वदिष्यामि । कथयिष्यामि, "हे सखायः, सर्वोन्नतये प्रातश्चतुर्वादनादारभ्य रात्रौ नववादनपार्यन्तिकीं दैनन्दिनीं निर्माय चलन्तु ।" मन्ये, एतेन तेषामपि हितं भवेत् । नववादनं जातम् । एष मम शयनकालः । सम्प्रति यदि न शये तर्हि दैनन्दिनी कथं परिपालिता स्यात् ? इष्टदेवं संस्मृत्येह स्वपिमि ।

## अभ्यासः

### श्रवणं भाषणञ्च

१. **सखिभिस्सह मिलित्वा अधस्तनपदानां शुद्धोच्चारणमनुच्चारणञ्च विधत्त**

प्रातश्चतुर्वादनम्, अस्मार्षम्, पूजाप्रकोष्ठम्, वैशिष्ट्यञ्च, अश्रौषम्, तद्दत्तावधानेन, प्रमदितव्यम्, तच्छ्रुत्वा, दीपप्रज्वालनात्, प्रक्षाल्य, रात्रेर्भोजनकालः, समैक्षिषि, दैनन्दिनी, मित्राण्यपि, नववादनपार्यन्तिकीम्

२. पाठस्यान्त्यानुच्छेदात् क्रियापदानि सञ्चित्य कक्षायां श्रावयत ।

३. सन्धिं विच्छेद्य सन्धिनाम कथयत

पर्वेदम्, भविष्यत्यपि, ततोऽहम्, शयनञ्च, तच्छ्रुत्वा, सप्ताहावधि

४. गौरापर्वणो वैशिष्ट्यमेकवाक्ये कथयत ।

५. गुरोरतिथेर्वा श्रुतपूर्वात् कस्माच्चन प्रवचनादवबुद्धं सारतत्त्वं कक्षायां प्रकटयत ।

६. अधस्तनेषु प्रयुक्तानुपसर्गान् कथयत

प्राणंसिषम्, आदाय, प्रापम्, व्याख्यातः, प्राविक्षम्, समैक्षिषि, प्रेरयिष्यामि, प्रत्यागतवान् ।

७. प्रियतमेन सख्या अद्य प्रातर्विहितानि कार्याणि पृच्छत ।

८. आत्मना सम्पादितान्यद्यतनकार्याणि कक्षायां श्रावयत ।

९. अद्यतन्यां कक्षायां यत्किमपि पठितं तत् स्वाभिभावकं वदत ।

१०. पाठेऽभिव्यक्तं विचारं प्रति स्वाभिमतं प्रकटयत ।

## पठनम्

१. पाठस्य तृतीयमनुच्छेदं प्रवाचयत ।

२. पाठस्य द्वितीयमनुच्छेदं पठित्वा अव्ययपदानि सङ्कलयत ।

३. पाठस्य मौनपठनं विधाय अज्ञातार्थानि पदानि चिह्नीकुरुत ।

४. पाठं पठित्वा सन्धियुतानां समस्तानाञ्च पदानामर्थापनाय सहपाठिभिस्सह विमर्शं कुरुत ।

५. पाठस्य प्रथमानुच्छेदं पठित्वा अधस्तनप्रश्नानुत्तरयत

(क) लेखकस्य जागरणकालः कः ?

(ख) कौ आशीर्वयांसि अदाताम् ?

(ग) अद्य को विशेषः ?

(घ) गौरापर्व विशेषेण कुत्र कति दिनानि यावत् समायोज्यते ?

(ङ) माता किमानैषीत् ?

(च) के कार्ये युगपदभूताम् ?

(छ) 'अश्रौषम्' इति क्रियापदस्य धातु-लकार-पद-वचन-पुरुषान् निर्दिशत ।

(ज) अनुच्छेदे प्रयुक्तानि कर्मपदानि चित्वा तेषां स्वशब्दैर्वाक्ये प्रयोगं दर्शयत ।

(झ) 'अपाम्' इत्यस्य बहुत्वे किं रूपम् ?

(ञ) अद्यतनभूतार्थे कस्य लकारस्य क्रियापदानां प्रयोगः कर्तव्यः ?

६. पाठं पठित्वा समस्तपदानि सङ्कलयत ।

## ७. अधस्तनगद्यं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत

# शैक्षिकभ्रमणम्

मानवो ज्ञानबुद्धिविवेकसहितः प्राणी वर्तते । नान्येषु जीवेषु इमे गुणा लभ्यन्ते । अनया दुर्लभशक्त्या मानवोऽन्यान् जीवान् वशीकरोति स्वप्रभावञ्च विशदीकरोति । इमां शक्तिमर्जयितुं मानवः सर्वोपायान् चालयति, सततं यत्नञ्च कुरुते । एतेषूपायेषु शैक्षिकभ्रमणमन्यतमं मन्यते । किं नाम शैक्षिकभ्रमणमिति छात्राणां हृदि जिज्ञासा समुदेति । शिक्षाप्राप्तये ज्ञानवृद्धये बुद्धिविकासाय च यद् भ्रमणं विधीयते तदेव शैक्षिक-भ्रमणं भवति । भ्रमणमेतत् प्राधान्येन विद्यालय-महाविद्यालयप्रभृतिशैक्षिकसंस्थानां विद्यार्थिभिर्विधीयते तथापि अन्येषां वर्गाणामपि भवितुं शक्नोति । विशेषतो विद्यार्थिनः शिक्षार्थिनश्च शैक्षिकभ्रमणाय उत्सुकास्तत्पराश्च दृश्यन्ते । अत एव शैक्षिकभ्रमणमिति प्रसिद्धिर्वर्तते । ज्ञानबुद्धिविवेकानामर्जनाय वर्धनाय च बहव उपाया नैकविधानि स्रोतांसि च सन्ति । प्रज्ञावन्तो वदन्ति - बुधजनसम्पर्केण, शास्त्राध्ययनेन शासकसभाप्रवेशनेन च ज्ञानं वर्धते, बुद्धिर्विकसति, विवेको निर्मलायतेऽनुभवश्च दृढतरो जायते । एतेषु देशाटनमपि संयोज्यते । देशाटनेन भूगोल-जाति-रीति-संस्कृति-जनजीवनानां वैविध्यपूर्णं स्वरूपमवगन्तुं शक्यते । शैक्षिकभ्रमणं देशाटनस्यैवान्यतमं संस्करणं मन्तव्यम् । एतादृशेन भ्रमणेन विद्यार्थिनः कस्यापि महत्त्वाधायकस्थानस्य बहुपक्षीयं ज्ञानं प्रत्यक्षं प्राप्तुं शक्नुवन्ति । तच्च ज्ञानमाजीवनं चित्तमधिशेते व्यवहारोपयोगि च भवति । शतं पुस्तकानि यत् प्रतिपादयन्ति ततोऽप्यधिकं भ्रमणमेकं सर्वं विवृणोति, प्रमाणयति च । जनमनःशान्तये स्वास्थ्याय च शैक्षिकभ्रमणस्योपयोगित्वं निभाल्यते । दैनिककार्यं विहाय विहितेन नवीनस्थानस्य भ्रमणेन नवीनोर्जा उत्पद्यते, कार्यक्षमता प्रवर्धते, मानसिकशक्तिश्च बलवती भवति । एतच्छात्राणां कृते महद्धितकारकं सिद्ध्यति । शैक्षिकभ्रमणं स्वस्थमनोरञ्जनेन ज्ञानप्राप्तेः सरलतमोपायो विद्यते । अद्यतनेषु शिक्षणविधिषु विलोकनविधिरपि प्रचलितोऽस्ति । शैक्षिकभ्रमणमस्यैव विधेरन्यतमं सर्वाधिकं प्रभावकार्युदाहरणं वर्तते । एवंविधेषु भ्रमणेषु सुरक्षासावधानताकुशलव्यवस्थापनानि परमावश्यकानि भवन्ति । एतत्सर्वं विचार्य विहितं शैक्षिकभ्रमणं न केवलं छात्राणां ज्ञानाय हिताय च परं शिक्षणसंस्थानां महल्लाभाय च सिद्ध्यति ।

### प्रश्नाः

**(अ) अनुच्छेदाद् गृहीतं वाक्यं पठित्वा प्रश्नान् उत्तरयत**

अनया दुर्लभया शक्त्या मानवोऽन्यान् जीवान् वशीकरोति ।

(क) वाक्येऽस्मिन् कर्मपदं किम् ? किञ्च तस्य विशेषणम् ?

(ख) अत्र करणपदं किम् ? तस्य प्रातिपदिक-लिङ्ग-विभक्ति-वचनानि निर्दिशत ।

(ग) करणस्य विशेषणपदे के ?

(घ) 'मानवोऽन्यान्' इत्यस्य सन्धिच्छेदं विधत्त ।

(ङ) 'वशीकरोति' इत्यस्य धातुं निर्दिशत ।

(च) शिक्षकान्नामधातोः परिचयं प्राप्य पञ्चानां नामधातूनां प्रयोगं दर्शयत ।

**(आ) एकवाक्येनोत्तरं दत्त**

(क) समस्तप्राणिषु मानवे को विशेषः ?

(ख) मानवः कथमन्यान् वशीकरोति ?

(ग) किन्नाम शैक्षिकभ्रमणम् ?

(घ) कस्मादार्जितं ज्ञानं व्यवहारेऽधिकतममुपयोगि भवति ?

(ङ) 'अधिशेते' इति पदस्य स्वशब्दैर्वाक्ये प्रयोगं प्रदर्शयत ।

(च) 'कृते' इत्यस्य योगे का विभक्तिर्जायते ?

(छ) अनुच्छेदात् करणकारकस्य प्रयोगयुतं वाक्यमेकमन्विषत ।

**(इ) सङ्क्षेपेणोत्तरयत**

(क) ज्ञानवर्धनस्य चत्वारि स्रोतांसि अनुच्छेदाधारेण लिखत ।

(ख) शैक्षिकभ्रमणस्य महत्त्वं पञ्चवाक्येषु प्रकाशयत ।

(ग) विद्यार्थिनां सार्वत्रिकविकासाय प्रयोगात्मकशिक्षणस्य महत्त्वं प्रकाश्यानुच्छेदमेकं लिखत ।

(घ) अनुच्छेदस्यास्य सारांशं स्पष्टयत ।

(ङ) अनुच्छेदात् पञ्च अव्ययपदान्यन्विष्य तानि स्ववाक्येषु योजयत ।

(छ) कृतपूर्वं शैक्षिकभ्रमणमवलम्ब्य आत्मानुभूतिं वाक्यपञ्चके प्रकटयत ।

**(ई) विद्यालयेन समायोजिते शैक्षिकभ्रमणे स्वसहभागितादिवसमवलम्ब्य दैनिकीं लिखत ।**

## लेखनम्

**१. प्रदत्तसमस्तपदानां पाठानुकूलमर्थापनं कुरुत**

| | | | | | |
|---|---|---|---|---|---|
| क) | दैनन्दिनी | (ख) | हितवचनम् | (ग) | सरलगिरा |
| (घ) | स्वल्पाहारकालपूर्वम् | (ङ) | आशीर्वचांसि | (च) | स्थिरासनः |
| (छ) | प्रतिदिनम् | (ज) | स्वाध्यायकालः | (झ) | ऊष्णजलम् |
| (ञ) | पूजाप्रकोष्ठम् | (ट) | मातापितरौ | (ठ) | योगध्यानव्यायामेषु |
| (ड) | लेखनीपुस्तकाभ्यासपुस्तिकाः | | | | |

२. **वाक्येषु योजयत**

स्थिरासनः, सर्वोन्नतये, सम्प्रति, समैक्षिषि, प्रमदितव्यम्, तदनु, अरुक्, मन्ये, लेखितास्मि, चलन्तु

३. **पाठस्यान्त्यानुच्छेदे प्रयुक्तानां क्रियापदानां लकारं प्रदर्शयत ।**

४. **"स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यम्" इत्यस्याशयं प्रकाशयत ।**

५. **दैनिकीलेखनस्यावश्यकतत्त्वानि निर्दिशत ।**

६. **दैनन्दिनीं निर्माय तस्या अनुसरणस्य लाभान् सूत्ररूपेण लिखत ।**

७. **स्वास्थ्यरक्षणोपायान् पाठाधारेण विलिखत ।**

८. **श्रीपञ्चमीदिवसस्य दैनिकीं रचयत ।**

९. **स्वास्थ्यदिनचर्ययोः सम्बन्धमन्विष्य अनुच्छेदमेकं रचयत ।**

१०. **स्वसमुदायस्य लब्धप्रतिष्ठं प्राप्तदीर्घजीवनञ्च जनं मिलित्वा तस्य दिनचर्यां पृच्छत । तस्यानुकरणीयपक्षान् सूचीकृत्य स्वस्य दैनन्दिनी निर्मात ।**

११. **प्रदत्तानुच्छेदतः सप्त सारवाक्यानि विरचय्य तदाधारेण एकचतुर्थांशे गद्यं सङ्क्षेपीकुरुत**

नेपालो विविधजातीनां बहुभाषाभाषिणां नानाधर्मावलम्बिनाञ्च निवासस्थलमस्ति । अत्र बहोः कालाज्जाति-भाषा-धर्म-संस्कृतीनां परस्परं मेलसद्भावौ विद्येते । अत्रत्याः कतिचिज्जना चीनतिब्बतस्य संस्कृति- परम्परा-पर्वोत्सवान् प्रत्यास्थाभावं दर्शयन्ति । एतदीयप्रसङ्गे ल्होसारपर्व-दिवसोऽन्यतममुदाहरणमस्ति । 'ल्होसार' इति पदं 'ल्हो', 'सार' इति शब्दद्वयेन निष्पद्यते । 'ल्हो' इत्यस्यार्थो 'वर्गः', 'सार' इत्यस्यार्थश्च 'नव' 'विकसनम्' वा भवति । 'ल्हो' इत्यस्य सामान्यार्थो वर्गः सन्नपि ततो वर्षं संवत्सरो वा बुद्ध्यते । एतस्माद् 'ल्होसार' पदस्यार्थो नववर्षमिति स्फुटति । केचन 'ल्होछार' इत्यपि ब्रुवन्ति । एतस्याप्यर्थो नववर्षमेव । तिब्बतपञ्चाङ्गानुसारेण विभिन्नानां पशुपक्षिणां द्वादशनाम्नामाधारेण प्रत्येकं वर्षाय जन्तोर्नाम प्रदीयते । एतदनुरूपं वर्षाणि मूषक-वृष-व्याघ्र-विडाल-गरुड-सर्पाश्व-मेष-वानर-पक्षि-कुक्कुर-वराहाणामाधारेण नामाङ्कितानि विधीयन्ते । प्रतिवर्षमेकैकं कृत्वा द्वादशनाम्नां द्वादशवर्षाणां पूरणानन्तरं पुनस्तान्येव नामानि द्विरावर्त्यन्ते । द्वादशवर्षाणां युगमेकं परिकल्प्य एषा व्यवस्था विधीयमाना वर्तते । युगमिदं वर्षचक्रो निगद्यते । पर्वेदं मान्यजनेभ्य आशीर्वादं गृहीत्वा परस्परं शुभकामनामभिव्यज्य च सहर्षं सोल्लासञ्च समायोज्यते । नेपाले गुरुङ-तामाङ-शेर्पा-थकाली-मनाङे-खाममगर-ह्योल्मो-डोल्वा-जिरेल-तोप्के-गोला-नेस्याङ्वाजातीया जना विशेषोत्साहेन पर्वोत्सवममुमायोजयन्ति ।इदानीं नेपाले त्रीणि ल्होसारपर्वाणि प्रसिद्धानि सन्ति । गुरुङजातीया जना नववर्षस्य रूपेण पौषस्य पञ्चदशे दिवसे तोलाल्होसारपर्व आयोजयन्ति । तामाङसमुदायेन माघशुक्लप्रतिपदि सोनामल्होसारदिवसः समाद्रियते । शेर्पाजातेर्जनाः फाल्गुनशुक्लप्रतिपदि नूतनवर्षागमनमभ्यर्थ्य ग्याल्वोल्होसारपर्वण आयोजनं विदधति । अस्माकं संस्कृतौ

पशुपक्षिणः पूज्याः सन्ति । ल्होसारदिवसायोजका येषां पशुपक्षिणां नामभिर्नववर्षस्य नामकरणं कुर्वन्ति तानेव पशुपक्षिणः सनातनसंस्कृतेरनुयायिनोऽपि पूजयन्ति । एतत् सांस्कृतिकसद्भावसहिष्णुतयोरनुपम-मुदाहरणमस्ति । वेदोऽपीयं पृथिवी बहुजातीर्धारयन्ति या नानाभाषा भाषन्ते, विविधधर्मांश्चालम्बन्ते इति स्वीकरोति । इत्थं पृथिवी बहुजाति-धर्म-संस्कृतिसम्बलास्तीति प्रमाणीभवति । ल्होसारपर्व अस्माकं देशस्य विविधतासूचकमेकमङ्गं मन्तुं शक्यते ।

## अनुप्रयुक्तव्याकरणम्

**भविष्यत्कालप्रयोगः**

**१. वाक्यानि पठित्वा यथानिर्देशं कुरुत**

- परश्वः प्रतिपद् भविता ।
- अहं कार्यमेतदद्यैव समाप्स्यामि ।
- गुरवः श्वोऽस्मान् न पाठयितारः ।
- साधुरद्य श्वो वा प्रवचनं करिष्यति ।
- आगामिवर्षे वयं द्वादशकक्षायां प्रवेष्टास्मः ।
- युवां परीक्षायामुत्तीर्णौ भविष्यथः ।
- मम मातुलः प्रपरश्व आगन्ता ।
- अहमागामिमासे शैक्षिकभ्रमणं कर्ताहे ।
- गुरुभिर्मह्यं कति अङ्का दास्यन्ते ?
- त्वया सप्ताहेऽपरेऽवकाशो लब्धा ।

(क) उपरितनवाक्यानि कस्मिन् काले वर्तन्ते ?

(ख) वाक्येषु प्रयुक्तानां क्रियापदानां लकारनिर्देशं विधत्त ।

(ग) कतमेषु वाक्येषु कालसूचकसुबन्तपदानि समागतानि सन्ति ? कानि च तानि ?

(घ) सोपसर्गं क्रियापदानि परिचित्य तेषां धातूपसर्ग-विभक्ति-वचनानि निर्दिशत ।

(ङ) शिक्षकस्य यथावश्यकं साहाय्यमवाप्य भविष्यत्काले कुत्र कस्य लकारस्य प्रयोगो विधातव्य इति निश्चिनुत ।

(च) लभ्-धातोः कर्तरि कर्मणि च लुटि रूपाणि विलिख्य परस्परं तोलयत ।

(छ) दा-धातोः कर्तृकर्मणोर्लृटि रूपाणि लिखत ।

(ज) उपर्युक्तेषु कर्मणि प्रयुक्तं वाक्यद्वयं परिचिनुत ।

(झ) णिजन्तस्य पठ्-धातोर्लुटि लृटि च रूपाणि दर्शयत ।

(ञ) उपरितनवाक्यानां वाच्यपरिवर्तनं कुरुत ।

भविष्यत्कालेन आगामिसमयो द्योत्यते, स च अद्यतनानद्यतन-व्यामिश्र-सामान्यभेदेन चतुर्विधो मन्यते । संस्कृतव्याकरणे भविष्यत्कालद्योतकौ द्वौ लकारौ स्तः, लुट् लृट् च । अतो भविष्यत्क्रियावृत्तौ द्योत्यायामर्थमनुसृत्य एतयोः कस्यचिदेकस्य प्रयोगो भवति । अद्यतनभिन्नागामिकालो भविष्यदनद्यतनस्तत्र लुट्-लकारः प्रयोज्यः । व्यतीताया रात्रेः पश्चार्धेन आगामिन्या रात्रेः पूर्वार्धेन च सहितः कालोऽद्यतनः कथ्यते । अद्यतनभिन्नः कालोऽनद्यतनत्वेन व्यवह्रियते, स च द्विविधो भवति- भूतानद्यतनो भविष्यदनद्यतनश्च । यो व्यतीतः स भूतानद्यतनः, यश्च आगामी स भविष्यदनद्यतन इति । यदि वाक्येषु श्वः-परश्वाद्यनद्यतन-भविष्यत्कालद्योतकपदानि प्रयुज्यन्ते चेत् तत्र लुट्-लकारजानि क्रियापदान्येव प्रयोक्तव्यानि भवन्ति । यथा - श्व अवकाशो भविता, वयं विद्यालयं न गन्तास्मः । अनद्यतनसूचकपदेऽप्रयुज्यमानेऽपि यत्र लुट् प्रयुज्यते स च क्रियावृत्तेरनद्यतनत्वं द्योतयति । यथा - छात्रो गीतां पठिता, अत्र प्रयुक्तेन पठितेति लुटः क्रियया छात्ररूपकर्ता पठनक्रियायाः कार्यव्यापारान् भविष्यत्यनद्यतने काल एव सम्पादयितेति द्योत्यते ।

अद्यतन-व्यामिश्र-सामान्यभविष्यत्काले लृट्-लकारस्य प्रयोगो विधीयते । यथा - अहमद्य सायं मित्रं मेलिष्यामि । स अद्य श्वो वा विदेशत आगमिष्यति । त्वं शीघ्रमेव वृत्तिं लप्स्यसे । अत्र व्यामिश्रपदस्य अद्यतनानद्यतनयोर्मिश्रितः (अनिर्धारितो वा) कालोऽर्थः । सामान्यभविष्यदित्यनेन अविवक्षिताद्यतनत्वानद्यतनत्वागामिकालो विशेषरहितागामिकालो वाऽवगन्तव्यः ।

**२. पाठस्यान्तिमानुच्छेदतो भविष्यत्कालिकवाक्यानि सङ्गृह्य लुट्-लृड्लकारयोः प्रयोगान् पृथक् पृथग्दर्शयत ।**

**३. प्रदत्तवाक्यानि भविष्यति सामान्ये परिवर्तयत**

(क) अहं प्रातर्नववादने भोजनमभौक्षम् ।

(ख) ते ज्ञानिनोऽभवन् ।

(ग) सा व्यर्थमितस्ततो न चलति ।

(घ) त्वमवश्यमेव एधसे ।

(ङ) अतिथिः स्वास्थ्यरक्षाविषये प्रवचनमकार्षीत् ।

(च) आचार्यया वयं पाठ्यामहे ।

(छ) विद्यार्थिनो ज्ञानवर्धनायैव चलभाषं चालयन्ति ।

(ज) अहं स्थिरासनो भूत्वा स्वाध्ययनं कुर्वे ।

(झ) पितरौ अस्मान् भ्रमणार्थमनयताम् ।

(ञ) गावः शीतं जलं पिबन्ति ।

**४. पाठस्य प्रथमानुच्छेदे यानि कान्यपि अद्य कृतानि कार्याणि वर्णितानि सन्ति तेषां श्वः करणाय क्रियापदानि परिवर्त्य अनुच्छेदस्य पुनर्लेखनं कुरुत ।**

**५. कोष्ठस्थसङ्केतमनुसृत्य भविष्यत्कालिकक्रियापदै रिक्तस्थानानि पूरयत**

(क) भ्राता श्वो मां ग्रामं .................... । (गम्-णिच्)

(ख) त्वं स्वकर्मणः फलं .................... । (लभ्)

(ग) त्रिदिवसानन्तरं यूयं तत्र .................... । (प्र-आप्)

(घ) सच्चरित्रवन्तो जनाः अवश्यमेव .................... । (वि-जि)

(ङ) परश्व आयोक्ष्यमागे कार्यक्रमे वयं .................... । (मिल्)

(च) पित्रा अस्मभ्यमाशीर्वचांसि .................... । (प्र-दा)

(छ) भारवाहौ भारं .................... । (वह्)

**६. लुट्-लकारस्थानि क्रियापदानि प्रयुज्य सप्तवाक्येषु आगामिदिनस्य कृते स्वयोजनां निर्मात ।**

**७. भविष्यत्कालस्य प्रयोगप्रदर्शकमनुच्छेदमेकं विरचयत ।**

## कारकप्रयोगः

**८. वाक्यानि पठित्वा निर्दिष्टकार्यकलापान् कुरुत**

- वृक्षात् पत्राणि पतन्ति ।
- अहं वन्यजन्तुभ्यो बिभेमि ।
- नद्यो हिमालयात् प्रभवन्ति ।
- पितृव्यः पोखरानगरतो यानेन काष्ठमण्डपमागच्छति ।
- निर्धनो दरिद्रतायाः पराजयत ।
- दाशरथी रामः कौशल्याया अजायत ।
- अहं गुरोर्व्याकरणमधीये ।
- माता बालवचनान्मुह्यति ।
- ते दुष्कर्मणो व्यरमन् ।
- शिक्षका दुःसङ्गतेश्छात्रान् वारयन्ति ।

- नववधूर्गृहपरिजनेभ्यो लज्जते ।
- रामाद् ऋते सुखं नास्ति ।
- भाद्रात् पूर्वं श्रावण आगच्छति ।
- वयम् आचतुर्वादनं विद्यालये भविष्यामः ।
- मातापितृभ्यां पृथक् सुखं न भवति ।
- त्वत्तो नाहं पटुतरोऽस्मि ।
- महाभारतं रघुवंशाद् बृहत्तरो ग्रन्थो वर्तते ।

(क) उपरितनवाक्येष्वागतानां पञ्चम्यन्तपदानां प्रातिपदिकविभक्तीर्निर्दिशत ।

(ख) उपरि प्रयुक्तानि तसिल्प्रत्ययान्तपदानि कानि ?

(ग) तसिल्प्रत्ययः कस्मिन्नर्थे विधीयते ?

(घ) 'त्वत्तः' इत्यस्य प्रकृतिप्रत्ययौ विभाजयत ।

(ङ) कस्मिन् कारके पञ्चमीविभक्तेः प्रयोगोऽपेक्ष्यते ।

(च) कुत्र कुत्र कारकत्वाभावेऽपि पञ्चमीविभक्तेः प्रयोगो वर्तते ? तत्र पञ्चमीकारकोपपदानि कानि ?

(छ) पञ्चमीविभक्तेः प्रयोगप्रदर्शकानि चत्वारि वाक्यानि रचयत ।

**८. प्रदत्तानि पदान्यासृत्य अपादानकारकस्य पञ्चमीविभक्तेर्वा प्रयोगं वाक्येषु दर्शयत**

पतति, बिभेति, पराजयते, जुगुप्सते, विरमति, प्रमाद्यति, वारयति, अधीते, जायते, प्रभवति, अन्यः, भिन्नः, इतरः, आरात्, ऋते, पूर्वम्, प्राक्, प्रत्यक्, दक्षिणा, दक्षिणाहि, प्रभृति, आरभ्य, बहिः, अप, परि, आ, दूरात्, अन्तिकाद्, पृथक्, नाना, बद्धः

**९. अधस्तनसूक्तौ प्रयुक्तान्यपादानद्योतकानि पदानि चिह्नीकृत्य प्रत्येकं सूक्त्यर्थानुकूल्येन वाक्ये योजयत ।**

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥

**१०. अधः प्रदत्तानि वाक्यानि पठित्वा प्रश्नानुत्तरयत**

- सीता आसन्दे उपविशति ।
- पाचकः स्थाल्यां भोजनमपचत् ।
- साहित्ये मम रुचिरस्ति ।
- आत्मा सर्वस्मिन् प्राणिनि विराजते ।

- मम पुत्रः पितामहयां साधुरस्ति ।
- आखेटको दन्तयोः करिणं हन्ति ।
- बालाः सूर्येऽस्तमाने गृहं प्राप्तवन्तः ।
- सज्जना दुर्जनेषु तिष्ठत्सु तरन्ति ।
- पुत्र्यां रुदन्त्यां माता पलायिता ।
- सर्वेषु कूटेषु सगरमाथाशिखरं सर्वोन्नतं वर्तते ।
- यूयं कुत्र कुत्र निवसथ ?
- (भवता) यत्र इष्यते तत्रैव स्थीयताम् ?
- परिश्रमे कृते किमप्यसाध्यं नास्ति ।
- त्यक्ते शरीरेऽपि सुकविः स्वकृतिभिश्चिरञ्जीवति ।
- सत्यामसामान्यायां स्थितावपि अस्माभिः प्रविधिभिः शिक्षणमनवरुद्धम् ।

(क) सप्तम्यन्तपदानि चिह्नीकृत्य उपरितनवाक्यानामनुलेखनं कुरुत ।

(ख) अत्र सप्तम्यन्तविशेषणपदानि तेषां विशेष्याणि च कानि ?

(ग) अत्र सप्तम्यर्थवाहकानि कानि अव्ययपदानि प्रयुक्तानि सन्ति ?

(घ) प्रथमे वाक्ये सीताकर्तृकोपवेशनक्रियाया आधारः कः ?

(ङ) कस्मिन् कारके सप्तमीविभक्तिः प्रयुज्यते ?

(च) प्रदत्तवाक्येषु कुत्र केन कारणेन सप्तमीविभक्तिर्जातेति विषयं सहपाठिभिस्सह विमृशत । सत्यावश्यके शिक्षकस्य च साहाय्यं स्वीकुरुत ।

**११. पाणिनीयव्याकरणे प्रयोगसाधुत्वप्रकारलेखनक्रमे सप्तम्यन्तपदानां प्रयोगो बाहुल्येन दृश्यते । व्याकरणखण्डे पठितेषु कस्यचिदेकस्य प्रयोगस्य साधनप्रक्रियां विलिख्य तत्रत्यानि सप्तम्यन्तपदानि रेखाङ्कितानि कुरुत ।**

**१२. प्रयुक्तद्व्यधिकसप्तम्यन्तपदं किञ्चन सुभाषितमन्विष्य विलिखत ।**

**१३. कोष्ठस्थप्रातिपदिकानां समुचितविभक्त्यन्तरूपै रिक्तस्थानानि पूरयत**

(क) इदानीं जना ................ भीता दृश्यन्ते । (रोग)

(ख) सञ्चालितेषु यानेषु बहवो जना ................ स्वदेशं प्रत्यागमिष्यन्ति । (विदेश)

(ग) बालिका ................ ................ शेते । (खट्वा)

(घ) ते व्याघ्रं ................ घ्नन्ति । (चर्म)

(ङ) राजा ................. नाटकं प्रेक्षते । (सिंहासन)

(च) ................. त्वं बलवत्तरोऽसि । (अस्मद्)

(छ) श्वा ................. ................. अपि गर्दभो न भवति । (छिन्न, पुच्छ)

(ज) ................. ................. खेदस्य किं प्रयोजनम् ? (त्यक्त, अवसर)

(झ) जनको ................. बहिर्गतवानस्ति । (गृह)

(ञ) ................. नाइलनाम्नी दीर्घा वर्तते । (नदी)

(ट) ज्ञानिनः ................. नैव विरमन्ति । (अध्ययन)

(ठ) व्याप्तरोगविषये मम मतं ................. भिन्नमस्ति । (अन्य)

(ड) परिश्रमी आ ................. कार्यं कुरुते । (रात्रि)

(ढ) मूषकाः ................. बिभ्यति । (बिडाल)

(ण) भक्तः प्रभोः ................. प्रमाद्यति । (नामश्रवण)

**१४. वाक्यानि संशोधयत**

(क) बालाः शय्यायामधिशेरते ।

(ख) वयं देवेभ्यो नमामः ।

(ग) विद्यार्थिनः कन्दुकं क्रीडन्ति ।

(घ) अग्रजा उद्यानं तिष्ठति ।

(ङ) युवकः सर्पाय त्रायते ।

**१४. पाठात् पञ्चम्यन्तानि सप्तम्यन्तानि च पदानि सञ्चित्य स्वशब्दैर्वाक्येषु प्रयोगं प्रदर्शयत ।**

-o-

चतुर्थः पाठः

# दाननिधिर्दधीचिः



दधीचिः प्रसिद्धो वैदिको महर्षिरासीत् । स नानाविद्यानां ज्ञाता तत्त्वदर्शी परोपकारपरायणश्चाभवत् । ऋषिरसौ दयादानकल्याणकर्मभिरिदानीमपि सर्वैः सर्वत्र प्रशंस्यते । ऋग्वेद-भागवत-देवीभागवतादिग्रन्थेषु दधीचेः प्रसङ्ग उपलभ्यते ।

दधीचिः 'दध्यञ्च', 'दध्यङ्ग्य' वेति नाम्ना व्युत्पादित इत्युच्यते । 'दध्य' (दधि), 'अञ्च' (भागः) इति पदद्वयेन, 'दध्ना सबलीकृतान्यङ्गानि येन सः' इति विग्रहेण च दधीचिर्निष्पद्यते इत्यतो रूपमिदं 'दध्यञ्च' इत्यस्यैव परिवर्तनमिति मन्यते । तदनुरूपमस्य नाम दधीचिरिति सञ्जातम् । दधीचिश्चित्त्यर्थवणोः पुत्र आसीत् । दधीचेर्मातुर्नाम 'शन्तिः' इत्यप्युल्लिखितमस्ति । शन्तिः ऋषेः कर्दमस्य पुत्री आसीत् । दधीचेः पत्नी स्वरचा आसीत् । अथर्वा ब्रह्मणो मानसपुत्रस्य ऋषेर्भृगोः पुत्र आसीत् । अथर्वणाथर्ववेदः प्राप्त इत्युक्तमस्ति । कुत्रचिद्दधीचिर्ऋषेश्च्यवनस्य सुकन्यायाश्च पुत्रः प्रोच्यते । कस्यचित्पुराणस्यानुसारेणासौ शुक्राचार्यस्य पुत्र आसीत् । इन्द्राद् दधीचिर्विविधा विद्या अधीतवान् । अयं मधुविद्यामपि जानाति स्म परमिन्द्रस्याज्ञायाः कारणेन न कमपि वक्तुं शक्नोति स्म । यतो हि शपथ एष आसीद् यद्यदि दधीचिस्ता विद्या अन्यान् शिक्षयिष्यति तर्हीन्द्रस्तस्य शिरः कर्तिष्यति ।

अश्विनीकुमारौ तां विद्यां ज्ञातुमीषतुः किन्तु इन्द्रस्यादेशमुल्लङ्घयितुं न शेकतुः । अश्विनीकुमारौ दधीचेः शिरश्चकर्ततुः, सुरक्षितस्थाने स्थापयामासतुश्च । ते तस्य शरीरस्योपरितनभागेऽश्वस्य शिरः संयोजयामासतुः । अश्वमुखाद्दधीचेरश्विनीकुमारौ निखिला विद्या अगृहतुः । एतत्सर्वं विज्ञाय इन्द्रोऽतीव क्रुद्धो बभूव । स दधीचेरश्वशिरश्चकर्त । वारद्वयं शिरः कर्तितं सदपि दधीचिर्विद्याराशेर्दानेन परेषां महदुपकारं चकार । पश्चादश्विनीकुमारौ दधीचेर्वास्तविकशिरस्तस्य शरीरे योजयामासतुः ।

दानेन ख्यातनाम्नो दधीचेः प्रसङ्गो महाभारतेऽपि समुपलभ्यते । एकदा दक्षो भव्यं यज्ञं समायोजयामास । तत्रान्यैरतिथिभिस्सह दक्षेण सतीपतिं शङ्करं विहायान्ये जामातारश्च सहर्षं निमन्त्रिता बभूवुः । शङ्करस्यानाहवानं न केवलं तस्यापमानं प्रत्युतानर्थकारि च सम्भवेदिति विचारेण दधीचिश्चिन्ताकुलो बभूव । सर्वोपकारको दधीचिः शङ्करञ्चामन्त्रितुं दक्षं भूयो भूयो निवेदयामास परं हठाधीनः स दधीचेर्हितवचांसि कठोरेणोपेक्षाञ्चक्रे । क्रान्तदर्शी ऋषिर्दधीचिर्दुःखातिशयमनुभूय दक्षयज्ञं परित्यज्य निर्जगाम ।

दधीचिः कठोरतपश्चर्यां समाचचार । इन्द्रस्तां न सहते स्म । स तपोभ्रंशनाय अलम्बुषानामिकामप्सरसं दधीचेः समक्षं प्रेषयामास । ताभ्यां सारस्वतनामा पुत्रो जज्ञे । दधीचेः सुदर्शननामापरपुत्रोऽपि बभूव । अस्य सुवर्चस उत्पन्नः पिप्पलादनामधेयपुत्रश्चासीदिति पौराणिकवृत्तमुपलभ्यते ।

अस्थिदानस्य हृदाकर्षकः प्रसङ्गो दधीचेरखिलजीवनचरितमलङ्करोति । प्रसङ्गेऽस्मिन् द्विविधं वृत्तं प्रसिद्धमस्ति । प्रथमवृत्तस्यानुसारेण देवराज इन्द्रो वृत्रासुरस्य पिता त्वष्टा च परस्परं शत्रू बभूवतुः । त्वष्टा इन्द्रं हन्तुं पुत्रं वृत्रासुरमादिदेश । वृत्रासुरो घोरं तपश्चकार । तेन मुदितमानसौ ब्रह्मा शङ्करश्च 'इन्द्रं जीयाः' इत्युदीर्य वृत्रासुराय वरं ददतुः । ब्रह्मज्ञानी सन्नपि वरेण उन्मत्तो वृत्रासुर इन्द्रेण सह योद्धुं तत्परोऽभवत् । स देवान् कठोरतया पीडयामास । स स्वर्गादिन्द्रमपसार्य तत्र स्वाधिकारं स्थापयामास । भृशं भीता देवाः प्रजापतिं सर्वं निवेदयामासुः । तदनु इन्द्रादयो देवाः प्रजापतिश्चासुराद्रक्षितुं हरि मुपाजग्मुः । हरिस्तान् महर्षेर्दधीचेः समीपं गत्वा तस्यास्थि याचितुं परामर्शं ददौ । हरिणा दधीचिरस्थि दास्यतीति देवेषु विश्वासश्च समुद्भावितः । देवा हर्षभरेण मनसा दधीचिमुपजग्मुः । सादरं प्रणम्य इन्द्रः कातरस्वरेण न्यवेदयामास, "महर्षे ! वृत्रासुरेण पीडिता वयं भवच्छरणं समुपागताः । वयं भवतोऽस्थिभिरायुधं घटयामः, तेन तं निहन्तुं प्रभवामः । कृपया स्वास्थीनि अस्मभ्यं प्रयच्छतु ।" इन्द्रस्य वचनं श्रुत्वा दधीचिर्नितरां तुतोष । स आह, "मम शरीरं युष्माकमुपकाराय एवास्ति । अहं युष्मभ्यं स्वशरीरं सहर्षं ददामि । कार्यं साधयन्तु ।" इत्थं निगद्य नयने निमील्य च स समाधिस्थो बभूव । गावो मृतस्य दधीचेः शरीरं लिलिहुरस्थीनि च प्रकाशं निन्युः । शिल्पी विश्वकर्मास्थिभिर्वज्रायुधं निर्माय देवराजाय इन्द्राय ददौ । तेन इन्द्रो वृत्रासुरं जघान । दधीचेरात्मोत्सर्गेण देवा वृत्रासुरभयान्मुक्तिमवापुः ।

द्वितीयवृत्तस्यानुसारेण देवासुरसङ्ग्रामस्य पश्चाद् देवाः स्वास्त्राणि दधीचेः सन्निधौ स्थापयामासुः । चिरकाले व्यतीतेऽपि देवास्तानि प्रतिग्रहीतुं नाजग्मुः । दधीचिरस्त्राणां तेजो जले सम्मेल्य पपौ । यदा देवाः स्वास्त्राण्यभियाचितुमृषिमुपागच्छन् तदा स सकलवृत्तान्तं संश्राव्य स्वस्यैवास्थीनि ददौ ।

दधीचिर्यानि कर्माणि व्यधात्तानि सर्वाणि परोपकाराय स्वाभूवन् । दानदयापरोपकारैरसौ पौराणिकसाहित्येषु समादरणीयो वर्तते । अधुनापि जना दाननिधिं दयानिधानञ्च दधीचिं वारंवारं स्मरन्ति । अस्य प्रेरणया स्वधनं कदाचित् प्राणाँश्च परहिताय लोककल्याणाय च दित्सन्ति । साम्प्रतमपि दधीचेः स्मृतिशेषाणि स्थानानि सन्ति । कुरुक्षेत्रे दधीचितीर्थं प्रसिद्धं वर्तते । नैमिषारण्ये विद्यमानस्य दधीचिमन्दिरस्य शिवलिङ्गमनेनैव स्थापितमस्तीति जनश्रुतिर्विद्यते । नैमिषारण्यस्य मिसरिखस्थाने अहमदावादवर्तिनि सावरमत्याश्रमे च दधीचेराश्रम आसीदिति जनविश्वासो वर्तते । केचिन्नेपालस्य दैलेखजनपदस्य डुङ्गेश्वरमस्य ऋषेराश्रमस्थलं प्रमाणयन्ति । 'नारायणकवचम्' दधीचिरेव लिलेख । जनाः शक्तये शान्तये च कवचमिदं पठन्ति । अन्यायस्योपरि न्यायस्यासत्यस्योपरि सत्यस्य च विजयाय परेषां रक्षणाय हिताय च त्यागादपरो धर्मो न विद्यत इति दधीचेर्जीवनवृत्तादवगन्तुं शक्यते । 'न च धर्मो दयापरः' इत्युक्तिर्दधीचेर्जीवनचरितं सङ्गच्छते । दयालोरस्य ऋषेः परहितपरायणजीवनं परोपकाराय नः सदैव प्रेरयति ।

## अभ्यासः

### श्रवणं भाषणञ्च

१. **दधीचेर्विषये ज्ञातपूर्वान् विषयान् कक्षायां श्रावयत ।**

२. **पदानां शुद्धोच्चारणं कुरुत**

दध्यङ्ग्य, दध्यञ्च, अगृहणन्, ब्रह्मज्ञानी, व्यतीतेऽपि, डुङ्गेश्वरमस्य, ऋषेराश्रमस्थलम्, अन्यायस्योपरि, इत्युक्तिः, हृदाकर्षकः

३. **पाठस्य द्वितीयानुच्छेदस्य वाचनं श्रुत्वा तथैव वाचनाभ्यासं कुरुत ।**

४. **सन्धियुतानि समस्तानि च पदानि पृथक्कृत्य अधस्तनसारिण्यां लिखत**

नानाविद्यानाम्, तत्त्वदर्शी, दयादानकल्याणकर्मभिः, ऋग्वेदभागवतदेवीभागवतादिग्रन्थेषु, इत्युक्तम्, मधुविद्या, अश्वमुखात्, विद्याराशेः, सतीपतिम्, चिन्ताकुलः, हठाधीनः, हितवचांसि, इन्द्रस्ताम्, तपोभ्रंशनाय, हृदाकर्षकः, अखिलजीवनचरितम्, प्रथमवृत्तस्य, स्वास्थीनि, अधुनापि, दधीचेराश्रमः, असत्यस्योपरि, त्यागादपरः

| सन्धियुतम् | समस्तम् | समस्तं सन्धियुतञ्च |
|---|---|---|
| ..................................... | ..................................... | ..................................... |

५. परोपकाराय लोककल्याणाय वात्मोत्सर्गिणोः कयोश्चिद्द्वयोर्महापुरुषयोर्नाम्नी कथयत ।

६. अधस्तनक्रियापदानां धातुं लकारं कालञ्च कथयत

समाचचार, जज्ञे, आदिदेश, चकार, ददतुः, स्थापयामास, निन्युः, स्थापयामासुः, जग्मुः, पपौ, ददौ, प्रमाणयन्ति, लिलेख, सङ्गच्छते

७. स्वसमुदायवासिनं कञ्चन साधुं परोपकारिणं समाजसेविनं वा मिलित्वा तस्य जीवनचरितं पृच्छत ।

८. सर्वेषां सहपाठिनां सहभागितायां 'परोपकाराय सतां विभूतयः' इत्यस्मिन् विषये कक्षायां वक्तृताप्रतियोगितां समायोजयत ।

९. दधीचेर्जीवनवृत्ताद् यत् शिक्षितं तदभिव्यञ्जनं कुरुत ।

१०. दधीचेः कथां स्वशब्दैः श्रावयत ।

११. अस्थियाचनसमये देवराजेन इन्द्रेण दधीचिसमक्षमुक्तानि वचांसि साभिनयं वदत ।

## पठनम्

१. पाठस्य चतुर्थमनुच्छेदमुच्चैर्गिरा पठत ।

२. पाठस्य पञ्चममनुच्छेदं पठित्वा तिङन्तपदानि कृदन्ताव्ययानि च चिह्नीकुरुत ।

३. पाठस्य मौनपठनेनाज्ञातार्थानि पदानि सङ्कलय्य कोशसाहाय्येनार्थानन्विषत ।

४. पाठं संपठ्य सन्धियुतपदानि सङ्कलयत ।

५. पाठस्य तृतीयमनुच्छेदं पठित्वा अधस्तनप्रश्नानुत्तरयत

(क) दधीचिः केन ख्यातनामास्ति ?

(ख) को यज्ञं समायोजयाञ्चकार ?

(ग) यज्ञे के आमन्त्रिता बभूवुः ?

(घ) यज्ञे कोऽनामन्त्रितः ?

(ङ) दधीचिः किमर्थं चिन्ताकुलो बभूव ?

(च) दधीचिर्दक्षं किं निवेदयामास ?

(छ) दक्षस्योपेक्षया दधीचिः किमनुबभूव ?

(ज) 'हठाधीनः' इति कस्य विशेषणम् ?

(झ) सत्याः पतेः पितुश्च नामनी के ?

(ञ) 'जामातरः' इति पदस्य प्रातिपदिक-विभक्ति-वचन-लिङ्गानि निर्दिश्य अर्थापनञ्च कुरुत ।

(ट) 'निर्जगाम' इत्यत्र उपसर्ग-धातु-लकार-पद-विभक्ति-वचन-पुरुषान् निर्दिशत ।

(ठ) अनुच्छेदाल्ल्यबन्तपदानामन्वेषणं कुरुत ।

(ड) 'भूयः' इत्यव्ययपदं प्रयुज्य वाक्यमेकं रचयत ।

(ढ) अनुच्छेदे प्रयुक्तं तृतीयान्तकर्तृपदं तस्य कर्म चान्विषत ।

(ण) भूतानद्यतनपरोक्षेऽर्थे कस्य लकारस्य क्रियापदानां प्रयोगः कर्तव्यः ? उदाहरणमेकं दत्त ।

**६. पाठमनुसृत्य दधिचीन्द्रयोः संवादवाक्यानि सख्या सह साभिनयं पठत ।**

**७. अधस्तनगद्यं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत**

## नारीसम्मानः

वयं समाजे निवसामः । पशूनां समूहः समजस्तं विहाय अन्येषां प्राणिनां समुदायः समाजो निगद्यते । मानवानां समाजोऽपि विविधतापूर्णो भवति- सभ्योऽसभ्यः, शिक्षितोऽशिक्षितः, समृद्धो विपन्नः, विकसितोऽविकसितश्च । सभ्यसमाजस्य कानिचन वैशिष्ट्यानि भवन्ति यानि तस्य सभ्यतां द्योतयन्ति । नारीसम्मान एतादृशं वैशिष्ट्यं वर्तते । नारीसम्मानेन समाजः कियान् विकसितोऽस्तीति ज्ञातुं शक्यते । नारीसम्मान आर्यसंस्कृतेः सनातनी परम्परा वर्तते । नारीणां वयसोऽनुरूपं विविधा अवस्था भवन्ति । कन्याया धर्मपत्न्या मातुश्च रूपेण इमाः सदैव पूज्याः संरक्षणीया वन्दनीयाश्च सन्ति । नार्यो देवीस्वरूपिण्यः सन्ति । वयं महाकालीं महालक्ष्मीं महासरस्वतीञ्च सश्रद्धं पूजयामः । काले काले नवदुर्गाश्च सविधि प्रपूजयामः । कुमारीपूजनमस्माकं मौलिकी सांस्कृतिकपरम्परा वर्तते या वैदेशिकानामपि हृदयं नितरां समाकर्षति । एतान्यखिलानि कार्याणि नारीसम्मानस्यैवोत्तमान्युदाहरणानि मन्तुं शक्यन्ते । इत्थं परस्परं नारीसम्मानेन देवीपूजनं देवीपूजनेन नारीसम्मानो जायते । मनुना नारीपूजनेन देवता रमन्ते इति यदुक्तं तत्सत्यमेव । नारीणां सम्मानपूजनाभ्यां बहवो लाभाः

समुल्लसन्ति । नारीपूजनेन देवता रमन्ते, पितरश्च मोदन्ते, कदाचारा विरमन्ति, परिवारः प्रसीदति, रामा रमारूपेण परिवर्तन्ते । परिवारे, समाजे, देशे विश्वस्मिन् विश्वे च सद्भावसमभावौ प्रवर्धेते । जना ज्ञानिनो भवन्ति समाजश्चोन्नतिपथमवलम्बते । समाजस्यायं नियमोऽस्ति यद्ये स्वकर्तव्यं निष्ठया सम्यक् परिपालयन्ति त एवाधिकं सम्मानं प्राप्नुवन्ति । तेषामेव पूजनं गुणकीर्तनञ्च विधीयते । शिक्षया समानावसरप्रदानेन संरक्षणेन च नार्यः सर्वतोऽग्रगामिन्यो विधातव्याः । ततस्ताः स्वकर्तव्यं पालयितुमितोऽप्यधिकं जागरूका भवन्ति । नारी पुरुषान्न कदाप्यवरा वर्तते । प्रकृत्या शरीरं विहाय नारीपुरुषयोः कोऽपि भेदो विहितो नास्ति । पुरुषो यत् कर्तुं शक्नोति नारी च तत् कर्तुं प्रभवति । प्राचीनकालस्य गार्गी-मैत्रेयी-कात्यायनीप्रभृतिविदुषीणां नामानि वयमधुनापि शृणुमः । ता ब्रह्मविद्याविद आसन् । महर्षिणा याज्ञवल्क्येनान्यैर्विद्वद्धौरेयैश्च सह ताः शास्त्रार्थं चक्रुः । अतुल्यशौर्येण शत्रून् पराजित्य राष्ट्रस्य, जनताया धर्मस्य च संरक्षणाय कृतात्मोत्सर्गिणीनां नारीणामुदाहरणमितिहासे प्राप्यते । अस्मिन् समयेऽपि नार्यो विविधक्षेत्रेषु विलक्षणकार्याणि प्रदर्श्य विश्वकीर्तिमर्जयन्त्यः सन्ति । वीराङ्गना विदुष्यः कर्तव्यपरायणाः स्नेहसौख्यादिस्रोतस्विन्यो देव्याकृतयश्च नार्यः सर्वैः सम्मान्याः समादरणीयाश्च विद्यन्ते ।

## प्रश्नाः

**(अ) अनुच्छेदाद् गृहीतं वाक्यं पठित्वा प्रश्नान् उत्तरयत**

वीराङ्गना विदुष्यः कर्तव्यपरायणाः स्नेहसौख्यादेस्रोतस्विन्यो देव्याकृतयश्च नार्यः सर्वैः सम्मान्याः समादरणीयाश्च विद्यन्ते ।

(क) वाक्यमिदं कस्मिन् वाच्ये वर्तते ?

(ख) अत्र बहुविशेषणयुतं विशेष्यपदं किम् ? तस्य विभक्तिवचने के ? कानि च तद्विशेषणानि ?

(ग) 'देव्याकृतयश्च' इत्यस्य विग्रहं सन्धिच्छेदञ्च कुरुत ।

(घ) अत्र तृतीयान्तपदं किम् ? किञ्च षष्ठ्यन्तम् ?

(ङ) 'विदुष्यः' इत्यस्य प्रातिपदिकविभक्ती निर्दिशत ।

(च) वाक्यमिदं पुँल्लिङ्गे परिवर्तयत ।

(छ) 'समादरणीयाः' इत्यस्य धातु-उपसर्ग-कृत्प्रत्यय-प्रातिपदिक-स्त्रीप्रत्यय-विभक्ति-वचनानि निर्दिशत ।

(छ) शिक्षकात् कृत्यप्रत्ययान्तपदानां परिचयमवाप्य तव्य-यत्-ण्यत्-अनीयर्प्रत्ययैर्निष्पन्नानां केषाञ्चन चतुर्णां पदानां वाक्येषु प्रयोगं प्रदर्शयत ।

(आ) एकवाक्ये प्रश्नानुत्तरयत

(क) समाजसमजयोः को भेदः ?

(ख) प्रकृत्या नारीपुरुषयोः कस्मिन् भेदो वर्तते ?

(ग) देवताः केन रमन्ते ?

(घ) सभ्यसमाजे नारीणां किं स्थानम् ?

(ङ) नारीणामवस्थां विलोक्य समाजस्य विकासः कथं परिमीयते ?

(च) एकस्या नार्या विविधरूपाणि कानि ?

(छ) नार्यः केन जागरुका जायन्ते ?

(ज) 'सह' इत्यव्ययस्य योगे का विभक्तिर्विधेया ?

(झ) नारीसम्मानद्योतकं वाक्यमेकं विलिखत ।

(इ) सङ्क्षेपेणोत्तरयत

(क) सभ्यसमाजाय आवश्यकतत्त्वानि विलिखत ।

(ख) नारीशिक्षाया महत्त्वं पञ्चसु वाक्येषु प्रतिपादयत ।

(ग) अस्माकं नारीसम्मानपरम्परां सोदाहरणं वर्णयत ।

(घ) अनुच्छेदस्यास्य सारांशं वाक्यसप्तके लिखत ।

(ङ) अनुच्छेदात् पञ्च प्रश्नान् निर्मात ।

(छ) नारीसमाजयोरभिन्नसम्बन्धं विकासदृष्ट्या प्रकाशयत ।

(ज) परिवारस्य, समाजस्य राष्ट्रस्य च विकासाय नारीशक्तेर्योगदानं कथं प्रवर्धनीयम् ?

**(ई) नारीदिवसस्यावसरे स्वसमुदायस्य लब्धप्रतिष्ठां नारीमतिथिरूपेणाहूय सम्मानकार्यक्रमं समायोजयत । तस्या जीवनवृत्तलेखनाय आवश्यकविवरणसङ्कलनार्थान् विविधप्रश्नान् निर्माय तां पृच्छत । सङ्गृहीतायाः सामग्र्या आधारेण जीवनवृत्तं विलिख्य कक्षायां श्रावयत । तदनु सहपाठिनां शिक्षकस्य च साहाय्येन यथावश्यकं संशोधनं विधाय तस्यै प्रेषयत ।**

८. गद्यं संपठ्य अधस्तनप्रश्नानुत्तरयत

मिर्जागालिब उर्दूभाषायाः ख्यातनामा साहित्यकार आसीत् । तस्य पूर्णनाम मिर्जा-असदुल्लाह-खाँ-गालिब आसीत् । १७९६ तमे खिस्टाब्दे लब्धजन्मनस्तस्य मातापितरौ अवदुल्ला-बेग-खाँ, आगाका चाभवताम् । पञ्चवर्षाणां वयसि गालिबः पितृवियोगमन्वभवत् । तस्य विवाहस्त्रयोदशवर्षेऽभवत् । यदा गालिबश्चतुर्दशवर्षं प्राविशत्तदा तेन हुरमुज्दनामधेयो विद्वज्जनो मिलितः । तस्मात् प्रकाण्डविदुषो

गालिबः फारसीभाषां सुष्ठु अधीतवान् । पूर्वं गालिब 'असदे' इत्युपनाम्ना परिचित आसीत्, पश्चाद् 'गालिब' इत्युपनामाङ्कयत्, तेनैव काव्यकीर्तिञ्चालभत । मिर्जा बाल्यकालादेव कवितां लिखति स्म । स कवितालेखनाय वातावरणेन प्रभावितो व्यक्तिभिः प्रेरितश्चासीत् । तस्य प्रारम्भिककविताः फारसीभाषायामासन् परं पश्चात् स उर्दूभाषायां काव्यं रचितवान् । तस्य कविताः सरला गभीराः काव्यसौन्दर्यभरिताश्च सन्ति । कमपि विषयं नवीनदृष्ट्या विलोक्य कलात्मकतया वर्णयितुं स समर्थ आसीत् । कवावस्मिन् जीवनविषयिणी दार्शनिकदृष्टिरपि प्राप्यते । गालिबो मानवीयभावनाया उत्कृष्टः कविर्मन्यते । तस्य गद्यञ्च उर्दूसाहित्ये लोकप्रियं वर्तते । तेन समये समये विभिन्नाभ्यो व्यक्तिभ्यो लिखितानि पत्राणि उर्दूसाहित्यस्यामूल्यनिधिरस्ति । गालिबो व्यक्तिगतजीवनेऽपि विनोदप्रियः प्रत्युत्पन्नमतिश्चासीत् । विविधाः कथास्तस्य तद्वैशिष्ट्यं प्रमाणयन्ति । सुभाषितभरिता तस्य वाणी सहृदयानां हृदयं सद्यः प्रीणयति । जीवनस्यान्तकाले गालिबः शारीरिककष्टेन पीडितोऽभवत् । १८६९ तमे ख्रिष्टाब्दे स प्राणानत्यजत् । उर्दूसाहित्यप्रेमिणस्तं तस्मिन् साहित्ये भासमानं चन्द्रमिव मानयन्ति । केचन गालिबं संस्कृतसाहित्यस्य महाकविना कालिदासेन सह तोलयितुमपीच्छन्ति ।

## प्रश्नाः

(क) गद्यतः पञ्चसूत्रवाक्यानां दोहनं विधत्त ।

(ख) गद्यस्य सारांशं विलिखत ।

(ग) गालिबस्य प्रसिद्धेः कारणं सूत्ररूपेण लिखत ।

(घ) फारसीभाषासाहित्ययोर्विकासाय गालिबस्य योगदानं वर्णयत ।

(ङ) अनुच्छेदात् पञ्च बोधप्रश्नान् निर्मात ।

## लेखनम्

**१. पदानामर्थापनेन सह वाक्ये प्रयोगं प्रदर्शयत**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| (क) | सङ्गच्छते | (ख) | दयापरः | (ग) | समाधिस्थः | (घ) | निगद्य |
| (ङ) | उपजग्मुः | (च) | तदनु | (छ) | भृशम् | (ज) | जीयाः |
| (झ) | हन्तुम् | (ञ) | परस्परम् | (ट) | विहाय | (ठ) | सन्नपि |
| (ड) | निखिलम् | (ढ) | कर्तिष्यति | (ण) | जानाति स्म | (त) | अधीतवान् |
| (थ) | प्रोच्यते | (द) | सञ्जातम् | (ध) | प्रशंस्यते | (न) | तत्त्वदर्शी |

**२. सन्धिं विच्छेदयत**

चाभवत्, ऋषेर्भृगोः, कुत्रचिद्दधीचिः, इन्द्रस्याज्ञायाः, महाभारतेऽपि, इत्युदीर्य, भवतोऽस्थिभिः,

व्यतीतेऽपि, स्वास्त्राण्यभियाचितुम्, स्वस्यैवास्थीनि, प्राणाँश्च, सावरमत्याश्रमे, दधीचिरेव, त्यागादपरम्, सदैव

३. **अविस्तरेण पाठानुकूलमुत्तरं लिखत**

(क) देवाः कस्माद् भयभीता बभूवुः ?

(ख) वृत्रासुरः केन कैरजेयो बभूव ?

(ग) दधीचेः प्रसिद्धिः केन कारणेन सर्वोच्चतामुद्गता ?

(घ) दधीचेरस्थ्ना को वज्रायुधं निर्मितवान् ?

(ङ) इन्द्रः केन वृत्रासुरं जघान ?

(च) दधीचिः कस्माद् विद्यामधिजगे ?

(छ) इन्द्रो दधीचिं कं शपथं कारयामास ?

(छ) सारस्वतः कयोः पुत्रः ?

(ज) 'दधीचिः' इति संज्ञापदं कथं व्युत्पाद्यते ?

(झ) दधीचिः कथं स्वशरीरं तत्याज ?

(ञ) नेपाले दधीचेराश्रमस्थलं कुत्र मन्यते ?

(ट) वृत्रासुरस्य पितुर्नाम किम् ?

४. **अस्तनप्रश्नान् नातिविस्तरेणोत्तरयत**

(क) दधीचेर्मातापित्रोर्विषये के मताः प्रचलन्तो विद्यन्ते ?

(ख) देवा वृत्रासुरभयात् कथं मुक्तिमवापुः ?

(ग) दधीचेर्जीवनवृत्तात् किं ज्ञायते ?

(घ) कानि तीर्थानि दधीचेर्नाम्ना साम्प्रतमपि प्रसिद्धानि सन्ति ?

(ङ) दधीचिप्रेरणया जना लोककल्याणाय कथं प्रवर्तन्ते ?

(च) दधीचिसुवर्चसोः पुत्रस्य नाम किम् ?

(छ) लोकहिताय दधिचेर्योगदानं प्रकाशयत ।

(ज) अश्विनीकुमारा दधीचेः कथं विद्यां जगृहुः ?

(झ) त्यागस्य महत्त्वं पाठाधारेण वर्णयत ।

(ञ) 'न च धर्मो दयापरः' इत्यस्याशयं सोदाहरणं प्रकाशयत ।

५. पाठस्य पञ्चमानुच्छेदस्य वाक्यानि लङ्लकारे परिवर्त्य लिखत ।

६. जीवनवृत्तलेखनस्यावश्यकतत्त्वानि यथाक्रमं विवेचयत ।

७. जीवनवृत्तलेखने तथ्याङ्कस्य महत्त्वं वर्णयत ।

८. 'परोपकारः' इति विषयमवलम्ब्य अनुच्छेदमेकं रचयत ।

९. अन्तर्जालादिप्रविधेः सन्दर्भग्रन्थानाञ्च साहाय्येन प्रामाणिकं बहुभिस्स्वीकृतं वा तथ्याङ्कं सङ्गृह्य महर्षेर्वेदव्यासस्य जीवनचरितं प्रकाशयत ।

१०. पौराणिककथनाधारेण दानशीलस्य राज्ञः शिवेर्जीवनवृत्तं विलिखत ।

११. प्रदत्तानि सूत्राण्याधृत्य जीवनवृत्तं रचयत

**प्रसिद्धनाम** - डा. स्वामी रामानन्दगिरिः

**पूर्वाश्रमनाम** - रामप्रसादसुवेदी

**जन्म** - २००३ तमस्य वैक्रमाब्दस्य जेष्ठमासस्य १० तमे दिनाङ्के

**जन्मस्थानम्** - धादिङजनपदस्य केवलपुरग्रामम्

**पिता** - पं. पूर्णप्रसादसुवेदी

**पितामहः** - पं. पूर्णचन्द्रसुवेदी

**विवाहः** - आबालब्रह्मचारी

**सन्न्यासग्रहणम्** - २०४८ तमस्य विक्रमवर्षस्य फाल्गुनमासे

**सन्यासगुरुः** - महामण्डलेश्वरः स्वामी महेशानन्दगिरिः

**औपचारिकी शिक्षा** - विद्यावारिधिपर्यन्तम्

**अध्ययनस्य मूलक्षेत्रम्** - वेदान्तदर्शनम्

**प्रसिद्धिः** - शिक्षासेवी, संस्कृतसेवी, ब्रह्मविद्, अध्यापकः, महेशसंस्कृतगुरुकुलस्य संस्थापकः, सन्न्यासी

**प्रकाशितकृतयः** - माण्डूक्यकारिका, रामगीता, वेदस्तुतिः, श्रीमद्भागवतमहापुराणम्, देवीगीता, दुर्गासप्तशती अध्यात्मरामायणम् इत्येतेषां ग्रन्थानां नेपालीभाषायामनुवादो व्याख्यानञ्च, जनकदर्शनम् (विद्यावारिधिशोधग्रन्थः) ।

**प्रेरककर्माणि** - सकलपारिवारिकबन्धेभ्यो मुक्तो भूत्वा परोपकारायैव स्वजीवनस्य समर्पणम्, **धर्मसंस्कृतेः** संरक्षणाय प्रचाराय च महद्योगदानम्, शिक्षाविकासेऽपूर्वयोगदानम्, आश्रम-**शिक्षालय-** मन्दिरादीनां स्थापनेन सहायहीनेभ्यो आबालवृद्धेभ्यो आवास-शिक्षा-भोजनाद्याधार-भूत-सौविध्यानामाध्यात्मिकज्ञानस्य च प्रदानम् ।

**मानपदव्यः** - पाणिनिपुरस्कारः, गुणराजपुरस्कारः, डा. बलरामजोशीज्ञानविज्ञानपुरस्कारः,

राजर्षिजनकस्मृतिसम्मानः, पृथ्वीबहादुरसिंहकार्की-भक्तकुमारीपुरस्कारः, भारतीखरेलपुरस्कारः, प्रबलगोरखादक्षिणबाहुः, अन्येऽपि विविधपुरस्काराः ।

**ब्रह्मलीनः -** २०७४ तमस्य वैक्रमाब्दस्य आषाढमासस्य २४ तमे दिनाङ्के (सायं सप्तवादने), पशुपतिक्षेत्रस्थशङ्कराचार्यमठे, तनहुँजनपदस्य देवघट्टे कालीगण्डकी त्रिशूल्योः सङ्गमे जलसमाधिनाऽन्त्येष्टिः ।

## अनुप्रयुक्तव्याकरणम्

### भूतकालप्रयोगः

१. **वाक्यानि पठित्वा यथानिर्देशं कुरुत**

- ह्यः शनिवासर आसीत्, वयं भ्रमणाय अगच्छाम ।
- त्वमद्य कतिवादने प्रातर्भोजनमकृथाः ?
- त्रेतायां श्रीरामो एकादशसहस्रवर्षाणि यावत् शासनं चकार ।
- स अद्य ह्यो वा रोगेण सङ्क्रमितोऽभूत् ।
- शिशुः शीघ्रमैधिष्ट ।
- वायुयानञ्चेत् समाचालीद् विदेशमहमयासिषम् ।
- गतवर्षे स दशमकक्षामुदतरत् ।
- गोपालो गा वनमगमयत् ।
- वेदव्यासो महाभारतं विरचितवान् ।
- अहं बाल्यकाले मातुरुत्सङ्गे तिष्ठामि स्म ।
- मया द्वे कविते श्रुते ।
- परह्यो युष्माभिः किमक्रियत ?
- दधीचिना स्वास्थीनि देवराजाय ददिरे ।
- ममानुजेन वेदोऽपाठि ।
- गुरुणा त्वं उपदिश्यसे स्म ।

(क) उपरितनवाक्यानि कस्मिन् काले वर्तन्ते ?

(ख) वाक्येषु कर्तरि प्रयुक्तानां तिङन्तक्रियापदानां लकारनिर्देशं विधत्त ।

(ग) कालसूचकसुबन्तपदानां प्रयोगः कुत्र कुत्र विद्यते ? तत्र को लकारः प्रयुक्तो विद्यते ?

(घ) अत्र कानि वाक्यानि कर्मवाचीनि वर्तन्ते ? तेषां लकार-पुरुष-वचननिर्देशनं कुरुत ।

(ङ) सोपसर्गक्रियापदानि परिचित्य तेषां धातूपसर्ग-विभक्ति-वचनानि निर्दिशत ।

(ङ) भूतकाले कुत्र कस्य लकारः प्रयोज्यः ?

(च) आप्-धातोः कर्तरि लिटि लङि लुङि च रूपाणि विलिखत ।

(छ) पा-धातोः कर्तृकर्मणोर्लङि रूपाणि विलिखत ।

(ज) 'स्म' इत्यस्य योगे को लकारो विधीयते ? तस्य च कोऽर्थः ?

(झ) णिजन्तस्य गम्-धातोर्लिटि लङि लुङि च रूपाणि लिखत ।

(ञ) शिक्षकसाहाय्येन उपरितनवाक्यानां वाच्यपरिवर्तनं कुरुत ।

(ट) 'विरचितवान्', 'श्रुते' इत्यनयोः कौ कृत्प्रत्ययौ ? तयोर्वाच्यमर्थञ्च निर्दिशत ।

भूतकालेन व्यतीतसमयो द्योत्यते, अद्यतनानद्यतन-परोक्ष-गौण-व्यामिश्र-सामान्यभेदेन भूतकालः षड्विधो मन्यते । संस्कृतव्याकरणे भूतकालद्योतकास्त्रयो लकाराः सन्ति, लिट् लङ् लुङ् च । अतो भूतक्रियावृत्तौ द्योत्यायामर्थमनुसृत्य एतेषां कस्यचिदेकस्य प्रयोगो विधीयते ।अद्यतनभिन्नव्यतीतकालो भूतानद्यतनस्तत्र लङ्-लकारः प्रयोज्यः ।यदि वाक्येषु ह्यः, परह्यः, इत्याद्यनद्यतनभूतकालद्योतकपदानि प्रयुज्यन्ते चेत् तत्र लङ्-लकारजानि क्रियापदान्येव प्रयोक्तव्यानि भवन्ति । यथा - वयं ह्यः कारकमपठाम । अनद्यतनसूचकपदेऽप्रयुज्यमानेऽपि यत्र लङ् प्रयुज्यते स च क्रियावृत्तेर्भूतानद्यतनत्वं द्योतयति । यथा - पिता मन्दिरमगच्छत्, अत्र प्रयुक्तेन अगच्छदिति लङः क्रियया पितृरूपकर्ता गमनक्रियायाः कार्यव्यापारान् भूतानद्यतने काल एव समपादयदिति द्योत्यते ।

परोक्षत्वं प्रयोक्तुरिन्द्रियागोचरत्वम्, परोक्षानद्यतने लिट्-लकारो प्रयुज्यते । यथा - द्वापरे युधिष्ठिरो राजा बभूव ।

अद्यतन-सामान्य-व्यामिश्र-गौणभूते लुङ्लकारजानां क्रियापदानां प्रयोगोऽपेक्षते । अद्यतने यथा - अहम् (अद्य) प्रातः सार्धचतुर्वादनेऽजागरिषम् । विशेषविवक्षारहितो व्यतीतः कालः भूतसामान्यः, यथा - स गृहमकृत । अद्यतनस्य भूतानद्यतनस्य च मिश्रितो कालो व्यामिश्रभूतः, यथा - ते ह्योऽद्य वाऽगमन् । आशंसादीनामतिदिश्यमानो भूतकालो गौणभूतः, यथा - पर्जन्यश्चेदवर्षीद् (वयं) धान्यमवाप्स्म ।

क्तक्तवतुप्रत्ययान्तपदानि प्रायेण भूतकालद्योतकानि भवन्ति परं तत्र अद्यतनादिभेदानां विवक्षा नैव भवति । यथा - मया पाठाः पठिताः । ईशो जगत् कृतवान् ।

भूताभ्यस्तक्रियावृत्तौ द्योत्यायां 'स्म' इत्युपपदकस्य लट्-लकारस्य प्रयोगो भवति । यथा - स बाल्ये मोदकं खादति स्म ।

२. **प्रथमे प्रश्ने प्रदत्तेषु कतमं वाक्यं भूतकालस्य कस्य भेदस्योदाहरणमस्तीति सारिण्यां प्रदर्शयत ।**

३. **पाठस्य प्रथमानुच्छेदतो भूतकालिकवाक्यानि सङ्गृह्य तेषां काल-पुरुष-वचननिर्देशं कुरुत ।**

४. **भूतकाले परिवर्तयत**

(क) त्वं पञ्चशतरूप्यकाणि लभसे ।

(ख) ते दण्डिना क्रीडन्ति ।

(ग) भवद्भिः कस्मिन् विषये वार्तालापो क्रियते ?

(घ) चौरा अजा हरन्ति ।

(ङ) स अद्य प्रातः पितरौ नमति ।

५. **लङ्लकारस्य क्रियापदानि लिटि परिवर्त्य पाठस्य तृतीयानुच्छेदस्यानुलेखनं कुरुत ।**

६. **भूतकालस्य क्रियापदानि प्रयुज्य एकां लघुकथां विरचयत ।**

७. **लिट्-लकारस्य प्रयोगेण पञ्चवाक्येषु कस्यचित् पौराणिकपात्रस्य जीवनवृत्तं लिखत ।**

## कारकप्रयोगः

८. **अधस्तनगद्यांशं पठित्वा षष्ठ्यन्तपदानि चिह्नीकुरुत**

महेशस्य गृहं सुदूरपश्चिमप्रदेशान्तर्गतस्य कैलालीजनपदस्य धनगढीनगरे वर्तते । तस्य एका पुत्री एकः पुत्रः पत्नी च सन्ति । पुत्र्या नाम भुवनेश्वरी अस्ति । सा बङ्गलादेशस्य राजधान्यां ढाकानगरे चिकित्साविषयं पठति परन्तु सम्प्रति कोरोणानामकसङ्क्रामकरोगस्य विश्वव्यापिसङ्क्रमणस्य कारणेन नियमितपठनपाठनप्रक्रियाऽवरुद्धा जाताऽस्ति । अस्या वैश्विक्याः समस्याया न्यूनीकरणाय अस्माकं देशेन सह विश्वस्याधिकतररोगाक्रान्तदेशैः स्वजनपदेषु परिपिधानादेशा घोषिता वर्तन्ते । परिपिधानावधौ वायुयानाद्यावागमनसाधनानां सञ्चालनं निषिद्धमस्ति । अत एव सत्यवकाशेऽपि सा गृहस्य प्रत्यागमनाय असमर्था जाता । सङ्कटापन्ने समये स्वजनेभ्यः स्वदेशाश्च दूरं निवसनेनन गृहं प्रत्यावर्तितुमेकाकिनीमनुभवन्ती सा प्रतिक्षणं मातुः स्मरति । पितुर्भ्रातुश्च स्मरणमाधिक्येन वर्धमानमस्ति । परिवारजनैः सह प्रतिदिनमन्तर्जालप्रविधेर्दूरभाषस्य च साहाय्येन वार्तालापं साधयन्ती सत्यपि सा तैस्साकं मेलनस्य हेतोर्व्याकुला अस्ति, तथैव स्थितिरत्र मातापित्रोर्भ्रातुश्च विद्यते । परन्तु परिवारमेलनस्य कृते तेषां प्रतीक्षाया विकल्पो नास्ति । निकटभविष्ये परिपिधानेऽपसार्यमानेऽपि तस्या झटिति स्वदेशागमनं सुकरं न भविष्यति । परिपिधानेन तस्या वार्षिकपरीक्षाया नियमिततालिकाऽपि अवरुध्यमाना वर्तते । परीक्षाया हेतोरपि तया तत्रैव स्थातव्यं भविष्यति । परीक्षायाः समाप्तेः पश्चादेव सा स्वगृहं प्रत्यावर्तितुं प्रभविष्यति ।

९. **प्रदत्तानि पदान्यासृत्य वाक्येषु षष्ठीविभक्तेः प्रयोगं दर्शयत**

हेतोः, कृते, दूरम्, निकटम्, आन्तिकम्, मम, तस्याः, युष्माकम्, सताम्, स्मरति, उपकाराय, करणाय, पोषणार्थम्, गमनम्, कृतिः, कर्ता, पठनम्

१०. **प्रदत्तसुभाषितात् चत्वारि वाक्यानि रचयत**

अलसस्य कुतो विद्याऽविद्यस्य कुतो धनम् ?

अधनस्य कुतो मित्रममित्रस्य कुतः सुखम् ?

११. **षष्ठीविभक्तेः प्रयोगं विधाय विस्तरेण स्वपरिचयं दत्त ।**

१२. **पाठात् षष्ठ्यन्तपदानि संगृह्य तेषां स्ववाक्येषु प्रयोगं विधत्त ।**

-0-

# गुरुविद्या वरीयसी




विक्रमसंवत्सरस्य प्रारभणादासन्नशतत्रयवर्षपूर्वं भारतवर्षे षोडश महाजनपदा आसन् । तेषु मगधो विशालतमः सर्वाधिकशक्तिशाली चासीत् । तत्र नन्दवंशः शासनं चालयति स्म । राज्ञा महापद्मनन्देन स्थापिते नन्दवंशस्य शासने धनानन्दो राजसिंहासने आसीत् । स क्रूरो विलासी विवेकहीनः स्त्रैणश्च बभूव । जनताया अधिककरं गृहीत्वा स विलासं करोति स्म । तेन जनपदो दुर्बलायमान आसीत् । जनपदानां राज्ञां मध्ये परस्परं वैमनस्यमवर्धत ।

यवनसम्राट् सिकन्दरो भारतवर्षे सैन्यविस्तारमकरोत् । तस्योत्तराधिकारी सेकुलसश्च तामेव नीतिमङ्गीकृतवान् । तादृशीं दशामवलोक्य कौटिल्यश्चिन्तितो जातः । स भारतवर्षे सिकन्दरस्य प्रवेशं रोद्धुमिच्छति स्म । मगधजनपदस्य सर्वसामर्थ्यं निभाल्य कौटिल्यो राजानं धनानन्दं मेलितुं गतवान् । स राजानं सिकन्दरस्य प्रवेशनिरोधनाय नेतृत्वं कर्तुं न्यवेदयत् । स विलासवृत्तिं त्यक्तुमप्यन्वरुणत् । मदोन्मत्ताय धनानन्दाय कौटिल्यस्य परामर्शनं न रोचते स्म । स कौटिल्यं सापमानं प्रासादाद् बहिर्निष्काशयत् । तदवधौ कौटिल्यस्य शिखाश्रथयत् । कौटिल्यः प्रतिजज्ञौ, “त्वादृशस्य

दुराचारिणोऽभिमानिनश्च राज्ञो मगधस्य राजसिंहासनाद्यावन्नापसारयिष्यामि तावत्तवापमानेन शिथिलां शिखां न भन्त्स्यामि ।"

धनानन्दस्यापमानेन दग्धहृदयः कौटिल्यो नवीनराजमन्वेष्टुमितस्ततश्चचाल । तस्मिन् क्रमे स कञ्चन ग्रामं प्रापत् । तत्र बालका राजप्रजाक्रीडां क्रीडन्त आसन् । तेष्वेको बालक आत्मानं राजानं मन्यमानोऽन्यानादिशति स्म । अन्ये तमनुसरन्त आसन् । तं बालकं वीक्ष्य कौटिल्यः पुलकितोऽभवत् । तस्मिन् बालके स भारतवर्षस्य भविष्यं ददर्श । बालकस्य परीक्षणाभिप्रायेण स आत्मानं भिक्षो रूपेण परिवर्तितं चकार साहाय्यञ्चाभ्ययाचत । बालकः कौटिल्यं गा नीत्वा गन्तुमादिशत् तत्र कस्याप्यवरोधो न भविष्यतीति च समाश्वासयत् । स एव बालकश्चन्द्रगुप्तमौर्य आसीत् । तात्कालिकगान्धारमहाजनपदस्य राजधानी तक्षशिला आसीत् । तत्स्थानं विद्यायाः केन्द्रमभवत् । कौटिल्यस्तत्र वेद-वेदाङ्गार्थशास्त्र-नीतिशास्त्र-राजशास्त्र-दर्शनशास्त्र-सामुद्रिकशास्त्र-चिकित्साशास्त्र-ज्योतिषशास्त्र-युद्धनीति-कूटनीति-वैदेशिकसम्बन्धादिविषयानधीतवान् । स तत्रैवाध्यापकश्चाभवत् । कौटिल्य आत्मनः सर्वा विद्या अध्येतुं चन्द्रगुप्तं परामृष्टवान् । स अष्टवर्षाणि यावत् तक्षशिलायां चन्द्रगुप्तं विविधविद्या अध्यापयामास । कौटिल्येन स सैन्यप्रशिक्षणेन क्षमः कारितः ।

कौटिल्यो भारतवर्षस्यैकीकरणं विश्वविजयिनः सिकन्दरात् सेलुकसाच्च स्वराष्ट्ररक्षणं मगधराज्यात् सधनानन्दं नन्दवंशस्योन्मूलनञ्चापेक्षते स्म । तत्प्रयोजनसिद्धये स चन्द्रगुप्तं सर्वविधोपायैः प्राशिक्षयत् । स शास्त्रशस्त्रविद्ययोर्निपुणोऽभवत् । कौटिल्यस्य मार्गनिर्देशनेन चन्द्रगुप्तो योग्यः शिष्यः कुशलनेता चावर्तत । स गुरुं सर्वस्वं मत्वातीव सम्मानयति स्म ।

कौटिल्यश्चन्द्रगुप्ते नेतृत्वक्षमतां विकास्य तं मगधस्य राजधानीं पाटलीपुत्रमाक्रमितुं तत्परमकारयत् । पञ्चसहस्राणां सैनिकानां बलेन चन्द्रगुप्तः पाटलीपुत्रमाक्रामत् । मगधस्य शक्तिशालिनः सैन्यबलस्य पुरतश्चन्द्रगुप्तस्य सैनिका दिनमपि स्थातुं नाशक्नुवन् । गुरुशिष्यौ पलाय्य यत्नेन प्राणान् जुगुप्सतुः । तौ गृहमेकमाश्रित्य बहिर्निवसन्तावास्ताम् । गृहाभ्यन्तरे कश्चन जनः पीडया चक्रन्द । तदैव नारीस्वरः श्रुतः, "त्वं कौटिल्य इव मूर्खोऽसि पुत्र ! स्थाल्या मध्यभागे स्पर्शनात् तप्तकृशरो हस्तं दहत्येव । पार्श्वभागतः खादसि चेन्न तद् दुःखम् ।" कौटिल्यो गृहं प्रविश्य मातरं ववन्दे जगाद च, "मातः, प्रबुद्धोऽस्मीदानीम्, भवत्येव मम गुरुः ।"

कौटिल्यस्य बुद्ध्या निर्देशनेन च चन्द्रगुप्तो भूयोऽपि सैन्यबलं समघटयत् । कौटिल्यश्च वात्स्यायनमुनिवेशेन प्रतिग्राममेत्य जनान् सैन्यबलं प्रविश्य धनानन्दस्य विरुद्धे योद्धुं प्रेरितवान् । स विषकन्याश्च रचयामास । स मगधविरोधिभिस्समीपस्थजनपदैस्सह मैत्रीञ्च स्थापयामास । बहबो

राजानः ससन्धि कौटिल्यचन्द्रगुप्तयोरभियाने प्रत्यक्षेण संलग्ना बभुवुः । पार्श्वभागतो विहितेनाक्रमणेन चन्द्रगुप्तः पाटलीपुत्रं जिगाय । धनानन्दाय देशान्निष्क्रान्तुमनुमतिः प्रदत्ता । स आवश्यकवस्तूनि रथे संस्थाप्य बहिर्ययौ । धनानन्दस्य पुत्री दुर्धरा अनुरागवती सती चन्द्रगुप्तं वृतवती । अनाथो गोपजनेन पालितो बालकश्चन्द्रगुप्तो गुरोः कौटिल्यस्य नीतिं निर्देशनञ्चानुसृत्य विशालमगधराज्यस्य मौर्यवंशीयः प्रथमराजा बभूव । धनानन्दं प्रति कौटिल्यस्य प्रतिशोधस्य शमनं जातम् । उद्दण्डस्यात्याचारिणश्च नन्दवंशस्य शासनं समाप्तम् ।

मगधविजयस्यानन्तरं कौटिल्यस्यैव योजनानुसारेण चन्द्रगुप्तो भारतवर्षस्यैकीकरणं प्रारब्धवान् । स दक्षिणभागं विहाय भारतवर्षस्यैकीकरणं प्रापूरयत्, यवनसम्राजं सिकन्दरं सेलुकसञ्च पराजित्य भारतवर्षं ररक्ष च । कौटिल्यस्य निर्देशनेनैव चन्द्रगुप्तो भारतवर्षस्य चिराय रक्षणस्योद्देश्येन यवनशासकस्य सेलुकसस्य पुत्रीं हेलेननामधेयामुदवहत् ।

चन्द्रगुप्तश्चतुर्विंशतिवर्षाणि भारतवर्षं शशास । तदनु जैनभिक्षुर्भूत्वा सन्न्यासं समाचर्य प्राणानत्यजत् । तस्य पुत्रो विन्दुसारः पौत्रश्चाशोक आस्ताम् । चन्द्रगुप्तेन विस्तारितं राज्यमशोक इतोऽपि विस्तृतं सबलञ्चाकरोत् । मौर्यवंशस्य द्वाचत्वारिंशदधिकशतवर्षीये शासनावधौ नव राजानोऽभवन् । तेषु चन्द्रगुप्तोऽशोकश्च विशेषप्रसिद्धौ स्तः । अशोको बौद्धधर्मस्योन्नतौ च लब्धकीर्तिर्वर्तते ।

कौटिल्यो न केवलं राष्ट्रभक्तः परं मातृभक्तश्चासीत् । एकदा तस्य गृहं कश्चन ज्योतिर्विदाजगाम । गृहे माता पुत्रश्चास्ताम् । कौटिल्यं तस्य जन्मपत्रिकाञ्च विलोक्य ज्योतिर्विन्मातरमवदत्, “अस्मिन् राजयोगो वर्तते । अस्य दन्ते नागराजस्य चिह्नमस्ति । अयं प्रधानमन्त्री भविष्यति ।” तच्छ्रुत्वा माता मां परित्यज्य पुत्रो दूरं गमिष्यतीति भीया चिन्ताकुला बभूव । कौटिल्यः सहसा शिलया स्वदन्तं सन्त्रोट्य मातरं समाश्वासयत्, “मातः ! भवत्याः कृतेऽहं न केवलं राजशासनं परं सहर्षं सर्वं त्यक्तुं शक्नोमि ।”

राज्यस्य गुरुः प्रधानमन्त्री च सन्नपि कौटिल्यः कुटीरे निवसति स्म । कदाचिदेको युनानदेशीयो दूतस्तं मेलितुं तत्र समागतः । दूतोऽगदत्, “भवान् भव्यप्रासादं त्यक्त्वा कथं कुटीरे निवसति ? राजगुरवे प्रधानमन्त्रिणे चैतन्नौचित्यम् ।” कौटिल्यः प्रत्यवदत्, “यद्यहं प्रासादं निवसामि तर्हि जनता कुटीरं निवत्स्यति ।” कौटिल्यस्य वचनेन दूतस्य मनो मुमुदे ।

कौटिल्यो विदेशेष्वपि श्रुतनामासीत् । तं मेलितुं नैकव्यक्तयोऽभिलषन्ति स्म । एकवारं चीनदेशीयः साहसिकयात्री कौटिल्यं मेलितुं सायं तस्य कुटीरं प्रापत् । कौटिल्यस्तैलदीपं प्रज्वाल्य कार्ये निमग्न आसीत् । यदा यात्री कुटीरं प्राविशत्तदा कौटिल्यो ज्वलन्तं दीपं निर्वाप्यापरं दीपं प्राज्वालयत् ।

विस्मितो यात्री अभाषत, “भवता किमर्थमेतत् कृतम् ? दीपौ तु समानौ एव ।” कौटिल्यो यात्रिणो जिज्ञासां शमयनुवाच, “अहं राज्यस्य कार्यं कुर्वन्नासम्, अतो राज्यस्यैव तैलं प्रयुक्तम् । भवान् मम वैयक्तिकातिथिः । वैयक्तिककार्याय मम नैजतैलं प्रयुनज्मि ।” तेनातिप्रभावितो यात्री यस्य देशस्य शासक एतादृशस्तत्र मूल्यवन्ति रत्नानि स्युरिति हृदि विश्वासं निधाय तान्वेष्टुं भारतवर्षमाट ।

कौटिल्यो गुणग्राही दूरदर्शी चिन्तनशीलो राजनीतिज्ञ आसीत् । स योजनाविच्च बभूव । विकासकार्येषु तस्य षट्सूत्रीयं मार्गनिर्देशनमासीत्- किं कर्तव्यम् ? केन कर्तव्यम् ? कथं कर्तव्यम् ? कदा कर्तव्यम् ? कस्य सहयोगेन कर्तव्यम् ? केनानुगन्तव्यम् ? कौटिल्यो योजनाबद्धविकासस्य आधुनिकार्थव्यवस्थायाश्च प्रणेतापि मन्यते । तस्यार्थशास्त्रनामकस्य पुस्तकस्याधुनिकराज्यप्रणाल्यामपि सातिशयं महत्त्वं वर्तते । वैदेशिकविश्वविद्यालयेष्वपीदं पाठ्यते । अनेनैव कृतां चाणक्यनीतिं जना अद्यापि साभिरुचि पठन्ति व्यवहारेऽभ्यसन्ति च । कौटिल्यो यादृशं शासकमपैक्षत चन्द्रगुप्तं तादृशमेवाकारयत् । चन्द्रगुप्तस्य साफल्यं कीर्तिश्च गुरोः कौटिल्यस्य प्रसाद आसीत् । सद्गुरोर्विद्याबुद्धिपरामर्शमार्गनिर्देशनैश्चन्द्रगुप्तमौर्यः सर्वं प्राप्तवान्, कुशासनेनाहतेभ्यो जनेभ्यो न्यायं समृद्धिञ्च दत्तवान्, समस्तं भारतवर्षं सुदृढीकृत्य वैदेशिकविस्तारवादिनामतिक्रमणात् स्वराष्ट्रं जुगोप च ।

## अभ्यासः

### श्रवणं भाषणञ्च

**१. श्रुतपूर्वां कथामैतिहासिकघटनां वा कक्षायां श्रावयत ।**

**२. सखिमुखादधस्तनपदानि श्रुत्वा उच्चारणे जायमानास्त्रुटीर्निराकुरुत**

विक्रमसंवत्सरस्य, सर्वाधिकशक्तिशाली, स्त्रैणः, सर्वसामर्थ्यम्, बहिर्न्यष्काशयत्, अश्रथयत्, साहाय्यम्, परामृष्टवान्, स्वराष्ट्ररक्षणम्, चक्रन्द, स्पर्शनात्, भूयोऽपि, निष्क्रान्तुम्, उद्दण्डस्य, प्रापूरयत, विन्दुसारः, प्रज्वाल्य, प्राज्वालयत्, प्रयुनज्मि, षट्सूत्रीयम्, तच्छ्रुत्वा, सहर्षम्, निवत्स्यति

**३. वर्णसम्मेलनेन मिलिते पदे पृथक्कृत्य तयोः शुद्धोच्चारणं विधत्त**

वैमनस्यमवर्धत, सैन्यविस्तारमकरोत्, नवीनराजमन्वेष्टुम्, तमनुसरन्तः, गन्तुमादिश्य, पाटलीपुत्रमाक्रमितुम्, तत्परमकारयत्, प्राणानत्यजत्, मातरमवदत्, शमयनुवाच, भारतवर्षमाट, मार्गनिर्देशनमासीत्, आधुनिकराज्यप्रणाल्यामपि, निष्क्रान्तुमनुमतिः, तावत्तव, अन्यानादिशति, प्रतिग्राममेत्य

४. पदानां ध्यानेनानुच्चारणं विधाय दन्त्यवर्णान् रेखाङ्कितान् कुरुत

विलासी, सेकुलसः, निभाल्य, धनानन्दः, पुलकितः, तक्षशिला, कुशलनेता, मगधस्य, स्थातुम्, स्थाल्या, संस्थाप्य, मगधविजयस्य, योजनानुसारेण, तदनु, चन्द्रगुप्तः, परित्यज्य, स्वदन्तम्, त्यक्त्वा, प्रत्यवदत्, दीपम्, नैजतैलम्, रत्नानि, विश्वासम्, प्राप्तवान्

५. सन्धिं विच्छेद्य ससन्धि च पदानामुच्चारणेन उभयोर्ध्वनिगतपार्थक्यमनुभवत

अनेनैव, कीर्तिश्च, प्रणेतापि, चन्द्रगुप्तोऽशोकश्च, बौद्धधर्मस्योन्नतौ, लब्धकीर्तिर्वर्तते, कश्चन, ज्योतिर्विन्मातरम्, तच्छ्रुत्वा, कृतेऽहम्, दूतस्तम्, विदेशेष्वपि, श्रुतनामासीत्, राज्यस्यैव, वैयक्तिकातिथिः, स्युरिति, योजनाविच्च, आधुनिकार्थव्यवस्थायाश्च, सद्गुरोर्विद्याबुद्धी, समृद्धिञ्च, चासीत्, इतस्ततश्चचाल, तेष्वेकः, भारतवर्षस्यैकीकरणम्, शास्त्रशस्त्रविद्ययोर्निपुणोऽभवत्, मूर्खोऽसि, दहत्येव, चन्द्रगुप्तो भूयोऽपि, विषकन्याश्च, देशान्निष्क्रान्तुम्, बहिर्ययौ, निर्देशनञ्चानुसृत्य, रक्षणस्योद्देश्येन, जैनभिक्षुर्भूत्वा, पौत्रश्चाशोकः, राजानोऽभवन्, मातृभक्तश्चासीत्

६. पाठस्य चतुर्थानुच्छेदं वाचयित्वा कक्षायां श्रावयत ।

७. अधस्तनक्रियापदानां धातुमुसर्ग लकारं कालञ्च कथयत

अन्वरुणत्, न्यष्काशयत्, आदिशति स्म, अभ्ययाचत, समाश्वासयत्, प्राशिक्षयत्, सम्मानयति, आक्रामत्, समघटयत्, प्रारब्धवान्, उदवहत्, आजगाम, निवसति, निवत्स्यति, प्रापत्, प्राज्वालयत्, प्रयुनज्मि

८. कौटिल्यचन्द्रगुप्तयोर्विषये किमपि श्रुतपूर्वञ्चेत् कक्षायां श्रावयत ।

९. 'सद्गुरोर्महत्त्वम्' इति विषये कक्षायां प्रवचनकार्यक्रमं समायोज्य स्वमतं प्रस्तुत ।

१०. पाठाधारेण सद्गुरोः सच्छिष्यस्य च गुणान् वर्णयत ।

११. पाठस्थकथां स्वशब्दैः श्रावयत ।

१२. पाठे प्रत्यक्षकथनत्वेनागतानि वाक्यानि साभिनयमनुकथयत ।

१३. धनानन्दस्य चारित्रिकवैशिष्ट्यं पाठाधारेण प्रकाशयत ।

१४. विविधमाध्यमेभ्यः कौटिल्यस्य त्रीणि नीतिवचनान्यन्विष्य कक्षायां श्रावयत ।

१५. प्रदत्तगद्यमाधृत्य अधस्तनप्रश्नानामुत्तराणि वदत

## सम्मतिः

नेपालस्येतिहासे राष्ट्रियैकीकरणं महत्त्वाधायिनी घटना वर्तते । राज्ञः पृथ्वीनारायणशाहस्य नेतृत्वे कार्यमेतत् सम्पन्नमासीत् । तत्र बहवो नागरिकास्तस्मै साहाय्यमकुर्वन् । तादृशेषु जनेषु बिसेनगर्चिणो दुन्दुभिवादकस्य योगदानं न कोऽपि विस्मर्तुं शक्नोति । गोरखाजनपदस्य पोखरीथोकस्थाने १७७५ तमे वैक्रमाब्दे लब्धजन्मा नगर्ची पृथ्वीनारायणस्य सुहृदासीत् । तस्यैव परामर्शेन मार्गनिर्देशनेन च पृथ्वीनारायण एकीकरणकार्येषु साफल्यमवाप्नोत् । नगर्चिणः पितुश्च गोरखाप्रासादे सम्मानितं स्थानमासीत् । स राज्यसञ्चालनस्य विषयेषु राजपरिवाराय परामर्शान् प्रायच्छत् । १७९९ तमे विक्रमवर्षे सिंहासनारोहणस्यानन्तरं पृथ्वीनारायणो नुवाकोटजनपदमाक्रामत् परं पराजितः । खिन्नमानसः स विमातरमुपागच्छत् । विदितवृत्तान्ता माता बिसेनगर्चिणं मेलितुं परामृष्टवती । तदा राज्यकोष आयुधानि च रिक्तायमानानि आसन् । सैनिकाश्च अल्पसङ्ख्यका आसन् । पृथ्वीनारायणात् सर्वं निशम्य नगर्ची एकं रूप्यकं दददवदत्, “गृहाण, एतत् । इदानीं गोरखायां द्वादशसहस्राणि गृहपरिवाराः सन्ति । प्रतिगृहमेकस्य रूप्यकस्य ग्रहणेन द्वादशसहस्राणि रूप्यकाणि सङ्कलितानि भविष्यन्ति । आयुधक्रयणाय सैन्यव्यवस्थापनाय च तैरलम् ।” स राजगुरुं हर्षमिश्रं सहैव नीत्वा काशीं गन्तुमायुधानि क्रीत्वा आनीय ससज्जं नुवाकोटजनपदमाक्रमितुञ्च पृथ्वीनारायणं प्रेरितवान् । तदनुरूपं तृतीयवारं १८०२ तमे वैक्रमाब्दे विहितेनाक्रमणेन पृथ्वीनारायणो नुवाकोटजनपदमजयत् । तत्र बिसे सैनिकरूपेणायुद्धत । बिसे न केवलं पृथ्वीनारायणाय परं ‘काजी’ पदीयाय कालुपाँडेऽभिधेयाय च बुद्धिदोऽभवत् । राज्ञः प्राप्तं तत्पदं स्वीकर्तव्यं न वेति निर्णेतुं पाँडे नाशक्नोत् । स नगर्चिणः परामर्शमपैक्षत । तस्य सम्मत्या स पदभारमवहत् । बिसे मानवतावादी विचारक आसीत् । युद्धप्रारभणसमये स पृथ्वीनारायणमकथयत्, “बालकान् वृद्धान् रुग्णान् प्रसूतिका गर्भवतीरशक्ताँश्च न हन्याः ।” बिसे विलक्षणप्रतिभावान् बुद्धिमानैतिहासिकः पुरुष आसीत् । स दूरदर्शी आर्थिकव्यवस्थापको रणनीतिकारः परामर्शनपटुश्चावर्तत । कठिनावस्थायां पृथ्वीनारायणस्तस्यैव सम्मत्या सद्भावेन चाग्रेऽवर्धत सफलश्च संवृतः । नेपालस्यैकीकरणे पृथ्वीनारायणस्य राजकीर्तिविस्तारणे च तस्य योगदानं स्तुत्यमस्ति । नैपालकः साहित्यकारो भीमनिधितिवारी बिसेविषयकं नाटकं व्यरचयत् । श्रवणमुकारुङनामा कविर्बिसेऽभिधमाधृत्य कवितामलिखत् । तस्य योगदानस्योच्चमूल्याङ्कनं विधाय काष्ठमण्डपे प्रतिमायाः स्थापनाय उपक्रमः प्रारब्धो वर्तते ।

(क) नेपालराष्ट्रस्यैकीकरणं केन विहितम् ?

(ख) बिसेनगर्ची क आसीत् ?

(ग) बिसे कदा कुत्र चाजायत ?

(घ) नुवाकोटविजयाभियाने पृथ्वीनारायणः कीदृशानि व्यवधानानि अन्वभवत् ?

(ङ) राज्यकोषस्य प्रवर्धनाय बिसे राजानं किं परामृशत् ?

(च) बिसे राजानं कति रुप्यकाण्यदात् ?

(छ) गोरखाशासने तदानीं कति गृहपरिवारा आसन् ?

(ज) केनोपायेनायुधैः सेनां सज्जीकर्तुं बिसे न्यवेदयत् ?

(झ) नुवाकोटराज्यं कदा गोरखाराज्यस्याधीनं गतम् ?

(ञ) गोरखाराज्येन कतमे प्रयासे नुवाकोटजनपदो विजितः ?

(ट) परामर्शनपटुर्बिसे मानवतावाद्यप्यासीदिति केन सिद्ध्यति ?

(ठ) युद्धे केषां हननं नैव कर्तव्यम् ?

(ड) जना बिसेनगर्चिणो योगदानं कथं स्मरन्ति ?

(ढ) बिसेनगर्चिणो जीवनवृत्तात् का शिक्षा अवाप्यते ?

(ण) सङ्कटापन्ने दूरगामिनिर्णयनसमये च शासकेन किं विचारणीयम् ?

## पठनम्

१. लेख्यचिह्नानां परिपालनेन पाठस्य सप्तममनुच्छेदमुच्चैः स्वरेण पठत ।

२. पाठस्य तृतीयमनुच्छेदं प्रवाहपूर्वकं पठित्वा विशेषणपदानि विशेष्यपदैस्सह चिह्नीकुरुत ।

३. पाठस्याष्टमानुच्छेदस्य द्रुतपठनं कुरुत । तस्यानेकवारं पठनं विधाय प्रतिवारं पठनगतिवर्धनाभ्यासञ्च कुरुत ।

४. पाठस्य मौनपठनेनाज्ञातार्थानि पदानि सङ्कलयत । पाठस्य पुनःपठनेन पाठगतसन्दर्भं वाक्यं वाऽऽधृत्य सन्दर्भानुकूलार्थान्वेषणाय प्रयत्नं कुरुत । तदनु यथावश्यकं कोशस्य सखीनां गुरोर्वा साहाय्येन समुचितार्थान्निश्चित्य पदप्रयोगाभ्यासं विधत्त ।

५. पाठं पठित्वा समस्तानि सन्धियुतानि च पदानि सङ्कलयत ।

६. पाठस्य षष्ठानुच्छेदं पठित्वा अधस्तनप्रश्नानुत्तरयत

(क) सैन्यबलस्य सङ्घटने कौटिल्यः कथं चन्द्रगुप्तस्य सहायतामकरोत् ?

(ख) को विषकन्यां रचयामास ?

(ग) चन्द्रगुप्तः पाटलीपुत्रं कथं व्यजयत ?

(घ) धनानन्दः केन दण्डितः ?

(ङ) दुर्धरा कस्य पुत्री आसीत् ?

(च) मगधनरेशश्चन्द्रगुप्तः कया सह विवाहमरचयत् ?

(छ) मौर्यवंशस्य संस्थापकराजः कः ?

(ज) नन्दवंशस्य पतनस्य प्रमुखकारणं लिखत ।

(झ) धनानन्दस्य पराजयेन कस्य प्रतिशोधं पूर्णतामयात् ?

(ञ) अत्र 'पुनः' इत्यस्य पर्यायत्वेन किं पदं प्रयुक्तमस्ति ?

(ट) 'केन्द्रम्' इत्यस्य किं विलोमपदमत्र प्रयुक्तम् ?

(ठ) 'अनाथः' इति कस्य विशेषणम् ?

(ड) 'दुर्धरा' इत्यस्य कानि विशेषणपदान्यत्र प्रयुक्तानि ?

(ढ) 'समघटयत्' इत्यस्य कर्तृ-कर्मपदे के ?

(ण) अनुच्छेदात् क्त-क्तवतुप्रत्ययान्तपदानि सङ्कलय्य तेषां धातु-लिङ्ग-विभक्ति-वचनानि निर्दिशत ।

७. सखिभिस्सह मिलित्वा पाठस्योपान्त्यस्यानुच्छेदत्रयस्य प्रत्यक्षकथनरूपवाक्यानि साभिनयं पठत ।

८. पाठस्य प्रथमानुच्छेदमधीत्य तदाधृतान् पञ्च प्रश्नान् पृच्छत ।

९. अधस्तनगद्यं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत

## गुरुपूर्णिमा

विश्वस्य सर्वेषु धर्मग्रन्थेषु गुरोर्महत्त्वं वर्णितमस्ति । गुरुर्मानवजीवनं सर्वेभ्यो दुःखेभ्यः पारं नयति, शान्तं सुखदञ्च कारयति । यः शास्त्रं गृह्णाति यद्वा शिष्यवर्गेण गीर्यते स गुरुरुच्यते । 'गुरुः' पदे विद्यमानयोः 'गु' शब्दस्यान्धकारः, 'रु' शब्दस्य चान्धकारनिवारणमित्यर्थो भवति । अनेन योऽज्ञानरूपमन्धकारमपसार्य जनमनसि ज्ञानरूपमालोकमादधाति स गुरुर्ज्ञेयः । असौ ज्ञानशलाकास्ति येन चक्षुरुन्मील्यते इति भणितिः प्रसिद्धा वर्तते । विद्याविनयौ शिक्षयित्वा गुरवः शिष्यस्योपकारं कुर्वन्ति । जनकः, संस्कारकारकः, विद्यादायकः, अन्नदः, भयाद्रक्षकश्च पिता भवति । शिष्येषु ज्ञानमुद्भाव्य गुरुरपीमानि कर्माणि करोति,

इत्यतः पितुरपि गुरोः स्थानं श्रेष्ठं मन्यते । प्राचीनकाले गुरोराज्ञापालनं शिष्यस्य परमकर्तव्यमासीत् । प्राकृतिकपितुरपि गुरुरधिक आदरणीय मन्यते स्म । आधुनिककालेऽपि गुरुसम्मानपरम्परा विद्यत एव । गुरुपूर्णिमा गुरोः सम्मानपूजनयोर्दिवसोऽस्ति । आषाढशुक्लपूर्णिमायां ब्रह्म-विष्णु-महेश्वरवद्देवता मत्वा गुरोः पूजनं विधीयते । एतस्मिन् दिवसे शिष्या विद्याविनयादिगुणान् प्रदाय जीवने मार्गनिर्देशनं कृतवन्तं गुरुं प्रपूज्य तस्मादाशीर्वादं गृहणन्ति । शास्त्रेषु गुरुसम्मानात् पराङ्मुखा जना दुःखभाजो भवन्तीत्युल्लिखितं वर्तते । दिवसोऽयं व्यासजयन्तीनाम्ना च प्रथितो वर्तते । वेदव्यासो वेदानां चतुर्षु भागेषु विभजनं कृतवान् । ब्रह्मसूत्रं व्यरचयत् । अष्टादश पुराणानि प्रणीतवान् । महाभारतं तस्यैवाङ्गभूतां गीताञ्च विलिख्य व्यासेन ज्ञानमयः प्रदीपः प्रज्ज्वालितः । स गुरूणां गुरोः स्थानमध्यास्ते । गुरुपूर्णिमायां स स्मर्यते, श्रद्धया तस्य योगदानञ्च वर्ण्यते । व्यासः सर्वान् विषयान् लिलेख । स धर्मार्थकाममोक्षाणां पुरुषार्थचतुष्टयं प्रत्यपादयत् । तेनानुल्लिखितं किमपि नावशिष्टम् । व्यासोच्छिष्टं जगत् सर्वम् यदुक्तं तद्युक्तमेव वर्तते । परोपकारः पुण्याय परपीडनं पापाय इति व्यासस्य वचनसारोऽस्ति । इत्थं गुरोः सम्मानेन पूजनेन च, ज्ञानदीपस्य व्यासस्य स्मरणेन गुणकीर्तनेन च गुरुपूर्णिमा समायोज्यते । कर्मेदं प्राचीनगुरुकुलपरम्पराया गुरुदक्षिणार्पणस्यार्वाचीनस्वरूपमस्ति । गुरुः सदैव नम्यः पूज्य आदरणीयश्च भवति तदपि दिवसोऽयं विशेषो मन्यते । गुरुशिष्यसम्बन्धस्य स्थायित्वाय माधुर्याय चास्य दिवसस्य महत्त्वं विद्यते । आधुनिकशिक्षाप्रणाल्यामपि गुरुपूर्णिमा गौरवास्पदा प्रतिभाति ।

## प्रश्नाः

**(अ) अनुच्छेदादनुवर्ति वाक्यद्वयमनुसृत्य प्रश्नानुत्तरयत**

**महाभारतं तस्यैवाङ्गभूतां गीताञ्च विलिख्य व्यासेन ज्ञानमयः प्रदीपः प्रज्ज्वालितः । गुरुपूर्णिमायां स स्मर्यते श्रद्धया तस्य योगदानञ्च वर्ण्यते ।**

(क) प्रथमे वाक्ये कर्तृपदं किम् ? तत्र का विभक्तिरस्ति ?

(ख) द्वितीयस्य वाक्यस्य कर्तृपदं कीदृशं भवेत् ?

(ग) प्रथमे कति कर्मपदानि सन्ति ? कानि च तानि ? तेषु कुत्र का विभक्तिः ?

(घ) 'प्रज्वालितः' इत्यस्य धातूपसर्ग-प्रत्यय-प्रातिपदिक-विभक्ति-वचनानि निर्दिशत ।

(ङ) 'विलिख्य' इत्यस्य कर्मणी के ? तत्र कस्य विभक्तेः प्रयोगो वर्तते ?

(च) 'प्रदीपः', 'सः' इत्येतयोः कथं प्रथमाविभक्तेः प्रयोगः ?

(छ) अत्र 'योगदानम्' इति पदं प्रथमान्तं द्वितीयान्तं वा ?

(ज) 'गीताम्', 'प्रदीपः' इत्येतयोः कारकविभक्त्योः साम्यत्वं भिन्नताञ्चान्विषत ।

(झ) 'स्मर्यते', 'वर्ण्यते' इत्येते कयोर्धातोः कस्य वाच्यस्य च क्रियापदे वर्तेते ? उभयत्र एकत्वे किं कारणम् ?

(ञ) क्त-ल्यबन्तयोः कृदन्तक्रिययोर्मध्ये कस्य कर्तरि कस्य च प्रायेण कर्मणि प्रयोगो भवति ?

(ट) अनभिहिते कर्मणि कर्तरि च कयोर्विभक्त्योः प्रयोगः कार्यः ?

(ठ) अनयोर्वाक्ययोः कर्तरि प्रयोगं प्रदर्शयत ।

(ड) वाक्यद्वयस्यार्थमनतिक्रम्य विभागेन चत्वारि वाक्यानि रचयत ।

**(आ) एकवाक्येन प्रश्नानुत्तरयत**

(क) 'गुरुः' इति पदं कथं व्युत्पाद्यते ?

(ख) गुरुः किमपसारयति ?

(ग) 'ज्ञानशलाका' इति पदस्य कोऽर्थः ?

(घ) शिष्यस्य परमकर्तव्यं किम् ?

(ङ) गुरुपित्रोः कः प्रशस्यतरो मन्यते ?

(च) गुरुः किमर्थं पितापि कथ्यते ?

(छ) गुरुपूर्णिमापर्व कस्मिन् तिथौ समायोज्यते ?

(च) वेदानां विभजनं केन कृतम् ?

(छ) व्यासजयन्ती कदा निपतति ?

(ज) व्यासः किं प्रत्यपादयत् ?

(झ) व्यासकृतपुराणादिग्रन्थानां सारवचनवाक्यं लिखत ।

(ञ) गुरुसम्मानद्योतिकामेकां सूक्तिं विलिखत ।

**(इ) सङ्क्षेपेणोत्तरयत**

(क) गुरोर्महत्त्वं वाक्यपञ्चके प्रकाशयत ।

(ख) गुरुपूर्णिमायां व्यासः कथं स्मर्यते ?

(ग) 'व्यासोच्छिष्टं जगत् सर्वम्' इत्यस्याशयः कः ?

(घ) गुरोर्जनकादपि श्रेष्ठत्वे कारणं किम् ?

(ङ) गुरुः कथं शिष्योपकारको भवति ?

(च) गुरुशिष्ययोः सम्बन्धः कीदृशो भवेत् ?

(छ) 'जगद्‌गुरुः' इति पदं सव्युत्पत्ति सोदाहरणञ्च परिभाषध्वम् ।

(ज) मनोगतान्धकारापसारणोपायान् विलिखत ।

(झ) सद्‌गुरुरस्मत् किं किमपनयति किं किञ्चास्मास्वानयति ?

(ञ) गुरुशिष्यपरम्परामवलम्ब्य स्वल्पमनुच्छेदं रचयत ।

(ई) प्राचीनार्वाचीनशिक्षाप्रणाल्योर्गुरुशिष्यसम्बन्धगताया भिन्नतायाः समतायाश्च विवेचनं कुरुत ।

## लेखनम्

१. पदानामर्थप्रकाशनेन वाक्ये प्रयोगं प्रदर्शयत

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| (क) | दग्धहृदयः | (ख) | भीया | (ग) | सहसा | (घ) | सहर्षम् |
| (ङ) | तप्तकृशरः | (च) | बभुवुः | (छ) | अत्यजत् | (ज) | प्रारब्धवान् |
| (झ) | प्रबुद्धः | (ञ) | समाश्वासयत् | (ट) | जुगुप्सतुः | (ठ) | मातृभक्तः |
| (ड) | त्यक्तुम् | (ढ) | अध्यापयामास | (ण) | लब्धकीर्तिः | (त) | सातिशयम् |
| (थ) | शासनावधौ | (द) | पालितः | (ध) | गुणग्राही | (न) | सम्मानयति स्म |

**२. सन्धिं विच्छेद्य सन्धिनाम लिखत**

अद्यापि, पुत्रश्चास्ताम्, दूतोऽगदत्, चैतन्नौचित्यम्, नैकव्यक्तयोऽभिलषन्ति, तान्वेष्टुम्, तस्यार्थशास्त्रम्, वैदेशिकविश्वविद्यालयेष्वपीदम्, अप्यन्वरुणत्, साहाय्यञ्चाभ्ययाचत, गा नीत्वा, तत्रैवाध्यापकश्चाभवत्, प्रबुद्धोऽस्मीदानीम्, भवत्येव, बालकश्चन्द्रगुप्तो गुरोः, कौटिल्यस्यैव, इतोऽपि, सबलञ्चाकरोत्, उद्दण्डस्यात्याचारिणश्च, भिक्षो रूपेण

**३. प्रदत्तानां समस्तपदानां सविग्रहमर्थानन्विष्य सारिण्यां प्रदर्शयत**

आसन्नशतत्रयवर्षपूर्वम्, महाजनपदाः, राजसिंहासने, सर्वसामर्थ्यम्, मदोन्मत्ताय, सापमानम्, दग्धहृदयः, नवीनराजम्, सैन्यप्रशिक्षणेन, विश्वविजयिनः, सर्वविधोपायैः, मार्गनिर्देशनेन, नेतृत्वक्षमताम्, पञ्चसहस्राणाम्, गुरुशिष्यौ, गृहाभ्यन्तरे, तप्तकृशरः, प्रबुद्धः, प्रतिग्रामम्, अनाथः, प्रथमराजः, भारतवर्षम्, मातृभक्तः, जन्मपत्रिकाम्, राजयोगः, नागराजस्य, प्रधानमन्त्री, श्रुतनाम, तैलदीपम्, नैजतैलम्, गुणग्राही, चिन्तनशीलः, कुशासनेन, स्वराष्ट्रम् ।

**४. अविस्तरेण पाठानुकूलमुत्तरं लिखत**

(क) नन्दवंशस्याद्यन्तौ राजानौ कावास्ताम् ?

(ख) धनानन्दः कीदृशो राजा आसीत् ?

(ग) मगधः किमर्थं दुर्बलायमान आसीत् ?

(घ) यवनशासकौ सिकन्दरसेकुलसौ भारतवर्षे किं प्रायतताम् ?

(ङ) कौटिल्यः किमर्थं चिन्तामग्नो जातः ?

(च) कौटिल्यः धनानन्दात् किमपेक्षते स्म ?

(छ) कौटिल्यो धनानन्देन कथमपमानितोऽभवत् ?

(ज) कौटिल्यः धनानन्दं प्रति किं प्रत्यजानात् ?

(झ) कौटिल्यो कस्मिन् भारतवर्षस्य भविष्यमपश्यत् ?

(ञ) चन्द्रगुप्तं वीक्ष्य कौटिल्यः किमर्थं पुलकितो जातः ?

(ट) कौटिल्यश्चन्द्रगुप्तं प्रथमवारं कस्यामवस्थायामपश्यत् ?

(ठ) भिक्षुरूपकौटिल्यं राजरूपचन्द्रगुप्तः कथमाश्वासयत् ?

(ड) कौटिल्यः कुतः शिक्षां लब्धवान् ?

(ढ) तक्षशिलायां कौटिल्यश्चन्द्रगुप्तं कति वर्षाणि यावत् प्राशिक्षयत् ?

(ण) मगधस्य राजधानी कुत्रासीत् ?

(ट) कौटिल्येन मगधाक्रमणारम्भे का त्रुटिर्विहिता ?

(ठ) चन्द्रगुप्तदुर्धरयोः पुत्रस्य पौत्रस्य च नामनी के ?

(ड) मौर्यवंशस्य तृतीयमन्तिमञ्च राजानौ कौ ?

(ढ) मौर्यवंशस्य कतिभी राजभिः कतिवर्षाणि यावद् भारतवर्षं शासितम् ?

(ण) तक्षशिला केन प्रसिद्धाऽभवत् ?

(त) सेकुलसचन्द्रगुप्तयोः कौटुम्बिकसम्बन्धः कः ?

(थ) मगधाय नवीनराजस्योऽन्वेषणस्य कौटिल्यस्य प्रधानोद्देश्यं किमासीत् ?

(द) चन्द्रगुप्तः कीदृशः शिष्य आसीत् ?

**५. अधस्तनप्रश्नान् नातिविस्तरेणोत्तरयत**

(क) कौटिल्यस्य चन्द्रगुप्ताय राजप्रशिक्षणदाने कान्युद्देश्यान्यासन् ?

(ख) कौटिल्यश्चन्द्रगुप्तं किं किं शिक्षयाम्बभूव ?

(ग) चन्द्रगुप्तः कथं कुशलो योद्धा नेता चाभवत् ?

(घ) पाटलीपुत्रे चन्द्रगुप्तस्य पराजये कारणानि कानि ?

(ङ) केन्द्रतः प्रारभ्यमाणस्याक्रमणस्य वैफल्येन कौटिल्यः कां शिक्षामाप्तवान् ?

(च) प्रथमपराजयेन लब्धशिक्षः कौटिल्यो युद्धनीतौ कीदृशं परिवर्तनं विहितवान् ?

(छ) नन्दवंशस्य पतनस्य कारणानि पाठाधारेण विलिखत ।

(ज) चन्द्रगुप्तः कथं मगधं विजित्य भारतवर्षमेकीकृतवान् ?

(झ) कौटिल्यः कथं भारतवर्षं ररक्ष ?

६. कौटिल्यो महान् राष्ट्रभक्त आसीदिति कथनं सोदाहरणं विवेचयत ।

७. विकासकार्येषु कौटिल्यस्य योजनाया मार्गनिर्देशनस्य च सार्वकालिकमहत्त्वं प्रकाशयत ।

८. बहुशो जनाः कौटिल्यमाधुनिक्या राज्यप्रणाल्या अर्थव्यवस्थायाश्च प्रणेतारं मन्वते । तस्याधारभूतकारणान्यन्विष्य सूत्ररूपेण लिखत ।

९. तक्षशिला पाटलीपुत्रञ्च वर्तमानविश्वमानचित्रे कस्मिन् कस्मिन् देशे जनपदे च निपततः ? आवश्यकतायां सत्यां सामाजिकसञ्जालानां साहाय्यं स्वीकृत्योत्तरं दत्त ।

१०. लङ्लकारस्य क्रियापदानि लिटि लिटश्च लङि परिवर्त्य पाठस्य तृतीयानुच्छेदस्य पुनर्लेखनं कुरुत ।

११. कथालेखनस्यावश्यकतत्त्वानि संरचनाञ्च यथाक्रमं विवेचयत ।

१२. श्रुताया दृष्टाया अनुभूताया वैकस्या घटनाया यथाक्रमं वर्णनं विधत्त ।

१३. 'सुशासनम्' इति विषयमवलम्ब्य अनुच्छेदमेकं रचयत ।

१४. कौटिल्यस्य 'शत्रोरपि न पातनीया वृत्तिः' इति नीतिवचनस्य भावं विस्तारयत ।

१५. 'बहुजनहिताय, बहुजनसुखाय' इत्यस्याभिप्रायं प्रकाशयत ।

१६. पाठस्यान्तिमानुच्छेदस्य नेपालीभाषायामनुवादं कुरुत ।

१७. कौटिल्यस्य चरित्रं वर्णयत ।

१८. चन्द्रगुप्तस्य जीवनचरितं पाठाधारेण निर्दिशत ।

१९. **अनुभूतविषयं कल्पनां वाधृत्य लघुकथां विरचयत ।**

२०. **संस्कृतेऽनुवादं कुरुत**

कौटिल्य विष्णुगुप्त र चाणक्य नामले पनि प्रसिद्ध छन् । कौटिल्य अर्थशास्त्र र कौटिल्य नीति पाठकद्वारा अत्यधिक रुचाइएका कृति हुन् । कौटिल्य असल गुरु मात्र नभएर दूरदर्शी राजनेता र कुशल अर्थशास्त्री पनि थिए । उनको विद्वत्ता र गहन राजनीतिक चिन्तनको समाजमा महत्त्वपूर्ण प्रभाव रहेको छ । राज्यको उच्चपदमा आसीन हुँदा पनि उनले अँगालेको सामान्य जीवनशैली आज पनि उत्तिकै अनुकरणीय छ ।

२१. **नेपालीभाषायामनुवादं कुरुत**

सुखस्य मूलं धर्म, धर्मस्य मूलमर्थः, अर्थस्य मूलं राज्यम्, राज्यस्य मूलमिन्द्रियजयः, इन्द्रियजयस्य मूलं विनयः ।

२२. **प्रदत्तसूत्राण्याधृत्य कथां विरचय्य यथोचितं शीर्षकं दत्त**

- गौतमनामा सिद्ध ऋषिः, तस्य अहल्यानाम्नी पत्नी
- ब्रह्मणो मानसपुत्री अहल्या अतीव सुन्दरी, सौन्दर्यदृष्ट्या सृष्टेरुत्तमं सर्जनम्
- उच्चपदे विराजमाने सत्यपि देवराजस्येन्द्रस्य दुष्कर्मणि प्रवर्तनम्
- इन्द्रस्य ऋषिपत्न्या अहल्यायाः सौन्दर्येण वशीभवनम्
- कामातुरस्येन्द्रस्य परस्त्रीगमनम्
- गौतमस्य प्रतिदिनं प्रातः स्नानार्थमाश्रमात् किञ्चिद्दूरं गङ्गायां गमनम्
- एकदा ऋषेः स्नानाय गमनावसरमुपयुज्य अहल्यया सह मेलनस्येन्द्रस्य योजना
- दैवीशक्त्या गौतमस्य स्वरूपमवधार्य इन्द्रस्य ऋषेराश्रमे गमनम्
- गौतमरूपधारिणमिन्द्रमजानन्त्या अहल्यायास्तस्य पतिवद्व्यवहरणम्
- अहल्यायाः पतेः शीघ्रम् आगमनस्य कारणप्रच्छनम्
- ऋषिरूपेन्द्रस्य अहिल्यायै समागमेच्छायाः प्रकटनम्
- पतिव्रतायाः पत्न्या भर्तुरिच्छाया अनवज्ञानम्
- देवराजस्य छलेन अहल्यायाः सतीत्वहरणम्
- समाप्तस्नानादिनित्यकर्मणो गौतमस्य स्वाश्रमप्रत्यागमनम्
- स्वरूपधारिणेन्द्रेण स्वपत्न्या सह विरचितस्य सर्वस्यापि घटनावृत्तस्य गौतमावगमनम्
- क्रुद्धस्य ऋषेरुभाभ्यां शापदानम्
- स्वपत्न्यै 'पाषाणो भूयाः' इति गिराभिशपनम्

- स्त्रीलिप्ताय इन्द्राय 'सहस्रयोनिवान् भव' इत्यभिशापः
- इन्द्रस्य छलं प्रति आत्मानभिज्ञत्वं प्रदर्शयन्त्या अहल्याया निरपराधिनीं स्वपत्नीं नैव दण्डयितुम् ऋषेः समक्षं याचना
- ऋषेरभिशापमुक्त्युपायकथनम्
- सिद्धर्षिवचनादहल्यायाः सद्यैव पाषाणरूपधारणम्, इन्द्रस्य शरीरे च सहस्रयोनिचिह्नानामुद्भवनम्
- योनिमयस्वरूपेण त्रपमानस्येन्द्रस्य पलायनम्
- पश्चाद्गौतमसमक्षमिन्द्रस्यात्मालोचनमभिशापान्मुक्तये याचनञ्च, क्षमादानाय समस्तदेवानामपि निवेदनम्
- दयानिधेर्गौतमकृपया इन्द्रशापमुक्तिः
- त्रेतायां भगवतः श्रीरामस्य चरणस्पर्शेन निवृत्तशापाया अहल्यायाः पत्या गौतमेन सह पुनर्मेलनम्
- दुराचारः सर्वथा त्याज्य इति सन्देशः ।

# अनुप्रयुक्तव्याकरणम्

## प्रेरणार्थप्रयोगः

**१. वाक्यानि पठित्वा अधस्तनकार्यकलापान् कुरुत**

- शिशुर्दुग्धं पिबति ।
  माता शिशुं दुग्धं पाययति ।
- छात्रो नीतिशास्त्रमधीते ।
  गुरुश्छात्रं नीतिशास्त्रमध्यापयति ।
- भृत्यो भारं वहति ।
  स्वामी भृत्येन भारं वाहयति ।
- त्वं भूमौ तिष्ठसि ।
  अहं त्वां भूमौ स्थापयामि ।
- माता ओदनं पचति ।
  पिता मात्रा ओदनं पाचयति ।
- भक्तो देवं पश्यति ।
- गुरुः भक्तं/भक्तेन देवं दर्शयते ।

- देवदत्तेन वेदः पठ्यते ।

  यज्ञदत्तेन देवदत्तो वेदं पाठ्यते ।
- कौटिल्यश्चन्द्रगुप्तं शिक्षायै तक्षशिलामगमयत् ।
- कौटिल्यश्चन्द्रगुप्ताय शास्त्रशस्त्रयोः प्रशिक्षणं दापयामास ।
- अग्रजा मां ज्ञानिनमबिभवत् ।
- शिक्षका विद्यार्थिनो भाषाप्रयोगे समर्थान् कारयेयुः ।
- त्वं कदा गां जलं पाययिष्यसि ?
- अहं युष्माभिः श्वो मम पितरौ मेलयितास्मि ।
- इदानीं भवती रुदता बालेन भोजनं खादयतु ।
- गुरुणा यत् पाठितं तन्मयाऽवबुद्धम् ।
- स पाठं बोधयित्वा मम साहाय्यं कृतवान् ।

(क) उपरितनवाक्येषु प्रयुक्तानां तिङन्तपदानां कालं लकारञ्च निर्दिशत ।

(ख) वाक्येषु णिजर्थक्रियापदानि शुद्धधातुवाच्यक्रियापदानि च परिचित्य पृथक्कुरुत ।

(ग) णिजर्थक्रियापदानां प्रयोजककर्तृपदानि प्रयोज्यकर्तृपदानि च चित्वा तालिकायां प्रदर्शयत ।

(घ) तिङन्तेषु कृदन्तेषु च क्रियासु शुद्धधातून् तेषां णिजन्तस्वरूपाणि च निर्दिशत ।

(ङ) णिजर्थक्रियानां णिज्रहितरूपाण्यन्विष्य तालिकायां दर्शयत ।

(च) कस्मिन्नर्थे धातुभ्यो णिच्-प्रत्ययो भवति ?

(छ) ण्यन्तधातुभ्यः किं पदं भवति ?

(ज) ण्यन्तधातुभ्यः कस्यामवस्थायामात्मनेपदं प्रयोक्तव्यम् ?

(झ) 'अधि+इ(ङ्)' इति नित्यात्मनेपदिधातोर्णिजर्थे 'अध्यापयति' इति परस्मैपदिप्रयोगः कथं सुलभः ?

(ञ) अकर्मकस्य स्था-धातोर्णिजर्थक्रियायाः (स्थापयति इत्यस्य) सकर्मकत्वे कारणं किम् ?

(ट) पठ्-धातोर्णिचि लटि कर्तरि कर्मणि चोभयोः पदयो रूपाणि लिखत ।

(ठ) ण्यन्त-स्थाधातोर्लङि कर्तरि रूपाणि विलिखत ।

(ड) ण्यन्त-गम्धातोर्लृटि परस्मैपदे रूपाणि प्रदर्शयत ।

(ढ) णिजन्तस्य भू-धातोर्दशसु लकारेषु कर्तरि परस्मैपदे रूपाणि दर्शयत ।

(ण) ण्यन्तस्य श्रुधातोः क्त-क्तवतु-क्त्वा-तुमुन्-तव्य-अनीयर्-शतृ-शानच्प्रत्ययान्तमेकैकं पदं लिखत ।

प्रेरणार्थे धातुभ्यो णिच्-प्रत्ययो विधीयते । प्रयोजककर्तुः प्रेरणादिव्यापारे द्योत्ये यस्मात् कस्मादपि धातोर्णिज्भवति । यथा - 'भवन्तं प्रेरयति' इत्यर्थे भूधातोर्णिचि लटि प्रथमपुरुषैकवचने भावयति/भावयते इति । अत्र यः प्रेरयति स प्रेरककर्ता भवति, यश्च प्रेर्यते (यस्मै प्रेरणा दीयते) स (स्वतन्त्रकर्ता) प्रयोज्यकर्तृत्वेन व्यवह्रियते । 'केशवो रामं भावयति' इति वाक्यस्य 'भवन्तं रामं केशवः प्रेरयति' इत्यर्थः । उक्ते वाक्ये 'केशवः' इति प्रयोजककर्तृपदम्, 'रामम्' इति कर्मसंज्ञकं प्रयोज्यकर्तृपदम् वर्तेते । तथैव, 'गुरुः शिष्यमपाठयत्' इत्यस्य 'पठन्तं शिष्यं गुरुः प्रैरयत्' इत्यर्थो फलति ।

सर्वे णिजन्तधातवः सकर्मका भवन्ति । णौ अनुत्पन्ने सति शुद्धधातुवाच्यामकर्मकक्रियां प्रति यः कर्ता स ण्यन्तधातुवाच्यां प्रयोजकव्यापारित्मिकां क्रियां प्रति कर्मसंज्ञको भवति । अत एव अकर्मकधातवोऽपि सकर्मका भवन्ति । सकर्मकधातुषु तु नी-वह्-अद्-खाद्-भक्षादिधातून्, विहाय गति-बुद्धि-भक्षण-शब्दकर्मकार्थकधातूनां प्रयोज्यकर्ता एव प्रेरणार्थेकर्मसंज्ञको भवति । कर्मणि प्रयोगे प्रयोज्यकर्मणि प्रथमा प्रधानकर्मणि च द्वितीया प्रयोक्तव्या ।

ण्यन्तधातव उभयपदिनो भवन्ति । क्रियाफले कर्तृगे सति आत्मनेपदस्य अकर्तृगे तु परस्मैदस्य प्रयोगो विधातव्यो भवति ।

२. **उदाहरणमनुसृत्य प्रदत्तार्थद्योतकानि क्रियापदानि विलिखत**

**यथा-**

| | | |
|---|---|---|
| **पठन्तं प्रेरयति** | - | **पाठयति** |
| **पठन्तं प्रेरयते** | - | **पाठयते** |
| **पठन्तं प्रेरयाञ्चकार** | - | **पाठयाञ्चकार** |
| **घटमानं प्रैरयत्** | - | **अघटयत्** |
| **घटमानं प्रैरिरत्** | - | **अजीघटत्** |

| | | |
|---|---|---|
| (क) भवन्तं प्रेरयतु | (ख) तिष्ठन्तौ प्रैरिरत् | (ग) ददतं प्रेरयिष्यति |
| (घ) एधमानं प्रेरयिता | (ङ) कुर्वाणं प्रेरयेत् | (च) अधीयानं प्रेरयामास |
| (छ) कुर्वन्तं प्रेरयसि | (ज) पठन्तीं प्रेरयामि | (झ) पचन्तं प्रेरयन्ति |
| (ञ) खादतः प्रेरयते | (ट) शयानं प्रेरिष्ये | (ठ) वर्धमानां प्रेरयाम्बभूवतुः |

३. **उदाहरणमनुसृत्य वाक्यानि लिखत**

**यथा - अहं भवन्तमनुजं प्रेरयामि ।**

**अहमनुजं भावयामि ।**

(क) सा दुग्धं पिबन्तं पुत्रं प्रेरयति ।

(ख) हरिरमृतमशतो देवान् प्रैरयत् ।

(ग) कौटिल्योऽधीयानं चन्द्रगुप्तं प्रेरयाञ्चकार ।

(घ) वटुः क्रीडन्तौ बालकौ प्रेरयिष्यति ।

(ङ) त्वं चित्रं पश्यन्तीं बालां प्रेरय ।

(च) अहं मन्दिरं गच्छन्तं मातरं प्रेरयामि ।

**४. सङ्केतमनुसृत्य क्रियापदानि विलिख्य वाक्येषु योजयत**

(क) बुध्+णिच्+लट् (झि) (ख) स्था+णिच्+लुङ् (तिप्)

(ग) दा+णिच्+लिट् (तिप्) (घ) पा+णिच्+लृट् (मिप्)

(ङ) ज्ञा+णिच्+वि.लिङ् (सिप्) (छ) प्रदृश्+णिच्+लोट् (थ)

(ज) आस्+णिच्+लङ् (तिप्) (झ) लिख्+णिच्+लट् (त)

(झ) पठ्+णिच्+लुट् (आताम्)

**५. अधस्तनवाक्यानि प्रेरणार्थे परिवर्तयत**

(क) पदं वाक्ये युनक्ति ।

(ख) बालका मिष्टान्नैर्मोदन्ते ।

(ग) छात्रा उद्याने भ्रमिष्यन्ति ।

(घ) चन्द्रगुप्तः पाटलीपुत्रमाक्रामत् ।

(ङ) वेदपाठिन उच्चैर्गिरा मन्त्रान् अभाषन्त ।

(च) चन्द्रगुप्तो भारतवर्षस्य राजा बभूव ।

(छ) सा यथासमयं गृहकार्यं कुर्वीत ।

(ज) अहं कौटिल्यनीतिं पठानि ।

(झ) पण्डितः परश्वः कथां कथयिता ।

(ञ) अस्माभिः श्रद्धावद्भिर्भूयते ।

**६. प्रेरणार्थे परिवर्त्य वाक्यानि रचयत**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| (क) | त्रुटति | (ख) | भिनत्ति | (ग) | छिनद्मि | (घ) | अवपत् |
| (ङ) | गत्वा | (च) | पातुम् | (छ) | क्षिपते | (ज) | मेलिष्यति |
| (झ) | अजायत | (ञ) | पठन् | (ट) | बिभ्यति | (ठ) | शयानः |
| (ड) | कृतम् | (ढ) | प्रभूय | (ण) | श्रुतवती | | |

७. प्रेरणार्थकक्रियापदानि प्रयुज्य अनुच्छेदमेकं विरचयत ।

## कारकप्रयोगः

८. वाक्यानि पठित्वा निर्दिष्टकार्यकलापं कुरुत

- हे प्रपन्नार्तिहरे देवि ! (त्वम्) प्रसीद ।
- अयि सखे ! कुत्र गच्छसि ?
- भो गुरवः ! आवां जलपानाय गन्तुं शक्नुव ?
- गुरो ! क्षमस्व माम् । मया महती त्रुटिर्जाता ।
- शृणु मूर्ख ! तव अत्याचारेण सीमोल्लङ्घिता ।
- भो अतिथिवर्य ! अत्र स्थास्यताम् ।
- अहो पापिन् ! (इतः) शीघ्रं याहि ।
- पुत्रि ! झटिति स्वकार्यं समापय ।
- हे लक्ष्मीः ! अस्मभ्यं धनं देहि ।
- श्रोतारः ! (यूयम्) सर्वे सावधाना भवत ।
- हरे ! मां भवसागरादुद्धर ।
- भगो (भगवन्) नमस्ते ।
- अ ! कोलाहलं मा कुरुत ।
- भो मातः ! भवत्या मम विषये चिन्ताकूलया नैव भूयताम् ।
- श्रीमन्तः ! मम निवेदनं स्वीक्रियताम् ।
- सीते ! त्वं ह्यः किमर्थं विद्यालयमनागतवती ?
- भोः पितरौ ! परीक्षायां साफल्याय मे आशीर्वचांसि प्रयच्छताम् ।
- ए भ्रातः ! किमर्थं व्यर्थं समयं यापयसि ? ध्यानेनाधीष्व ।
- आचार्य ! कौटिल्यश्चन्द्रगुप्तं कथं भारतवर्षस्य सम्राजं भावयाञ्चकार ?
- भो इह श्राद्धे भुङ्क्ताम् ।

(क) उपरितनवाक्येषु प्रयुक्तानां सम्बोधनार्थकपदानां प्रातिपदिकानि निर्दिशत । तेषां प्रथमायाः सम्बोधनस्य च रूपाणि विलिख्य परस्परं तोलयत ।

(ख) कस्मिन् वचने प्रायः प्रातिपदिकानां प्रथमासम्बोधनयो रूपाणि विभिद्यन्ते ?

(ग) अत्र प्रयुक्तानि सम्बोधनसूचकान्यव्ययपदानि कानि ?

(घ) सम्बोधनं किम् ? तत्र का विभक्तिः प्रयुज्यते ?

(ङ) लोट्लकारस्थक्रियापदानि विधिलिङि परिवर्त्य वाक्यानां पुनर्लेखनं कुरुत ।

(च) संस्कृतव्याकरणे 'सम्बुद्धिः' इति पदेन किं बोध्यते ?

(छ) उपर्युक्तेषु निषेधार्थकसम्बोधनसूचकाव्ययं किम् ?

(ज) 'भोस्', 'भगोस्', 'अघोस्' इत्येतेषां सान्तनिपातानां प्रयोगः कस्मिन् कस्मिन्नर्थे सम्बोधनाय कर्तव्यः ?

(झ) केषां प्रातिपदिकानां प्रयोगः सम्बोधने न भवति ?

(ञ) प्रथमं वाक्यं विलोक्य अन्येषु वाक्येष्वपि सम्बोधनार्थकपदेषु एकैकं विशेषणपदं योजयितुं प्रयासं कुरुत ।

**८. प्रदत्तानि पदान्यासृत्य सम्बोधनसूचकवाक्यानि विरचयत**

भोः, भगोः, अघोः, हे, ए, इ, आ, अ, ओ, औ, अयि, राजन्, दुर्गे, शारदे, पितः, गौरि, अनुज, गीते, महोदय, महोदये, महोदयाः, श्रीमन्, भवन्, भवति, मित्र, भगवन्, भवन्तः, सखायः, दातारः, जन्मदात्रि, भानो, गुरवः, मित्राणि, मातापितरौ, हरिहरौ, देवाः, ज्ञाननिधे

**९. श्लोकपादान् पठित्वा सम्बोधनार्थकपदेषु तेषां विशेषणपदेषु च रेखाङ्कनं कुरुत**

(क) नमस्ते शारदे देवि काश्मीरपुरवासिनि ।

(ख) देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ।

(ग) मोहान्धकारभरिते हृदये मदीये मातः सदैव कुरु वासमुदारभावे ।

(घ) त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि ।

(ङ) श्रीकृष्ण गोविन्द हरे मुरारे हे नाथ नारायण वासुदेव ।

(च) दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।

**१०. निर्दिष्टप्रातिपदिकानां सम्बोधनैकवचनस्य रूपाणि विलिख्य वाक्येषु योजयत**

राम, सखी, रमा, दुहितृ, कर्त्री, जामातृ, मघवन्, युवन्, विश्ववाह्, धीमत्, गिर्, सजुष्, मित्र, पशुपति, लक्ष्मी, विष्णु, विश्वपा, गो, चेतस्, भुवनेश्वरी, ईश, शूलिन्, धेनु, वधू

**११. लघुसंवादं विलिख्य सम्बोधनस्य प्रयोगं दर्शयत ।**

**१२. निर्दिष्टाय सम्बोध्याय सम्बोधनवाक्यानि विलिखत**

(क) प्रधानाध्यापकाय निवेदनलेखने

(ख) कस्मिन्नपि कार्यालये निवेदनलेखने

(ग) अग्रजाय पत्रलेखने

(घ) अनुजाय पत्रलेखने

(ङ) अनुजायै पत्रलेखने | (च) अग्रजायै पत्रलेखने
(छ) अपरिचितजनाय पत्रलेखने | (ज) सख्यादिभ्यः पत्रलेखने
(झ) कार्यालयतः कार्यालयाय पत्रलेखने | (ञ) कार्यालयतो व्यक्तये पत्रलेखने

**१३. कोष्ठस्थप्रातिपदिकानां समुचितविभक्त्यन्तरूपै रिक्तस्थानानि पूरयत**

(क) मम पुत्री ................ बिभेति । (बिडाल)

(ख) चन्द्रगुप्तः कयाचनजिज्ञासया ................ उपागच्छत् । (कौटिल्य)

(ग) ................ प्रातः पूर्वस्मिन् दिश्युदेति । (सवितृ)

(घ) ................ सकलविघ्नेभ्यो मां रक्ष । (गणेश)

(ङ) भवान् इमां पुस्तिकां ................ ददातु । (तद्)

(च) भो ................ ................ ! मह्यं ज्ञानं यच्छ । (वरदा, सरस्वती)

(छ) छिन्ने ................ वृक्षस्य शाखा अपि न जीवन्ति । (मूल)

(ज) शिक्षिका सम्प्रति ................ श्वेतपट्टे विलिख्य ................ प्रदर्शयति ? (अङ्कनी, दूरदर्शन)

(झ) स ................ कनिष्ठो वर्तते । (अस्मद्, वयस्)

(ञ) ................ कृते पर्वाण्यपि ऋणकारीणि भवन्ति । (निर्धन)

(ट) विषयेऽस्मिन् ................ चिन्ता मा भूत् । (युष्मद्)

(ठ) कृषकः ................ बीजं वपति । (अन्न)

**१४. अधस्तनपद्यतः सर्वासां विभक्तीनां प्रयोगद्योतकानि अष्टौ वाक्यानि रचयत**

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम ! मामुद्धर ॥

-0-

# न्यायखण्डः

## प्रथमः पाठः

# मङ्गलश्लोकार्थविवरणम्

न्यायसिद्धान्तमुक्तावलीनामकोऽयं ग्रन्थो विश्वनाथपञ्चाननभट्टाचार्यस्य विदुषः कृतिरस्ति । अत्र विश्वनाथपञ्चाननभट्टाचार्येण पूर्वं कारिकावलीनामको ग्रन्थो रचितः । तदनु तस्याः कारिकावल्याः स्वोपज्ञतया टीका रचिता । तस्या एव टीकाया नाम मुक्तावलीति । इयञ्च टीका न्यायसिद्धान्तानां प्रतिपादिकातोऽस्य ग्रन्थस्य नाम न्यायसिद्धान्तमुक्तावलीति । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्ता यथा स्युरिति महाभाष्यवचनात् समाप्तिकामो मङ्गलमाचरेदिति शिष्टाचारा नुमितश्रुत्या च प्रारीप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्तिकामनया ग्रन्थादौ मङ्गलं विधीयते । तच्च मङ्गलं त्रिविधम्- नमस्कारात्मकमाशीर्वादात्मकं वस्तुनिर्देशनात्मकञ्च । अत्रापि मुक्तावलीनामके ग्रन्थे विश्वनाथपञ्चाननभट्टाचार्यः स्वेष्टदेवतानमस्कारात्मकं प्रार्थनागर्भं मङ्गलं प्रस्तुवन् शिष्या अप्येवं ग्रन्थादौ मङ्गलं कुर्युरिति धिया शिष्यशिक्षायै ग्रन्थादौ मङ्गलं निबध्नाति विश्वनाथः । तद्यथा -

**मूलम् –** चूडामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥

**अन्वयः -** चूडामणीकृतविधुः, वलयीकृतवासुकिः, भवः, भव्याय, भवतु । लीलाताण्डवपण्डितः (भवः भव्याय भवतु)

**व्याख्या -** चूडा = केशः, चूडायाः मणिः = आभूषणं = चूडामणिः = शिरोभूषणविशेषः, न चूडामणिरिति अचूडामणिः, अचूडामणिश्चूडामणिः कृत इति चूडामणीकृतः, चूडामणिकृतो विधुर्येन स = चूडामणीकृतविधुः = शिरोभूषणीकृतचन्द्रः । वलयः = हस्ताभूषणविशेषः, न वलयः = अवलयः, अवलयो वलयः कृत इति वलयीकृतः, वलयीकृतो वासुकिर्येन स = वलयीकृतवासुकिः = हस्ताभूषणीकृतनागः, एतादृशालौकिककार्यकारी भगवान्, भवः = शङ्करः, भव्याय = कल्याणाय, भवतु = अस्तु ।

ननु भगवतैतादृशालौकिकं कार्यं किमर्थं कृतमित्याशङ्कयाह लीलाताण्डवपण्डितः = लीलया = स्वेच्छया, ताण्डवे = तन्नामके नृत्यविशेषे पण्डितः = कुशल इति लीलाताण्डवपण्डितः = शङ्करः स्वेच्छापूर्वकसम्पाद्यमानताण्डवनामकनृत्यविशेषे कुशलः, नृत्यञ्च आभूषणं विना न सम्भवतीति ताण्डवनामकनृत्यसम्पादनाय भगवतालौकिकं कार्यं कृतमिति पूर्वार्धांशार्थस्य हेतुरुत्तरार्धांशः, स च शङ्करोऽस्माकं कल्याणं करोत्वित्यर्थः । एतेनात्रोत्थिताताया आकाङ्क्षायाः सत्त्वान्न समाप्तपुनरातत्त्वं काव्यदोषः । शान्ताकाङ्क्षकविशेष्यवाचकपदस्थल एव स दोषो भवति । उत्थिताकाङ्क्षास्थले

त्वाकाङ्क्षाया एव सत्त्वादुत्थाप्याकाङ्क्षास्थल एव स दोषः प्रसरति। यतो हि क्रियान्वयेन शान्ताकाङ्क्षस्य विशेष्यवाचकपदस्य विशेषणान्तरेणान्वयार्थं पुनरनुसन्धानं समाप्तपुनरातत्त्वमिति तल्लक्षणम् । यथा चास्योदाहरणम् -

**नाशयन्तो घनध्वान्तः, तापयन्तो वियोगिनाम् ।**
**पतन्ति शशिनः पादा भासयन्तः क्षमातलम् ॥**

अत्रापि नाशयन्तो घनध्वान्तः, तापयन्तो वियोगिनाम्, शशिनः पादाः पतन्ति, भासयन्तः क्षमातलम् (शशिनः पादाः पतन्ति) इत्यन्वय एव स दोषो बोध्यः ।

**भावार्थः-** भूतभावनभगवान् शङ्करः स्वेच्छापूर्वकालौकिकताण्डवनृत्यसम्पादनायालौकिकं चन्द्रमसः चूडामणीकरणम्, वासुकेर्वलयीकरणरूपं कार्यञ्चकार । एतादृशालौकिककार्यकारी जगज्जन्मस्थितिलयकारणीभूतो महेश्वरोऽस्माकं सर्वेषां गुरुशिष्याणां कल्याणं करोत्विति ।

कारिकावलीरचनानन्तरं मुक्तावल्या रचनायाः प्रयोजनं निर्दिशति ग्रन्थकारो विश्वनाथपञ्चाननः -

**मूलम् –** **निजनिर्मितकारिकावलीमतिसङ्क्षिप्तचिरन्तनोक्तिभिः ।**
**विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः ॥**

**अन्वयः-** राजीवदयावशंवदः (सन्) अतिसङ्क्षिप्तचिरन्तनोक्तिभिः निजनिर्मितकारिकावलीम् कौतुकात् ननु विशदीकरवाणि ।

**व्याख्या -** राजीवदयावशंवदः = राजीवे = तन्नामके शिष्ये, या दया = गुरुशुश्रूषया जाता कृपा, तया वशंवदः = वशीभूतः = राजीवदयावशंवदः = राजीवनामकस्य स्वीयशिष्यस्य शुश्रूषया जातया कृपयाधीनः (सन्नित्यर्थः) । अथवा राजीवलोचनस्य भगवतो विष्णोर्दयया = कृपया, वशंवद इति मध्यमपदलोपी समासः, भगवतो राजीवलोचनस्य कृपयार्जितविद्यावैभवेन (अहम् = विश्वनाथपञ्चाननः) अति = अत्यन्तम्, सङ्क्षेपः = शब्दसङ्क्षेपो यासु ताः = अतिसङ्क्षिप्ताः, चिरं भवाः = चिरन्तनाः, चिरन्तनानां कणादगौतमप्रभृतीनां या उक्तयो = वचांसि = तदभिमतार्थप्रतिपादकाः शब्दा इति चिरन्तनोक्तयः, अतिसङ्क्षिप्ताश्च ताश्चिरन्तनोक्तयः, ताभिरतिसङ्क्षिप्तचिरन्तनोक्तिभिः = सङ्क्षिप्तसूत्रादिकणादगौतमादिमहर्षिवचोभिः, निजनिर्मितकारिकावलीम् = निजेन = स्वेन, निर्मिता = प्रणिता या कारिकाणाम् = श्लोकानाम्, आवली = पङ्क्तिरिति निजनिर्मितकारिकावली ताम् = निजनिर्मितकारिकावलीम् = स्वनिर्मितकारिकावल्याख्यो यो ग्रन्थस्तमित्यर्थः । कौतुकात्ऽअनायासेन स्वल्पपरिश्रमादित्यर्थः, विशदीकरवाणिऽविस्तरेण प्रकाशयामि ।

**भावार्थः -** अहं विश्वनाथपञ्चाननो राजीवनामके स्वकीयान्तेवासिनि जायमानया कृपया वशीभूतः सन्

अथवा भगवतो राजीवलोचनस्य कृपया वशीभूतः सन् न्यायदर्शनप्रवर्तकाणां गौतमकणादादिमहर्षीणां सूत्रभाष्याद्यत्यन्तसङ्क्षिप्तवचसा प्रमाणेन तन्मतप्रतिपादकं स्वनिर्मितकारिकावल्याख्यग्रन्थविशेषं स्वल्पप्रयासेन सविस्तारं प्रकाशयामि ।

ग्रन्थादौ श्रोतॄणां प्रवृत्तयेऽभिधेयप्रयोजनसम्बन्धाधिकार्यात्मकानुबन्धचतुष्टयं प्रदर्शनीयम् । यतो हि कार्यमात्रं प्रति प्रवर्तकम् - इदं मदिष्टं साधनमित्यात्मकमिष्टसाधनताज्ञानं तस्य ज्ञानस्य विषयाश्चेमेऽभिधेयप्रयोजनसम्बन्धाधिकारिण इति श्रोतृप्रवृत्तये तच्चतुष्टयं प्रदर्शनीयमतस्तान् चतुरः प्रदर्शयन् ग्रन्थस्यास्य सकलपदार्थप्रतिपादकत्वञ्च प्रतिपादयन् मुक्तावलीसमं स्वग्रन्थं परमात्मनि समर्पयंश्च स्वयशोऽनुवृत्तये ग्रन्थस्य स्वस्य च नामोल्लेखनपूर्वकं वस्तुनिर्देशात्मकं मङ्गलमाचरति विश्वनाथः -

**मूलम्- सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका ।**
**सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला ॥**
**विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली ।**
**विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥**

**अन्वयः -** सद्द्रव्या, गुणगुम्फिता, सुकृतिनां सत्कर्मणां ज्ञापिका, सत्सामान्यविशेषनित्यमिलिता, अभावप्रकर्षोज्वला, सद्युक्तिः, एषा सिद्धान्तमुक्तावली, विश्वनाथकृतिना विष्णोः वक्षसि विन्यस्ता (तथा सति) सुकृतिनां मनसः मुदं चिरं वितनुताम् ।

**व्याख्या-** कारिकेयं द्व्यर्थिका मालार्थिका, ग्रन्थार्थिका च । **मालापक्षेऽस्याः** कारिकाया अर्थ इत्थम्- सद्द्रव्या = द्रव्यैः = मूल्यवन्मरकतमण्यादिभिः, सहिता = युक्तेति सद्द्रव्या, गुणेन = सूत्रेण, गुम्फिता = ग्रन्थिता = गुणगुम्फिता, सुकृतिनाम् = पुण्यवताम्, सत्कर्मणाम् = सन्ति = समीचीनानि मन्त्रपुरश्चरणभगवद्भजनादीनि यानि कर्माणि तेषां ज्ञापिका = अनुमानिका । एतन्मालया विभूषितो जनः पुण्यवानित्यनुमीयते । अनुमानाकारश्चेत्थम् - अयं सुकृतिजनः मन्त्रपुरश्चरणादिमान् मालावत्त्वादित्यनु-मानेन पुरोदृश्यमाने जने मालावत्त्वहेतुना मन्त्रपुरश्चरणादिरूपशुभकर्मवत्त्वमनुमीयते इत्यर्थः ।सामान्यश्च विशेषश्चेति = सामान्यविशेषौ, सन्तौ च तौ सामान्यविशेषाविति सत्सामान्यविशेषौ, ताभ्याम्, नित्यम् = अनवरततम्, मिलिता = सत्सामान्यविशेषनित्यमिलिता = उत्कृष्टापकृष्टमणिभ्यां सततं युक्तेत्यर्थः, प्रकर्षेणोज्ज्वला = अतिशयविषयप्रकाशिकेत्यर्थः = अन्धकारे सत्यपि प्रकाशिता-शयेन घटादीनां विषयाणां प्रकाशिकैषा मालेत्यर्थः । सद्युक्तिः = सती = समीचीना, युक्तिः = मालारचनाकौशलं यस्यां सा, एतादृशी एषा, सिद्धान्तमुक्तावली, सिद्धः = समीचीनीकृतः, अन्तः = मेरुप्रदेशो यस्या सा सिद्धान्ता, मुक्तानाम् = मरकतमण्यादीनाम्, आवली = समूहः = मुक्तावली,

सिद्धान्ता चेयं मुक्तावली = सिद्धान्तमुक्तावली = समीचीनाभिर्युक्तिभी रचितमेरुप्रदेशो यस्या एतादृशी मालेत्यर्थः, एषा च माला विश्वनाथकृतिना = विश्वनाथश्चासौ कृती = पण्डितः = विश्वनाथकृती स्तेन विश्वनाथकृतिना = विश्वनाथनामकेन विदुषा, विष्णोः = भगवतो नारायणस्य, वक्षसि = गलप्रदेशे, विन्यस्ता = श्रद्धाभक्त्यतिशयेनार्पिता, अर्पिता सती च सुकृतिनाम् = भगवद्भजनादिकर्मवताम्, मनसः = चेतसः, मुदम् = हर्षम्, चिरम् = बहुकालं यावत्, वितनुताम् = विस्तारयत्विति ।

**ग्रन्थपक्षे** चास्याः कारिकाया अर्थ इत्थम् - सद्रव्या = द्रव्यैः = न्यायदर्शनप्रतिपाद्यनवभिर्द्रव्यैः, सहिता = प्रतिपादकत्वसम्बन्धेन युक्तेति सद्रव्या = न्यायदर्शनप्रतिपाद्यपृथिव्यादिनवसङ्ख्याकद्रव्यप्रतिपादिकेत्यर्थः। एतेनैतद्ग्रन्थेन सह पृथिव्यादिनवद्रव्याणां प्रतिपाद्यप्रतिपादकभावसम्बन्धो व्यज्यते।गुणगुम्फिता = गुणैः = न्यायदर्शनप्रतिपाद्यचतुर्विंशतिसङ्ख्याकैर्गुणैः,गुम्फिता = ग्रन्थितेति गुणगुम्फिता = प्रतिपादकत्वसम्बन्धेन न्यायदर्शनोक्तचतुर्विंशतिसङ्ख्याकगुणैर्युक्तेत्यर्थः । सन्ति = न्यायदर्शने वर्तमानानि च तानि कर्माणि = उत्क्षेपणादीनि यानि कर्माणि तेषाम्, ज्ञापिका = बोधिका, न्यायसिद्धान्तमुक्तावली उत्क्षेपणादिपञ्चकर्मणां प्रतिपादिका वर्तत इत्यर्थः । सत् = न्यायशास्त्रे विद्यमानम् = प्रतिपादितम्, सामान्यम् = जातिरिति सत्सामान्यम्, सत्सामान्यञ्च विशेषश्च नित्यश्चेति = सत्सामान्यविशेषनित्याः, तैर्मिलिता = युक्तेति सत्सामान्यविशेषनित्यमिलिता।सामान्यम् = जातिः, विशेषः = वैशेषिकदर्शनाभिमतपञ्चमपदार्थः, नित्यः = नित्यसम्बन्धः समवायाख्यः पदार्थः, एतेषां त्रयाणामपि प्रतिपादिकेयं मुक्तावलीत्यर्थः । एवंभूता, अभावस्य = भावभिन्नस्य सप्तमपदार्थत्वेन स्वीकृतस्य पदार्थस्य यः प्रकर्षः प्रागभावप्रध्वंसाभावान्योन्याभावात्यन्ताभावादिरूपेण यो भेदस्तैर्भेदैरुज्ज्वला = प्रकाशिकेति अभावप्रकर्षोज्ज्वला, अभावस्य प्रागभावादिभेदानां प्रकर्षाणां यद् गाम्भीर्यं तत्प्रतिपादनेन दर्शनशास्त्रेऽतिप्रसिद्धेयं मुक्तावलीत्यर्थः । एतादृशी एषा = बुद्धिस्था, सिद्धान्ता = वादिप्रतिवादिभ्यां निर्णीता अर्थास्ता एव मुक्तास्तासामावली = पङ्क्तिरिति सिद्धान्तमुक्तावलीनामको ग्रन्थविशेषः, विश्वनाथकृतिना = विश्वनाथनामकेन विदुषा, विष्णोः = भगवतो नारायणस्य, वक्षसि = गलप्रदेशे, विन्यस्ता = श्रद्धाभक्तिपुरस्सरं समर्पिता (समर्पिता सती) सुकृतिनाम् = पुण्यकर्मवतां विदुषाम्, मनसः = चित्तस्य, मुदम् = हर्षम्, चिरम् = बहुकालं यावद्, वितनुताम् = वर्धताम् = विस्तारयत्वित्यर्थः ।

**भावार्थः-** न्यायदर्शनाभिमतनवद्रव्याणाम्, चतुर्विंशतिगुणानामुत्क्षेपणादिपञ्चकर्मणां सामान्यविशेषसमवायानां भावानां प्रतिपादिका, तथैव भावभिन्नसप्तपदार्थरूपाभावस्य योऽवान्तरभेदरूप-प्रकर्षस्तेषामपि शोभनाभिर्युक्तिप्रयुक्तिभिः समुपपादिकेयं मुक्तावलीनामको ग्रन्थविशेषो विश्वनाथनामकेन विदुषा नारायणस्य गलप्रदेशे श्रद्धाभक्तिपुरस्सरं समर्पितेयं मुक्तावली सज्जनानां मनसि बहुकालं यावद्धर्षप्रकर्षमभिवर्धयतु ।

अनया रीत्या ग्रन्थकृता आभ्यां द्वाभ्यां कारिकाभ्यामनुबन्धचतुष्टयं निर्दिष्टम् । तत्रानुबन्धचतुष्टयन्नाम-सम्बन्धाधिकारिविषयप्रयोजनानि । अस्य च ग्रन्थस्याधिकारी ग्रहणधारणपटू राजीवोपलक्षितो बालः । प्रयोजनञ्च विदुषां मनसो हर्षवर्धनम् । विषयाश्च द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्याः सप्तपदार्थाः । सम्बन्धश्च ग्रन्थप्रतिपाद्यद्रव्यादिसप्तपदार्थानां ग्रन्थेन सह प्रतिपाद्यप्रतिपादकभावो बोध्यः । इत्थं मुक्तावल्यामनुबन्धचतुष्टयप्रदर्शनपुरस्सरं स्वेष्टदेवतानमस्कारात्मकमङ्गलानन्तरं तस्य मङ्गलस्य प्रयोजनं प्रदर्शयति ग्रन्थकारः -

**मूलम्- विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति नूतनेत्यादि ।**

**व्याख्या-** विघ्नस्य = समाप्तिप्रतिबन्धकीभूतपापविशेषस्य विघाताय = निःशेषेण नाशाय, कृतं मङ्गलं = आचरितमिष्टदेवतास्मरणरूपं मङ्गलम्, शिष्यशिक्षायै = मत्शिष्या अप्येवं ग्रन्थादौ मङ्गलं कुर्युरिति शिक्षायै = शिष्याणां बोधनाय, ग्रन्थतो = ग्रन्थादौ निबध्नाति = ग्रन्थावयवीकरोतीत्यर्थः ।

**अयं भावः-** प्रारब्धे कर्मण्यागतानां विघ्नानां नाशनायेष्टस्मरणरूपं मङ्गलं करणीयमिति धिया कृतं मङ्गलं आचार्यपरम्परामवलोक्य शिष्येभ्योऽपि तद्बोधनाय ग्रन्थादौ लिखतीत्यर्थः । विघातायेत्यत्र यद्यपि घातपदस्योत्पत्तिमदभावार्थतया विपदस्यानर्थक्यं प्रतिभाति तथापि **विशिष्टवाचकानां पदानां सति पृथग् विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वमिति** न्यायाद् विपदमुत्पत्तिमदर्थकम्, घातपदञ्चाभावमात्रार्थकमिति रीत्या न विपदमनर्थकमित्यपि बोध्यम् ।

कारिकावल्यां नमस्कारात्मकं मङ्गलं प्रस्तौति विश्वनाथः -

**मूलम् - नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।**
**तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥**

**अन्वयः -** नूतनजलधररुचये, गोपवधूटीदुकूलचौराय, संसारमहीरुहस्य बीजाय तस्मै कृष्णाय नमः ।

**व्याख्या -** धरतीति धरः, जलस्य धरः = जलधरो मेघः, नूतनश्चासौ जलधरः = नूतनजलधरः = सद्योवृष्टिप्रदाता मेघः, नूतनजलधरस्य रुचिरिव रुचिर्यस्य स नूतनजलधररुचिः, तस्मै = नूतनजलधररुचये = सद्योजलप्रदातृनीलमेघस्येव कान्तिमते । यथा नूतनजलधरो मेघः सद्योवृष्टिप्रदानेन कृषकानानन्दयति तथैव भगवान् कृष्णोऽपि स्वभक्तान् अभिलषितानि वस्तूनि सद्यः प्रदाय स्वभक्तान् तोषयत्वित्यर्थः, एवं भूताय । गोपवधूटीदुकूलचौराय = गाः पान्तीति = गोपाः = गोपालाः, गोपानां वधूटयः = स्त्रियः = गोपवधूटयस्तासां दुकूलानि = वस्त्राणि = गोपवधूटीदुकूलानि, तेषां चौरः = अपहर्ता, तस्मै = गोपवधूटीदुकूलचौराय = गोपिकानां वस्त्रापहर्त्रे । अथवा गाः = इन्द्रियाणि पान्तीति = गोपाः = जीवात्मानस्तेषां वधूटी = सहचरी = बुद्धिः, गोपवधूटीनाम् = बुद्धीनां

दुकूलानि = तदाच्छादकवस्त्रकल्पानि = कामकस्मलादीनि तेषां चौराय = तदपहर्त्रे एवं भूताय, संसारमहीरुहस्य बीजाय, संसार एव महीरुहो वृक्षस्तस्य बीजाय = निमित्तकारणाय, कृष्णाय = शास्त्रप्रसिद्धदेवकीनन्दनाय वासुदेवाय भगवते नमः = (नमस्करोमि) स्वापकर्षबोधानुकूलात्मककरशिरः संयोगानुकूलव्यापारं करोमीत्यर्थः ।

**भावार्थः -** नवीनमेघकान्तिसदृशकान्तियुक्ताय, गोपस्त्रीणां वस्त्रापहर्त्रे संसारमहीरुहस्य निमित्तकारणाय कृष्णाय नमः । एतेनेश्वर आद्यणुकं ब्रह्माण्डस्य = संसारस्य निमित्तकारणत्वं प्रतिपादितम् ।

१. **पदानामर्थपरिचयः**

कृती = पण्डितः

वधूटी = पत्नी

दुकूलम् = वस्त्रम्

जलधरः = मेघः

रुचिः = कान्तिः

बीजम् = निमित्तकारणम्

महीरुहः = वृक्षः

चूडामणीकृतविधुः = शिरोभूषणीकृतचन्द्रः शङ्करः

वलयीकृतवासुकिः = करभूषणीकृतसर्पराजनागः शङ्करः

लीलाताण्डवपण्डितः = ताण्डवनृत्यसम्पादने निपुणः शङ्करः

आवली = पङ्क्तिः (समूहः) ।

कौतुकम् = अनायासः (स्वल्पपरिश्रमः) ।

सुकृती = शोभनकर्मवान् (पुण्यवान्) ।

चिरन्तनः = भूतपूर्वम् (पुराकल्पे भवः) पुरातनः ।

## अभ्यासः

१. **अधोलिखितान् श्लोकान् स्पष्टतयोच्चारयत**

**निजनिर्मितकारिकावलीमतिसङ्क्षिप्तचिरन्तनोक्तिभिः ।**
**विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः ॥१॥**

**चूडामणीकृतविधुर्वलयीकृतवासुकिः ।**
**भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥२॥**

**सद्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका ।**
**सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला ॥**

विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली ।
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥३॥

२. **परस्परं मेलयत**

| | |
|---|---|
| चूडामणीकृतविधुः | गौतमादिः |
| चिरन्तनः | मुक्तावली |
| नूतनजलधररुचिः | शङ्करः |
| महीरुहः | पण्डितः |
| कृती | वृक्षः |
| सद्रव्या | कृष्णः |

३. **अतिसङ्क्षेपेणोत्तरयत**

(क) मुक्तावल्या रचयिता कः ?

(ख) मङ्गलश्लोको ग्रन्थादौ किमर्थं लिख्यते ?

(ग) बीजमित्यस्य कोऽर्थः ?

(घ) लीलाताण्डवपण्डितः कः ?

(ङ) गोपवधूटीनां दुकूलानि कः चोरयति ?

४. **सङ्क्षेपेणोत्तरयत**

(क) नमस्कारात्मकमङ्गलस्यैकमुदाहरणं दीयताम् ।

(ख) भगवता शङ्करेण किमर्थमलौकिकं कार्यं कृतम् ?

(ग) किं नाम समाप्तपुनरातत्त्वं दोषः ?

(घ) कारिकावलीलेखनानन्तरमुक्तावलीलेखनस्य प्रयोजनं किम् ?

(ङ) मुक्तावल्या अनुबन्धचतुष्टयं किम् ?

(च) नूतनजलधररुचये इति कारिकां प्रपूर्य व्याख्यायत ।

(छ) सद्रव्येति कारिकां मालापक्षे व्याख्यायत ।

५. **सविस्तारं व्याख्यायत**

(क) मङ्गलं कतिविधम् ? ग्रन्थादौ तन्मङ्गलं किमर्थं क्रियत इति विवेचयत ।

(ख) चूडामणीकृतविधुरिति श्लोकं व्याख्याय तत्रागतं समाप्तपुनरातत्त्वं दोषमुद्भाव्य निवारयत ।

(ग) सद्रव्येति कारिकार्थं व्याख्याय मुक्तावल्या अनुबन्धचतुष्टयं प्रतिपादयत ।

# द्वितीयः पाठः

# मङ्गलेश्वरवादौ

## (क) मङ्गलवादः

मङ्गलाचरणस्य विरोद्धारो नास्तिका मङ्गलस्य निष्फलत्वमाशङ्कन्ते नन्वित्यादिना-

**मूलम्- ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं विनापि मङ्गलं नास्तिकादीनां ग्रन्थेषु निर्विघ्नपरिसमाप्तिदर्शनादिति ।**

**व्याख्या -** सिद्धान्तिना पूर्वं मङ्गलाचरणस्य प्रयोजनं विघ्नविघात इति निर्दिष्टमासीत् । तत्रेत्थं बोध्यम्- मङ्गलस्य द्वे फले स्वीकृते स्तः । तत्र प्राचीनमते मङ्गलस्य फलं विघ्नध्वंसपुरस्सरं समाप्तिर्वर्तते चेन्नवीनमते विघ्नध्वंस एव मङ्गलस्य फलम् । तत्र नास्तिका उभयोर्मतं खण्डयन्तो वदन्ति- मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं भवितुं शक्नोति । यतो हि कार्यकारणभावस्तत्रैव निश्चीयते यत्रान्वयव्यतिरेकव्याप्ती निश्चीयेते । तत्रान्वयव्याप्तिः **कारणसत्त्वे कार्यसत्त्वम्** । यथा भोजनरूपकारणसत्त्वे क्षुधानिवृत्तिरूपकार्यसत्त्वमिति । व्यतिरेकव्याप्तिश्च **कारणाभावे कार्याभाव** इति । यथा औषधसेवनाभावे रोगनिवृत्त्यभाव इति । परमत्र तु तादृशान्वयव्यतिरेकौ न स्तः । अर्थान्मङ्गलसत्त्वे समाप्तिः, मङ्गलाभावे समाप्त्यभाव इत्यन्वयव्यतिरेकावत्र न स्तः । किन्तु अन्वयव्यतिरेकव्यभिचारावत्र स्तः । तौ चान्वयव्यतिरेकव्यभिचारौ कार्यकारणभावविरोधिनौ भवतः । तत्रान्वयव्यभिचारो नाम **कारणसत्त्वे कार्याभावः**, व्यतिरेकव्यभिचारश्च **कारणाभावे कार्यसत्त्व**मिति । अत्रापि नास्तिकादीनां ग्रन्थेषु मङ्गलाभावेऽपि ग्रन्थसमाप्तिरूपस्य कार्यस्य दर्शनाद् व्यतिरेकव्यभिचारो भवति चेत् कादम्बर्यादिग्रन्थेषु मङ्गलरूपकारणस्य सत्त्वेऽपि ग्रन्थसमाप्त्यभावरूपकार्याभावस्य सत्त्वादन्वयव्यभिचारोऽपि दृश्यतेऽतो मङ्गलं न समाप्तिं प्रति कारणम् । एवमेव रीत्या ग्रन्थसमाप्तिरूपकार्यं प्रति व्यभिचारात् तत्कारणीभूतविघ्नध्वंसं प्रत्यपि मङ्गलस्यान्वयव्यभिचारव्यतिरेकव्यभिचारौ द्रष्टव्यौ । तथा च समाप्तिं प्रति विघ्नध्वंसं प्रति च मङ्गलं न कारणम् । एवञ्च यावत्फलविशेषशून्यत्वान्मङ्गलं निष्फलम् । फलविशेषशून्यत्वहेतुना मङ्गले निष्फलत्वसिद्धे, निष्फलत्वहेतुना च मङ्गलेऽकरणीयत्वं सिद्ध्यति । तथा चानुमानकारौ - मङ्गलं निष्फलं फलविशेषशून्यत्वाद्, जलताडनादिवत् । मङ्गलमयुक्तं (अकरणीयम्) निष्फलत्वाद्, अकरणीयकार्यकरणाच्च ग्रन्थकृतो न्यूनत्वमिति पूर्वपक्षिणां नास्तिकानामाशङ्कायामाह सिद्धान्ती-

**मूलम्- इति चेन्न, अविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वसिद्धेः ।**

**व्याख्या -** यत्र यत्र धूमस्तत्र तत्र वह्निरिति व्याप्तिज्ञाने जाते यथा पर्वते पक्षेऽदृश्यमानो वह्निः

धूमेन लिङ्गेनानुमीयते तथैव मङ्गलरूपे पक्षेऽपि-अविगीतशिष्टाचारविषयत्वेन हेतुना सफलत्वं सिद्ध्यति । अयं भावः - फलसाधनतांशे भ्रान्तिरहिताः शिष्टा सफले एव कर्मणि प्रवर्तन्ते, निष्फलकर्मणः वेदनिषिद्धत्वात् । तस्माद् योऽविगीत = अनिन्दित-शिष्टानामाचारो भवति तस्य विषयः सफल एव दृश्यते । यथा लौकिकभोजनादिकार्यमलौकिकदर्शपूर्णमासादि कर्म च । तथैव मङ्गलमपि कार्यमविगीतशिष्टानामाचारविषयो वर्ततेऽतस्तत्रापि सफलत्वेन साध्येन भवितव्यम् । यतो हि यत्र यत्राविगीतशिष्टाचारविषयत्वं हेतुः वर्तते तत्र सफलत्वं साध्यं वर्तत एवेति व्याप्त्या मङ्गले सफलत्वं सिद्ध्यति । अनुमानाकारश्च मङ्गलं सफलं अविगीतशिष्टाचारविषयत्वाद् दर्शादिवदिति । यत्र यत्राविगीतशिष्टाचारविषयत्वं तत्र तत्र सफलत्वमिति व्याप्त्याथ चाविगीतशिष्टाचारविषयत्ववन्मङ्गलमितितत्पक्षधर्मतावत्त्वज्ञानेन चाविगीतशिष्टाचारविषयत्वव्याप्यसफलत्ववन्मङ्गलमिति परामर्शपूर्वकं मङ्गलं सफलमित्यनुमितिर्जायते। इत्थं रीत्यानुमानेन मङ्गले सफलत्वे सिद्धे किं फलं भवितुं शक्नोति मङ्गलस्येति जिज्ञासायामाह-

**मूलम्- तत्र च फलजिज्ञासायां सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अन्यायत्वाद्, उपस्थिततत्वाच्च समाप्तिरेव तत्फलं कल्प्यते ।**

**व्याख्या-** पूर्वोक्तानुमानेन मङ्गले सफलत्वसिद्धे, तत्र कीदृशं फलं भवितुं शक्नोति मङ्गलस्येति चेद् यतो हि फलं द्विविधं भवति । कस्यचित् कार्यस्य फलं लौकिकञ्चेत् कस्यचित् कार्यस्य फलमलौकिकं भवति । यथा भोजनस्य फलं क्षुधानिवृत्तिः लौकिकं फलम्, दर्शादेः फलं स्वर्गादिकमलौकिकं फलमिति । तत्र लौकिकं फलं दृष्टम् = प्रत्यक्षसिद्धञ्चेदलौकिकं फलं स्वर्गाद्यनुमेयमात्रम् । यत्र दृष्टं प्रत्यक्षसिद्धं फलं सम्भवति । तत्रानुमेयादृष्टं फलं न कल्पीनयम्, कल्पनागौरवात् । यतो हि **दृष्टादृष्टयोर्मध्ये दृष्टफलस्यैव बलीयस्त्वा**दिति न्यायेन यत्र दृष्टं फलं न सम्भवति तत्रैवादृष्टं फलं कल्पनीयम् । यथा गङ्गास्नानादेः फलं स्वर्ग इति, तत्र दृष्टफलासम्भवतात् । अत्र तु मङ्गले दृष्टं समाप्त्यादिकं फलं सम्भवतीति दर्शादिवन्मङ्गले नादृष्टं स्वर्गादिकं फलं कल्पयितुं शक्यतेऽतोऽत्र दृष्टफलमेव कल्पनीयमिति सिद्धम् । दृष्टेष्वपि किं फलं मङ्गलस्येति चेन्मङ्गलाचरणे प्रवृत्तपुरुषस्य कामना भवति यत् प्रारिप्सितो मे ग्रन्थः निर्विघ्नं परिसमाप्येत इति, अतः कामनाया विषयत्वेनोपस्थिततत्वाद् ग्रन्थसमाप्तिः, विघ्नध्वंसो वा मङ्गलस्य फलमिति सिद्धम् । मङ्गलस्य फलं ग्रन्थसमाप्तिः, विघ्नध्वंसो वेति परिशेषानुमानेन सिद्ध्यतीत्यर्थः । परिशेषानुमानाकारश्च- मङ्गलं समाप्तिफलकं समाप्त्यन्याफलकत्वे सति सफलत्वात्, यन्नैवं तन्नैवं यथा भोजनादिरिति । अथवा मङ्गलं विघ्नध्वंसफलकं विघ्नध्वंसान्याफलकत्वे सति सफलत्वादिति केवलव्यतिरेकानुमानमेव परिशेषानुमानम् । (प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गात् शिष्यमाणे संप्रत्यय इत्येव परिशेषानुमानम्) । तथा चानुमानप्रमाणेन मङ्गलस्य फलं ग्रन्थसमाप्तिर्विघ्नध्वंसो वेति

निश्चितम् । तथा च ग्रन्थकृतो मङ्गलाचरणं युक्तमेवेति सिद्धम् ।

नास्तिकग्रन्थेषु मङ्गलाभावेऽपि ग्रन्थसमाप्तिरूपव्यतिरेकव्यभिचारस्य, कादम्बर्यादौ सत्त्वेऽपि मङ्गले समाप्त्यभावरूपान्वयव्यभिचारस्य च निवारणायाह ग्रन्थकारः -

**मूलम्- इत्थञ्च यत्र मङ्गलं न दृश्यते तत्रापि जन्मान्तरीयं तत्कल्प्यते । यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यम् । प्रचुरस्यैवाऽस्य बलवत्तरविघ्ननिवारणे कारणत्वम् ।**

**व्याख्या-** पूर्वोक्तप्रकारेण मङ्गलस्य सफलत्वे सिद्धेऽर्थात् समाप्तिं प्रति विघ्नध्वंसं प्रति वा मङ्गलस्य कारणत्वे सिद्धे यत्र नास्तिकादीनां ग्रन्थेषु मङ्गलं विनैव समाप्तिर्दृश्यते तत्र जन्मातरीयं मङ्गलमनुमातव्यम् । निर्विघ्नग्रन्थसमाप्तिरूपहेतुना नास्तिकेऽपि पूर्वजन्मकृतमङ्गलवत्त्वमनुमानेन साधनीयमित्यर्थः । अनुमानाकारश्च नास्तिकः पूर्वजन्मार्जित-मङ्गलवान् निर्विघ्नपूर्वकग्रन्थसमाप्तिमत्त्वादास्तिकवद् इति । अनेनानुमानेन नास्तिकस्यापि ग्रन्थसमाप्तिः पूर्वजन्मकृतमङ्गलेनैव जातेति सिद्धमिति न मङ्गलसमाप्त्योः कार्यकारणभावे व्यतिरेकव्यभिचारः । यत्र च कादम्बर्यादिष्वास्तिकप्रणीतग्रन्थेषु मङ्गलसत्त्वेऽपि समाप्त्यभावादन्वयव्यभिचारो दर्शितस्तत्रापि बलवत्तरविघ्नस्य विद्यमानत्वादर्थात् तत्र कादम्बर्यादौ एकोऽपि विघ्नोऽतीवबलवान् विद्यतेऽतस्तं विघ्नं निर्बलं मङ्गलं विघातयितुमशक्नुवत् कादम्बर्यादिग्रन्थप्रणेतरि बलवतो विघ्नस्य विद्यमानत्वान्निर्बलेन मङ्गलेन (विघ्नापेक्षया निर्बलेन) स बलवान् विघ्नो न नष्ट इति तत्र विघ्नस्यैव सत्त्वान्न समाप्तिरिति भावः । अथवा तत्र विघ्नाः प्रचुरसङ्ख्यकाः (अधिकसङ्ख्यकाः) सन्ति, मङ्गलञ्च न्यूनसङ्ख्याकमिति अधिकसख्याकविघ्नेन तत्र ग्रन्थसमाप्तिः प्रतिबद्धयते । यावन्मङ्गलं तावत्सङ्ख्याकविघ्नं तु नाशयत्येवातो न विघ्नध्वंसमङ्गलयोर्विघ्नध्वंसपुरस्सरसमाप्तिमङ्गलयोर्वा कार्यकारणभावेऽन्वयव्यभिचारः। समसङ्ख्याकत्वेनैव मङ्गलविघ्नयोः नाश्यनाशकभावः । यावत्सङ्ख्याकमङ्गलमाचरितं तेन तावन्तो विघ्ना नाशिताः तदतिरिक्तानां विघ्नानां नाशकमङ्गलाभावाद् ग्रन्थसमाप्त्यभावान्नान्वयव्यभिचार इत्यर्थः ।

मङ्गलस्य सफलत्वे सिद्धे तस्यावश्यं करणीयत्वमपि सिद्धम् । परं तस्य मङ्गलस्य कार्यविषये प्राचीननवीनयोर्मतभेदो वर्ततेऽतस्तं मतभेदं प्रस्तौति ग्रन्थकारः -

**मूलम्- विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः । नवीनास्तु मङ्गलस्य विघ्नध्वंस एव फलं समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात् ।**

**व्याख्या -** प्राचां मते मङ्गलं समाप्तिं प्रति करणम् । करणञ्च व्यापारवदसाधारणं कारणम् । यथा घटं प्रति दण्डः करणम् । स च दण्डो भ्रमिरूपव्यापारजनकत्वेन जनकत्वसंबन्धेन भ्रमिरूपव्यापारवान्,

घटं प्रत्यसाधरणकारणञ्चेति दण्डो घटस्य करणम् । एवमेव मङ्गलमपि समाप्तिं प्रति करणम् । अत्र व्यापारश्च विघ्नध्वंसः । यतो हि व्यापारत्वन्नाम तज्जन्यत्वे सति तज्जन्यजनकत्वमिति । अत्र प्रथमतत्पदेन करणं ग्राह्यं तज्जन्यं कार्यं प्रकृते च तत्पदग्राह्यं मङ्गलं मङ्गलजन्यो विघ्नध्वसः, एवञ्च द्वितीयतत्पदेनापि करणरूपं तदेव मङ्गलं ग्राह्यम्, तज्जन्या, समाप्तिः तज्जनकत्वमपि विघ्नध्वंस इति विघ्नध्वंसो मङ्गलस्य व्यापारः, विघ्नध्वंसपुरस्सरसमाप्तिश्च मङ्गलस्य फलमिति प्राञ्चो वदन्ति । नवीनास्तु मङ्गलस्य फलं विघ्नध्वंस एव, समाप्तिस्तु न मङ्गलस्य फलमपि तु बुद्धिप्रतिभादिकारणसमुदायस्य, यतो हि नवीनमते करणं न तावद्व्यापारवदसाधारणं कारणमपि तु फलायोगव्यवच्छिन्नं कारणमेव करणमिति मङ्गलस्य सामर्थ्यं विघ्नध्वंसपर्यन्तमेवेति मङ्गलस्य फलं विघ्नध्वंस एव । ननु विघ्नध्वंसस्य मङ्गलकार्यत्वे विघ्नविरहवता कृतस्य मङ्गलस्य किं फलमिति नवीनान् प्रति प्राचीनानामाशङ्कामुद्धरति ग्रन्थकारः -

**मूलम्- न च स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम् , इष्टापत्तेः, विघ्नशङ्कया तदाचरणात् तथैव शिष्टाचारात् । न च तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यापत्तिरिति वाच्यम्, सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् । अत एव पापभ्रमेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम् ।**

**व्याख्या-** प्राचीनाः नवीनान् पृच्छन्ति यन्मङ्गलस्य फलं यदि विघ्नध्वंसस्तदा यस्यात्मनि-एतत्कार्यप्रतिबन्धकीभूतविघ्न एव नास्ति स स्वतः सिद्धविघ्नविरहवान् पुरुषो भवति, तेन पुरुषेण कृतस्य मङ्गलस्य निष्फलत्वापत्तिः, यतो हि "ध्वंसं प्रति प्रतियोगिनः कारणत्वेन" विघ्नस्यैवाभावाद् विघ्नध्वंसासम्भवात् तन्मङ्गलं न विघ्नध्वंसफलकमपि तु निष्फलम्, निष्फलत्वे च तस्मिन् मङ्गले सफलत्वसाधकानुमानं व्यभिचारदोषग्रस्तमिति चेन्न, इष्टापत्तेः । अर्थात् तादृशमङ्गलस्य विघ्नध्वंसफलकत्वाभावेऽपि न क्षतिः । तत्र विघ्नशङ्कया मङ्गलाचरणात् । यतो हि मङ्गलाचरणप्रवृत्तिं प्रति निश्चयसंशयसाधारणविघ्नवत्ताज्ञानं कारणमिति तादृशमङ्गलस्य फलं विघ्नशङ्कानिवारणमेवेति न तत्र मङ्गले निष्फलत्वापत्तिः ।न च तस्य मङ्गलस्य विघ्नध्वंसफलकत्वाभावे विघ्नध्वंसकामो मङ्गलमाचरेदिति वेदस्याप्रामाण्यापत्तिरिति चेन्न, सति विघ्ने तन्नाशकामो मङ्गलमाचरेदिति वेदबोधितत्वात् । संशयनिश्चयसाधारणविघ्नज्ञाने सति तन्नाशनाय मङ्गलमाचरेदिति वेदबोधितत्वादित्यर्थः । वस्तुतो विघ्नध्वंसासंभवेऽपि तत्र विघ्नात्यन्ताभाववान् पुरुषो विघ्नाः सम्भविष्यन्तीति सन्देहेन मङ्गलमाचरन्तीति सन्देहनिवारणमेव फलं तस्येति न निष्फलत्वापत्तिस्तत्र । एवमेवास्माकं शिष्टाचारोऽप्येतादृश्येव यद् ग्रन्थादौ मङ्गलमाचरणीयमिति । तस्मात् शिष्टाचारसम्पादनायापि मङ्गलं तु करणीयमेवेति स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य फलं विघ्नध्वंसाभावेऽपि शिष्टाचारसम्पादनमिति न निष्फलत्वं तस्य । यथा बहिर्गतस्य पुरुषस्य

गोहननरूपपापशङ्कायां तेन प्रायश्चित्तः कृतः परन्तत्र गोहननं न जातमासीत् तेन तस्य प्रायश्चित्तस्य **पापध्वंसरूपफलाभावेऽपि पापध्वंसकामः प्रायश्चित्तमाचरेदिति** श्रुतेर्नाप्रामाण्यम् । सति पापे पापनाशनाय तत्कामः प्रायश्चित्तमाचरेदिति वेदबोधितत्वात् । निश्चयसंशयसाधारणपापज्ञाने सति पापनाशकामेन प्रायश्चित्तमाचरणीयमिति वेदबोधितत्वात् पापाभावे सति कृतस्य प्रायश्चित्तस्य पापनाशनरूपफलाभावेऽपि न तद्बोधकवेदाप्रामाण्यम् । परं तादृशप्रायश्चित्तस्य फलान्तरमनुसन्धेयमिति भावः ।

इत्थञ्च मङ्गलस्य विघ्नध्वंसं प्रति कारणत्वे सिद्धे मङ्गलविघ्नध्वंसादेः निर्दुष्टं कार्यकारणभावं दर्शयति ग्रन्थकारः -

**मूलम्- मङ्गलञ्च विघ्नध्वंसविशेषे कारणम् । विघ्नध्वंसविशेषे च विनायकस्तवपाठादिः, क्वचिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनम्, प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् । इत्थञ्च नास्तिकादीनां ग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः, स्वतःसिद्धविघ्नात्यन्ताभावो वास्तीति न व्यभिचार इत्याहुः ।**

**व्याख्या-** पूर्वोक्तपरिशेषानुमानेन विघ्नध्वंससामान्ये मङ्गलस्य कारणत्वं साधितमासीत् परं तन्न समीचीनम्, यतो हि यत्र विघ्नध्वंसाव्यवहितपूर्वक्षणे मङ्गलं नास्ति किन्तु विनायकस्तवपाठादिर्वर्तते तत्र व्यभिचारो निश्चित इति चेत्, समीचीनमेतत् यतो हि विघ्नध्वंससामान्यं प्रति न मङ्गलमात्रं कारणमपि तु मङ्गलाव्यवहितोत्तरजायमानविघ्नध्वंसं प्रत्येव मङ्गलं कारणम्, विनायकस्तवपाठाव्यवहितोत्तरजायमानविघ्नध्वंसं प्रति तु विनायकस्तवपाठादिरेव कारणम् । एवमेव प्रायश्चित्ताव्यवहितोत्तरजायमानविघ्नध्वंसं प्रति प्रायश्चित्तं कारणमिति प्रातिस्विकरूपेणैव कार्यकारणभावो विज्ञेयः । एवमेव समाप्तिं प्रत्यपि विघ्नध्वंसादेः कारणत्वमनुसन्धेयम् । अर्थाद् विघ्नध्वंसाव्यवहितोत्तर-समाप्तिं प्रति विघ्नध्वंसः कारणम्, यत्र विघ्नध्वंसो नास्ति किन्तु विघ्नात्यन्ताभाव एव तत्र समाप्तौ विघ्नात्यन्ताभावः कारणम् । यत्र च विघ्न उत्पस्यमानो वर्तते तत्र समाप्तौ विघ्नप्रागभावः कारणम्, विघ्नस्य समाप्तिं प्रति प्रतिबन्धकत्वेन प्रतिबन्धकसंसर्गाभावस्य (प्रागभावप्रध्वंसाभावात्यन्ताभावानां) कार्यमात्रं प्रति कारणत्वेन विघ्नस्यापि त्रय एवाभावाः समाप्तिं प्रति कारणानीत्यर्थः । इत्थञ्च नास्तिकादीनां ग्रन्थेषु इदानी मङ्गलाभावेऽपि जन्मान्तरीयमङ्गलजन्यविघ्नध्वंसो वर्ततेऽथवा स्वतःसिद्धविघ्नात्यन्ताभावो वर्तत इति न विघ्नाभावसमाप्त्योः कार्यकारणभावे व्यभिचार इति मङ्गलविघ्नध्वंसयोः विघ्नभावसमाप्त्योश्च कार्यकारणभावः निष्प्रत्युहः ।

**(ख) ईश्ववादः**

संसारमहीरुहस्य बीजायेत्यनेन संसारात्मककार्यं प्रति ईश्वरो निमित्तकारणमिति पूर्वं प्रतिपादितम्, स चेश्वरः केन प्रमाणेन सिद्ध्यतीत्याकाङ्क्षायामाह ग्रन्थकारः-

**मूलम्- संसारेति । संसार एव महीरुहो वृक्षस्तस्य बीजाय = निमित्तकारणायेत्यर्थः । एतेनेश्वरे प्रमाणमपि दर्शितं भवति । तथाहि यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि ।**

**व्याख्या-** संसारमहीरुहस्य बीजाय तस्मै कृष्णाय नमः इत्यनेन जगन्निमित्तकारणत्वमीश्वरे प्रतिपादितमासीत्, परं तन्नोचितमीश्वरसाधकस्य प्रमाणस्याभावाद्, यतो हि प्रमेयसाधकानि प्रमाणानि चत्वार्येव, "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति सूत्रानुसारात् । तत्र प्रत्यक्षप्रमाणमीश्वरं साधयितुं न शक्नोति । यतो हि प्रत्यक्षं द्विविधं -बाह्यं मानसञ्चेति । तत्र बाह्यं प्रत्यक्षं रूपादिमतो द्रव्यस्य, ईश्वरश्च न रूपादिमानिति नेश्वरो बाह्यप्रत्यक्षविषयः । मनसापि ईश्वरं साक्षात्कर्तुं न शक्यते, स्वमनसा स्वप्रत्यक्षं प्रति परात्मव्यावृत्तमनःसंयोगस्य कारणत्वात्, ईश्वरस्य च परात्मत्वान्न मानसप्रत्यक्षविषय ईश्वरः । ईश्वरसहचरितलिङ्गाभावान्न साक्षादनुमानं प्रमाणमीश्वरसाधकम् । ईश्वरसदृशवस्तुनोऽभावान्नोपमानं प्रमाणमीश्वरसाधनायालम् । शब्दराशिरूपवेदस्य प्रामाण्यमीश्वरोच्चरितत्वेनैव स्वीक्रियते परमिदानीम् ईश्वर एव न सिद्ध इति न तदुच्चरितवेदेनेश्वरः साधयितुं शक्य इति प्रमाणसामान्याभावादीश्वरो न सिद्धस्तस्मात्तद्विषयकनमस्कारोऽपि ग्रन्थकृतो व्यर्थ इति चेन्न, परिशेषानुमानेनेश्वरः साधनीयः तच्चेत्थम् - **क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवदिति** । अयञ्चानुमानाकारः । अनुमानाकारे च चत्वारोंऽशाः भवन्ति - पक्षः, साध्यः, हेतुः, दृष्टान्तश्चेति । तत्र पक्षो नाम यत्र हेतोः निश्चयो वर्तते साध्यस्य निर्णयश्च न वर्तते पश्चाद् हेतुज्ञानेन साध्यस्य निश्चयः क्रियते स पक्षः । साधयितुं योग्यः साध्यः । पञ्चम्यन्तः तृतीयान्तो वा साध्यज्ञापकोऽर्थाद् येन साध्यः सूच्यते स हेतुः । यत्र साध्यहेत्वोरुभयोः ज्ञानं पूर्वतो वर्तते स दृष्टान्तः । यथा पर्वतो वह्निमान् धूमाद्, महानसवदित्यत्र पर्वतः पक्षः, वह्निः साध्यः, धूमो हेतुः, महानसं दृष्टान्तः । तथैवात्रापि क्षित्यङ्कुरादिकं पक्षः, सकर्तृकत्वं (कृतिजन्यत्वं) साध्यम्, कार्यत्वं हेतुः, घटो दृष्टान्तः । क्षित्यङ्कुरादिकमित्यनेन कार्यमात्रमुपलक्षितं पक्षः, सकर्तृकमर्थाद् जन्यत्वसम्बन्धेन कर्तृसहितत्वं साध्यम्, कर्तृत्वञ्च स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्, तथा च जन्यत्वसम्बन्धेन स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्सहितत्वमायातम्, तदपेक्षया कृतिजन्यत्वे लाघवात् कृतिजन्यत्वमात्रं साध्यम् । हेतुश्च कार्यत्वम्, तच्च प्रागभावप्रतियोगित्वरूपं ज्ञेयम् । तथा चानुमानाकारः – कार्यं कृतिजन्यं प्रागभावप्रतियोगित्वादिति । अनेनानुमानेन यत्र यत्र प्रागभावप्रतियोगित्वरूपं कार्यत्वं तत्र कृतिजन्यत्वम् (सकर्तृकत्वम्) यथा घटः, इत्यन्वयव्याप्त्या, कृतिजन्यत्वव्याप्यकार्यत्ववत्क्षित्यङ्कुरादिकार्यमिति परामर्शद्वारा क्षित्यङ्कुरादिकार्यं कृतिजन्यमित्यनुमितौ यत्कृतिजन्यं क्षित्यङ्कुरादिकं स ईश्वरोऽपरिमितानल्पशक्तिमान् सर्वज्ञः जगत्कर्तेति सिद्धम् । न चास्मदादिषु अल्पशक्तिमत्सु सम्भवति तत्कर्तृत्वमिति परिशेषानुमानादीश्वरः सिद्ध्यति । अनुमानाकारश्च क्षित्यङ्कुरादिकार्यं ईश्वरकृतिजन्यं तदतिरिक्तमनुष्यादिकृत्यजन्यत्वे सति कार्यत्वादिति, अनेनानुमानेनेश्वरः सिद्धस्तस्मात्तद्विषयकनमस्कारोऽपि सार्थकः ।

इत्थं रीत्या परिशेषानुमानेनेश्वरसाधने पुनः पूर्वपक्षिणः स्थापकानुमाने सत्प्रतिपक्षदोषमाक्षिपन्ति -

**मूलम्- न च शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम्, अप्रयोजकत्वात् ।**

**व्याख्या-** अनुमानेन पक्षे साध्यानुमित्यर्थं हेतौ व्याप्तिपक्षधर्मतोभयवत्त्वरूपसद्धेतुत्वज्ञानमपेक्षितं भवति । यदि हेतौ पञ्चान्यतमेषु एकोऽपि दोष आगच्छेदर्थाद् हेतौ दुष्टत्वज्ञानं भवेत्तदा तादृशहेतुना साध्यं साधयितुं न शक्यते । तत्र हेतुदोषाः = हेत्वाभासाः पञ्च सन्ति । तेष्वन्यतमः सत्प्रतिपक्षनामको दोषः । स च साध्याभावव्याप्यवत्पक्षरूपोऽर्थाद् यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षितो दुष्टः । यथा कृतकत्वहेतुना शब्देऽनित्यत्वसाधने शब्दोऽनित्यः कृतकत्वादित्यनुमाने प्रतिपक्षी यदि तत्रैव शब्दे नित्यत्वसाधनाय शब्दो नित्यः शब्दत्वादित्यनुमाने हेत्वन्तरं प्रयुङ्क्ते तदा तत्रानुमाने सत्प्रतिपक्षो दोषो भवति । अर्थात् परस्परानुमितिजनकपरामर्शाभ्यां परस्परमनुमिती प्रतिबध्येते न काप्यनुमितिस्तत्र जायते, तद्वदत्रापि सिद्धान्तिना क्षित्यङ्कुरादिपक्षे कृतिजन्यत्वसाधनाय प्रयुक्तानुमाने पूर्वपक्षी सत्प्रतिपक्षानुमानं प्रयुङ्क्ते यत् क्षित्यङ्कुरादिकं कर्त्रजन्यं शरीराजन्यत्वादाकाशवदिति । एतयोरुभयोः हेत्वोः परामर्शयोरुपस्थित्योः परस्परानुमिती प्रतिबध्येते न काप्यनुमितिरुत्पद्यते इति सिद्धान्तिनः स्थापकानुमानेन क्षित्यङ्कुरादौ कृतिजन्यत्वासिद्धौ नेश्वरः सिद्ध्यतीति पूर्वपक्षिण आशङ्कायामाह सिद्धान्ती-अप्रयोजकत्वात् = व्यभिचारनिवारकतर्कशून्यत्वादित्यर्थः ।

**अयमर्थः -** परस्परविरुद्धयोरुभयहेत्वोर्विरोधिपरामर्शयोरुपस्थित्योः किञ्चित्क्षणायानुमितिप्रतिरोधेऽपि तत्र बलाबलविचारे सति बलवतो हेतोरेकपरामर्शे बलवत्त्वज्ञानेन तेन बलवत्परामर्शेणापरानुमितिः प्रतिरोध्यते स्वीयानुमितिश्चोत्पाद्यत इति सत्प्रतिपक्षभङ्गो जायते । कथं बलवत्त्वज्ञानमिति चेद् यदि सिद्धान्ती पूर्वपक्षाभिमतहेतौ शरीराजन्यत्वे व्यभिचारशङ्कामुद्भावयति क्षित्यङ्कुरादौ शरीराजन्यत्वमस्तु कर्त्रजन्यत्वं मास्त्विति तदा पूर्वपक्षिणो हेतौ एतादृशव्यभिचारशङ्कानिवारकतर्काभावादयं शरीराजन्यत्वहेतुर्निर्बलो जायते तदा स्वकीयबलवता प्रागभावप्रतियोगित्वरूपकार्यत्वहेतुना पूर्वपक्षानुमितिः प्रतिबध्यते, स्वकीयानुमितिश्चोत्पाद्यत इति न दोषः ।

पुनः प्रतिवादी वदति तवापि मते वयं कार्यत्वमस्तु कृतिजन्यत्वं मास्त्विति व्यभिचारमाक्षिपामस्तदा तवापि हेतुर्निर्बल इत्याशङ्कायां गदति ग्रन्थकारः -

**मूलम्- मम तु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवानुकूलस्तर्कः । द्यावाभूमी जनयन् देव एको विश्वस्य कर्ता भुवनस्य गोप्ता इत्यादय आगमा अप्यनुसन्धेयाः ।**

**व्याख्या-** अस्माकं नैयायिकानां मते तु कृतिकार्ययोः कार्यकारणभाव एवानुकूलस्तर्कोऽर्थात् कृतिसत्त्वे कार्यसत्त्वं कृत्यभावे कार्याभाव इति कार्यकारणभावजनकान्वयव्यतिरेकाभ्यां जायमानस्तर्को यदि कार्यत्वं कृतिजन्यत्वव्यभिचारि स्यात् तदा कृतिं विना कार्योत्पद्येतेति प्रयोजकस्य तर्कस्य सत्त्वान्नास्माकं मते

व्यभिचारापादयितुं शक्य इति नास्माकमीश्वरसाधको हेतुर्निर्बलोऽपि तु व्यभिचारवारकतर्कसहितत्वेनास्माकं कार्यत्वहेतुः क्षित्यङ्कुरादौ कृतिजन्यत्वसाधनाय सबल एवेति न सत्प्रतिपक्षदोषः । तथा च स्थापकानुमानपुरस्सरं परिशेषानुमानेनेश्वरः सिद्ध्यतीति तद्विषयकनमस्कारोऽपि सार्थकः। एवं रीत्यानुमानेन प्रमाणेनेश्वरसाधनानन्तरमनुमानसिद्धेश्वरे वेदोऽपि प्रमाणत्वेनोपस्थापयति ग्रन्थकारः - द्यावाभूमी जनयन् देव एको विश्वस्य कर्ता भुवनस्य गोप्ता इत्यादय आगमा अप्यनुसन्धेया इति ।

### १. पदानामर्थपरिचयः

मङ्गलम् = इष्टस्मरणम् (समाप्तिप्रतिबन्धकीभूतदूरितविशेषध्वंसाधारणकारणम्)

विघ्नः = पापविशेषः

विघ्नध्वंसः = पापनाशः (पापस्योत्पत्तिमदभावः)

समाप्तिः = चरमवर्णध्वंसः

अविगीतः = अनिन्दितः

आस्तिकः = वेदप्रामाण्याभ्युपगन्ता

प्रतिबन्धकः = कार्यावरोधकः (कारणीभूताभावप्रतियोगी)

अन्वयः = सम्बन्धः

व्यतिरेकः = अभावः

अन्वयव्याप्तिः = कार्यकारणयोरव्यभिचारसम्बन्धः (तत्सत्त्वे तत्सत्त्वम्)

व्यतिरेकव्याप्तिः = कारणाभावकार्याभावप्रयुक्तसम्बन्धः (तदभावे तदभावः)

अन्वयव्यभिचारः = कारणसत्त्वे कार्याभावः

व्यतिरेकव्यभिचारः = कारणाभावे कार्यसत्त्वम्

शिष्टः = फलसाधनतांशे भ्रान्तिरहितः

कर्तृत्वम् = स्वोपादानगोचरापरोक्षकृतिमत्त्वम्

अप्रयोजकत्वम् = व्यभिचारनिवारकतर्कशून्यत्वम्

सत्प्रतिपक्षः = हेतुगतः कश्चन दोषविशेषः (साध्याभावव्याप्यवत्पक्षः)

हेत्वाभासः = हेतुगतदोषः (यस्य ज्ञानेनानुमितिः प्रतिबध्यते)

उपादानम् = समवायिकारणम्

अपरोक्षज्ञानम् = प्रत्यक्षज्ञानम्

चिकीर्षा = कर्तुमिच्छा

गोचरः = विषयः

## अभ्यासाः

१. **परस्परं मेलयत**

| (क) | (ख) |
|---|---|
| प्राचीनमते मङ्गलफलम् | पापनाशः |
| मङ्गलस्य व्यापारः | समाप्तिः |
| प्रायश्चित्तस्य फलम् | विघ्नध्वंसः |
| नास्तिकग्रन्थसमाप्तिः | विघ्नात्यन्ताभावजन्या |
| नवीनमते मङ्गलफलम् | जगन्निमित्तकारणम् |
| ईश्वरः | प्रागभावप्रतियोगित्वम् |
| कार्यत्वम् | कश्चन हेतुगतदोषविशेषः |
| सत्प्रतिपक्षः | विघ्नध्वंसः |

२. **अतिसङ्क्षेपेणोत्तरयत**

(क) मङ्गलस्य नवीनाभिमतं फलं किम् ?

(ख) विघ्नध्वंसद्वारत्ववादिनः के ?

(ग) संसर्गाभावपदेन किं ज्ञायते ?

(घ) अन्वयव्यभिचारस्य स्वरूपं किम् ?

(ङ) अप्रयोजकत्वमित्यस्य कोऽर्थः ?

(च) कर्तृत्वन्नाम किम् ?

(छ) सत्प्रतिपक्षो दोषः कः ?

३. **सङ्क्षिप्तमुत्तरं देयम्**

(क) मङ्गलस्य निष्फलत्ववादिनां मतमुपस्थापयत ।

(ख) मङ्गलस्य साफल्यं निरूपयत ।

(ग) मङ्गलविषयकं प्राच्यनव्यमतं प्रस्तुत ।

(घ) सत्यपि मङ्गले समाप्त्यभावे को दोषः ? कुत्र च स दोषः ?

(ङ) मङ्गलस्य विघ्नध्वंसफलकत्वे दोषमुद्भावयत ।

(च) ईश्वरसाधकानुमानमुपस्थापयत ।

(छ) ईश्वरसाधकानुमाने सत्प्रतिपक्षं संसाधयत ।

(ज) ईश्वरसाधकानुमानेऽप्रयोजकत्वशङ्का कथं वारणीया ?

४. **विस्तृतमुत्तरं मौलिकं देयम्**

(क) मङ्गले साफल्यसाधकानुमानं प्रकाश्य मङ्गलविषयकप्राच्यनव्यमतं प्रतिपादयत ।

(ख) यदि मङ्गलस्य फलं विघ्नध्वंसस्तदा स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य फलं किं किमिति विवेचयत ।

(ग) ईश्वरसाधकानुमानमुपस्थाप्य तत्रत्य हेतौ सत्प्रतिपक्षदोषं निर्दिश्य निवारयत ।

५. **कक्षाभ्यासः**

१. व्यापारलक्षणं कथं लक्ष्ये सङ्घटत इति परस्परं भिन्नभिन्नलक्ष्येषु योजयत ।

२. सखिभिः सह मङ्गलपक्षकसफलत्वसाध्यकानुमानस्थलीयपक्षसाध्यहेतून् चर्चयत ।

३. हेत्वाभासविषये शिक्षकेण सह परामर्शङ्कुरुत ।

## तृतीयः पाठः

# द्रव्यादिसामान्यान्तपदार्थपरिचयः

**(क) पदार्थविभागः**

न्यायदर्शनस्य प्रवृत्तिस्तावत् त्रिधा, त्रिप्रकारेणेत्यर्थः । अर्थान्न्यायदर्शनशास्त्रं त्रिषु भागेषु विभक्तं वर्तते, उद्देशलक्षणपरीक्षासु । तत्रोद्देशो नाम नाममात्रेण वस्तुसंकीर्तनम्, वस्तूनां नामोच्चारणपूर्वकविभजनमेवोद्देश्यम् । अत्रापि विश्वनाथपञ्चाननो न्यायदर्शनाभिमतपदार्थानुद्दिशति-

**मूलम्-** **द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।**
**समवायस्तथाभावः पदार्थाः सप्तकीर्तिताः ॥२॥**

**अन्वयः -** द्रव्यम्, गुणः, तथा कर्म, सामान्यम्, सविशेषकम्, समवायः, तथा अभावः सप्त पदार्थाः कीर्तिताः (सन्ति) ।

**व्याख्या -** वैशेषिकदर्शने द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्याः सप्त पदार्थाः प्रतिपादिताः सन्ति । तत्र द्रव्यादीनामेकवचनेनोपस्थापनं द्रव्यत्वादिजात्यपेक्षया न तु द्रव्यादीनामेकत्वेन, एको महान् धान्यराशिरितिवत् । कारिकायामत्रोभयत्र तथेति पदं प्रयुक्तं वर्तते, तत्र प्रथमं तथेति पदं कर्मणोऽतिरिक्तपदार्थत्वव्यवस्थापनाय । भूषणकारो वैयाकरणः संयोगातिरिक्तं कर्म न स्वीकरोति, अतस्तन्मतनिराकरणाय प्रथमं तथेति पदं प्रयुक्तं ग्रन्थकृता । द्वितीयञ्च तथेति पदमभावस्यातिरिक्तपदार्थत्वव्यवस्थापनाय । मीमांसका वेदान्तिनश्चाभावोऽधिकरणात्मक इति वदन्ति परं नैयायिका वैशेषिकाश्चाभावं सप्तमपदार्थत्वेनातिरिक्तं पदार्थं स्वीकुर्वन्तीत्यभावस्य स्वतन्त्रपदार्थत्वव्यस्थापनाय द्वितीयं तथेति पदम् । यथा द्रव्यादयः षड्भावपदार्थाः स्वतन्त्रास्तथैवाभावोऽप्यतिरिक्तः पदार्थ इत्यर्थः । इत्थं रीत्या द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायः, अभावश्चेती सप्तपदार्थाः सन्ति ।

ननु कथं सप्तैव पदार्थाः ? ते च कुत्र प्रसिद्धा इत्याकाङ्क्षायामाह ग्रन्थकारः-

**मूलम्- अत्र सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं प्राप्तं तेन भावत्वेन पृथगुपन्यासो न कृतः । एते च पदार्था वैशेषिकनये प्रसिद्धा नैयायिकानामप्यविरुद्धाः । प्रतिपादितं चैवमेव भाष्ये ।**

**व्याख्या-** पदजन्यप्रतीतिविषयो हि पदार्थः, अर्थाद् घटपटादिपदैर्जायमाना या प्रतीतिरयं घटोऽयं पट इत्यात्मिका, तादृस्याः प्रतीतेर्विषया घटपटादयः सर्वेऽपि व्यवहारपथमागता अर्थाः पदार्थाः । ते च पदार्थाः सप्तसु विभागेषु विभक्ताः सन्ति ।

**तद्यथा -** द्रव्यम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायः, अभावश्चेति । एतेषु सप्तसु पदार्थेषु सप्तमस्या-भावत्वेनोल्लेखात् षण्णां द्रव्यादीनां भावपदार्थत्वं सुस्पष्टमिति पदार्थाः द्विप्रकारकाः भावात्मका अभावात्मकाश्चेति वक्तुं शक्यते ।परमेतस्य विभागस्य सुस्पष्टत्वेन पदार्थानां भावाभावत्वेन विभागोल्लेखो न कृतो ग्रन्थकृता । एते च सप्तपदार्था वैशेषिकदर्शनशास्त्रे सूत्रभाष्यादिषु शब्दतयोल्लिखिताः सन्ति । न्यायदर्शनेऽप्येतेषां पदार्थानामुल्लेखः प्रकारान्तरेण वर्तत एव, न तु खण्डिता एते पदार्थाः । गौतमोक्तानां प्रमाणप्रमेयादीनां षोडशपदार्थानां वैशेषिकदर्शनप्रतिपाद्येषु सप्तस्वन्तर्भावादेते द्रव्यादयः सप्तपदार्था न गौतमोक्तषोडशपदार्थतो भिन्नाः । अत एव न्यायभाष्ये षोडशपदार्थान्तर्गततया सप्तानां पदार्थानामुल्लेखो, वैशेषिकप्रशस्तपादभाष्ये च सप्तस्वन्तर्गततया षोडशपदार्थानामुल्लेखो विद्यते । न केवलमाकरग्रन्थ एवापि तु नव्यन्यायप्रवर्तकगङ्गेशोपाध्यायस्य तत्त्वचिन्तामणिनामके ग्रन्थेऽपि सप्तपदार्थानामेव विभागं द्रढयितुं सप्तातिरिक्तानां पदार्थत्वनिराकरणायोपामानचिन्तामणौ सप्तपदार्थातिरिक्तत्वेन शक्तिसादृश्यादीनां खण्डनं तत्त्वचिन्तामणिकृता कृतम् ।तत्र चिन्तामण्युपमाखण्डे शक्तिसादृश्यादीनां पदार्थत्वनिराकरणार्थं पूर्वं पूर्वपक्षमित्थं व्यवस्थापितं गङ्गेशोपाध्यायेनेति वदति विश्वनाथः –

**मूलम्- अत एवोपमानचिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशङ्किम्- ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात् ? तथाहि मण्यादिसमवहितेन वह्निना दाहो नजायते, तच्छून्येन तु जन्यते । तत्र मण्यादिना वह्नौ दाहानुकूलाशक्तिर्नाश्यते, उत्तेजकेन, मण्याद्यपसारणेन च जन्यत इति कल्प्यते ।**

**व्याख्या-** न्यायवैशेषिकदर्शने द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्याः सप्त पदार्थाः स्वीकृताः सन्ति । न ततो न्यूना नातिरिक्ता वा । तत्र मीमांसकाः शक्तेरतिरिक्तपदार्थत्वं स्वीकुर्वन्ति । साहित्यिकाश्च सादृश्यस्यातिरिक्तपदार्थत्वं स्वीकुर्वन्ति । अतो मीमांसकाः साहित्यिकाश्च नैयायिकं प्रति पृच्छन्ति - ननु कथं द्रव्यगुणादय एव पदार्थाः ? शक्तिसादृश्यादीनामतिरिक्तपदार्थानां सत्त्वात् ? कथं शक्तेरतिरिक्तपदार्थत्वमित्याकाङ्क्षायामाहु मीमांसका यतो हि व्यवहारे दृश्यते वह्निना दाहो जायते परं तत्रैव वह्नौ यदि चन्द्रकान्तमणिसमवधानं भवेत् सूर्यकान्तमणिर्वागच्छेत्तदा तत्र वह्निना दाहो नजायत इति वह्नौ दाहानुकूला काचन शक्तिरस्तीति सिद्धयति, तया च शक्त्या दाहः प्रतिरोध्यते । परं चन्द्रकान्तमणिसमवहितवह्निस्थल एव यदि कश्चिज्जनः सूर्यकान्तमणिमानयति चेत्तत्र दाहो जायतेऽतः सूर्यकान्तमणौ दाहोत्तेजिका शक्तिः कल्पनीया तया च शक्त्या दाहो जन्यते । तत्र प्रतिबन्धकत्वं नाम कार्यानुकूलशक्तिविघटकत्वम् । यथा चन्द्रकान्तमणौ दाहानुकूलशक्तिविघटकत्वस्य विद्यमानत्वाच्चन्द्रकान्तमणिः दाहप्रतिबन्धकस्तेन च मणिना वह्निगता शक्तिर्नाश्यतेऽतो न तत्र दाहः, परन्तत्रैव चन्द्रकान्तमण्यपसारणेऽथवा सूर्यकान्तमणिरूपोत्तेजकानयने पुनस्तत्रैव चन्द्रकान्तमणिस्थले

दाहो जायते । अनेन ज्ञायते यत् पूर्वं वह्नावेका दाहजनिका शक्तिरासीच्चन्द्रकान्तमणिस्तां शक्तिं नाशयति । अथ च सूर्यकान्तमणिर्दाहप्रतिबन्धिकचन्द्रकान्तमणिशक्तिं नाशयतीति नाश्यनाशिकानां शक्तीनां कल्पनात् (अनुमानात्) शक्तेः सिद्धिः । किञ्च प्रतिबन्धकदशायामपि सूर्यकान्तमण्याद्युत्तेजकसत्त्वे कार्योत्पत्तौ सूर्यकान्तमणावप्युत्तेजिका शक्तिः कल्पनीया । अत्रोत्तेजकत्वं नाम प्रतिबन्धकसत्त्वेऽपि कार्यजनकत्वरूपं ज्ञेयम् । तच्चात्र सूर्यकान्तमणाविति सूर्यकान्तमणिरुत्तेजकः । एवञ्च वह्न्यादौ कार्यजनिका शक्तिः, चन्द्रकान्तमणिमन्त्रौषधादिषु प्रतिबन्धिका शक्तिः, सूर्यकान्तमणिमन्त्रौषधादिषु चोत्तेजिका शक्तिरिति अनन्ताशक्तिः कार्यानुरोधेन कल्पनीयेति मीमांसकानां सिद्धान्तः ।

ननु कल्पनामूलिकायाः शक्तेः क्लृप्तसप्तपदार्थेष्वन्तर्भावान्नातिरिक्तपदार्थसिद्धिरिति चेन्न, क्लृप्तसप्तपदार्थेष्वन्तर्भावासम्भवात् शक्तिरतिरिक्ता तथाहि शक्तिर्न द्रव्यगुणकर्मान्यतमा गुणवृत्तित्वाद् गुणत्ववदित्यनुमानेन शक्तेर्द्रव्यगुणकर्मभिन्नत्वसिद्धौ, शक्तिर्न सामान्यविशेषसमवायाभावान्यतमाः, ध्वंसप्रतियोगित्वे सति प्रागभावप्रतियोगित्वाद् घटवदित्यनुमानेन च सामान्यविशेषसमवायाभावभिन्नत्वसिद्धेः शक्तेरतिरिक्तपदार्थत्वं सिद्ध्यतीति पदार्थविभाजकवाक्ये शक्तेरप्रवेशेन न्यूनत्वम् । एवमेव सादृश्यमप्यतिरिक्तः पदार्थः । तथा चाह ग्रन्थकारः-

**मूलम्- एवं सादृश्यमप्यतिरिक्तपदार्थः, तद्धि न षट्सु भावेष्वन्तर्भवति सामान्येऽपि सत्त्वाद्, यथा गोत्वं नित्यं तथाश्वत्वमपीति सादृश्यप्रतीतेः । नाप्यभावे सत्त्वेन प्रतीयमानत्वादिति चेद्**

**व्याख्या-** यथा शक्तिरतिरिक्तपदार्थस्तथैव सादृश्यमप्यतिरिक्तम्- तथाहि सादृश्यं न षट्सु पदार्थेष्वन्तर्भवति, तद्यथा- सादृश्यं न षट्ष्वन्तर्भूतं सामान्यवृत्तित्वात् । षट्सु द्रव्यादिषु पदार्थेषु न कोऽपि पदार्थः सामान्ये तिष्ठति परमिदं सादृश्यं सामान्ये = जातौ तिष्ठतीति तत्सादृश्यं षड्भावातिरिक्तम् । अस्तित्वेन प्रतीयमानत्वाच्च नेदं सादृश्यमभावोऽतः सप्तपदार्थभिन्नत्वेन, यथा गोत्वं नित्यं तथाश्वत्वमपीति सादृश्यस्यास्तित्वेन प्रतीयमानत्वाच्च सादृश्यमतिरिक्तः पदार्थ इति कथं सप्तैव पदार्था इत्युक्तमिति मीमांसकादीनां प्रश्ने उत्तरयति ग्रन्थकारः -

**मूलम्- न मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वं कल्प्यते । अनेनैव सामञ्जस्येऽनन्तशक्तिस्तत्प्रागभावध्वंसकल्पनानौचित्यात् ।**

**व्याख्या-** चन्द्रकान्तमणिसमवधानदशायां वह्निना दाहानुत्पादाच्चन्द्रकान्तमण्यभावदशायां सूर्यकान्तमणिसत्त्वे चन्द्रकान्तमणिदशायां वा वह्निना दाहजननाद् या शक्तिरतिरिक्ता कल्पिता तन्नोचिता, यतो हि कार्यमात्रं प्रति प्रतिबन्धकाभावविशिष्टकारणस्यैव सामर्थ्यं सर्वत्रानुभूयते । प्रतिबन्धकदशायां कस्यापि कार्यस्यानुत्पादात् कार्यमात्रं प्रति प्रतिबन्धकाभावस्य साधारणकारणत्वमभ्युपेयम् । तस्य च प्रतिबन्धकाभावस्य कारणत्वं स्वातन्त्र्येण, कारणतावच्छेदकत्वेनेत्यन्या चर्चा । तथा च प्रकृतेऽपि

चन्द्रकान्तमणिः दाहं प्रति प्रतिबन्धकः । प्रतिबन्धत्वञ्चात्र कारणीभूताभावप्रतियोगित्वम्, न तु कार्यानुकूलशक्तिविघटकत्वम्, तादृश्याः शक्तेरस्वीकारात् । तथा च दाहं प्रति कारणीभूताभावः चन्द्रकान्तमण्यभावः तत्प्रतियोगित्वस्य चन्द्रकान्तमणौ सत्त्वाच्चन्द्रकान्तमणिः प्रतिबन्धकः, तत्सत्त्वे च चन्द्रकान्तमण्यभावरूपप्रतिबन्धकाभावस्यासत्त्वात् प्रतिबन्धकाभावविशिष्टवह्निरूपकारणमेव नास्तीति कथं दाहरूपं कार्यमुत्पद्येत, नोत्पद्यत इत्यर्थः । अतस्तत्र शक्तिकल्पनं व्यर्थम् । अयंभावः– दाहं प्रति वह्निमात्रस्य कारणत्वं न स्वीकुर्मः किन्तु चन्द्रकान्तमणिरूपप्रतिबन्धकाभावविशिष्टस्यैव वह्नेः दाहं प्रति कारणत्वेन चन्द्रकान्तमणिसत्त्वे च प्रतिबन्धकाभावविशिष्टवह्नेरसत्त्वेन कारणाभावान्न दाहरूपकार्योत्पत्तिरिति तत्र दाहवारणायानन्तशक्तिरनन्तशक्तिप्रागभावशक्तिध्वंसादिकल्पनं व्यर्थम् ।

ननु प्रतिबन्धकाभावविशिष्टवह्नेर्दाहकारणत्वे यत्र चन्द्रकान्तमणिः सूर्यकान्तमणिसमवहितस्तत्र वह्निसत्त्वेऽपि दाहो न भवेत् प्रतिबन्धकविशिष्टस्यैव वह्नेः कारणस्य सत्त्वादिति चेदाह ग्रन्थकारः -

**मूलम्- न चोत्तेजके सति प्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम् । उत्तेजकाभावविशिष्टमण्यद्यभावस्य हेतुत्वात् ।**

व्याख्या- यद्युपर्युक्तरीत्या कार्यं प्रति प्रतिबन्धकाभावविशिष्टवह्न्यादिरूपकारणस्य सामर्थ्यं (कारणत्वं) स्वीक्रियते तदा यत्र सूर्यकान्तमणिसमवहितश्चन्द्रकान्तमणिर्वर्तते तत्र प्रतिबन्धकाभावविशिष्टवह्नेर-सत्त्वाद् दाहो न स्यादित्याकाङ्क्षायां चन्द्रकान्तमणेः प्रतिबन्धकत्वमप्युत्तेजकाभावत्वेनैव, तथा च दाहकार्यं प्रति चन्द्रकान्तमण्यभावस्य कारणत्वं सूर्यकान्तमण्यभावविशिष्टत्वेनैव न तु स्वातन्त्र्येणार्थात् कार्यमात्रं प्रति प्रतिबन्धकाभावस्य कारणत्वमुत्तेजकाभावविशिष्टत्वेनैव, तथा चोत्तेजकाभावविशिष्ट-प्रतिबन्धकाभावो हि कार्यं प्रति कारणम् । यत्र च सूर्यकान्तमणिविशिष्टचन्द्रकान्तमणिस्तत्र तादृशकारणस्य सत्त्वात् कार्योत्पत्तौ न व्यभिचारः, यतो ह्ययमभावो विशिष्टाभावो विशिष्टाभावश्च त्रेधा भवति - विशेषणाभावप्रयुक्तविशिष्टाभावः, विशेष्याभावप्रयुक्तविशिष्टाभावः, विशेषणविशेष्यो-भयाभावप्रयुक्तविशिष्टाभावश्चेति । तत्राद्यो यथा यत्र रक्तो नास्ति दण्डश्चास्ति तत्र विद्यमानो रक्तदण्डाभावो रक्तरूपविशेषणाभावप्रयुक्तो विशिष्टाभावः । द्वितीयो यथा यत्र रक्तः पटादौ वर्तते दण्डश्च नास्ति तत्र विद्यमानो रक्तदण्डाभावो दण्डरूपविशेष्याभावप्रयुक्तो विशिष्टाभावः । तृतीयश्च यत्र रक्तोऽपि नास्ति दण्डोऽपि नास्ति तत्र विद्यमानो रक्तदण्डाभावः विशेषणविशेष्योभयाभावप्रयुक्तो विशिष्टाभावः ।प्रकृते च यत्र सूर्यकान्तमणिरस्ति चन्द्रकान्तमणिश्चास्ति तत्र सूर्यकान्तमण्यभावरूपप्रति-बन्धकविशेषणस्याभावात् सूर्यकान्तमण्यभावविशिष्टचन्द्रकान्तमण्यभाव आगत इति तत्र वह्निसत्त्वे दाहो भवति । यत्र च सूर्यकान्तमणेरभावोऽथ च चन्द्रकान्तमणिर्विद्यते तत्र वह्निसत्त्वेऽपि न दाहः, उत्तेजकाभावविशिष्टप्रतिबन्धकस्य सत्त्वात्, कार्यमात्रं प्रत्युत्तेजकाभावविशिष्टप्रतिबन्धकाभावस्य,

तद्विशिष्टवह्न्यादिरूपकारणस्य वा सामर्थ्यादिति न काप्यनुपपत्तिः ।

यथा शक्तिर्नातिरिक्तः पदार्थस्तथैव सादृश्यमपि नातिरिक्तः पदार्थः तथा चाह विश्वनाथः-

**मूलम्- सादृश्यमपि न पदार्थान्तरं किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्, यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति ।**

**व्याख्या-** पूर्वं साहित्यिकैः सादृश्यस्यातिरिक्तपदार्थत्वं साधितमासीत् तदपि नोचितम्, यतो हि सादृश्यन्नाम सदृशवस्तुगतधर्म एव सदृशस्य भावः सादृश्यमिति व्युत्पत्त्या, परं तादृशस्य सदृशवृत्तिधर्मस्य प्रतीतिः कथं जायते इत्याशंकायां मुक्तावलीकारः सादृश्यं परिभाषते - तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमिति । अर्थात् सादृश्यं प्रतियोगिवृत्तिधर्म एव परन्तु स धर्म यथा प्रतियोगिनि तथैवानुयोगिन्यपि वर्तते, अत एवोभयोः सादृश्यमिति व्यवहारः । तस्मादनुयोगिनि विद्यमानं सादृश्यं तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपम् । प्रतियोगिनि विद्यमानं सादृश्यञ्च तद्गतभूयोधर्मवत्त्वमात्रमिति प्रतियोगिनि तद्भिन्नत्वरूपस्य विशेषणस्याभावान्नातिव्याप्तिः । तादृशधर्मश्च नातिरिक्तः पदार्थ इति सादृश्यं नातिरिक्तम् । यथा चन्द्रवन्मुखमित्यत्र चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वरूपधर्मो मुखे वर्तते तदेव च सादृश्यं स च धर्मो गुणविशेष एवेति नातिरिक्तपदार्थसिद्धिः । **अयमत्रः बोध्यः-** सादृश्यस्य द्वौ सम्बन्धिनौ भवतः, एकः प्रतियोगी, अपरश्चानुयोगी । तत्र यस्य सादृश्यं स प्रतियोगी यत्र सादृश्यं सोऽनुयोगी । यथा चन्द्रसदृशं मुखमित्यत्र चन्द्रस्य सादृश्यं मुखे भासते चेत्तत्र चन्द्रः प्रतियोगी मुखञ्चानुयोगीति चन्द्रप्रतियोगिकमुखानुयोगिकं सादृश्यं चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिरूपो धर्मो मुखे विद्यमानः स च धर्मो गुणो नान्यः पदार्थ इति सादृश्यं नातिरिक्तमतः सप्तैव पदार्थाः ।

**(ख) द्रव्यनिरूपणम्**

सप्तसु विभागेषु विभक्तानां द्रव्यादिपदार्थानां मध्ये प्रथमोदिष्टं यद्द्रव्यं तस्य द्रव्यस्य कति विभागाः सन्ति ? किञ्च तद्द्रव्यमित्याकाङ्क्षायामाह विश्वनाथः -

**मूलम्- क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः । द्रव्याणि......। द्रव्याणि विभजते- क्षित्यवित्यादि । क्षितिः पृथिवी, आपो जलानि, तेजो वह्न्यादिः, मरुद् वायुः, व्योमः आकाशः, कालः समयः, दिक् आशा, देही आत्मा मन एतानि नवद्रव्याणीत्यर्थः ।**

**व्याख्या-** क्षितिश्च आपश्च तेजश्च मरुच्च व्योम च कालश्च दिक्च देही चेति द्वन्द्वसमासात् क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिन इति पदं निष्पन्नम् । तत्र च क्षितिः = पृथिवी, आपः = जलानि, मरुद् = वायुः, व्योमः = आकाशः, कालः = समयः, दिक् = दिशा, देही = आत्मा, मनः = अन्तःकरणमन्तरिन्द्रियम्, एतानि च पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवसङ्ख्यकानि

द्रव्याणि न्यायदर्शने द्रव्यत्वेन स्वीकृतानि न ततो न्यूनानि न वाधिकानि द्रव्याणीत्यर्थः ।

ननु किं नाम द्रव्यम् ? द्रव्यत्वजातिमद् द्रव्यमिति चेत्तत्रैव द्रव्यत्वजातावर्थाद् द्रव्यत्वस्य जातित्वे किं प्रमाणमित्यतो वदति विश्वनाथः -

**मूलम्- ननु द्रव्यत्वजातौ किं मानम् ? नहि तत्र प्रत्यक्षं प्रमाणं घृतजतुप्रभृतिषु द्रव्यत्वाग्रहादिति ।**

**व्याख्या-** मूले नवद्रव्याणीत्युक्तम्, तत्र किं नाम द्रव्यम् ? यदि गुणवद् द्रव्यं कर्मवद् वा द्रव्यमित्युच्यते तदोत्पत्तिकालिके द्रव्येऽव्याप्तिः स्याल्लक्षणस्य, यतो हि नैयायिका उत्पत्तिकालिकं द्रव्यमेकक्षणपर्यन्तं निर्गुणं निष्क्रियञ्च तिष्ठतीति स्वीकुर्वन्ति । **उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियञ्च तिष्ठतीति नियमात्** । अतो गुणवद् कर्मवद् वा द्रव्यमिति द्रव्यलक्षणं भवितुं न शक्नोति तर्हि किं लक्षणं द्रव्यस्येत्युक्तौ द्रव्यत्वजातिमद्द्रव्यमिति । तत्र पूर्वपक्षिणो वदन्ति, द्रव्यत्वजातौ किं मानम् । यतो ह्यापामरसाधारणं द्रव्यत्वजातिप्रत्यक्षं न सम्भवति, कस्या अपि जातेः प्रत्यक्षं तदैव भवति यदा तज्जात्याश्रयव्यक्तौ यावति समानाकारा प्रतीतिः भवति । यथा सर्वेषु घटेषु अयं घटोऽयं घटः, सर्वेषु पुस्तकेष्विदं पुस्तकमिदं पुस्तकमित्यादिसमानाकारया प्रतीत्या सर्वेषु घटेष्वेकं घटत्वम्, सर्वेषु पुस्तकेष्वेकं पुस्तकत्वं जातिः सिद्ध्यति सा च जातिः प्रत्यक्षसिद्धा । न तथा द्रव्यत्वजातौ समानाकारा प्रतीतिः सम्भवति अतः सर्वेषु घटपटघृतजत्वादिद्रव्येष्वेकं द्रव्यत्वं जातिः न सिद्ध्यति । यतोहि घृतजतुप्रभृतिषु द्रव्येषु कदाचिद् द्रवत्वप्रतीतिः कदाचिच्च काठिन्यप्रतीतेः समानरूपेणेदं द्रव्यमित्यापामरसाधारणजनानां समानाकारप्रतीतेरसम्भवात् सर्वेषु घटपटघृतजतुप्रभृतिष्वेकं द्रव्यत्वं जातिर्न सिद्ध्यतीति प्रत्यक्षप्रमाणेन द्रव्यत्वजातावसिद्धायां द्रव्यलक्षणमप्यसिद्धमित्युक्तौ पूर्वं द्रव्यत्वजातिसाधनायानुमानं प्रमाणं दर्शयति ग्रन्थकारः -

**मूलम्- इति चेन्न कार्यसमवायिकारणतावच्छेदकतया, संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेरिति ।**

**व्याख्या-** परिशेषानुमानेन द्रव्यत्वं जातिः सिद्ध्यति, तच्चेत्थम्- किमपि भावकार्यं स्वाश्रयेषु द्रव्येषु समवायेन वर्तमानं सदुत्पद्यतेऽतो भावकार्यमात्रस्य सर्वस्य समवायिकारणं द्रव्यमेव (समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्) तत्र भावकार्यं द्रव्यात्मकम्, गुणात्मकम्, कर्मात्मकञ्च सन्ति । अन्येषां भावानां नित्यत्वेन ते न कार्याणि । एवञ्च द्रव्यात्मकं कार्यं स्वाश्रये = स्वावयवे समवायेन तिष्ठति, **अवयवावयविनोः समवायात्** । गुणात्मकं कर्मात्मकञ्च कार्यं स्वाश्रये द्रव्ये समवायेनैव तिष्ठति **गुणगुणिनोः, क्रियाक्रियावतोश्च समवायात्** । एवञ्च कार्यकारणयोः सामानाधिकरण्यनियमेन भावकार्यस्य समवायसम्बन्धेनाधिकरणे द्रव्ये कारणं स्वात्मकं स्वस्मिन् तादात्म्येनैव सम्बन्धेन तिष्ठतीति समवायेन कार्यं प्रति तादात्म्येन द्रव्यं कारणमिति कार्यकारणभावमाश्रित्य द्रव्यत्वजातिः साधनीया ।

कार्यताकारणतयोर्नित्यसापेक्षतया निरूप्यनिरूपकभावसम्बन्धो भवति।भावकार्ये विद्यमानायाः कार्यताया अवच्छेदकौ धर्मसम्बन्धौ द्वौ भवतः । तत्र भावकार्यनिष्ठकार्यताया अवच्छेदको धर्मः कार्यत्वं सम्बन्धश्च समवायः । यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्न इति नियमात्, येन सम्बन्धेन यत्कार्यं तिष्ठति स सम्बन्धःतन्निष्ठिकार्यताया अवच्छेदक इति नियमाच्च समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यता जाता तादृशकार्यता निरूपितकारणता च द्रव्यनिष्ठा सा तादात्म्यसम्बन्धावच्छिन्ना वर्तते।तथा चानुमानाकारः- समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नद्रव्यनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद्, समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्न-कार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकपालत्वावच्छिन्नकपालनिष्ठकारणतावदित्यनुमानेन, यत्र यत्र कारणतात्वं तत्र किञ्चिद्धर्मावच्छिन्नत्वम्, यथा पूर्वोक्तकपालनिष्ठा कारणतेत्यन्वयव्याप्त्या किञ्चिद्धर्मावच्छिन्नत्वव्याप्यकारणतात्ववती समवायसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपि-ततादात्म्यसम्बन्धावच्छिन्नद्रव्यनिष्ठा कारणतेत्यन्वयपरामर्शेण, समवायसम्बन्धावच्छिन्न-कार्यत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नद्रव्यनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना इत्यनुमितौ सत्याम्, यद्धर्मावच्छिन्ना द्रव्यनिष्ठा कारणता स धर्मो द्रव्यत्वम्, निरवच्छिन्नायाः कारणताया अभावाद् जातिबाधकाभावाच्च स धर्मो द्रव्यत्वं जातिरिति परिशेषानुमानेन द्रव्यत्वजातिः सिद्ध्यति ।

अत्र चानुमाने पक्षीभूतायाः कारणतायाः यद्विशेषणरूपावच्छेदिका कार्यता तस्या कार्यताया अवच्छेदकञ्च कार्यत्वमिति स्वीकृतं (कार्यत्वावच्छिन्ना कार्यता इति कथनेन) तच्च न सम्भवति, यतो हि कार्यत्वं कार्यता चैकेति कथं स्वं स्वस्यावच्छेदको भवेद्, यतो हि स्वं यदि स्वस्यावच्छेदकः स्यात्तर्हि स्वभिन्नं स्यादित्यापादकतर्केण स्वस्मिन् स्वावच्छेदकत्वनिषेधात्, अतः कार्यत्वावच्छिन्नकार्यताया असम्भवेन तन्निरूपितकारणतारूपः पक्षश्चात्राप्रसिद्ध इत्याश्रयासिद्धिरूपो हेत्वाभासोऽत्रागतः । (पक्षे पक्षतावच्छेदकाभाव आश्रयासिद्धिः, यथा-काञ्चनमयः पर्वतो वह्निमान् धूमादिति) अतः पक्षस्यैवाप्रसिद्धेः नानेन हेतुना द्रव्यत्वे जातित्वं सिद्ध्यतीति चेत् स्थलान्तरमाह विश्वनाथः-

**संयोगस्य समवायिकारणावच्छेदकतया द्रव्यत्वजातिसिद्धिरिति** अर्थात् पूर्वोक्तरीत्या समवायसम्बन्धा-वच्छिन्नसंयोगत्वावच्छिन्नसंयोगनिष्ठकार्यतानिरूपितद्रव्यनिष्ठतादात्म्य-सम्बन्धावच्छिन्नकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद्, या या कारणता सा किञ्चिद्धर्मावच्छिन्ना, यथा समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठकार्यतानिरूततादात्म्यसम्बन्धावच्छिन्नकपालनिष्ठा-कारणता कपालत्वावच्छिन्ना, इत्यन्वयव्याप्त्या किञ्चिद्धर्मावच्छिन्नत्व-व्याप्यकारणतात्ववती समवायसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नसंयोगनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्न-

द्रव्यनिष्ठकारणतेति परामर्शेण तादृशसंयोगनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्नेत्यनुमितौ यद्धर्मावच्छिन्ना संयोगनिष्ठा कारणता स धर्मो द्रव्यत्वं जातिः, जातिबाधकाभावाच्च स धर्मो जातिरिति रीत्यापि द्रव्यत्वं जातिः सिद्ध्यति ।

अत्राप्यनुमाने पक्षरूपायाः कारणताया विशेषणीभूतायाः कार्यताया अवच्छेदकं संयोगत्वमुक्तम्, संयोगत्वावच्छिन्ना कार्यतेत्यनेन तदपि न सम्भवति । यतो हि संयोगत्वं धर्मो न कार्यताया अवच्छेदको भवितुं शक्नोति, संयोगत्वस्य नित्यानित्योभयविधसंयोगयोर्विद्यमानत्वेन कार्यत्वस्य चानित्यमात्रवृत्तितया संयोगत्वं न कार्यतावच्छेदकम्-अन्यूनानतिप्रसक्तधर्मस्यैवावच्छेदकत्वादित्यतः आह विश्वनाथः-**विभागस्य समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेरिति** । अत्रापि पूर्ववदिव समवायसम्बन्धावच्छिन्नविभागत्वावच्छिन्न-विभागनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नद्रव्यनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वाद् । या या कारणता सा किञ्चिद्धर्मावच्छिन्ना, यथा समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठकार्यतानिरूततादात्म्यसम्बन्धावच्छिन्न-कपालनिष्ठाकारणता कपालत्वावच्छिन्ना इत्यन्वयव्याप्त्या, कञ्चिद्धर्मावच्छिन्नत्वव्याप्यकारणतात्ववती समवायसम्बन्धावच्छिन्नविभागत्वावच्छिन्नविभागनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्न-द्रव्यनिष्ठा कारणतेति परामर्शद्वारा तादृशकारणता किञ्चिद्धर्मावच्छिन्नेत्यनुमितौ, यद्धर्मावच्छिन्ना सा कारणता स धर्मो द्रव्यत्वं जातिः, जातिबाधकाभावात् स धर्मो जातिः तच्च द्रव्यत्वमिति परिशेषेण द्रव्यत्वे जातित्वं सिद्ध्यति । द्रव्यत्वजातौ सिद्धायाञ्च द्रव्यत्वजातिमद्द्रव्यमिति द्रव्यलक्षणमपि सुघटमिति ।

तच्च द्रव्यं पृथिवीजलतेजोवाय्वाकाशकालदिगात्ममनांसि नवैव । ननु गुणकर्मणोरव्याप्त्या द्रव्य-लक्षणासम्भवेऽपि गुणकर्मणी द्रव्यातिरिक्तेऽन्यत्र कुत्रापि न वर्तेतेऽतो गुणकर्मवतो द्रव्यत्वं स्वीकार्यमेव, तमसि गुणस्य कर्मणश्च विद्यमानत्वात् स्वीकृतनवद्रव्यानन्तर्भावाच्च तमसो दशमद्रव्यत्वं सिद्धमिति कथं नवैवेति, अर्थाद् ग्रन्थकृतो द्रव्यविभागोऽनुचितस्तथा चाह ग्रन्थकारः-

**मूलम्- ननु दशमं द्रव्यं तमः कुतो नोक्तम् ? तद्धि न प्रत्यक्षेण गृह्यते तस्य च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वम् । तद्धि गन्धशून्यत्वान्न पृथिवी नीलरूपवत्त्वाच्च न जलादिकम् । तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुःकारणमिति चेद्**

**व्याख्या-** मीमांसकाः तमसो दशमद्रव्यत्वं स्वीकुर्वन्ति, यतो हि गुणकर्मवतो द्रव्यत्वनियमेन तमसि च नीलरूपस्य, चलनरूपकर्मणश्च विद्यमानत्वात् तमो द्रव्यमिति सिद्धम् अत एवाह-

**तमो द्रव्यं चलं नीलं परापरविभागवत् ।**
**प्रसिद्धद्रव्यवैधर्म्यात् नवभ्यो भेत्तुमर्हति ॥ इति**

अर्थात् तमः नीलं चलञ्च वर्तते, नीलं तमश्चलतीति प्रतीतेः, एवमेव तत्तमः परम्, एतच्च तमोऽपरमिति प्रतीतेश्च नीलरूपवत्त्वं परत्वापरत्वरूपगुणवत्त्वं चलनरूपक्रियावत्त्वञ्च तमसि प्रतीयमानत्वात्तमो द्रव्यमिति सिद्धम् । तस्य च तमसः स्वीकृतनवद्रव्येष्वन्तर्भावासम्भवात्तमो दशमं द्रव्यम् । कुतो नवद्रव्येष्वनन्तर्भाव इति चेत्तमसि गन्धो न वर्तते पृथिव्याञ्च सर्वस्यां गन्धो वर्तते तस्मान्निर्गन्धस्य तमसो न पृथिव्यामन्तर्भावः । पूर्वपक्षमतानुसारेण तमसि नीलरूपमस्ति जलादिष्वष्टसु नीलरूपाभावात्तमसो जलाद्यष्टानन्तर्भावात्तमसो नवद्रव्यानन्तर्भावत्वं सिद्धमिति परिशेषानुमानेन तमसि दशमद्रव्यत्वं सिद्ध्यति । तथा चानुमानकारः- **तमो दशमं द्रव्यं क्लृप्तनवद्रव्यानन्तर्भूतत्वे सति गुणाश्रत्वादिति** । किञ्चान्यद्रव्यस्य चाक्षुषप्रत्यक्षं प्रत्यालोकसापेक्षचक्षुषः कारणत्वं तमसः प्रत्यक्षत्वे त्वालोकनिरपेक्षचक्षुषः कारणत्वेनान्यद्रव्येभ्यो भिन्नं तमः, तथा च दशमस्य द्रव्यस्य तमसोऽविभाजनाद् ग्रन्थकृतो नैयून्यमिति चेदाह ग्रन्थकारः-

**मूलम्- न आवश्यकतेजोऽभावेनैववोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वाद्, रूपवत्ताप्रतीतिस्तु भ्रमरूपा, कर्मवत्ताप्रतीतिरप्यालोकापसारणौपाधिकी भ्रान्तिरेव । तमसोऽतिरिक्तद्रव्यत्वेऽनन्तावयवादिकल्पनागौरवञ्च स्यात् ।**

**व्याख्या-** तमो न द्रव्यमपि तु प्रकृष्टप्रकाशात्मकतेजोऽभावः तमः । यतो ह्येकं तेजो नामकं द्रव्यं स्वीकुर्मः, तदवान्तरभूतं यत्प्रकृष्टप्रकाशात्मकं तेजस्तदभाव एव तम इत्यनेनैव सामञ्जस्ये, तमसोऽतिरिक्तद्रव्यत्वं स्वीकृत्यानन्ततमोऽनन्ततत्प्रागभावध्वंसादिकल्पनमनुचितमिति तमः प्रकृष्टप्रकाशात्मकतेजोभाव एव । ननु तर्हि तमोऽभावस्तेज इति किं न स्वीक्रियत इति चेन्न तमोऽभावस्य तेजस्त्वे तादृशतेजसि प्रकृष्टप्रकाश एवान्तर्भवति, सर्वानुभूतोष्णस्पशाश्रयतया वह्न्यादेरतिरिक्तद्रव्यत्वम्, सुवर्णादेश्चाप्यतिरिक्तद्रव्यत्वं कल्पनीयमेवेति न दशमद्रव्यत्वापत्तिवारणं सम्भवति तस्मान्न तमोभावस्तेजोऽपि तु तेजोऽभाव एव तमः, तथा सति च न कोऽपि दोष इति ।

ननु तमसोऽभावरूपत्वे कथं रूपवत्ताप्रतीतिः कथं वा कर्मवत्ता प्रतीतिरिति चेत्तमसि रूपवत्ता प्रतीतिः भ्रमरूपा, यथा नभसि नीलरूपवत्ताप्रतीतिः भ्रमरूपा तथैव तमसि रूपवत्ताप्रतीतिरपि भ्रम एव । कर्मवत्ताप्रतीतिरप्यालोकापसारणगतौपाधिकी । अतो नवैव द्रव्यं नातिरिक्तम् । ननु सुवर्णस्य कुत्रान्तर्भाव इति चेत्तदपि तेजस्येव, तच्चाग्रे वक्ष्यते ।

### (ग) गुणनिरूपणम्

नवविधद्रव्यनिरूपणानन्तरं प्रसङ्गसङ्गत्या सप्तविधेषु पदार्थेषु द्वितीयक्रमप्राप्तं गुणं विभक्तुमारभते ग्रन्थकारः-

**मूलम्- अथ गुणा रूपं रसो गन्धस्ततः परम् ॥३॥**

**स्पर्शः सङ्ख्या परिमितिः पृथक्त्वञ्च ततः परम् ॥**

**संयोगश्च विभागश्च परत्वञ्चापरत्वकम् ॥४॥**

**बुद्धिः सुखं दुखमिच्छा द्वेषो यत्नो गुरुत्वकम् ॥**

**द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥५॥**

**अथ गुणा इति । एते च गुणाश्चतुर्विंशतिसङ्ख्यकाः कणादेन कण्ठतश्चशब्देन च दर्शिताः । तत्र गुणत्वजातिसिद्धिरग्रे वक्ष्यते ।**

**व्याख्या-** न्यायवैशेषिकदर्शनयोर्गुणाः चतुर्विंशतिसङ्ख्यकाः प्रसिद्धाः सन्ति । तत्र गुणत्वन्नाम द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वमिति । सामान्यवत्त्वस्य द्रव्ये कर्मणि च विद्यमानत्वात्तत्रातिव्याप्ति-वारणाय द्रव्यकर्मभिन्नत्वविशेषणं देयम् । सामान्यादावतिव्याप्तिवारणाय विशेष्यदलं देयम् । ते च गुणाः के ? इति चेद् रूपम्, रसः, गन्धः स्पर्शः, सङ्ख्या, परिमितिः, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, यत्नः, गुरुत्वम्, द्रवत्वम्, स्नेहः, संस्कारः, अदृष्टं (धर्माधर्मौ), शब्दश्चेति चतुर्विंशतिसङ्ख्यकाः । एते गुणाः वैशेषिकदर्शने मुनिना कणादेन कण्ठतश्चशब्देन च दर्शिताः सन्ति । अर्थात् कणादमुनिना "रूपरसगन्धस्पर्शाः, सङ्ख्याः, परिमाणानि, पृथक्त्वम्, संयोगविभागौ, परत्वापरत्वे, बुद्धयः, सुखदुःखे, इच्छाद्वेषौ, प्रयत्नाश्च गुणाः" इति सूत्रे सप्तदशगुणानां शब्दतः शेषसप्तगुणानाञ्च सूत्रस्थेन चशब्देन सूचिता इति चतुर्विंशतिगुणाः कणादानुमता, अग्रिमसूत्रेषु तथैव निरूपणात् । यथा द्रव्यत्वजातिः परिशेषानुमानगम्येति पूर्वमुक्तं तथैव गुणत्वजातिरपि परिशेषानुमानेनैव सिद्ध्यति, तच्चाग्रे कथयिष्यामः ।

### (घ) कर्मनिरूपणम्

सप्तपदार्थेषु तृतीयक्रमप्राप्तं कर्मपदार्थं विभक्तुमारभते ग्रन्थकारः-

**मूलम्-** **उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा ॥**
**प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥६॥**
**भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च ॥**
**तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥७॥**

**व्याख्या-** न्यायदर्शनानुसारं उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनञ्चेति पञ्चकर्माणि स्वीकृतानि सन्ति । तत्रोत्क्षेपणन्नाम-ऊर्ध्वदेशसंयोगानुकूलो व्यापारः । अपक्षेपणन्नाम-अधोदेशसंयोगानुकूलो व्यापारः । आकुञ्चनन्नाम-शरीरसन्निकृष्टदेशसंयोगानुकूलो व्यापारः । प्रसारणन्नाम-शरीरविप्रकृष्टदेशसंयोगानुकूलो व्यापारः । गमनन्नाम-उत्तरदेशसंयोगानुकूलो व्यापारः, इत्येतानि पञ्च कर्माणि न्यायवैशेषिकदर्शनशास्त्रेषु प्रतिपादितानि दृश्यन्ते । एतत्कर्मपञ्चकसाधारणं कर्मलक्षणन्तु

-संयोगभिन्नत्वे सति संयोगासमवायिकारणत्वमिति कस्यापि संयोगस्यासमवायिकारणं किञ्चित् कर्मैव, कर्म विनावयवसंयोगासम्भवाद्, यत्र च हस्तक्रियया हस्ततरुसंयोगानन्तरं तत्र तरुशरीर-संयोगस्य व्यवहारो जायत इत्युच्यते तदा शरीरतरुसंयोगः क्रियां विनैव हस्ततरुसंयोगाज्जातः संयोग इति तत्र शरीरतरुसंयोगस्यासमवायिकारणं हस्ततरुसंयोग इति हस्ततरुसंयोगे कर्मलक्षणातिव्याप्त्या तद्दोषवारणाय संयोगभिन्नत्वं विशेषणं देयम् । घटादिवारणाय विशेष्यपदं देयमिति । ननु कर्मत्वं जातिः कथं सिद्ध्यति ? भ्रमणादेश्चातिरिक्तकर्मणः सत्त्वात्तत् कथन्नोक्तमिति चेदाह ग्रन्थकारः-

**मूलम्- उत्क्षेपणमिति । कर्मत्वजातिस्तु प्रत्यक्षसिद्धा । एवमुत्क्षेपणत्वादिकमपि । ननु भ्रमणादिकमपि पञ्चकर्माधिकतया कुतो नोक्तमत आह भ्रमणमित्यादि ।**

**व्याख्या-** यथा द्रव्यत्वं जातिरनुमानप्रमाणसिद्धा, यथा च गुणत्वजातिरप्यनुमानप्रमाणसिद्धा न तथा कर्मत्वजातिरनुमानप्रमाणसिद्धापि तु कर्मत्वं जातिः प्रत्यक्षसिद्धैव । या व्यक्तिः येनेन्द्रियेण ग्राह्या तद्गता जातिः तदभावश्च तेनैवेन्द्रियेण ग्राह्येति नियमात् सर्वस्यापि कर्मणः प्रत्यक्षसिद्धत्वात् कर्मत्वं जातिः प्रत्यक्षप्रमाणगम्येति । ननु भ्रमणम्, रेचनम्, स्यन्दनम्, उर्ध्वज्वलनम्, तिर्यग्गमनञ्चेत्यादिकानि पञ्चाधिकानि कर्माणि सन्ति, तानि कुतो नोक्तानीत्यत आह ....गमनादेव लभ्यत इति । अर्थाच्चलनात्मकं यत्कर्म तत्सर्वमपि गमनात्मकमतो भ्रमणादीनां सर्वेषामुत्क्षेपणादिभिन्नानां गमनेऽन्तर्भावान्नातिरिक्तं भ्रमणादिकम् । ननु तर्हि उत्क्षेपणादीनामपि चलनात्मकत्वात् तेषामपि गमनान्तर्गतत्वेन तेषामतिरिक्तत्वेन कथमुल्लेख इति चेत् स्वतन्त्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वाद् गौतमादिमहर्षिणा पञ्चानामेव कर्मणां कर्मत्वेन गणनाद् भ्रमणादेरगणनादुत्क्षेपणादिपञ्चैव कर्माणीत्यर्थः ।

## (ङ) सामान्यनिरूपणम्

क्रमप्राप्तं सामान्यं विभक्तुं लक्षयितुञ्चारभते ग्रन्थकारः ।

**मूलम्- सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ॥८॥**
**परभिन्ना च या जातिः सैवापरतयोच्यते ।**
**द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥९॥**
**व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च ॥**

**व्याख्या-** समानाकारप्रतीतिव्यङ्ग्या ह्यर्थादनेकासु घटादिव्यक्तिषु समानाकारा=एकाकारा अनेकाः प्रतीत्यो जायन्ते, अयं घटोऽयं घट इत्यात्मिकाः, न तु पटे तादृशी प्रतीतिरिति तादृशीभिः प्रतीतिभिरनेकेषु घटष्वेकं घटत्वं सिद्ध्यति, वक्ष्यमाणजातिबाधकाभावात् स धर्मो घटत्वं जातिरिति । एतादृशी च समानप्रसवात्मिका जातिराश्रयापेक्षया द्विविधा परा, अपरा च । तत्र सर्वतः परा जातिर्द्रव्यगुणकर्मसु वर्तमाना सत्ता सर्वतोऽधिकदेशवृत्तितया परोच्यते तदपेक्षया चान्यासां जातीनां

न्यूनदेशवृत्तित्वेनापरा । द्रव्यत्वादिजातयस्तु सत्तापेक्षया पराः, पृथिवीत्वाद्यपेक्षयाधिकदेशवृत्तित्वादपरा । एवमेव पृथिवीत्वादिकमपि परमपरञ्च याधिकदेवृत्तिमती जातिः सा परा । या च न्यूनदेशवृत्तिनी सा अपरा । सामान्यलक्षणञ्चाह ग्रन्थकारः-

**मूलम्- सामान्यमिति । तल्लक्षणन्तु नित्यत्वे सत्यनेकसमवेतत्वम् । अनेकसमवेतत्वं संयोगादीनामप्यस्त्यत उक्तं नित्यत्वे सतीति, नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तमनेकेति नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावेऽप्यस्त्यतो वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम् ।**

**व्याख्या-** अनेकेषु घटेष्वेकाकारप्रतीतिविषयीभूतं घटत्वमेकं नित्यञ्च । तच्च सामान्यम्, सामान्यञ्च जातिः । तल्लक्षणञ्च नित्यत्वे सत्यनेकसमवेतत्वमिति । यथा घटत्वपटत्वादिकं नित्यमनेकेषु घटेषु पटेषु च समवायेन वर्तमानञ्चेति तद्घटत्वादिकं जातिः । अत्र लक्षणे यद्यनेकसमवेतत्वमात्रमुच्यते तर्ह्यनेकसमवेते संयोगेऽतिव्याप्तिः स्यादतस्तत्रातिव्याप्तिवारणाय नित्यत्वे सतीति विशेषणम् । तथा सति संयोगस्याप्राप्तयोः प्राप्तिरूपस्य गुणस्यानित्यत्वेन नातिव्याप्तिः ।

नित्यत्वे सति समवेतत्वं गगनपरिमाणादावप्यस्तीति तद्वारणायोक्तमनेकेति, गगनपरिमाणस्यैकगगनसमवेतत्वान्नातिव्याप्तिः । नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावेऽप्यस्तीति अत्यन्ताभावेऽतिव्याप्तिवारणाय वृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तम्, समवायसम्बन्धेन वृत्तिमत्त्वमिति तस्यार्थः । ननु सामान्यस्यैतादृशलक्षणेऽव्याप्तिदोषः सम्भवति यतो हि गगनाद्येकव्यक्तिमात्रवृत्तिगगनत्वादिधर्मेऽनेकसमवेतत्वघटितलक्षणागमनादिति चेन्न गगनत्वादेर्जातित्वाभावात्तत्र लक्षणागमनमिष्टमेव । तथा चाह ग्रन्थकारः-

**मूलम्- एकमात्रवृत्तिस्तु न जातिः तथा चोक्तम्-**

**व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ।**
**रूपहानिरसम्बन्धो जातिबाधकसंग्रहः ॥**

**व्याख्या-** जातेः कल्पनमनेकेष्वेकाकारप्रतीत्यर्थं यद्येकमात्रव्यक्तिराश्रयीभूता वर्तते चेत्तत्र वर्तमानो धर्मो न जातिस्तत्र जातिकल्पनं व्यर्थमर्थात्तत्र जातिबाधकाः सन्तीत्यर्थः । जातिबाधकाश्च षट् सन्ति ते च यथा- व्यक्तेरभेदः, व्यक्तेस्तुल्यत्वम्, सङ्करः, अनवस्थितिः, रूपहानिः, असम्बन्धश्चेति । तत्र जातिपदं जातिजातित्वान्यतरपरम् । अर्थादितेषु षट्सु प्रथमं त्रयं जातित्वबाधकम् । एतद्दोषत्रयं धर्मे जातित्वं बध्नन्ति । एतेषु दोषेषु त्रिषु मध्ये एकोऽपि दोषो यत्र धर्मे वर्तते स धर्मो न जातिरित्यर्थः । अन्तिमत्रयन्तु जातिबाधकमर्थादन्तिमेषु त्रिषु मध्ये एकोऽपि दोषो यत्र धर्मे वर्तते तादृशधर्माश्रयव्यक्तौ न कापि जातिर्वर्तत इति प्रथमदोषत्रयाधिकरणे काचिदन्या जातयो वर्तितुं शक्नुवन्ति, परमन्तिमदोषत्रयाधिकरणे

तु काचिदपि जातिर्वर्तितुमेव न शक्नोति । अन्तिमदोषत्रयाधिकरणं जात्यनधिकरणमित्यर्थः ।

तत्र प्रथमजातिबाधकस्तावद् व्यक्तेरभेदः

१. **व्यक्तेरभेदः =** स्वाश्रयीभूतव्यक्तेरभेदः = भेदाभावः, ऐक्यमित्यर्थः । तथा च स्वाश्रयीभूतव्यक्तिर्यत्र एका तादृशैकव्यक्तिमात्रवृत्तिधर्मो न जातिः, यथा गगनत्वम्, कालत्वम्, दिक्त्वमित्यादि ।

२. **तुल्यत्वम् =** स्वाश्रयीभूतव्यक्तेस्तौल्यम् । तुल्यव्यक्तिवृत्तित्वमित्यर्थः । यथा घटत्वकलशत्वयोः । तथा च कलशत्वं घटत्वातिरिक्तं न जातिरित्यर्थः । तत्र घटत्वाश्रयीभूतो घटः, कलशत्वाश्रयादभिन्न इति घटत्वकलशत्वाश्रयेषु घटेषु एकं घटत्वमेव जातिः कलशत्वन्तु घटत्वातिरिक्तं न जातिः । लाघवाद् घटत्वन्तु जातिरेव ।

३. **सङ्करः-** परस्परात्यन्ताभावसमानाधिरणधर्मयोरेकत्र समावेशः, यथा भूतत्वाभावाधिकरणे मनसि मूर्तत्वम्, मूर्तत्वाभावाधिकरणे चाकाशे भूतत्वमिति भूतत्वमूर्तत्वे परस्परात्यन्ताभावसमानाधिरण= परस्परविरुद्धावित्यर्थः, तादृशविरुद्धधर्मयोरेकत्र पृथिवीजलतेजोवायुषु समावेशाद् भूतत्वं न जातिः साङ्कर्यात् । मूर्तत्वन्तु क्रियासमवायिकारणतावच्छेदकतया जातिरेव ।

४. **अनवस्था -** अप्रामाणिकानन्तपदार्थकल्पनाविश्रान्तेरभावोऽनवस्था, यथा घटत्वत्वादिकम् । सर्वेषु घटेष्वेकं घटत्वं जातिः कल्प्यते । परं तत्र घटत्वे पुनः घटत्वत्वादिकं जातित्वेन न कल्पनीयं प्रयोजनाभावात्, अतो जातौ जातिः न स्वीक्रियते ।

५. **रूपहानिः** = रूपस्य = स्वलक्षणस्वरूपस्य, हानिः = असिद्धिरिति रूपहानिः । पार्थिवादिसजातीयपरमाणुषु परस्परभेदसिद्धये तेषु परमाणुषु प्रत्येकेषु भिन्नभिन्ना विशेषा कल्प्यन्ते ते च विशेषाः स्वतोव्यावृत्ताः = स्वतोव्यावर्तका इति । परन्तत्र विशेषे यदि विशेषत्वं जाति स्वीक्रियते तदा तस्य विशेषस्य व्यावृत्तिस्तयैव विशेषत्वजात्या भवेदिति विशेषस्य स्वतोव्यावृत्तत्वलक्षणस्य संरक्षणाय विशेषे विशेषत्वादिः कापि जातिः न स्वीक्रियतेऽतो रूपहानिर्विशेषत्वे जातिबाधिका ।

६. **असम्बन्धः** = प्रतियोगित्वानुयोगित्वान्यतरसम्बन्धेन समवायाभावः, तत्र समवायोऽनुयोगितासम्बन्धेन प्रतियोगितासम्बन्धेन वा कुत्रचित् तिष्ठति । यथा घटघटत्वयोः समवायोऽनुयोगितासम्बन्धेन घटे तिष्ठति चेत् प्रतियोतासम्बन्धेन घटत्वे तिष्ठति । तत्र समवायः प्रतियोतासम्बन्धेन द्रव्यगुणकर्मसामान्यविशेषेषु पञ्चसु तिष्ठति । द्रव्यगुणकर्मसामान्यविशेषा एते पञ्च कुत्रचित् समवायेन तिष्ठन्तीत्यर्थः । अनुयोगितासम्बन्धेन च समवायः द्रव्यगुणकर्मस्वेव तिष्ठति । द्रव्यगुणकर्मस्वेव समवायेन कश्चित् पदार्थः तिष्ठतीत्यर्थः । तथा च समवायसम्बन्धस्य प्रतियोगिनो द्रव्यगुणकर्मसामान्यविशेषाः पञ्च । अनुयोगिनश्च द्रव्यगुणकर्माणीति

प्रतियोगित्वानुयोगित्वान्यतरसम्बन्धेन समवायः द्रव्यगुणकर्मसमान्यविशेषेषु तिष्ठति समवायाभावयोः केनापि सम्बन्धेन समावायो न तिष्ठतीति समवायत्वमभावत्वञ्च न जातिः । समवायाभावयोः समवायत्वाभावत्वयोश्च समवायस्य सम्बन्धस्याभावत्, अतः समवायत्वमभावत्वञ्च न जातिः । एवं रीत्या षड्विधा जातिबाधकाः सन्ति । तेषु एकोऽपि जातिबाधको यत्र स धर्मो न जातिः । एतत् षड्विधान्यतमजातिबाधकशून्य एव धर्मो जातिः । तादृशी जातिश्च परापर इति द्विविधे ते च सोदाहरणं प्रस्तौति ग्रन्थकारः-

**मूलम्- द्रव्यादीति, परत्वमधिकदेशवृत्तित्वम्, अपरत्वमल्पदेशवृत्तित्वम् । सकलजात्यपेक्षयाधिकदेशवृत्तित्वात् सत्तायाः परत्वम्, तदपेक्षया चान्यासां जातीनामपरत्वम् ।**

**व्याख्या-** तत्र धर्मौ द्विविधौ, जातिरुपाधिश्चेति, तत्र जातिर्नाम षड्विधजातिबाधकदोषशून्यो नित्यत्वविशिष्टानेकसमवेतो धर्मः यथा द्रव्यत्वादयः । उपाधिश्च जातिभिन्नः कुत्रचिद्वर्तमानो धर्मः, यथा गगनत्वसमवायत्वाभात्वादयः । तत्र प्रथमोद्दिष्टो धर्मो जातिर्द्विविधा, परा, अपरा चेति तत्र परत्वमधिकदेशवृत्तित्वम् ।अपरत्वञ्चाल्पदेशवृत्तित्वम् ।अर्थाद्यो धर्मः कस्यचिद् धर्मस्यापेक्षयाधिकदेशवृत्तिः स धर्मो जातिबाधकशून्यश्चेत् स धर्मः परा जातिः कथ्यते । यदि च स जातिबाधकशून्यो धर्मः कस्यचिद् धर्मस्यापेक्षया न्यूनदेशवृत्तिस्तदा स धर्मोऽपरा जातिः कथ्यते । यथा सकलजात्यपेक्षयाधिकदेशवृत्तित्वात् सत्ताजातिः परा, तदपेक्षयाधिकदेशवृत्तिजातेरभावात् । सत्तापेक्षया चान्या द्रव्यत्वादिजातयोऽपराः कथ्यन्ते । द्रव्यत्वाद्यो जातयस्तु कस्याश्चिज्जातेरपेक्षया पराः, कस्याश्चिज्जातेरपेक्षया चापराश्चेति ता जातयः परापरे कथ्येत इति । यथा सत्तापेक्षया द्रव्यत्वाद्यो जातयः पराः, पृथिवीत्वाद्यपेक्षया चापरा बोध्याः ।

**पदानामर्थपरिचयः**

विभागः = विभजनम्, (स्वसमभिव्याहृतपदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मप्रकारकज्ञानानुकूलो व्यापारः)।

समवहितः = युक्तः ।

प्रतिबन्धकः = प्रतिरोधकः (कारणीभूताभावप्रतियोगी) ।

उत्तेजकः = प्रतिबन्धकसत्त्वे कार्यजनकः ।

पृथगुपन्यासः = पृथगुल्लेखः ।

सामञ्जस्ये = निर्वहे ।

जतुः = लाक्षा ।

अवच्छेदकः = व्यावर्तकधर्मविशेषः (अन्यूनानतिप्रसक्तधर्मः) ।

अवच्छिन्नः = व्यावृत्तः (यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्नः) ।

उपपत्तिः = निर्वाहः ।

तमः = अन्धकारः ।

व्यापकत्वम् = अधिकदेशवृत्तित्वम् ( तदधिकरणवृत्यत्यन्ताभावाप्रतियोगित्वम्) ।

व्याप्यत्वम् = न्यूनदेशवृत्तित्वम् (तदभाववदवृत्तित्वम्) ।

समवेतत्त्वम् = समवायसम्बन्धेन वृत्तिमत्त्वम् (समवायप्रतियोगित्वम्)

समवायित्वम् = समवायसम्बन्धेन यत्र वस्तु तिष्ठति (समवायसम्बन्धानुयोगित्वम् ) ।

जातिबाधकः = जातिखण्डकदोषः ।

सत्ता = द्रव्यगुणकर्मवृत्तिजातिविशेषः ।

तिर्यग्गमनम् = वक्रगमनम् ।

रेचनम् = पक्षिणः क्रिया ।

स्यन्दनम् = जलस्य क्रिया ।

विनिगमना = एकतरपक्षपातिनी युक्तिः ।

## अभ्यासाः

१. **एकवाक्येनोत्तरयत**

(क) पदार्थाः कतिसङ्ख्यकाः ?

(ख) तमो द्रव्यं न वा न्यायमते ?

(ग) तमसि नीलवत्ताप्रतीतिः भ्रमरूपा वा प्रमा ?

(घ) स्वर्णद्रव्यस्यान्तर्भावः कुत्र ?

(ङ) तमसः प्रत्यक्षमालोकसापेक्षचक्षुषा वा निरपेक्षचक्षुषा ?

(च) पञ्चाधिकानि कर्माणि स्वीकृतानि सन्ति न वा ?

(छ) एकव्यक्तिवृत्तिधर्मे जातिर्वोपाधिः ?

(ज) साङ्कर्यं किम् ?

(झ) का नामानवस्था ?

(ञ) असम्बन्धात् किं न जातिः ?

**२. टिप्पण्यात्मकमुत्तरं देयम्**

(क) शक्तेरतिरिक्तपदार्थत्ववादिनां मतमुपस्थापयत ।

(ख) सादृश्यं कीदृशं कथञ्च तन्नातिरिक्तं द्रव्यम् ?

(ग) मीमांसकमते प्रतिबन्धकलक्षणं किम् ? कथञ्च तल्लक्षणसमन्वयः ?

(घ) उत्तेजके सति प्रतिबन्धकसद्भावे कथं कार्योत्पत्तिः ?

(ङ) द्रव्यत्वजातिसाधकप्रथमानुमानं परित्यज्य द्वितीयानुमानानुसरणप्रयोजनं किम् ?

(च) कति गुणाः कण्ठतः कति गुणाश्च च शब्देनोल्लिखिताः कणादेन ?

(छ) भ्रमणादेः कुत्रान्तर्भावः कथञ्च ?

(ज) सामान्यलक्षणं लक्ष्ये समन्वीयताम् ।

(झ) जातिबाधकाः कतिसङ्ख्यकाः के च ते ?

**३. विस्तृतमुत्तरं देयम्**

(क) पदार्थान् विभज्य शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वं निराकुरुत ।

(ख) तमसोऽतिरिक्तद्रव्यत्वं निरस्य नवद्रव्यत्वं व्यवस्थापयत ।

(ग) द्रव्यत्वजातिसाधकानुमानं सयुक्ति प्रतिपादयत ।

(घ) सामान्यलक्षणमुल्लिख्य जातिबाधकान् सोदाहरणं प्रस्तुत ।

## कक्षाभ्यासः

१. कार्यकारणभावविषयकपरिष्कारपद्धतिः शिक्षकसखिभिः सह शिक्षणीया ।

२. परस्परं जातिबाधकसम्बद्धपरिचर्चा करणीया ।

## चतुर्थः पाठः

# विशेषाद्यभावान्तपदार्थनिरूपणम्

### (क) विशेषनिरूपणम्

क्रमप्राप्तं विशेषं निरूपयति अन्त्य इति ।

**मूलम् - अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥१०॥**

**विशेषं निरूपयति- अन्त्य इति । अन्तेऽवसाने वर्तत इत्यन्त्यः, यदपेक्षया विशेषो नास्तीत्यर्थः । घटादीनां द्यणुकपर्यन्तानां तत्तदवयवभेदात्परस्परं भेदः, परमाणूनां परस्परभेदको विशेष एव, स तु स्वत एव व्यावृत्तः, तेन तत्र विशेषान्तरापेक्षा नास्तीति भावः ।**

**व्याख्या-** विशेषो भेदकोऽर्थाद् भेदानुमितिजनको विशेषः । यथा घटे पटभेदानुमितिजनकं घटत्वं जातिः । यथा वा पृथिव्यां जलादिभेदजनकं पृथिवीत्वमेवं रीत्या जात्याश्रयेषु स्वेतरभेदजनिका जातिर्भवति । एवं रीत्या सावयवेषु घटादिषु घटान्तरभेदजनका घटाद्यवयवा भवन्ति परं पार्थिवादिपरमाणुषु पार्थिवादिपरमाण्वन्तरभेदसाधनाय विशेषनामकः कश्चनपदार्थः कल्प्यते, स च विशेषोऽन्त्यो = भवत्यर्थात् स विशेषः स्वतो व्यावृत्तो भवति । तस्मिन् विशेषे विशेषान्तरभेदसाधनाय विशेषान्तरस्य भेदकान्तरस्यापेक्षा न भवति इत्यर्थः । अत एव तस्य लक्षणं भवति अन्त्यत्वंऽ स्वतोव्यावृत्तत्वं विशेषस्य लक्षणमिति । स विशेषः कुत्र तिष्ठत्याकाङ्क्षायामाह नित्यद्रव्यवृत्तिरिति नित्यद्रव्येषु प्रत्येकेषु पृथिवीजलतेजोवायूनां परमाणुषु-आकाशकालदिगात्ममनस्सु च भिन्नभिन्ना विशेषाः तिष्ठन्ति इति नित्यद्रव्याणां अनेकत्वेन विशेषा अप्यनन्ता भवन्ति । एतादृशं विशेषमधिकृत्य प्रवर्तते यद्दर्शनं तद्दर्शनं वैशेषिकदर्शनमिति कथ्यते ।

### (ख) समवायनिरूपणम्

इदानीं क्रमप्राप्तं समवायं निरूपयति ग्रन्थकारः-

**मूलम्- घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ।**
**तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः ॥११॥**

समवायं दर्शयति घटादीनामिति । अवयवावयविनो**र्गुणगुणिनोः**र्जातिव्यक्त्यो क्रियाक्रियावतोर्नित्य-द्रव्यविशेषयोश्च यः सम्बन्धः स समवायः ।

**व्याख्या-** समवायो नाम नित्यसम्बन्धः तत्र सम्बन्धो नाम विशिष्टवुद्धिनियामकोऽर्थाद् यस्य वस्तुनः कारणाद् विशेष्यविशेषणयोर्विशिष्टा बुद्धिरुत्पद्यते यथा घटवद् भूतलमिति विशिष्टबुद्धिः विशेषणं घटं

विशेष्यञ्च भूतलं तयोः विशिष्टा बुद्धिः संयोगसम्बन्धावगाहिनी, संयोगसम्बन्धं विना घटभूतलयोः विशिष्टा बुद्धिः सम्भवत्येव नहि। तथैव द्रव्यगुणाद्ययुतसिद्धयोः विशिष्टबुद्धिविषयीभूतः सम्बन्धः समवायः। स च समवायः सम्बन्धः कुत्र कुत्र भवतीति शङ्कायां पूर्वं कारिकावल्यां पुनश्च मुक्तावल्यामपि सोदाहरणं स्पष्टीकरोति विश्वनाथः घटादीनामित्यादिना । कपालादौ अवयवे घटादीनामवयविनां यः सम्बन्धः स समवायः । अवयवेषु अवयवी येन सम्बन्धेन तिष्ठति स समवायः इत्यर्थः । द्रव्येषु चतुर्विंशतिगुणाः, उत्क्षेपणादिकर्माणि च येन सम्बन्धेन तिष्ठन्ति स समवायः । द्रव्यगुणकर्मसु जातिः येन सम्बन्धेन तिष्ठति स समवायः, एवमेव नित्यद्रव्येषु = पृथ्वीजलतेजोवायूनां परमाणुषु आकाशकालदिगात्ममनस्सु विशेषाः येन सम्बन्धेन तिष्ठन्ति स समवायः, तथा चैतदेव स्पष्टीकरोति मुक्तावल्याम् अवयवावयविनोः गुणगुणिनोः क्रियाक्रियावतोः जातिव्यक्त्योः नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवाय इत्यर्थः। अयुतसिद्धयोः पदार्थयोः सम्बन्धः समवायः। अयुतसिद्धश्च ययोर्द्वयोर्मध्ये एकमविनश्यत्तदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ यथा गुणगुणिनावित्यादि । समवायलक्षणम्, समवायसिद्धौ प्रमाणञ्च प्रस्तौति ग्रन्थकारः-

**मूलम् - समवायत्वं नित्यसम्बन्धत्वम्। तत्र प्रमाणन्तु- गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया, विशिष्टबुद्धित्वाद् दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानम् । एतेन संयोगादिबाधात् समवायसिद्धिः ।**

**व्याख्या-** नित्यत्वे सति सम्बन्धत्वं समवायस्य लक्षणम् । सम्बन्धत्वमात्र निवेशे संयोगादावतिव्याप्तिस्तद्वारणाय नित्यत्वविशेषणं तन्मात्रप्रवेशे गगनादावतिव्याप्तिस्तद्वारणाय सम्बन्धत्वम् । नित्योपाधेः स्वरूपसम्बन्धवारणाय सम्बन्धिभिन्नत्वं देयम् । तथा च सम्बन्धिभिन्नत्वे सति नित्यत्वे सति सम्बन्धत्वं समवायस्य लक्षणमिति । समवायविषेये न्यायवैशेषिकदर्शनयोः मतभेदो वर्तते । तत्र नैयायिकाः समवायस्य प्रत्यक्षमामनन्ति, वैशेषिकास्तु समवायस्य प्रत्यक्षं न स्वीकुर्वन्ति किन्तु अनुमिन्वन्ति समवायम्। अनुमानप्रकाश्चेत्थम् - **गुणक्रियादिविशिष्टबुद्धिः (रूपवान् घटः, क्रियावान् घटः) विशेषणविशेष्यसम्बन्धावगाहिनी विशिष्टबुद्धित्वात्, दण्डी पुरुष इति विशिष्टबुद्धिवत्।** यत्र यत्र विशिष्टबुद्धित्वं तत्र विशेषणविशेष्यसम्बन्धावगाहित्वमिति व्याप्त्या, विशिष्टबुद्धित्ववती गुणक्रियादिविशिष्टबुद्धिरिति पक्षधर्मताबलाद् विशेषणविशेष्यसम्बन्धावगाहित्वव्याप्यविशिष्टबुद्धित्ववती गुणक्रियादिविशिष्टबुद्धिरिति परामर्शेण गुणविशिष्टबुद्धौ पक्षे विशेषणविशेष्यसम्बन्धावगाहित्वसिद्धौ, गुणक्रियादिविशिष्टबुद्धिः यं सम्बन्धं विशेषणविशेष्यसम्बन्धत्वेन विषयीकरोति स सम्बन्धः संयोगस्वरूपादिर्न सम्भवतीति तादृश गुणक्रियादिविशिष्टबुद्धिविषयीभूतः सम्बन्धः समवाय इति परिशेषानुमानप्रक्रियया समवायस्य सिद्धिर्भव-तीति वदन्ति वैशेषिकाः। मीमांसका गुणगुणिनोः मध्ये क्रियाक्रियावतोश्च मध्ये स्वरूपसम्बन्धं

स्वीकुर्वन्ति । गुणविशिष्टबुद्धिः विशेषणविशेष्यसम्बन्धत्वेन स्वरूपसम्बन्धं विषयीकरोतीत्यनेनानुमानेन सिद्धस्यैव वस्तुनः साधनात् सिद्धसाधनमित्याक्षेपयन्ति तदेवाह ग्रन्थकारः -

**मूलम्- न च स्वरूपसम्बन्धेन सिद्धसाधनमर्थान्तरं वा ? अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवाल्लाघवादेकसमावायसिद्धेः । न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसङ्गः, तत्र रूपसमवायसत्त्वेऽपि रूपाभावात् ।**

**व्याख्या- गुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसम्बन्धावगाहिनी विशिष्टबुद्धित्वात्,** दण्डी पुरुष इतिवदित्यनुमानेन वैशेषिकाः समवायं साधयितुमिच्छन्ति परं मीमांसका वदन्त्यनेनानु-मानेनास्मत्स्वीकृतस्वरूपसम्बन्धः सिद्धयति। यतो हि अयुतसिद्धयोः सम्बन्धः स्वरूपं इति वयं स्वीकुर्मः। अतोऽस्मत्स्वीकृतस्वरूपं यद्यनुमानेन वैशेषिकाः साधयन्ति तदा सिद्धस्य साधनात् सिद्धसाधनमिति । यद्युच्यते वैशेषिकमते गुणगुणिनोः सम्बन्धो न स्वरूपमपि तु समवायः स च न सिद्ध इति चेत्तर्हि अर्थान्तरं जातमर्थात् समवायसाधनाय प्रयुक्तानुमानेन स्वरूपसम्बन्धः सिद्धयतीति गणेशं प्रकुर्वाणो रचयामास वानरमितिवत् समवायसाधनाय प्रयुक्तानुमानेन स्वरूपं सिद्धम् इति चेदाह ग्रन्थकारः- अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवाल्लाघवादेकसमवायसिद्धेरिति, अर्थात् यदि गुणगुणिनोः सम्बन्धः स्वरूपं तदा स स्वरूपसम्बन्धो नित्यो वानित्या यदि नित्यस्तदेष्टापत्तिः नित्यसम्बन्धस्यैव समवायत्वस्वीकारात् नामैवभिन्नं न वस्तु। यदि चानित्यस्तदा अनित्यसम्बन्धानामनन्तत्वेन गौरवात्तद -पेक्षया लाघवात् समावायसम्बन्धस्तत्र कल्पनीयः ।

न चायुतसिद्धानां सम्बन्धः समवायो यद्येकस्तर्हि रूपसमवायस्य स्पर्शसमवायस्य चैक्याद् वायौ यथा स्पर्शसमवायो वर्तते तथैव रूपसमावायोऽपि वर्तते एवोभयसमवायस्यैक्यात् । तथा च सम्बन्धसत्त्वे सम्बन्धिसत्त्वमिति नियमात् रूपसमवायवति वायौ रूपवत्ताप्रतीतिः स्याद् वायुः रूपवान् इत्यात्मिका प्रतीतिः स्यात् सा च नसम्भवतीति चेन्न, यथा आकाशस्यैकत्वेऽपि घटाकाशः पटाकाशाद् भिद्यते उपाधिभेदात् तथैव समवायस्यैकत्वेऽपि समवायसम्बन्धस्य प्रतियोगिनो रूपादेर्भेदात् समवायेऽपि भेदः प्रतीयत एव रूपप्रतियोगिकः समवायः स्पर्शप्रतियोगिकात् समवायाद् औपाधिकतया भिन्नः । अतो वायौ स्पर्शप्रतियोगिकसमवायसत्त्वेन स्पर्शप्रतीतेः सत्त्वेऽपि रूपप्रतियोगिकसमवायाभावात् न रूपवत्ताप्रतीतिः । किञ्च सम्बन्धसत्त्वे सम्बन्धिसत्त्वमिति न नियमः किन्तु सम्बन्धसम्बन्ध्युभयसत्त्वे सम्बन्धिप्रतीतिरित्येव नियमस्तथा च वायौ रूपाभावान्न रूपवत्ताप्रतीतिः ।

ननु यथा गुणगुणिनोः सम्बन्धोऽतिरिक्तः सम्बन्धिभ्यां भिन्नस्तथैव अभावस्यापि सम्बन्धः सम्बन्धिभ्यां भिन्नः कश्चन वैशिष्ट्यनामकः सम्बन्धः सिद्धयेदित्याह ग्रन्थकारः -

**मूलम्- न चैवमभावस्य वैशिष्ट्यं सम्बन्धान्तरं सिद्धयेदिति वाच्यम्, तस्य नित्यत्वे भूतले**

**घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गाद् घटाभावस्य तत्र सत्त्वात् तस्य च नित्यत्वात् अन्यथा देशान्तरेऽपि तत्प्रतीतिर्न स्याद् वैशिष्टयस्य च तत्र सत्त्वात् । मम तु पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः । वैशिष्टयस्यानित्यत्वे त्वनन्तवैशिष्टयकल्पने तवैव गौरवमित्थञ्च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां सम्बन्धः ।**

**व्याख्या-** मीमांसकाः अयुतसिद्धयोः सम्बन्धः स्वरूपं न तु समवायः, यथा तथैवाभावस्यापि वैशिष्टयनामकः कश्चित्सम्बन्धविशेषः स्वीक्रियते न तु स्वरूपमिति वदन्ति । तत्राभावस्य सम्बन्धः स्वरूपं वा वैशिष्टयमित्यत्र लाघवगौरवयोर्बलाबलं प्रस्तौति विश्वनाथः- तस्य नित्यत्वे इत्यादिना । तत्रेत्थं बोध्यं यद्यभावस्य सम्बन्धः स्वरूपं तदा तस्य स्वरूपसम्बन्धस्य सम्बन्धिभ्यामभिन्नत्वेनैकसम्बन्धिनाशे सति सम्बन्धस्यापि नाशः, सम्बन्धिभेदे च सम्बन्धभेदोऽपि स्वीकार्यः, यदि च वैशिष्टयनामकः सम्बन्धः स्वीक्रियते तदा तस्य वैशिष्टय सम्बन्धस्य विशिष्टयोः सम्बन्धिनो भिन्नत्वेन तस्य नित्यत्वमनित्यत्वं वा स्वीक्रियते इति प्रश्नः समायाति । यदि वैशिष्टयं सम्बन्धः नित्यस्तदा घटात्यन्ताभावस्थाले घटानयनानन्तरमपि वैशिष्टयसम्बन्धस्य घटात्यन्ताभावस्य चोभयोर्विद्यमानत्वेन घटवति भूतले घटात्यन्ताभाववत्ताबुद्धिः प्रसज्यते, घटात्यन्ताभावस्य नित्यत्वात् । यदि चात्यन्ताभावस्य नित्यत्वं न स्वीक्रियते तदैकघटाभाववति भूतले घटानयनानन्तरं सर्वत्र घटाभावो न प्रतीयेत घटाभावस्यानित्यत्वेन नाशात् प्रतीयते च घटशून्ये देशे घटाभावः, अतोऽत्यन्ताभावस्य नित्यत्वन्तु स्वीकार्यमेव । घटाभावस्य नित्यत्वे वैशिष्टयसम्बन्धस्यापि त्वया नित्यत्वस्वीकाराद् घटाभाववति भूतले घटानयनानन्तरमपि घटाभावः प्रतीयेत । तस्मादभावस्य न वैशिष्टयं सम्बन्धो भवितुमर्हति किन्तु स्वरूपमेव ।

ननु न्यायमतेऽपि अयुतसिद्धयोः गुणगुणिनोः सम्बन्धःसमवायो यदि तर्हि तस्य समवायस्य नित्यत्वेनैकत्वेन च रक्तघटे श्यामरूपनाशेऽपि श्यामरूपसम्बन्धस्य समावायस्य तत्र सत्त्वाद् रक्ततादशायामपि घटे श्यामरूपं प्रतीयेतेति चेन्न यतो रक्ततादशायां श्यामरूपसम्बन्धसत्त्वेऽपि श्यामरूपाभावान्न श्यामो घटः इत्यात्मिका प्रतीतिः, सम्बन्धस्य नित्यत्वेऽपि सम्बन्धिनो नाशात्, सम्बन्धसम्बन्ध्युभयसत्त्वे सम्बन्धिप्रतीतिरिति नियमात् न रक्ततादशायां श्यामरूपस्य प्रतीतिरस्माकं मते । ननु अभावस्य सम्बन्धः वैशिष्टयमेव परं तद्वैशिष्टयमनित्यमिति घटाभाववति भूतले घटानयने घटाभावस्य वैशिष्टयसम्बन्धस्य नाशान्न घटाभावबुद्धिरिति चेत्तदा वदति विश्वनाथः- वैशिष्टयस्यानित्यत्वे इत्यादि । अर्थाद् यदि वैशिष्टयं सम्बन्धोऽनित्यस्तदानित्यवैशिष्टयस्यानित्यत्वेनानन्तवैशिष्टयसम्बन्धकल्पने मीमांसकमतं गौरवं स्यात् । ननु स्वरूपसम्बन्धकल्पनेऽपि स्वरूपस्यानित्यत्वेनायं दोषः समान इति चेन्न, यतोऽस्माकं यः स्वरूपसम्बन्धः स न सम्बन्धिभ्यां भिन्नः कश्चन सम्बन्धः किन्तु सम्बन्धिरूप एव । यतो हि स्वं=प्रतियोग्यनुयोगि वा रूपं यस्य तत् स्वरूपमिति व्युत्पत्त्या स्वरूपसम्बन्धः प्रतियोगिरूपोऽनुयोगिरूपो

वा स्वीकार्यः । तथा चाभावस्य स्वरूपसम्बन्धः तत्तत्कालीनस्तत्तद्भूतलात्मकः स्वरूपसम्बन्धः इति न काप्यनुपपत्तिः ।

**(ग) अभावनिरूपणम्**

अभावं विभक्तुं निरूपयितुञ्चारभते ग्रन्थकारः-

**मूलम्– अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।**

**प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥१२॥**

**एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ।**

**व्याख्या-** भावभिन्नत्वमभावस्य लक्षणम्, भावाः द्रव्यगुणकर्मसामान्यविशेषसमवायाः पूर्वोक्तास्तद्भिन्नास्तु सप्तमपदार्थत्वेन स्वीकृतोऽयमभावः । अथवा प्रतियोगिज्ञानाधीनज्ञानविषयत्वमभावस्य लक्षणम् । प्रतियोगी नाम यस्याभावः स प्रतियोगी यथा घटो नास्तीत्यत्र नास्तिपदबोध्योऽभावः घटस्याभावोऽतस्तस्याभावस्य प्रतियोगी घटः प्रतियोगिनो घटस्य ज्ञानमन्तरा घटाभावं ज्ञातुं न कोऽपि शक्नोति इति प्रतियोगिज्ञानाधीनज्ञानविषयत्वं घटाभाव आगतमतस्तत्र लक्षणस्य समन्वयो भवति । एवमेव सर्वत्राभावे प्रतियोगिज्ञानाधीनज्ञानविषयत्वस्य विद्यमानत्वादभावसामान्यस्य लक्षणमिदम् । नहि कोऽपि जनः प्रतियोगिनमज्ञात्वाभावं परिचिनोति । यतो ह्यभाव इत्युक्तौ कस्याभाव इत्याकाङ्क्षा सर्वेषामेव जायते । न त्वभावो, नास्ति, नेत्याद्युक्तौ, घटविशेषाभावम्, पटविशेषाभावं वा ज्ञातुं शक्यतेऽतोऽभावज्ञानार्थं प्रतियोगिनो ज्ञानं ततः पूर्वमपेक्षितं भवत्येव । स चाभावः द्विविधः संसर्गाभावः, अन्योन्याभावश्चेति सामान्यतो नेति पदबोध्योऽन्योन्याभावः, एक एव । संसर्गाभावस्तु त्रिविधः । प्रागभावः, प्रध्वंसाभावः अत्यन्ताभावश्चेति । तत्र सामान्यतो भविष्यतीति पदबोध्योऽभावः प्रागभावः । नष्टो ध्वस्त इत्यादिपद-बोध्योऽभावः प्रध्वंसाभावः, नास्तिपदबोध्योऽभावोऽत्यन्ताभावः । एवं रीत्याभावा आहत्य चतुर्विधाः, प्रागभावः प्रध्वंसाभावः, अन्योन्याभावः, अत्यन्ताभावश्चेति । एवं रीत्याभावा आहत्य चतुर्विधाः, प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावश्चेति । कारिकायामभावं विभज्य मुक्तावल्यां तत्स्वरूपं प्रदर्शयितुकामो विश्वनाथोऽभावस्वरूपं प्रतिपादयति-

**मूलम्- अभावं विभजते अभावस्त्विति । अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्त्वम् । संसर्गेति, संसर्गाभावान्योन्याभावभेदादित्यर्थः । अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावात्संसर्गाभावं विभजते प्रागभाव इति । संसर्गाभावत्वमन्योन्याभावभिन्नाभावत्वम् । अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्न-प्रतियोगिताकाभावत्वम् । विनाश्यभावत्वं प्रागभावत्वम् । जन्याभावत्वं ध्वंसत्वम् । नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम् ।**

**व्याख्या-** कारिकायां विभक्तस्याभावस्य लक्षणं करोति ग्रन्थकारः - अभावत्वमित्यादिना,

द्रव्यगुणकर्मसामान्यविशेषसमवायाख्या ये भावास्तेषां भावानां षट्कान्योन्याभावाः, द्रव्यं न, गुणो न, कर्म न, सामान्यं न, विशेषो न, समवायो नेत्यात्मकाः, ते च षट्कान्योन्योभावाः न द्रव्यादिषु षट्सु भावेषु विद्यन्ते, द्रव्यादिषु षट्सु एकैकस्य भेदस्याभावात्, द्रव्ये द्रव्यं नेति भेदो नास्ति, एवं गुणादिष्वपि बोध्यम् । स्वस्मिन् स्वभेदासम्भवात्, अतो द्रव्यादिषट्कान्योन्याभाववत्त्वं सप्तमपदार्थस्वरूपेऽभाव एवेति तत्र लक्षणसमन्वयः स चाभावो द्विविध इति कारिकायामुक्तम्, तयोर्मध्येऽन्योन्याभावस्य भेदाभावात् स एक एव । संसर्गाभावस्तु प्रागभावः प्रध्वंसाभावः, अन्योन्याभावश्चेति त्रिविधः । तत्र त्रिविधेषु संसर्गाभावेषु प्रागभावोऽनादिसान्तः, प्रध्वंसाभावः, सादिरनन्तः अत्यन्ताभावो नित्य इति बोध्यम्, संसर्गाभावसामान्यस्यैकं लक्षणन्तु अन्योन्याभावभिन्नाभावत्वमिति, अन्योन्याभावभिन्नत्वे सति अभावत्वमिति तदर्थः । अन्योन्याभावत्वञ्च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमिति । तत्रान्योन्याभावीया प्रतियोगिता सर्वदैव तादात्म्येनैव सम्बन्धेनावच्छिन्ना भवति न तु अन्येन सम्बन्धेन । तत्रेत्थं बोध्यम्-येन सम्बन्धेन प्रतियोगिनो निषेधः - क्रियते) स सम्बन्धः प्रतियोगितावच्छेदकसम्बन्धः, यथा भूतले यदि संयोगेन घटो नास्तीत्युच्यते तदभूतलनिष्ठघटाभावीया प्रतियोगिता संयोगसम्बन्धावच्छिन्नेति कथ्यते । परं घटो नेति निषेधो घटातिरिक्तेषु सर्वेषु पदार्थेषु कर्तुं शक्यते तत्र घटो घटे तादात्म्येन (तस्यात्मा = तदात्मा, तदात्मनो भावस्तादात्म्यम् = अभेदः) तिष्ठति, न त्वन्यत्र घटस्तादात्म्येन स्थातुं शक्योऽतो घटातिरिक्तेषु पदार्थेषु तादात्म्येन घटस्य निषेधो भवति न तु घटे, घटे तादात्म्येन घटस्य विद्यमानत्वात् तादात्म्येन घटनिषेधाभावात् घटो नेति भेदो घटातिरिक्तेषु पदार्थेषु भवति, स च निषेधस्तादात्म्येनेति तादात्म्यसम्बन्ध भेदीय (अन्योन्याभावीय) घटनिष्ठप्रतियोगिताया अवच्छेदकः, सम्बन्धः, यः सम्बन्धो यस्यावच्छेदकः स तत्सम्बन्धावच्छिन्न इति नियमात् तादात्म्यसम्बन्धावच्छिन्ना भेदीया प्रतियोगिता जाता तादृशप्रतियोगिताया निरूपकोऽभावः (प्रतियोगिताकाभावः) अन्योन्याभावः, स एवाभावो भेदपदेनापि बोध्यः । तथा चान्योन्याभावस्य लक्षणं भवति तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमिति ।

प्रागभावस्य लक्षणमाह ग्रन्थकारः विनाश्यभावत्वं प्रागभावत्वमिति । चतुर्विधेष्वभावेष्वेक एवाभावो विनाशी, स च प्रागभावः, न त्वन्योऽभावो विनाशी तत्र, प्रध्वंसाभावः अनन्तः, अन्योन्याभावात्यन्ताभावौ नित्याविति विनाशित्वे सत्यभावत्वं प्रागभावत्वम् । स च प्रागभावः कार्योत्पत्तेः पूर्वं कार्यसमवायिकारणे तिष्ठति । अत एव कपाले घटो भविष्यतीति प्रत्ययो जायतेऽतो वक्तुं शक्यते भविष्यतीति प्रतीतिसाक्षिकोऽभावः प्रागभाव इति । प्रध्वंसाभावस्य लक्षणन्तु जन्याभावत्वमिति । जन्यत्वे सत्यभावत्वमिति प्रध्वंसाभावस्य लक्षणम् । प्रागभावोऽनादिकालाद् घटादीनां समवायिकारणे कपालादौ तिष्ठति, घटादिकार्योत्पत्त्यनन्तरं नश्यति । प्रध्वंसाभावस्तु घटादिषु जन्यपदार्थेषु मुद्गरपाताद्यनन्तरमुत्पद्यते परमुत्पत्त्यनन्तरं न नश्यति,

अनन्तकालं यावत् समवायिकारणे कपालादौ महाकाले वा तिष्ठति स सादिरनन्तोऽभावः प्रध्वंसाभावः । अत्यन्ताभावं लक्षयति नित्यसंसर्गाभावत्वमिति ।

नित्यत्वे सति तादात्म्यातिरिक्तकिञ्चित्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वमत्यन्ताभावस्य लक्षणम् । न्यायमतेऽत्यन्ताभावो नित्य इति स्वीक्रियते । एवाञ्चात्यन्ताभावीया प्रतियोगिता तादात्म्यातिरिक्तकिञ्चित्सम्बन्धावच्छिन्नैव भवति । कुत्रापि कस्यापि वस्तुनो निषेधोऽत्यन्ताभावः किञ्चित्सम्बन्धसापेक्ष एव सम्बन्धविशेषमन्तरेण कुत्रापि देशे इदं वस्तु अत्र नास्तीति वक्तुं न शक्यते । एकसम्बन्धेन वस्तुनोऽधिकरणेऽपरसम्बन्धेन तस्यैव निषेधोऽपि कर्तुं शक्यते । यथा- समवायेन घटाधिकरण एव कपाले संयोगेन घटो नास्तीत्यपि वक्तुं शक्यत एवातोऽत्यन्ताभावीयप्रतियोगिता किञ्चित्सम्बन्धावच्छिन्ना तादृशयत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगिताकाभावेन साकमेव प्रतियोगिनो विरोधः । अयमत्र विशेषोऽत्यन्ताभावस्य प्रतियोगिना साकं विरोधः । अर्थाद् यत्र यत्सम्बन्धेन प्रतियोगिमत्ताज्ञानं भवति तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदत्यन्ताभावो न तिष्ठति इति नियमः सम्बन्धविशेषमन्तरेण तु नायं नियमः सम्भवः, यतो हि तत्रैव कपाले समवायेन घटोऽपि वर्तते संयोगेन घटात्यन्ताभावोऽपीति अत्यन्ताभावीयप्रतियोगिता सम्बन्धविशेषेणावच्छेदनीया (अवच्छेद्या) भवति अतोऽत्यन्ताभावो नाम तादात्म्यसम्बन्धातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावो यो नित्यश्च सोऽभावोऽत्यन्ताभावः । यथा संयोगेन घटो नास्तीति प्रतीतिसाक्षिको घटाभावः, पटो नास्तीति प्रतीतिसाक्षिको वा पटाभावः ।

अभावलक्षणं प्रतिपाद्यात्यन्ताभावस्य नित्यत्वे कथं न घटाभाववति भूतले घटानयनानन्तरं घटाभाववत्ताबुद्धिरिति प्रतिपादयति ग्रन्थकारः -

**मूलम्- यत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकालस्य सम्बन्धाघटकतयात्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः ।**

**व्याख्या-** अत्यन्ताभावस्यानित्यत्वे घटाभाववति भूतले घटानयने देशान्तरेऽपि घटाभावबुद्धेरनुपपत्तिः स्यात् । यथैकदेशे मृतो मैत्रोऽपरदेशे जीवितो न भवति किन्तु मृत एव, एवमेव घटाभाववत्येकदेशे घटानयने सति नष्टो घटाभावः सर्वत्रैव नष्टः स्यादिति अपरदेशे घटाभावबुद्धिप्रमा न स्यात्, परमेकदेशे घटे आनीतेऽपरदेशे घटाभावबुद्धिप्रमैवातोऽत्यन्ताभावो नित्यः स्वीकार्यः । नित्यत्वे च घटात्यन्ताभावे घटाभाववति घटायनयने घटात्यन्ताभावस्य तत्र सत्त्वेऽपि घटात्यन्ताभावस्य यः स्वरूपसम्बन्धः तस्य नष्टत्वात् तत्र घटात्यन्ताभाववत्ताबुद्धिः प्रमा स च स्वरूपसम्बन्धः कीदृश इति चेत् तत्तत्कालीनतत्तदधिकरणात्मकः स्वरूपसम्बन्धः तत्तदभावानां सम्बन्धः । तथा च घटाभाववति घटानयने स घटाधिकरणकालः न घटाभावस्य सम्बन्धघटकः तद्घटाभावकालीनतद्भूतलात्मकसम्बन्धस्य

घटकाले नाशात् तत्र घटात्यन्ताभाववत्ताबुद्धिरिति घटात्यन्ताभावस्य नित्यत्वेऽपि न क्षतिः । स्वमतेऽत्यन्ताभावस्य नित्यत्वम्, भूतले घटो नास्तीत्याद्यभावस्यात्यन्ताभावत्वञ्च प्रतिपाद्य तादृशाभावो नात्यन्ताभावः, किन्तु सोऽभाव चतुर्थ उत्पादविनाशशाल्यभाव इति वदतां केषाञ्चिन्मतं प्रस्तौति ग्रन्थकारः -

**मूलम्- तत्रोत्पादविनाशशाली चतुर्थोऽयमभाव इति केचित्**

**व्याख्या-** संसर्गाभावश्चतुर्विधः, प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, उत्पत्तिविनाशशाल्यभावः इति तत्र वायौ रूपाभावः, गुडे तिक्ताभावः, निम्बे मधुराभावः इत्यादयोऽभावा अत्यन्ताभावाः । भूतले घटो नास्ति, गोष्ठे गौर्नास्तीत्यादयोऽभावाश्चोत्पत्तिविनाशाल्यभावश्चतुर्थोऽभावः इति केचिद् वदन्ति । युक्तिविकलत्वेन कल्पनागौरवाच्चेदं मतं न समीचीनम् । प्राचीना अत्यन्ताभावस्य ध्वंसप्रागभावाभ्यां सह विरोधं स्वीकुर्वन्ति, अतस्तन्मतमुपपाद्य खण्डयति ग्रन्थकारः -

**मूलम्- अत्र ध्वंसप्रागभावयोरधिकरणे नात्यन्ताभाव इति प्राचां मतम् । श्यामघटे रक्तो नास्ति, रक्तघटे श्यामो नास्तीति धीश्च प्रागभावं ध्वंसं चावगाहते न तु तदत्यन्ताभावं तयोर्विरोधात् । नव्यास्तु तत्र विरोधे मानाभावाद् ध्वंसादिकालावच्छेदेनाप्यत्यन्ताभावो वर्तत इति प्राहुः ।**

**व्याख्या-** प्राचीना यथात्यन्ताभावस्य प्रतियोगिना साकं विरोधः तथैव ध्वंसाप्रागभावाभ्यां सहापि अत्यन्ताभावस्य विरोध इति स्वीकुर्वन्ति अत एव ध्वंसप्रागभावयोरधिकरणे यो नास्तीति प्रतीतिविषयीभूतोऽभावः स नात्यन्ताभावोऽपि तु ध्वंसः, प्रागभावो वेति । यथा श्यामघटे रक्तो नास्तीति प्रत्ययः स श्यामघटे रक्तप्रागभावं विषयीकरोति । रक्तघटे च श्यामो नास्तीति प्रत्ययः श्यामध्वंसञ्चावगाहते । अत एव प्राचीनानां मतेऽत्यन्ताभावस्य प्रतियोगिनस्त्रयः, यथा घटात्यन्ताभावस्यास्य प्रतियोगी यथा घटस्तथैव घटप्रागभावो घटध्वंसश्चेति । अतः प्राचीनानां मते स्वसमवायिकारणे स्वात्यन्ताभावः कदापि न तिष्ठति, स्वोत्पत्तेः पूर्वं स्वसमवायिकारणे स्वप्रागभावस्य स्वनाशोत्तरं स्वसमवायिकारणे स्वध्वंसस्य स्वोत्पत्तौ च स्वस्य विरोधिनः सत्त्वात् स्वसमवायिकारणे स्वात्यन्ताभावो न तिष्ठतीति प्राचामाशयः । नवीनास्तु घटोत्पत्तेः पूर्वं घटसमवायिकारणे इह कपाले घटो नास्ति इति प्रतीतेरनुभवात् तादृशप्रतीतिविषयीभूतोऽत्यन्ताभावः स्वप्रागभावाधिकरणेऽपि तिष्ठत्येव ध्वंसप्रागभावयोरधिकरणेऽत्यन्ताभावस्य विरोधे मानाभावादेव यो घटः पूर्वं रक्तः ततः श्यामः ततः पुनः रक्तस्तादृशघटेश्यामतादशायां प्रतीयमानो यो रक्तसामान्याभावः, स न रक्तप्रागभावो न वा रक्तध्वंसः किन्तु घटात्यन्ताभाव एवातोऽत्यन्ताभावस्य ध्वंसप्रागभावाभ्यां सह न विरोध इति वदन्ति ।

वेदान्तिनो मीमांसकाश्चाभावोऽधिकरणात्मक इति वदन्ति, तन्मतमुपपाद्य निरस्यति ग्रन्थकारः -

**मूलम्- नन्वस्तु अभावानामधिकरणात्मकत्वं लाघवादिति चेन्न,**

**अनन्ताधिकरणात्मकत्व-कल्पनापेक्षयातिरिक्तकल्पनाया लघीयस्त्वात् । एवञ्चाधाराधेयभावोऽप्युपद्यते । एवञ्च तत्तच्छब्दगन्धरसाद्यभावानां प्रत्यक्षत्वमुपपद्यते । अन्यथा तत्तदधिकरणानां तत्तदिन्द्रियाग्राह्यत्वात् प्रत्यक्षत्वं न स्यात् । एतेन ज्ञानविशेषकालविशेषाद्यात्मकत्वमभावस्येति प्रत्युक्तमप्रत्यक्षत्वापत्तेः ।**

**व्याख्या-** यथा घटेन साकं चक्षुःसंयोगेन घटोपलब्धिर्भवति न तथा संयोगादिसंबन्धे चक्षुषाभाव उपलभ्यत इति अभावो नातिरिक्तः पदार्थः किन्तु यत्राभावोऽनुपलब्ध्या गृह्यते सोऽभावः तदधिरणात्मकः, यथा गुडे विद्यमानः तिक्ताभावः गुडस्वरूपः ब्रह्मणि च विद्यमान असज्जडदुःखाभावो ब्रह्मस्वरूपः इति वेदान्तिनां मीमांसकानाञ्च सिद्धान्तः, अभावस्याधिकरणात्मकत्व-स्वीकारेऽतिरिक्ताभावकल्पनाप्रयुक्तगौरवञ्च न भवतीति लाघवादभावो नाधिकरणात्मक इति तेषामाशयः परन्तु नैयायिकाः वैशेषिकाश्चाभावमतिरिक्तं स्वीकुर्वन्ति, अतः पूर्वमतं निराकुर्वन्नाह ग्रन्थकारः - न अनन्ताधिकरणात्मकत्वकल्पनापेक्षयातिरिक्तकल्पनाया लघीयस्त्वादिति, अर्थाद् यद्यभावोऽधि-करणात्मकस्तदाधिकरणानामनन्तत्वेनाभावोऽप्येकप्रतियोगिकोऽप्यनन्तात्मकः स्वीकार्यः स्यात् परन्तु एकधर्मावच्छिन्नैकप्रतियोगिकोऽभाव एकः स्वीक्रियतेऽतोऽभावस्याधिकरणत्वपक्षे एव गौरवदोषः स्यान्नतु अतिरिक्ताभावपक्षे तस्मादभावोऽतिरिक्तः सप्तमपदार्थ इति सिद्धम् । किञ्च यद्यभावोऽधिकरणात्मकस्तदा घटाभावभूतलयोरैक्याद् घटाभावभूतलयोः क्लृप्ताधाराधेयभावोऽप्यनुपपन्नः स्यात् । एकस्मिन् वस्तुनि आधाराधेयभावासम्भवतात्, अतोऽभावोऽतिरिक्तः । एतावदेव नहि यद्यभावोऽधिकरणात्मकस्तदा तत्तदधिकरणवृत्तिगन्धरसाद्यभावो न गृहेयत तत्तदिन्द्रियेण । अयंभावः यो गुणो यदिन्द्रियग्राह्यस्तद्गता जातिस्तदभावश्च तदिन्द्रियग्राह्य इति नियमाद् यदि जले गन्धाभावो वर्तते तदा जलवृत्तिगन्धाभावस्य जलस्वरूपतया जलस्य घ्राणेन्द्रियाग्राह्यत्वेन तद्वृत्तिगन्धाभावोऽपि घ्राणेन्द्रियेण न गृह्येत । एवमेव वा वादिवृत्तिरसाद्यभावानामपि रसनेन्द्रियादिग्राह्यत्वं न स्यादतोऽभावो नाधिकरणात्मकः अपि त्वतिरिक्तस्तथा चाभावस्याधिकरणभिन्नत्वेनाधिकरणानां तत्तदिन्द्रियग्राह्यत्वेऽपि तद्वृत्तिः गन्धरसाद्यभावः तत्तद्घ्राणरसनेन्द्रियादिना गृह्यत एव, इत्यभावनामधिकरणभिन्नत्वं स्वीकार्यम् । यथाभावो नाधिकरणस्वरूपस्तथैव ज्ञानविशेषकालविशेषादिस्वरूपोऽपि नाभावः चक्षुरादिन्द्रियैः ज्ञानस्वरूपाभावस्य, कालस्वरूपाभावस्य च ग्रहणासम्भवात् । अभावस्याधिकरणत्वनिरसनेनैव ज्ञानविशेषस्वरूपत्वं काल-विशेषस्वरूपत्वमपि निरस्तमिति । तथा सत्यभावानामप्रत्यक्षत्वप्रसङ्गात्, अतोऽभावः स्वतन्त्रः पदार्थः ।

## पदानामर्थाः

विशेषः = भेदकः (स्वतोव्यावृत्तः) ।

नित्यत्वम् = ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वम् (त्रैकालाबाध्यम्) ।

अन्त्यः = अन्तेऽवसाने भव इत्यन्त्यः=भेदकेष्वन्तिमः ।

नित्यद्रव्याणि = पृथिवीजलतेजोवायूनां परमाणवः, आकाशकालदिगात्ममनांसि ।

परमाणुः = अन्तिमावयवद्रव्यम् ।

व्यावृत्तः = भिन्नः ।

सम्बन्धः = सम्बन्धिभ्यां भिन्नो विशिष्टबुद्धिनियामकः ।

संसर्गः = सम्बन्धः ।

विशिष्टबुद्धिः = विशेषणविशष्यावगाहिनी बुद्धिः (मतिः) ।

वैशिष्टचम् = विशिष्टस्य भावः (विशेषणविशेष्ययोः सम्बन्धः) ।

स्वरूपम् = स्वम् = प्रतियोग्यनुयोगि वा रूपं यस्य तत्स्वरूपं सम्बन्ध्यभिन्नः कश्चित्सम्बन्धविशेषः ।

पाकः = रूपादिपरावृत्तिजनको विजातीयतेजःसंयोगः ।

संसर्गाभावः = अन्योन्याभावभिन्नाभावः ।

अन्योन्याभावः = तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावः ।

तादात्म्यम् = तस्यात्मा= तदात्मा, तदात्मनो भावः तादात्म्यमभेदः ।

अत्यन्ताभावः = नित्यसंसर्गाभावः ।

घटकः = अवयवः ।

अवगाहते = विषयीकरोति ।

आधाराधेयभावः= अधिकरणत्वम्, आधेयत्वञ्च ।

उपपद्यते = सङ्गच्छते ।

प्रत्युक्तम् = खण्डितम् ।

सिद्धसाधनम् = सिद्धस्य वस्तुनः पुनः साधनम् (पिष्टपेषणमित्यर्थः) ।

अर्थान्तरम् = अन्योऽर्थः ऽअर्थान्तरम् ।

प्रतियोगी = यस्याभावः स प्रतियोगी ।

अनुयोगी = प्रतियोगिनिरूपकोऽभावः ।

लघीयस्त्वम् = अतिशयलाघवम् ।

## अभ्यासः

### १. परस्परं मेलयत

| (क) | (ख) |
|---|---|
| जातिव्यक्त्योः सम्बन्धः | प्रागभावः । |
| किञ्चित्सम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकः | समवायः । |
| विनाश्यभावः | घटात्यन्ताभावः । |
| आधाराधेयभावः | ध्वंसप्रागभावाधिकरणे नात्यन्ताभावः । |
| प्राचीनाः स्वीकुर्वन्ति | घटभूतलयोः । |
| अभावस्याधिकरणस्वरूपत्वे | तत्तच्छब्दगन्धरसाद्यभावाप्रत्यक्षत्वं स्यात् । |
| घटो नेत्यभावः | प्रध्वंसाभावः । |
| उत्पत्तिमानभावः | अन्योन्याभावः । |
| स्वतो व्यावृत्ताः | अयुतसिद्धयोः । |
| अनयोः सम्बन्धः समवायः | नित्यद्रव्येषु वर्तमानाः विशेषाः । |
| विशिष्टबुद्धिः | जातिव्यक्ती । |
| घटघटत्वे | रूपवान् घट इति । |

### २. अत्यन्तं सङ्क्षिप्तमुत्तरं देयम्

(क) अन्त्यत्वमित्यस्य कोऽर्थः ?

(ख) अवयवावयविनोर्द्रव्ययोः कः सम्बन्धः ?

(ग) सिद्धसाधनमित्यस्य कोऽर्थः ?

(घ) विशेषाः कुत्र तिष्ठन्ति ?

(ङ) प्रागभावः कुत्र तिष्ठति ?

(च) ध्वंसस्य लक्षणं किम् ?

(छ) अन्योन्याभावीया प्रतियोगिता किं सम्बन्धावच्छिन्ना ?

(ज) नव्यमते ध्वंसप्रागभावयोरधिकरणेऽत्यन्ताभावः तिष्ठति न वा ?

(झ) अभावस्याधिरणस्वरूपत्वं कः स्वीकरोति ?

**३. नातिविस्तरेणोत्तरयत**

(क) सपदकृत्यं विशेषलक्षणं सोदाहरणञ्च प्रस्तुत ।

(ख) विशेषः कुत्र कुत्र तिष्ठति इति ग्रन्थोक्तदिशा निर्दिशत ।

(ग) समवायस्यानुमानप्रमाणगम्यत्वं कः स्वीकरोति कीदृशञ्च तदनुमानम् ?

(घ) समवायसाधकानुमानेन संयोगसाधने कापत्तिः ?

(ङ) अभावस्य वैशिष्टचसम्बन्धस्वीकारे को दोषः ?

(च) समवायस्यैकत्वे घटे रक्ततादशायां कथं न श्यामवत्ताप्रतीतिः ?

(छ) अभावस्याधिकरणस्वरूपत्वे कापत्तिः ?

(ज) अभावस्य प्रत्यक्षं केनेन्द्रियेण भवति ?

(झ) ध्वंसप्रागभावयोरधिकरणे कथं नात्यन्ताभावः ?

(ञ) अभावभेदान् प्रस्तुत ।

**४. विस्तरेण व्याख्याङ्कुरुत**

(क) समवायसाधकानुमानमुपस्थाप्य समवायसम्बन्धः कुत्र कुत्रेति निर्दिशत ।

(ख) अभावभेदान् प्रस्तुत्यात्यन्ताभावस्य नित्यत्वं युक्त्या साधयत ।

(ग) अत्यन्ताभावस्य नित्यत्वे घटवति घटाभावो कथं न प्रतीयते ?

(घ) विशेषसाधकानुमानं सबीजमुद्भाव्य विशेषभेदान् प्रतिपादयत ।

**५. कक्षाभ्यासः**

(क) समवायसम्बन्धः कुत्र कुत्र सम्भवतीति विषये सखिभिः सह चर्चयत ।

(ख) अभावमादाय शाब्दबोधः कीदृशात्मकः तत्प्रकारश्च कीदृश इत्यस्मिन् विषये शिक्षकेण सह परामर्शङ्कुरुत ।

**पञ्चमः पाठः**

# साधर्म्यवैधर्म्यनिरूपणम्

## (क) साधर्म्यप्रकरणम्

ऋते ज्ञानान्नमुक्तिरिति श्रुतेः पदार्थानां तत्त्वज्ञानं पुरुषैरर्थ्यमानं तत्त्वं वर्तते, परमपुरुषार्थसाधनाय । अतः पदार्थानां तत्त्वज्ञानं करणीयम् । तच्च तत्त्वज्ञानं पदार्थानां सामान्यतो विशेषतश्च ज्ञानाद् भवति । पदार्थानां सामान्यज्ञानं तावत् पदार्थानामुद्देशेन जायते चेद् विशेषज्ञानञ्च विभागपुरस्सरं लक्षणकरणाद् भवति । लक्षणञ्च साधर्म्यात्मकं वैधर्म्यात्मकञ्चेति द्विविधम् । एवञ्च पदार्थानां साधर्म्येण वैधर्म्येण च तत्त्वज्ञानादात्यन्तिकदुःखध्वंसात्मको मोक्षो भवति । अत एव महर्षिकणादः सूत्रयति "धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" इति । अतोऽत्रापि विश्वनाथपञ्चाननो वैशेषिकदर्शनाभिमतसप्तपदार्थान्नुद्दिश्य विभज्य च सम्प्रति तेषां पदार्थानां साधर्म्यं वैधर्म्यञ्च निरूपयति-

**मूलम्-** सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥१३॥

**इदानी पदार्थानां साधर्म्यवैधर्म्ये वक्तुमुपक्रमते -सप्तानामिति । समानो धर्मो येषां ते सधर्माणस्तेषां भावः साधर्म्यम्, समानो धर्म इति फलितार्थः । एवं विरुद्धो धर्मो येषां ते विधर्माणस्तेषां भावो वैधर्म्यम्, विरुद्धो धर्म इति फलितार्थः । ज्ञेयत्वम् = ज्ञानविषयता सा च सर्वत्रैवास्ति, ईश्वरज्ञानविषयतायाः केवलान्वयित्वाद् । एवमभिधेयत्वप्रमेयत्वादिकं बोध्यम् ।**

**व्याख्या-** द्रव्यगुणकर्मसामान्यविशेषसमवायाभावानां सप्तानां पदार्थानां साधर्म्यम् = समानो धर्मो ज्ञेयत्वम्, वाच्यत्वमभिधेयत्वम्, प्रमेयत्वम्, पदार्थत्वम्, अस्तित्वमित्यादिकं वर्तते । एतेषां धर्माणां सर्वत्र विद्यमानत्वादेते धर्मा साधर्म्यमेव । ननु किमिदं साधर्म्यं किञ्च तद्वैधर्म्यमिति चेदाह ग्रन्थकारः- समानो धर्म इत्यादि । समानः = एको धर्मो येषां धर्मिणां ते धर्मिणः सधर्माणः, तेषां सधर्मणां भावः साधर्म्यम् = अनेकवृत्त्येको धर्मः साधर्म्यम् । यथा द्रव्यगुणकर्मादिसप्तसु पदार्थेषु समानरूपेण वर्तमान एको धर्मो वर्तते ज्ञेयत्वम्, तच्च ज्ञेयत्वं द्रव्यादिसप्तपदार्थाना साधर्म्य वर्तते । यतो हि ज्ञातुं योग्यं ज्ञेयम्, ज्ञेयस्य भावो ज्ञेयत्वमिति व्युत्पत्त्या ज्ञानविषयत्वमित्यार्थः । तादृशज्ञानविषयत्वरूपं ज्ञेयत्वं सप्तानां पदार्थानां साधार्म्यम् । एवमेव विरुद्धो धर्मो येषान्ते विधर्माणस्तेषां विधर्मणां भावो वैधर्म्य विरुद्धधर्म इति यावद्, यथा द्रव्यत्वं गुणादीनां वैधर्म्यमित्यादि । ज्ञेयत्वादिकन्तु न कस्यापि वैधर्म्यं तेषां केवलान्वयित्वात्, केवलान्वयि च सर्वत्रैवास्तीश्वरज्ञानविषयतायाः सर्वत्र विद्यमानत्वाज्ज्ञेयत्वं केवलान्वयि, केवलान्वयित्वेन तज्ज्ञेयत्वं सप्तानां द्रव्यादिपदार्थानां साधर्म्यमित्यर्थः ।ज्ञेयत्वादिकमित्यत्रादिपदेन वाच्यत्वम्, प्रमेयत्वम्,

पदार्थत्वम्, अभिधेयत्वमस्तित्वादिकं ग्राहयम् । तत्र वाच्यत्वम् = अस्मात् पदादयमर्थो बोधव्य इतीश्वरेच्छाविषयत्वम् । प्रमेयत्वम् = प्रमाया विषयत्वम् । पदार्थत्वम् = पदजन्यप्रतीतिविषयत्वम् । अभिधेयत्वम् = अभिधा (शक्ति) विषयत्वम्, एतच्च सर्वं केवलान्वयि, तस्मात्तानि सर्वाणि साधर्म्याणि सप्तानां पदार्थानाम् ।

**सप्तानां पदार्थानां साधर्म्यं निरूप्येदानी पञ्चानां पदार्थानां साधर्म्यं प्रतिपादयति विश्वनाथः-**

**मूलम्-** **द्रव्यादयः पञ्च भावा अनेके समवायिनः ।**

**द्रव्यादय इति । द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वञ्च । यद्यप्यनेकत्वमभावेऽप्यस्ति, तथाप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम् । तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोऽर्थस्तेन प्रत्येकं घटादावाकाशादौ च नाव्याप्तिः ।**

**व्याख्या-** द्रव्यगुणकर्मसामान्यविशेषाणां पञ्चानां समवायातिरिक्तानां भावानां साधर्म्यमनेकत्वम्, समवायित्वञ्च ।अत्रानेकत्वन्नाम इमेऽनेक इति बुद्धिविषयत्वरूपैकत्वभिन्ना सङ्ख्या, सा चानेकत्वसङ्ख्या द्रव्येषु, गुणेषु, कर्मसु, सामान्ययोः, विशेषेषु च वर्तते । यतो द्रव्याण्यनेकानि, गुणा अनेके, कर्माण्यनेकानि सामान्येऽनेके, विशेषा अप्यनेका इति तेषु द्रव्यगुणकर्मसामान्यविशेषेषु पञ्चस्वनेकत्वं साधर्म्यं वर्तते । यद्यप्येकभिन्नानेकत्वसङ्ख्या यथा द्रव्यगुणकर्मसमामान्यविशेषेषु तथैवाभावेष्वपि वर्तत एव, अभावानां चातुर्विध्याद् । एवञ्चानेकत्वमाकाशादावव्याप्तमाकाशस्यैकत्वादिति चेदत्रानेकत्वमित्यस्यानेकत्वे सति भावत्वमर्थः । तथा च लक्ष्येऽन्वीतं भावपदं लक्षणेऽनुसन्धेयम् । तथा चानेकत्वे सति भावत्वं द्रव्यादीनां पञ्चानां साधर्म्यम् । तथा सत्यप्याकाशादावव्याप्तिदोषवारणायानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं द्रव्यादीनां पञ्चानां साधर्म्यं कार्यम् । तथा चानेकभाववृत्तिपदार्थविभाजकोपाधयो द्रव्यात्वादय उपाधयस्तादृशोपाधिमत्त्वस्य द्रव्यादिषु पञ्चसु सत्त्वाल्लक्षणसमन्वयः । आकाशत्वन्तु न पदार्थविभाजकोपाधिः । यैर्धर्मैः पदार्था विभज्यन्ते त एव धर्माः पदार्थविभाजकोपाधयः । यथा द्रव्यत्वम्, गुणत्वमित्यादि । आकाशत्वेन तु पदार्थानां विभागो न भवति किन्तु द्रव्याणां विभागो भवतीति आकाशत्वं द्रव्यविभाजकोपाधिः । अभावत्वन्तु न भाववृत्तिरिति द्रव्यत्वादिमादाय द्रव्यादिपञ्चसु लक्षणसमन्वयः । समवायित्वञ्चात्र न समवायवत्त्वमर्थात् समवायानुयोगित्वम्, तथा सति सामान्यविशेषयोरव्याप्तेरतोऽत्र समवायित्वम् = समवेतत्वरूपं समवायसम्बन्धेन सम्बन्धित्वम् । तच्च द्रव्यगुणकर्मसामान्यविशेषेषु पञ्चस्वेव, न तु समवायाभावयोः । अत्रापि निरवयवपरमाण्वाकाशादाव-व्याप्तिवारणाय समवायसम्बन्धेन सम्बन्धित्वमित्यस्य समवेतपदार्थवृत्तिपदार्थविभाजकोपाधिमत्त्व-मित्येवार्थः करणीयस्तेन कुत्राप्यसमवेत आकाशादौ नाव्याप्तिः । तथा च द्रव्यगुणकर्मसामान्य-विशेषाणां पञ्चानां साधर्म्यमनेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वम्, समवेतपदार्थवृत्तिपदार्थविभाजकोपाधिमत्त्वञ्चेति ।

पञ्चानां पदार्थानां साधर्म्यमुक्त्वा त्रयाणां पदार्थानां साधर्म्यं वक्ति ग्रन्थकारः-

**मूलम्- सत्तावन्तस्त्रयस्त्वाद्या...................... ।**

**सत्तावन्त इति । द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः ।**

**व्याख्या-** आद्यत्रयाणां द्रव्यगुणकर्मणां सत्तावत्त्वं साधर्म्यम् । द्रव्यगुणकर्मसु त्रिषु समवायेन सत्तारूपा जातिर्वर्तते ऽतस्तेषां त्रयाणां सत्तारूपजातिमत्त्वं साधर्म्यमित्यर्थः । इदानीं गुणादीनां षण्णां साधर्म्यं प्रतिपादयति विश्वनाथः-

**मूलम्- ....................गुणादिर्निगुणक्रियः ॥१४॥**

**गुणादिरिति यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं तथापि गुणवदवृत्तिधर्मवत्त्वं कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वं तदर्थः । नहि घटत्वादिकं द्रव्यत्वं वा गुणवदवृत्ति, कर्मवदवृत्ति वा किन्तु गुणत्वादिकं तथा, आकाशत्वादिकन्तु न पदार्थविभाजकोपाधिः ॥ १४ ॥**

**व्याख्या-** गुणः, कर्म, सामान्यम्, विशेषः, समवायः, अभावश्चेति षट्पदार्थाः निर्गुणाः निष्क्रियाश्च सन्ति । यतो गुणे गुणानङ्गीकाराद् गुणादिषु षट्सु गुणाः क्रियाश्च वर्तितुमशक्याः, तस्माद् गुणादीनां षण्णां निर्गुणत्वम्, निष्क्रियत्वञ्च साधर्म्यम् । यद्यपि निर्गुणत्वमात्रं लक्षणं निष्क्रियत्वमात्रं वा लक्षणमाद्यक्षणे घटादावतिव्याप्तमाद्यक्षणे घटे गुणरहितत्वाद् । एवमेव निष्क्रियत्वमाकाशेऽतिव्याप्तम्, आकाशस्य विभुत्वेन व्यापकत्वात्तत्र क्रियाया असम्भवतात् । तथापि निर्गुणत्वमित्यस्यात्र गुणवदवृत्तिधर्मवत्त्वमित्यर्थः करणीयः, तथा च गुणवद् घटादिद्रव्यं तत्रावर्तमानो धर्मो न घटत्वादिकं न वा द्रव्यत्वम्, द्रव्यत्वादेर्गुणवति वर्तमानत्वात्, अतस्तत्रावर्तमानो धर्मो गुणत्वादिः (गुणत्वम्, कर्मत्वम्, सामान्यत्वम्, विशेषत्वम्, समवायत्वम्, अभावत्वञ्चेति) तादृशधर्मवत्त्वस्य गुणादिषट्सु विद्यमानत्वाल्लक्षणसमन्वयः । एवमेव कर्मवत्त्वमित्यस्यापि कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वमर्थः । तथा चात्र कर्मवन्तो गुणादिषट् तत्रावर्तमानपदार्थविभाजकोपाधयो गुणत्वकर्मत्वसामान्यत्वविशेषत्वसमवायत्वाभावत्वानि, तद्वत्त्वस्य गुणादिषट्सु विद्यमानत्वाल्लक्षणसमन्वयः । आकाशत्वन्तु न पदार्थविभाजकोपाधिः, तस्य द्रव्यविभाजकत्वाद् । अतो न दोषः ।

इदानीं सामान्यादिचतुर्णां पदार्थानां साधर्म्यमाह विश्वनाथः-

**मूलम्- सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ।**

**सामान्येति । सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः ।**

**व्याख्या-** सामान्यविशेषसमवायाभावानां चतुर्णां साधर्म्यं सामान्यपरिहीनत्वम् = जातिरहितत्व-मित्यर्थः । यतो हि सामान्यम् = जातिः सा च द्रव्यगुणकर्मस्वेव त्रिषु विद्यते । सामान्यादिषु चतुर्षु

जातिबाधकसत्त्वात्तत्र कापि जातिर्न तिष्ठतीति सामान्यादिचत्वारो जातिशून्याः, अतस्तेषां चतुर्णां सामान्यपरिहीनत्वम् = जातिशून्यत्वं साधर्म्यमित्यर्थः । सामान्यादिषु त्रिषु सत्तावत्त्वप्रतीतिस्तु सामानाधिकरण्यसम्बन्धेन = एकार्थसमवायसम्बन्धेनेति बोध्यम् । यथा द्रव्यत्वादौ जातौ सत्ता जाति -रेकार्थसमवायेन वर्तते । एकस्मिन्नर्थे समवायो ययोः स एकार्थसमवायः सम्बन्धस्तथा चैकस्मिन् घटे समवायेन वर्तमानयोर्द्रव्यत्वसत्तयोरेकार्थसमवायो वर्ततेऽत एकार्थसमवायेन द्रव्यत्वजातौ सत्ता वर्तते । एवमेव विशेषसमवाययोरपि बोध्यम् ।

सामान्यादिचतुर्णां साधर्म्यं प्रतिपाद्येदानीं पारिमाण्डल्यभिन्नानां साधर्म्यं प्रतिपादयति ।

**मूलम्-** पारिमाण्डल्यभिन्नानां कारत्वमुदाहृतम् ॥ १५ ॥

**पारिमाण्डल्येति । पारिमाण्डल्यमणुपरिमाणम् । कारणत्वं तद्भिन्नानां साधर्म्यमित्यर्थः । अणुपरिमाणन्तु न कस्यापि कारणम् । तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् । तच्च न सम्भवति । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमाद् महदारब्धस्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसङ्गात् । एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः । इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वम् । ज्ञायमानं सामान्यं न प्रत्यासत्तिः । ज्ञायमानं लिङ्गं नानुमितिकरणमित्यभिप्रायेणोक्तम् । आत्ममानसप्रत्यक्षे आत्मपरममहत्त्वस्य कारणत्वान्महत्परिमाणं कालादेर्बोध्यम् । तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये, तन्न ज्ञानातिरिक्तं प्रत्येवाकारणताया आचार्यैरुक्तत्वात् ॥१५॥**

**व्याख्या-** परितो मण्डलं परिमण्डलम्, परिमण्डलस्य भावः पारिमाण्डल्यम् = अणुपरिमाणम्, तच्च परमाणौ द्व्यणुके च वर्तते तत्परमाणुद्व्यणुकसाधारणाणुपरिमाणं न कस्यापि कारणमतस्तदतिरिक्तानां सर्वेषां पदार्थानां कारणत्वं साधर्म्यम् । परमाणुद्व्यणुकसाधारणाणुपरिमाणभिन्नाः सर्वेऽपि पदार्थाः कस्यचन पदार्थस्य कारणानि भवन्त्येवेत्यर्थः । परमाणुपरिमाणन्तु न कस्यापि कारणं भवति । तस्यापि कारणत्वस्वीकारे वक्ष्यमाणदोषवारणासम्भवात् । तथा हि यद्यणुपरिमाणं कस्यापि कारणं भवेत्तर्हि द्व्यणुकपरिमाणस्यैव कारणं स्यात्, यतो हि परिमाणस्य स्वाश्रयारब्धद्रव्यपरिमाणारम्भकत्वनियमः । अस्यार्थश्च यदि परिमाणं कस्यापि कारणं स्यात्तर्हि स्वस्य = परिमाणस्य आश्रयेण द्रव्येणारब्धस्य द्रव्यस्य परिमाणस्यैव कारणं भवेद्, यथा कपालपरिमाणं कपालपरिमाणाश्रयकपालारब्धघटपरिमाणस्यैव कारणं भवति । कपालपरिमाणं घटपरिमाणमेव जनयतीत्यर्थः । अतः परिमाणस्य स्वस्याश्रयेण द्रव्येणारब्धस्य द्रव्यान्तरस्य परिमाणजनकत्वनियमादणुपरिमाणं यदि कारणं भवेत्तर्हि द्व्यणुकपरिमाणस्यैव कारणं स्यात्, तच्च न सम्भवति यतो हि परिमाणस्य नियमो वर्तते यद् यदि परिमाणं परिमाणान्तरं जनयेत्तर्हि स्वसमानजातीयं स्वोत्कृष्टञ्च परिमाणान्तरमेव जनयेन्न तु स्वासमानजातीयं स्वापकृष्टपरिमाणमिति नियमाद् यदि परमाणुपरिमाणं द्व्यणुकपरिमाणं जनयेत्तर्हि द्व्यणुकपरिमाणं परमाणुपरिमाणसजातीयं स्यात्, तच्च न सम्भवति, यतो हि परमाणुपरिमाणं परमाणुत्वजातीयकं द्व्यणुकपरिमाणञ्च

मध्यमाणुत्वजातीयकमिति तयोर्जातिभेदो वर्तते । यदि चाणुत्वेन समानजातीयकमित्युच्यते तर्हि द्व्यणुकपरिमाणं परमाणुपरिमाणत उत्कृष्टं स्यात्तदपि न सम्भवति, यतो यथा महदारब्धं महत्तरं महत्तमं वा भवति तथैवाणुजन्यमणुतरमणुतमं वा भवेत् । तथा च यद्यणुपरिमाणं द्व्यणुकादिपरिमाणं जनयेत्तर्हि परमाणुपरिमाणतोऽपि द्व्यणुकपरिमाणमणुतरं स्यात् । एवमेव द्व्यणुकपरिमाणादुत्पन्नत्रसरेणुपरिमाणं द्व्यणुकपरिमाणादप्यणुतमं स्यात्तथा स्वीकारे च जगत एवाणुत्वप्रसङ्गः स्यादतोऽणुपरिमाणं न कस्यापि कारणमिति सिद्धम् । किञ्च यद्यणुपरिमाणं स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं स्यात्तर्हि द्व्यणुकपरिमाणं त्रसरेणुपरिमाणस्य कारणं भवेत्तदा तेनैव नियमेन द्व्यणुकपरिमाणजन्यत्रसरेणुपरिमाणस्याप्यणुत्वजातीयपरिमाणत्वं स्यात् किन्तु त्रसरेणुपरिमाणन्तु मध्यमाणुत्वजातीयकमिति द्व्यणुकत्रसरेणुपरिमाणयोर्जातिभेदादप्यणुपरिमाणं न कस्यापि कारणमिति सिद्धम् । तथा चाणुपरिमाणाद् भिन्नानां सर्वेषां घटपटादिपदार्थानां कारणत्वं साधर्म्यमिति सिद्धम् । पारिमाण्डल्यमिति पदमुपलक्ष्यकमर्थाद् यथा पारिमाण्डल्यस्यार्थोऽणुपरिमाणं तथैवोपलक्ष्यत्वेन परममहत्परिमाणमतीन्द्रियं सामान्यं विशेषा अपि पारिमाण्डल्यपदेनात्र बोध्याः । तथा च यथाणुपरिमाणं न कस्यापि कारणं तथैव परममहत्परिमाणमतीन्द्रियं सामान्यम्, विशेषाश्च न कस्यापि कारणानीत्यर्थः । तथा च कारणत्वमणुपरिमाणपरममहत्परिमाणातीन्द्रियसामान्यविशेषभिन्नानां सर्वेषां पदार्थानां साधर्म्यमिति सिद्धम् । एतेषां चाणुपरिमाणपरममहत्परिमाणातीन्द्रियसामान्य-विशेषाणामकारणत्वं साधर्म्यमित्यपि बोध्यम् । ननु षड्विधप्रत्यक्षं प्रति महत्त्वस्य कारणत्वं स्वयमेव ग्रन्थकारोऽग्रे वक्ष्यति महत्त्वं षड्विधेर्हेतुरिन्द्रियं करणं मतमित्यादिना । एवञ्च योगिनामापरमाण्वन्तसर्वेषामतीतवर्तमानभविष्यत्कालीनानामपि पदार्थानां प्रत्यक्षत्वसम्भवादाकाशादिपरममहत्परिमाणस्यापि तेषां प्रत्यक्षत्वं सम्भवतीति योगिप्रत्यक्षं प्रत्याकाशादिगतपरममहत्परिमाणस्य कारणत्वेन तस्याकारणत्वं कथं सम्भवति । एवमेव चक्षुःघटसन्निकर्षे जाते यथा घटत्वरूपसामान्यलक्षणाप्रत्यासत्त्या सकलघटविषकं घटा इति प्रत्यक्षमलौकिकं भवति तथैवानुमानादिनैकपरमाणुज्ञाने जातेऽणुत्वसामान्यलक्षणाप्रत्यासत्त्या सकलाणुविषयकमलौकिकं प्रत्यक्षमपि स्वीकार्यमेव तथा सति चातीन्द्रियाणुत्वसामान्यस्यापि स्वाश्रयालौकिकप्रत्यक्षं प्रत्यसाधारणकारणत्वेनातीन्द्रियसामान्यस्याकारणत्वकथनं ग्रन्थकृतोऽसंगतम् । एवमेव एषः परमाणुः परमाण्वन्तरभिन्नो विशेषादित्याद्यनुमितौ विशेषस्य हेतुत्वेन हेतोश्चानुमितिकरणत्वेन विशेषस्याकारणत्वप्रतिपादनं ग्रन्थकृतो नैयून्यमिति चेन्न, यतो हि परममहत्परिमाणस्यातीन्द्रियसामान्यस्य, विशेषस्य चाकारणत्वप्रतिपादनं योगिप्रत्यक्षे विषयस्य न कारणत्वम्, अतीन्द्रियं सामान्यं न प्रत्यासत्तिः, लिङ्गं नानुमितिकरणमपि तु लिङ्गज्ञानमनुमितिकरणमित्यभिप्रायेणैवोक्तम् । अयमाशयः- योगिप्रत्यक्षे यदि विषयस्य कारणत्वं स्वीक्रियते तदा अतीतादिविषयाणां वर्तमानेऽसत्त्वात्तेषां योगिनां प्रत्यक्षं न स्यादतो योगिप्रत्यक्षं प्रति विषयस्याकारणत्वेन परमाणुपरिमाणस्याकाशादिगतपरममहत्त्वस्य

परिमाणस्य चास्मदादीनामप्रत्यक्षत्वेन चाणुपरिमाणं परममहत्परिमाणञ्चाकारणमित्युक्तिः सङ्गतैव । एवमेवालौकिकप्रत्यक्षं प्रति सामान्यलक्षणायाः प्रत्यासत्तित्वस्वीकारे सामान्यस्य नित्यत्वे सर्वदैव घटा इत्यादिसामान्यलक्षणाप्रत्यासत्तिजन्यज्ञानस्यापत्त्या अलौकिकप्रत्यक्षं प्रति सामान्यं न प्रत्यासत्तिरपि तु सामान्यविषयकं ज्ञानं प्रत्यासत्तिरिति स्वीकाराद् अतीन्द्रियसामान्यस्याकारणत्वप्रतिपादनं सङ्गतमेव । एवमेवानुमितौ यदि लिङ्गं करणं स्यात्तदातीतादिलिङ्गविषयकज्ञानेनानुमित्यनुत्पत्तिप्रसङ्गाल्लिङ्गं नानुमितिकरणमपि तु लिङ्गज्ञानं करणमित्यभिप्रायेण विशेषस्याप्यकारणत्वं प्रतिपादितमिति परममहत्परिमाणमतीन्द्रियसामान्यं विशेषा अप्यकारणानीत्यर्थः ।

नन्वस्मदादिषड्विधप्रत्यक्षं प्रति तु महत्त्वस्य कारणत्वं स्वीकार्यमेव, अन्यथा योगिनामिवास्मदादीनामपि परमाण्वादिप्रत्यक्षत्वापत्तिः स्यादतोऽस्मदादिप्रत्यक्षं प्रति महत्त्वस्य कारणत्वं स्वीकार्यमेव तथा चात्ममानसं प्रति सुखादिमानसं प्रति वात्मगतपरममहत्परिमाणं कारणमिति परममहत्त्वपरिमाणस्याकारणत्वप्रतिपादनमयुक्तमेव, एवमेवाकाशगतपरममहत्त्वपरिमाणस्य शब्दप्रत्यक्षं प्रति कारणत्वेन तस्याकारणत्वप्रतिपादनमयुक्तमिति चेदत्र परममहत्त्वपरिमाणपदेन कालदिशोर्महत्त्वं स्वीकार्यम्, आकाशात्मगतपरिमाणस्य तु शब्दज्ञानादिप्रत्यक्षं प्रति संयुक्तसमवायसम्बन्धेन हेतुत्वात् । तथा च कालदिग्गतपरममहत्त्वपरिमाणमेवाकारणमिति बोध्यम् । अत्र केचन वर्धमानोपाध्यायमतानुयायिन आकाशात्मगतपरममहत्त्वपरिमाणस्यापि ज्ञानं प्रत्यकारणत्वमुदयनाचार्यादिसम्मतमिति वदन्ति परं तन्न समीचीनम् यतो हि ज्ञातृधर्मो ज्ञानादिस्तदितरकार्यं प्रति कारणत्वं पारिमाण्डल्यभिन्नानां साधर्म्यमिति वदतामाचार्याणां ज्ञानं प्रत्याकाशात्मगतपरममहत्त्वपरिमाणस्य कारणत्वन्तु सिद्धमेव । विषयोऽयं कारणत्वञ्च ज्ञातृधर्मेतरकार्यापेक्षयेति प्रशस्तपादभाष्यादिग्रन्थादितोऽप्यधिकतयावसेयः ।

**(ख) कारणनिरूपणम्**

इदानीं प्रसङ्गसङ्गत्या कारणलक्षणं तद्भेदाँश्च प्रतिपादयति विश्वनाथः -

**मूलम्-** **अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता ।**
**कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥१६॥**
**समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम् ।**
**एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥१७॥**

**ननु कारणत्वं किम् ? अत आह अन्यथासिद्धीति । तस्य कारणत्वस्य ॥१६-१७॥**

**व्याख्या-** अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वमिति कारणलक्षणमर्थात् कारणं

नाम तद्वस्तु यद्वस्तु कार्यस्य पूर्वक्षणे नियमेन वर्तते, उत वा यद्वस्तु कार्यपूर्वक्षणे नियमेन वर्तमानं सत् कार्यजननाय (कार्योत्पत्तये) यत्किञ्चिद् व्यापारं करोति तद्वस्तु, अथवा स्वयमेव व्यापाररूपं वा भवति तद्वस्तु यद्यनन्यथासिद्धं वर्तते चेत्तदा तद्वस्तु तत्कार्यं प्रति कारणं कथ्यते । यथा घटदिकार्यं प्रति दण्डादयः । दण्डादयो हि घटरूपकार्यस्य पूर्वक्षणे नियमेन वर्तमानाः सन्तो घटरूपकार्यजननाय भ्रमीरूपव्यापारं कुर्वन्ति तस्मात्ते दण्डचक्तचीवरकुलालकपालादयोऽनन्यथासिद्धा घटरूपकार्यं प्रति कारणानि भवन्ति । एवमन्यत्रापि बोध्यम् । तच्च कारणं त्रिविधं समवायिकारणम्, असमायिकारणम्, निमित्तकारणञ्चेति । एवं रीत्या न्यायस्य यो नयः = सिद्धान्तः = न्यायनयः, तं जानन्तीति न्यायनयज्ञास्तैः = न्यायसिद्धान्तविद्भिर्नैयायिकैः कारणस्य त्रैविध्यं प्रतिपादितं वर्तते । तस्य तृतीया विधा च निमित्तकारणमेव । कारणविभागं प्रदर्श्येदानीं तेषां समवाय्यसमवायिनिमित्तकारणानां प्रत्येकेषां लक्षणमुदाहरणञ्च प्रदर्शयति ग्रन्थकारः -

**मूलम्-** **यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत् ।**
**तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥ १८ ॥**

**व्याख्या-** समवायिकारणलक्षणं प्रतिपादयति ग्रन्थकारः यत्समवेतमित्यादिना । अर्थाद्यस्मिन् समवेतं सत् कार्यमुत्पद्यते तत् समवायिकारणम् । यथा घटरूपं कार्यं समवायेन कपाले वर्तमानं सदुत्पद्यतेऽतः कपालं घटस्य समवायिकारणम् । एवमेव घटरूपात्मकं कार्यं घटे समवायेन वर्तमानं सदुत्पद्यतेऽतो घटरूपं प्रति घटः समवायिकारणम् । एतावता सिद्धं यत् कार्यं यस्मिन् समवायेन विद्यमानं सदुत्पद्यते तत्कारणं तत्कार्यस्य समवायिकारणमिति । अत्रेदं बोध्यम् - समवायिकारणे सर्वदैव कार्यं समवायेनैव तिष्ठति । तत्र कार्यं यदि द्रव्यात्मकं तदा तद्द्रव्यं स्वावयवे स्वसमवायिकारणे समवायेन तिष्ठति, अवयवावयविनो समवायात् । यदि च कार्यं गुणात्मकं कर्मात्मकं वा तदा तद्गुणात्मकं कर्मात्मकञ्च कार्यं स्वसमवायिकारणे स्वाश्रये समवायेनैव तिष्ठति, गुणगुणिनोः, क्रियाक्रियावतोश्च समवायात् । अतः समवायेन कार्यं प्रति तादात्म्येन द्रव्यस्य कारणत्वात् समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्ना कारणता समवायिकारणतेति निष्कृष्टं समवायिकारणतालक्षणं वक्तुं शक्यते ।

द्वितीयस्यासमवायिकारणस्य लक्षणं प्रतिपादयन्नाह विश्वनाथः तत्रासन्नं जनकं द्वितीयमिति । अर्थात् समायिकारणे प्रत्यासन्नमात्मविशेषगुणभिन्नं कारणमसमवायिकारणमिति । एतच्च लक्षणं सोदाहरणं लक्ष्ये समन्वीय प्रदर्शयति ग्रन्थकारः -

**मूलम्- तत्रेति । समवायिकारणे आसन्नम् = प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः । अत्र यद्यपि तुरीतन्तुसंयोगानां पटासमवायिकारणत्वं स्यात् । एवं वेगादीनामभिघाताद्यसमवायिकारणत्वं**

**स्यात् । तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयम् । तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव । एवं वेगादिकमपि वेगस्पन्दाद्यसमवायिकारणं भवत्येवेति तत्तत्कार्यसमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम् । आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वं नास्ति, तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव ।**

**व्याख्या-** कारिकायामुक्तस्यासमवायिकारणस्य लक्षणं मुक्तावल्यां समन्वयं कृत्वा दर्शयति विश्वनाथः । तत्रासमवायिकारणस्य लक्षणन्तावत् समवायिकारणे प्रत्यासन्नं कारणमसमवायिकारणमिति । अर्थाद् यत्कारणं समवायिकारणे समवायेन, स्वसमवायिसमवेतत्वसम्बन्धेन वा विद्यते तत्कारणमसमवायिकारणम् । यथा घटस्यासमवायिकारणं कपालद्वयसंयोगः, यतो हि कपालद्वयसंयोगं विना घटः कदापि नोत्पद्यत इति कपालद्वयसंयोगो घटस्य कारणम्, स च कपालद्वयसंयोगः कपाले समवायेन वर्तमानः सनेव घटस्य कारणं भवति । घटकपालयोरवयवावयवित्वादवयवावयविनोश्च समवायादतः कपालद्वयसंयोगो घटस्यासमवायिकारणम् । एवमेव पटस्यासमवायिकारणं तन्तुद्वयसंयोगः । मठस्यासमवायिकारणमिष्टिकादिसंयोगः, घटरूपस्यासमवायिकारणं कपालरूपं तद्धि कार्यस्य घटरूपस्य समवायिकारणे घटे स्वसमवायिसमवेतत्वसम्बन्धेन वर्तते तच्चाग्रे स्पष्टीभविष्यति । एवमन्यत्रापि बोध्यम् । अस्य लक्षणस्य कुत्रचिदतिव्याप्तिदोषग्रस्तत्वान्नेदं लक्षणं साध्विति शङ्कामुद्भाव्य निवारयति ग्रन्थकारः- अत्र यद्यपीत्यादिना, अर्थादसमवायिकारणस्य लक्षणं यदि समवायिकारणे प्रत्यासन्नकारणत्वमात्रं स्वीक्रियते तदा लक्षणेऽस्मिन्नतिव्याप्तिरूपदोषः स्यात् यतो हि पटात्मककार्यं प्रति यथा तन्तुद्वयसंयोगोऽसमवायिकारणं भवति, पटसमवायिकारणतन्तुवृत्तित्वात्, एवमेव तुरीतन्तुसंयोगोऽपि पटसमवायिकारणे तन्तौ वर्तत इति तुरीतन्तुसंयोगोऽपि पटस्यासमवायिकारणं स्यात्, तत्र यदि तुरीतन्तुसंयोगः पटासमवायिकारणमिति स्वीक्रियते तदा तुरीतन्तुसंयोगे नष्टे पटोऽपि नश्येत्, समवायिकारणनाशात् कार्यनाश इति नियमात । यथा तन्तुद्वयसंयोगे नष्टे पटो नश्यति । परन्तु तुरीतन्तुसंयोगे नष्टेऽपि पटस्य नाशाभावात्तुरीतन्तुसंयोगो न पटासमवायिकारणमिति पटासमवायिकारणलक्षणस्य तुरीतन्तुसंयोगेऽतिव्याप्तिर्मन्तव्या । एवमेवाभिघातसंयोगं प्रति यथा कर्मासमवायिकारणं भवति न तथा वेगोऽप्यसमवायिकारणम्, यतो हि वेगे नष्टेऽप्यभिघातसंयोगस्य नाशाभावादभिघातसंयोगं प्रति वेगो नासमवायिकारणं परं तत्र वेगेऽभिघातसंयोगासमवायिकारणलक्षणस्य गमनादतिव्याप्तिः स्याद्, यतो हि वेगोऽभिघातस्य समवायिकारणे हस्तादौ दण्डादौ वा समवायेन वर्तत इत्यभिघातसंयोगस्यासमवायिकारणलक्षणस्य वेगे सत्त्वादतिव्याप्तिरिति चेद्,न तत्र तत्रासमवायिकारण-लक्षणस्य भिन्नभिन्नस्य स्वीकारात् । अर्थाद् यदि पटासमवायिकारणलक्षणं कर्तव्यं तदा तुरीतन्तुसंयोग-भिन्नत्वे सति पटसमवायिकारणे प्रत्यासन्नं कारणं पटासमवायिकारणमिति पटासमवायिकारणलक्षणम् । यदि चाभिघातसंयोगासमवायिकारणलक्षणं कर्तव्यं तदा वेगभिन्नत्वे सत्यभिघातसंयोगसमवायिकारणे

प्रत्यासन्नं कारणमभिघातसंयोगासमवायिकारणलक्षणमिति भिन्नं भिन्नमसमवायिकारणलक्षणं कार्यमिति। ननु जानाति, इच्छति, यतत इति क्रमसम्भवादिच्छां प्रति ज्ञानस्याप्यसमवायिकारणत्वप्रसङ्गः स्यात् परमात्मविशेषगुणानां कुत्राप्यसमवायिकारणत्वाभावात्तत्रातिव्याप्तिरिति चेन्न, आत्मविशेषगुणानां कुत्राप्यसमवायिकारणत्वाभावादेवात्मविशेषगुणभिन्नत्वविशेषणन्तु सर्वत्रासमवायिकारणलक्षणे देयम् । नन्वेवमेव तुरीतन्तुसंयोगभिन्नत्वमित्यपि विशेषणं सर्वत्र दीयतामिति चेन्न, तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव । एवमेव वेगो द्वितीयादिवेगं प्रत्यसमवायिकारणमिति तद्भिन्नत्वं न सर्वत्रासमवायिकारणलक्षणे विशेषणं देयम् । आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वाभावात्तद्भिन्नत्वं सर्वत्रासमवायिकारणलक्षणे विशेषणं देयमिति ।

नन्विदं लक्षणं घटरूपासमवायिकारणे कपालरूपे कथं सङ्गच्छत इति जिज्ञासायामसमवायिकारण-लक्षणघटकं प्रत्यासन्नत्वं द्विधा व्याख्याय दर्शयति ग्रन्थकारः-

**मूलम्- अत्र समवायिकारणे प्रत्यासन्नं द्विविधं कार्यैकार्थप्रत्यासत्त्या, कारणैकार्थप्रत्यासत्त्या च । आद्यं यथा घटादिकं प्रति कपालसंयोगादिकमसमवायिकारणम् । तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्यैकस्मिन् कपाले प्रत्यासत्तिरस्ति । द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणम् । तत्र स्वगतरूपादिकं प्रति समवायिकारणं घटः, तेन सह कपालरूपस्यैकस्मिन् कपाले प्रत्यासत्ति -रस्ति । तथा च क्वचित्समवायसम्बन्धेन क्वचिच्च स्वसमवायिसमवायसम्बन्धेनेति फलितोऽर्थः । इत्थञ्च कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसन्नम् । आभ्याम् = समवायिकारणासमवायिकारणाभ्याम्, परम् = भिन्नम्, कारणं तृतीयम् = निमित्तकारणमित्यर्थः ॥१८॥**

**व्याख्या-** असमवायिकारणलक्षणन्तावत् समवायिकारणे प्रत्यासन्नं कारणमसमवायिकारणमिति । अत्र समवायिकारणे प्रत्यासन्नत्वं (वर्तमानत्वं) द्विविधम् = द्विप्रकारकरणेत्यर्थः । अर्थात् समवायिकारणे वक्ष्यमाणद्विविधप्रत्याप्रत्यासन्नं कारणमसमवायिकारणमित्यर्थः । तत्राद्यं यथा - घटं प्रत्यसमवायिकारणं कपालद्वयसंयोगः, स च कपालद्वयसंयोगो घटस्य समवायिकारणे कपाले समवायसम्बन्धेन वर्ततेऽतः समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नकपा-लद्वयसंयोगनिष्ठा कारणता असमवायिकारणतेत्यर्थः । एवमेव पटासमवायिकारणे तन्तुद्वयसंयोगेऽपि बोध्यम् । अत्र कार्यं कारणञ्चैकस्मिन्नधिकरणे कपालादौ समवायेन प्रत्यासन्नमस्ति । इदमेव कार्यैकार्थप्रत्यासत्त्या कारणत्वमित्यस्याभिप्रायः । कार्यस्य समवायिकारणरूप एकस्मिन्नर्थे कार्यकारणयोः प्रत्यासन्नत्वं (वर्तमानत्वं) इत्यर्थः । एवमेव कपालरूपं घटरूपस्यासमवायिकारणं वर्तते परं तत्र घटरूपस्य समवायिकारणे घटे कपालरूपं समवायेन समानाधिकरणं नास्तीति तत्र कश्चन द्वितीयः सम्बन्धः कल्पनीयः । तथा च कार्यसमवायिकारणे स्वसमवायिसमवेतत्वसम्बन्धेन प्रत्यासन्नं

कारण-मसमवायिकारणम् ।यथा घटरूपस्य समवायिकारणे घटे स्वसमवायिसमवेतत्वसम्बन्धेन प्रत्यासन्नं सत् कपालरूपं घटरूपस्यासमवायिकारणं भवति।तत्र स्वम् = कपालरूपम्, स्वसमवायि = कपालं तत्र समवेतो घटः समवेतत्वं घटे वर्तते ऽतः समवायसम्बन्धेन घटरूपात्मकं कार्यं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन वर्तमानं कपालरूपात्मकं कारणमसमवायिकारणमिति । तथा च समवायसम्बन्धेन कार्यसमवायिकारणे स्वसमवायिसमवेतत्वसम्बन्धेन प्रत्त्यासन्नं कारणमसमवायिकारणमिति द्वितीयासमवायिकारणस्य स्वरूपम् । यद्यपि यथा कार्यैकार्थप्रत्यासत्तिरित्यनेन कार्यस्य समवायिकारणरूप एकस्मिन्नर्थे कार्यकारणयोरुभयोः प्रत्यासत्तिरित्यर्थो बुद्ध्यते । तथा च कारणैकार्थप्रत्यासत्तिरित्यनेनापि कारणस्य समावायिकारणे कार्यकारणयोरुभयोः प्रत्यासत्तिरित्यर्थः करणीयः, तथा चोभयत्र मध्यमपदलोपीसमासः कर्तव्यः । कार्यसमवायिकारणे एकस्मिन्नर्थे प्रत्यासत्तिरिति कार्यैकार्थप्रत्यासत्तेः, एवमेव कारणस्य समवायिकारणे एकस्मिन्नर्थे प्रत्यासत्तिरिति कारणैकार्थप्रत्यासत्तेश्च व्युत्पत्तिः कार्या।तथा सति कपालरूपं घटरूपस्यासमवायिकारणमित्यत्र कारणस्य कपालरूपस्य समवायिकारणे कपाले कार्यकारणयोः घटरूपकपालरूपयोः सामानाधिकरण्यं स्थापनीयम् । तच्च तत्र कपालरूपस्य कारणस्य समवायिकारणे कपाले घटरूपात्मकं कार्यं स्वसमवायिसमवायसम्बन्धेन स्थापनीयम्, (स्वम् = घटरूपम्, स्वसमवायि = घटः, तस्य समवायः कपाले इति) कपालरूपात्मकं कारणञ्च समवायेनेति कार्यस्य सम्बन्धः परम्परा -सम्बन्धः कारणस्य सम्बन्धस्तु समवायः । अयमेव कारणैकार्थप्रत्त्यासत्त्या कारणत्वमित्यस्याभिप्रायो भवितुं शक्नोति ।मुक्तावलीकृतापि कारणैकार्थप्रत्यासत्तिस्थले स्वसमवायिसमवायसम्बन्धस्यौवोल्लेखात् । परमत्रोपरि व्याख्यायां भवता कार्यस्य सम्बन्धः समवायः, कारणस्य तु सम्बन्धः स्वसमवायिसमवेतत्वरूपः परम्परासम्बन्धः प्रतिपादितः, अन्यत्राप्येतद्ग्रन्थव्याख्यादिष्वप्येतादृश एव सम्बन्ध उल्लिखितो दृश्यते । तथा च कार्यतावच्छेदककारणतावच्छेदकसम्बन्धभेदाद् विरोधः प्रतिभाति तथाप्युभयथापि कार्यकारणयोः सामानाधिकरण्यसम्भवादुभावेव विध्यवलम्बयितुं शक्याविति न काचित् क्षतिः । इत्थं रीत्या द्वितीयप्रत्यासत्तिस्थले कार्यस्य समवायिकारणे कार्यकारणयोः सामानाधिकरण्यमथवा कारणस्य समवायिकारणे कार्यकारणयोः सामानाधिकरण्यमित्युभयथापि कर्तुं शक्यते किन्तु यदि समवायेन कार्यस्याधिकरणे कारणं स्थापनीयं तदा कारणस्य सम्बन्धः स्वसमवायिसमवेतत्वं कल्पनीयं यदि च कार्यस्याधिकरणं स्वसमवायिसमवायसम्बन्धेन स्वीक्रियते तदा कारणस्य सम्बन्धः समवाय-मात्रमिति विवेकः कार्यः । तथा च समवायस्वसमवायिसमवायान्यतरसम्बन्धावच्छिन्नकार्य-तानिरूपितसमवायसम्बन्धावच्छिन्नकारणता-असमवायिकारणस्य लक्षणमथवा समवायसम्बन्धा-वच्छिन्नकार्यतानिरूपित-समवायस्वसमवायि-समवेतत्वान्यतरसम्बन्धा-वच्छिन्नकारणता असमवायिकारणस्य लक्षणमित्यसमवायिकारणलक्षणमुभयथापि कर्तुं शक्यते । तथा च क्वचित् समवाय सम्बन्धेन क्वचिच्च स्वसमवायिसमवेतत्वसम्बन्धेन समवायिकारणे प्रत्यासन्नमात्मविशेष-गुणभिन्नं

कारणमसमवायिकारणमिति । समवाय्यसमवायिकारणलक्षणं प्रतिपाद्य निमित्तकारणलक्षणमाह-आभ्यां परं तृतीयमिति । अर्थात् समवाय्यसमवायिकारणभिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः । तच्च निमित्तकारणं द्विविधं साधारणनिमित्तमसाधारणनिमित्तञ्च, साधारणनिमित्तं कारणं कार्यमात्रं प्रति समानमेव । अर्थात् कार्यत्वावच्छिन्नकार्यतानिरूपितकारणता साधारणनिमित्तकारणता तद्वत् कारणं साधारणनिमित्तकारणम् ।

**तद्यथा-** **ईशस्तज्ज्ञानयत्नेच्छा कालोऽदृष्टं दिगेव च ।**

**प्रागभावप्रतिबन्धकाभावौ कार्ये साधारणाः स्मृताः ॥ इति**

एतानि कारणानि साधारणकारणानीत्यर्थः । असाधारणञ्च कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपित-कारणता असाधारणकारणता तद्वत् कारणमसाधारणकारणम् । यथा घटं प्रति दण्डादयः । एवञ्चेत्थं रीत्या कारणलक्षणं तद्भेदाँश्च प्रतिपाद्य प्रसङ्गसङ्गत्या कारणलक्षणघटकीभूतान्यथासिद्धलक्षणं तद्भेदांश्च प्रतिपादयति ग्रन्थकारः -

**मूलम्-** **येन सह पूर्वभावः कारणमादाय वा यस्य ।**

**अन्यं प्रति पूर्वत्वे ज्ञाते यत्पूर्वभावविज्ञानम् ॥१९॥**

**जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते ।**

**अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः ॥२०॥**

**व्याख्या-** अशंतः कारणलक्षणाक्रान्तं कार्यं प्रत्युदासीनं वस्त्वन्यथासिद्धमित्युच्यते । अर्थात् कार्यपूर्ववृत्ति सत् कार्यजननायानावश्यकं वस्त्वन्यथासिद्धमिति । अन्यथासिद्धेषु वस्तुष्वन्यथासिद्धिदोषाः तिष्ठन्ति, यद्यप्यन्यथासिद्धिरेकैव तथापि शिष्यबुद्धिवैशद्यायान्यथासिद्धं विभज्य पञ्चान्यथासिद्धिस्वरूपं प्रदर्शयति ग्रन्थकारो येन सहेत्यादिना ।

१. येन धर्मेण सहैव कारणस्य पूर्ववृत्तित्वं भवति, न तं धर्मं विना कारणस्य पूर्ववृत्तिता, स धर्म प्रथमान्यथासिद्धः तत्र वृत्तिधर्मः प्रथमान्यथासिद्धिदोषः । अर्थाद् यद्धर्मावच्छिन्ना कारणनिष्ठा कारणता स धर्मः प्रथमान्यथासिद्धः, तत्र वर्तमानो धर्मः प्रथमान्यथासिद्धिदोषः । तथा च कारणवृत्तिकारणतावच्छेदको धर्मः प्रथमान्यथासिद्धः । यथा दण्डत्वादिः, दण्डत्वादिं धर्मं विहाय दण्डस्य कारणत्वासम्भवाद् दण्डत्वं प्रथमान्यथासिद्धम् ।

२. यस्य वस्तुनः कार्यनियतपूर्ववृत्तित्वं कारणमादायैव भवति, तद्वस्तु द्वितीयान्यथासिद्धं तत्र वर्तमानो धर्मो द्वितीयान्यथासिद्धिः दोषः । यस्य वस्तुनः कार्येण सहान्वयव्यतिरेकौ कारणमादायैव भवतः न तु स्वातन्त्र्येण तद्वस्तु द्वितीयान्यथासिद्धस्तत्र वर्तमानो धर्मो द्वितीयान्यथासिद्धिः दोष इत्यर्थः । यथा घटं प्रति दण्डरूपादिकम् ।

३. अन्यं प्रति (शब्दं प्रति) पूर्वभावे (कारणतायां) ज्ञात एव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं ज्ञायते तद्वस्तु तत्कार्यं प्रति तृतीयान्यथासिद्धं तत्र वर्तमानो धर्मस्तृतीयान्यथासिद्धिर्दोषः । यथा गगनम् ।

४. कारणं प्रति पूर्ववृत्तित्वमज्ञात्वा यस्मिन् यत्कार्यं प्रति पूर्ववृत्तित्वं न ज्ञायते तद्वस्तु तत्कार्यं प्रति चतुर्थान्यथासिद्धं तत्र वर्तमानो धर्मश्चतुर्थान्यथासिद्धिर्दोषः । यथा कुलालपिता ।

५. नियतावश्यकपूर्वभाविकारणातिरिक्तं यद्यद् वस्तु तत्सर्वमन्यथासिद्धं पञ्चमम्, तत्र वर्तमानो धर्मः पञ्चमान्यथासिद्धिर्दोषः । अर्थादवश्यक्लृप्तनियतपूर्ववृत्तिभिरेव कार्यसम्भवे तत्सहभूतं सर्वमप्युदासीनं वस्तु पञ्चमान्यथासिद्धम् । यथा घटं प्रति रासभशकटादिकमुदासीनं सर्वं वस्तु पञ्चमान्यथासिद्धम् ।

इदानीमुपर्युक्तपञ्चान्यथासिद्धस्वरूपाणि पुनः स्फुटीकुत्योदाहरणसहितं पञ्चान्यथासिद्धलक्षणं लक्ष्ये समन्वीय दर्शयति मुक्तावलीकारः-

**मूलम्- इदानीमन्यथासिद्धत्वमेव कियतां पदार्थानामत आह येनेति । यत्कार्यं प्रति कारणस्य पूर्व- वृत्तिता येन रूपेण गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः । यथा घटं प्रति दण्डत्वमिति । द्वितीयमन्यथासिद्धमाह कारणमिति । यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः किन्तु कारणमादायैवा-न्वय-व्यतिरेकौ गृह्येते तदन्यथासिद्धम् । यथा दण्डरूपम् । तृतीयमाह- अन्यं प्रतीति । अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् । यथा घटादिकं प्रत्याकाशस्य तस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात् । आकाशत्वं हि शब्दसमवायिकारणत्वम् । एवञ्च तस्य शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम् । ननु शब्दाश्रयत्वेन तस्य कारणत्वे कान्यथासिद्धिरिति चेत् ? पञ्चमीति गृहाण । नन्वाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत् ? कवत्त्वादिकं विशेषपदार्थो वेति । चतुर्थमन्यथासिद्धमाह- जनकं प्रतीति । यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् । यथा कुलालपितुर्घटं प्रति । तस्य हि कुलालपितृत्वेन घटं प्रति जनकत्वे त्विष्टापत्तिः, कुलालमात्रस्य घटं प्रति जनकत्वात् । पञ्चमान्यथासिद्धमाह- अतिरिक्तमिति । अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नमन्यथासिद्धमित्यर्थः । अत एव प्रत्यक्षे महत्त्वं कारणमनेकद्रव्यवत्त्वमन्यथासिद्धम् । तत्र हि महत्त्वमवश्यक्लृप्तं तेनानेकद्रव्यवत्त्वमन्यथासिद्धम् । न च वैपरीत्ये किं विनिगमकमिति वाच्यम्, महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् ॥१९-२०॥**

**व्याख्या-** कार्यनियतपूर्ववृत्त्यनन्यथासिद्धं कारणमिति पूर्वं कारणलक्षणं प्रतिपादितमासीत् । तत्र तल्लक्षणघटकान्यथासिद्धिः केति जिज्ञासायां विश्वनाथपञ्चाननोऽन्यथासिद्धिदोषपरिज्ञानायान्यथासिद्धान्

पञ्चतया विभज्यान्यथासिद्धं परिचाय्य साररूपेण तद्विशेषणीभूतावश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे तत्सहभूतत्वरूपान्यथासिद्धेः स्वरूपं परिचायितवान् । तत्र पूर्वं शिष्यबुद्धिवैशद्याय पञ्चान्यथासिद्धानां प्रत्येकेषां स्वरूपं दर्शयतियत्कार्यं प्रतीत्यादिना । तथा च प्रथमान्यथासिद्धस्वरूपं यथा-यत्कार्यं प्रति कारणस्य पूर्ववृत्तित्वं (कारणत्वं) येन धर्मेण भवति, अर्थाद् यद्धर्मावच्छिन्ना कारणता भवति, स कारणतावच्छेदकीभूतो धर्मः प्रथमान्यथासिद्धः । यथा घटकार्यं प्रति दण्डस्य कारणता दण्डत्वेनार्थाद् दण्डत्वधर्मावच्छिन्ना, अतो दण्डनिष्ठायाः कारणताया अवच्छेदकीभूतो धर्मो दण्डत्वं घटं प्रति प्रथमान्यथासिद्धम् । एवं रीत्या सर्वमपि कारणतावच्छेदकीभूता धर्माः कार्यं प्रति प्रथमान्यथासिद्धा भवन्ति । कारणतावच्छेदकीभूता धर्माः प्रथमान्यथासिद्धा इत्यर्थः । द्वितीयमन्यथासिद्धन्तावद् यस्य वस्तुनः पूर्ववर्तिता सर्वदैव कारणमादायैव भवति न तु स्वातन्त्रेण, अथवा यस्य वस्तुनोऽन्वयव्यतिरेकौ कारणमादायैव भवतः, यथा दण्डरूपस्य घटं प्रत्यन्वयव्यतिरेकौ दण्डमादायैव भवतः, दण्डरूपसत्त्वे घटसत्त्वम्, दण्डरूपाभावे घटाभाव इति, अत्र दण्डं विहाय रूपघटयोरन्वयव्यतिरेकौ न भवतस्तस्माद् दण्डरूपं घटस्य द्वितीयान्यथासिद्धम् । तृतीयान्यथासिद्धन्तावद् अन्यं प्रति पूर्वभावे (कारणत्वे) ज्ञात एव यस्य यत्कार्यंप्रति पूर्ववृत्तित्वं गृह्यते तद्वस्तु तृतीयान्यथासिद्धम् । यथाकाशः । तत्रेत्थं बोध्यम्- इदानीमाकाशः कः ? इति जिज्ञासायां शब्दसमवायिकारणत्वमाकाशस्य लक्षणमिति रीत्या शब्दसमवायिकारणत्वेनाकाशो ज्ञेयः । तस्य च शब्दसमवायिकारणस्याकाशस्य लाघवादेकत्वं नित्यत्वञ्च युक्त्या सिद्ध्यतीत्याकाशस्य नित्यत्वे ज्ञात एवाकाशे घटनियतपूर्ववृत्तित्वं ज्ञायते न तु स्वातन्त्रेण द्रव्यत्वादिना वेति शब्दं प्रति पूर्ववृत्तित्वे ज्ञाते घटं प्रति पूर्ववृत्तित्वज्ञानमाकाशस्येत्याकाशो घटं प्रति तृतीयान्यथासिद्धः । एवं रीत्या शब्दाद्याकाशवृत्त्ययुतसिद्धभिन्नकार्यं प्रत्याकाशः तृतीयान्यथासिद्धः । नन्वाकाशस्य यदा शब्दाश्रयत्वेन ज्ञाने जात एवाकाशो यदि ज्ञायते तस्य चाकाशस्य नित्यत्वेन तत्र घटपूर्ववृत्तित्वं (घटकारणत्वं) यदि गृह्यते तदाकाशः कतमोऽन्यथासिद्ध इति चेत्तदाकाशः पञ्चमान्यथासिद्धः । तदानीं तृतीयान्यथासिद्धस्तु न कोऽपीति बोध्यः । ननु यद्यकाशः शब्दं प्रति समवायिकारणं तदाकाश-निष्ठशब्दसमवायिकारणताया अवच्छेदकः कः ? इति चेत् कवदाकाशनिष्ठशब्दसमवायिकारणताया अवच्छेदकं कवत्त्वं विशेषपदार्थो वेति गृहाण ।

चतुर्थान्यथासिद्धलक्षणमाह जनकं प्रतीति । अथाद् यस्य कारणं प्रति कारणत्वमज्ञात्वा कार्यं प्रति कारणत्वं न ज्ञायते किन्तु कारणं प्रति कारणत्वं ज्ञात्वैव यस्य यत्कार्यं प्रति कारणत्वं ज्ञायते तद्वस्तु तत्कार्यं प्रति चतुर्थान्यथासिद्धः । यथा कुलालजनके वृद्धे कुलालं प्रति कारणत्वमज्ञाय घटं प्रतिपूर्व- वृत्तित्वं न ज्ञायते किन्तु देशान्तरवर्तिनि कुलालपितरि कुलालकारणत्वे ज्ञाते तस्मिन् कुलालपितरि घटं प्रत्यपि कारणत्वं ज्ञायतेऽतः स कुलालपिता तं घटं प्रति चतुर्थान्यथासिद्धः । तथा

च व्यापारभिन्नं कारणस्य कारणं सर्वकार्यं प्रति चतुर्थान्यथासिद्धम् । यदि च स कुलालोऽपि पित्रा सह मिलित्वा घटं करोति तदा तु कुलालपितरि घटकारणत्वं कुलालकारणत्वमज्ञात्वापि ज्ञायतेऽतस्तदानीं कुलालपितानान्यथासिद्धः । कुलालमात्रस्य घटं प्रति कारणत्वाद् । पञ्चमान्यथासिद्धस्वरूपमाह- अवश्यक्लृप्तेत्यादि । कारणत्वेनावश्यं स्वीकरणीयवस्तुभिरेव कार्यसम्भवे तदवश्यं स्वीकरणीयवस्तुना साकमागतं सर्वमपि वस्तु यच्च कार्यं प्रत्युदासीनं तत्पञ्चमान्यथासिद्धम् । यथा घटं प्रति रासभादिः । अवश्यक्लृप्तनियतपूर्ववर्तिना कार्यसम्भवे तत्सहभूतत्वस्यान्यथासिद्धत्वस्वीकारादेव प्रत्यक्षं प्रति महत्त्वं कारणमनेकद्रव्यवत्त्वमन्यथासिद्धमिति, लाघवाद् । ननु विनिगमनाभावादनेकद्रव्यवत्त्वं कारणं महत्त्वञ्चान्यथासिद्धमिति किं नोच्यत इत्यपि वक्तुं न शक्यते यतो हि महत्त्वस्य कारणत्वे कारणतावच्छेदकं महत्त्वत्वं सा च जातिरेका । अनेकद्रव्यवत्त्वस्य कारणत्वे तु कारणतावच्छेदकं महत्त्वद्रव्यत्वोभयत्वरूपमनेकद्रव्यत्वमुपाधिः स चानेक इति गौरवं स्याद्यतो ह्यत्रानेकद्रव्यवत्त्वं कारणं तन्निष्ठकारणतावच्छेदकमनेकद्रव्यवत्त्वत्वं तच्चानेकद्रव्यत्वरूपं तदनेकद्रव्यत्वञ्च महत्त्वद्रव्यत्वोभयत्वरूपम् । तस्य गुरुभूतस्यापेक्षया लघुभूतमहत्त्वत्वमेव कारणतावच्छेदकमिति विनिगमनायाः सत्त्वान्न वैपरीत्यं युक्तम् । अतो महत्त्वमेव प्रत्यक्षं प्रति कारणम् । इदानीं पुनः पञ्चतया लक्षितानां पञ्चान्यथासिद्धानां प्रत्येकेषामुदाहरणं कारिकावल्यां प्रदर्शयति विश्वनाथः -

**मूलम्-** **एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम् ।**
**घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥२१॥**
**तृतीयं तु भवेद् व्योम कुलालजनकोऽपरः ।**
**पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥२२॥**

**रासभादिरिति । यद्यपि यत्किञ्चिद्घटव्यक्तिं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति, तथापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे रासभोऽन्यथासिद्ध इति भावः । एतेष्विति । एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकस्तेनैव परेषां चरितार्थत्वात् । तथाहि दण्डादिभिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे दण्डत्वादिकमन्यथासिद्धम् । न च वैपरीत्ये किं विनिगमकमिति वाच्यम्, दण्डत्वस्य कारणत्वे दण्डघटितपरम्परायाः सम्बन्धत्वकल्पने गौरवाद् । एवमन्येषामप्यनेनैव चरितार्थत्वं सम्भवतीति बोध्यम् ॥२१-२२॥**

**व्याख्या-**पूर्वोक्तपञ्चान्यथासिद्धानां प्रत्येकेषामुदाहरणं प्रदर्शयति विश्वनाथ एते पञ्चान्यथेत्यादिना । अर्थाद् घटादिकार्यं प्रति घटत्वादिकं प्रथममन्यथासिद्धम् । द्वितीयमन्यथासिद्धं घटादिकार्यं प्रति दण्डरूपादिकम्, तृतीयमन्यथासिद्ध आकाशः । चतुर्थान्यथासिद्धाः कुलालपित्रादयः । पञ्चमान्यथासिद्धा रासभादय इति । एतेषु पञ्चान्यथासिद्धस्वरूपेषु पञ्चममन्यथासिद्धस्वरूपमेवावश्यकमन्यानि

चत्वार्यन्यथासिद्धस्वरूपाणि व्यर्थानि, तेषां चतुर्णां पञ्चमेऽन्तर्भावसम्भवादर्थात् पञ्चमेन सर्वेषां गतार्थत्वादिति । तथा चावश्यक्लृप्तनियतपूर्ववर्तिभिर्दण्डादिभिरेव घटादिरूपकार्यसम्भवे तत्सहभूता दण्डत्वदण्डरूपाकाशाकुलालपितृरासभादयः सर्वेऽप्यन्यथासिद्धाः । ननु यो हि घटः रासभेन मृदानयनानन्तरमेवोत्पन्नस्तस्मिन् घटे रासभो नियतपूर्ववर्ती एव तर्हि तं घटं प्रति रासभः कथमन्यथासिद्ध इति चेन्न तस्यापि घटस्य घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेवोत्पत्तिसम्भवाद् रासभः तत्राप्यन्यथासिद्ध एव । घटजातीयं प्रति नियतत्वाभावाद् घटं प्रति रासभोऽन्यथासिद्ध इति ।

ननु घटं प्रति किं न दण्डत्वं कारणं दण्डश्चान्यथासिद्ध इति स्वीक्रियत इति चेन्न दण्डत्वस्य कारणत्वे स्वाश्रयदण्डभ्रमिजन्यभ्रमिजन्यभ्रमिमत्तासम्बन्धस्य कारणतावच्छेदकसम्बन्धत्वं कल्पनीयम् । दण्डस्य कारणत्वे तु स्वजन्यभ्रमिजन्यभ्रमिजन्यभ्रमिमत्तायाः कारणत्वकल्पनात् कारणतावच्छेदक- सम्बन्धांशे लाघवाद् दण्ड एव कारणमितीयमेव विनिगमना = एकतरपक्षपातिनी युक्तिरिति विनिग-मनायाः सत्त्वान्न वैपरीत्यमुचितमिति ।

## पदानामर्थाः

समानम् = एकम्

विरुद्धः = विरोधदोषवान् (एकाधिकरणावृत्तिः)

केवलान्वयित्वम् = सर्वत्र विद्यमानत्वम्( अत्यन्ताभावाप्रतियोगित्वम्)

ज्ञायमानम् = वर्तमानकालीनज्ञानविषयीभूतम्

लिङ्गम् = लीनमर्थं बोधयति यत्तल्लिङ्गम्

ज्ञेयत्वम् = ज्ञानविषयत्वम्

अभिधेयत्वम् = अभिधा (शक्ति) विषयत्वम्

प्रमेयत्वम् = यथार्थज्ञानविषयत्वम्

समवेतत्वम् = समवायसम्बन्धस्य प्रतियोगित्वम्

समवायित्वम् = समवायसम्बन्धस्यानुयोगित्वम्

अतीन्द्रियम् = इन्द्रियमतीत्य वर्तते यत्तदिन्द्रियाग्राह्यमतीन्द्रियम्

उत्कृष्टम् = उत्तमम्, उत्कर्षान्वितम्

नियतत्वम् = नितरां यतते यत्तस्य भावः (व्यापकत्वम्)

न्यायनयज्ञः = न्यायसिद्धान्तज्ञः

आसन्नम् = वर्तमानम् (प्रत्यासन्नम्)

| | | |
|---|---|---|
| तुरी | = | वस्त्रनिर्माणसाधनकाष्ठविशेषः (भाषायां तान इत्युच्यते) |
| वेमा | = | वस्त्रनिर्माणसाधनकाष्ठविशेषः (भाषायां कुरुस इत्युच्यते) |
| स्पन्दः | = | क्रिया |
| अन्यतरः | = | द्वयोरेकोऽन्यतरः |
| अभिघातः | = | शब्दहेतुसंयोगः |
| कार्यैकार्थप्रत्यासत्तिः | = | कार्यस्यैकस्मिन्नर्थेऽधिकरणे कारणस्य सम्बन्धः |
| कारणैकार्थप्रत्यासत्तिः | = | कारणस्यैकस्मिन्नर्थेऽधिकरणे कार्यस्य सम्बन्धः |
| पूर्वभावः | = | कारणत्वम् (पूर्ववर्तित्वम्) |
| अपरिज्ञाय | = | अज्ञात्वा |
| क्लृप्तम् | = | स्वीकृतम् |
| विनिगमना | = | एकतरपक्षपातिनी युक्तिः |
| चरितार्थता | = | फलितार्थता, गतार्थता |

## अभ्यासाः

**१. अतिसङ्क्षिप्तमुत्तरं देयम्**

(क) ज्ञेयत्वमित्यस्य कोऽर्थः ?

(ख) सत्तावत्त्वं केषां साधर्म्यम् ?

(ग) निर्गुणत्वं केषां साधर्म्यम् ?

(घ) ज्ञायमानं लिङ्गमनुमितिकरणं न वा ?

(ङ) घटं प्रत्यसमवायिकारणं किम् ?

(च) समवायिकारणस्य लक्षणं किम् ?

(छ) आभ्यां परं तृतीयमिति कस्य स्वरूपम् ?

(ज) अन्यथासिद्धाः कति विधाः ?

(झ) घटत्वं कतमदन्यथासिद्धम् ?

(ञ) केवलान्वयित्वमित्यस्य कोऽर्थः ?

**२. टिप्पण्यात्मकमुत्तरं देयम्**

(क) पञ्चानां पदार्थानां साधर्म्यं किमिति युक्त्या भणत ।

(ख) अणुपरिमाणस्य कारणत्वे कापत्तिः ?

(ग) योगिप्रत्यक्षे विषयस्य कारणत्वं भवति न वेति विचारयत ।

(घ) असमवायिकारणलक्षणं क्वचिल्लक्ष्ये समन्वयङ्कुरुत ।

(ङ) तृतीयान्यथासिद्धस्वरूपं प्रतिपाद्योदाहरणं प्रस्तुत ।

(च) पञ्चमान्यथासिद्धिस्वरूपेण कथं सर्वेषां चरितार्थता ?

(छ) चतुर्थान्यथासिद्धस्य स्वरूपमुपपाद्य दृष्टान्तो देयः ।

(ज) घटं प्रति दण्डत्वस्य कारणत्वे कापत्तिः ?

३. **स्वोपज्ञतया विस्तृतमुत्तरं देयम्**

(क) साधर्म्यवैधर्म्ये परिभाष्य पारिमाण्डल्यभिन्नानां साधर्म्यं किमिति विवेचयत ।

(ख) कारणलक्षणं विलिख्यासमवायिकारणलक्षणघटकद्विविधप्रत्यासत्तिं प्रतिपादयत ।

(ग) पञ्चान्यथासिद्धस्वरूपाणि सोदाहरणं प्रतिपादयत ।

४. **कक्षाभ्यासः**

(क) असमवायिकारणलक्षणघटकद्विविधप्रत्यासत्तिविषये विस्तृता चर्चा सखिभिः सह कार्या ।

(ख) अन्यथासिद्धभेदान् कक्षायां चर्चयत ।

**षष्ठः पाठः**

# अवशीष्टसाधर्म्यवैधर्म्यनिरूपणम्

सप्रपञ्चं कारणं प्रतिपाद्येदानीं पुनः शेषसाधर्म्यवैधर्म्ये निरूपयति ग्रन्थकारः -

**मूलम्-** **समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।**

**गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥२३॥**

**समवायीति । स्पष्टम् । गुणेति । असमवायिकारणत्वं गुणकर्मभिन्नानां वैधर्म्यम्, न तु गुणकर्मणोः साधर्म्यमित्यत्र तात्पर्यम् । अथवाऽऽसमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः । तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि नाव्याप्तिः ॥२३॥**

**व्याख्या-** साधर्म्यवैधर्म्यनिरूपणावसरेऽकारणत्वं पारिमाण्डल्यभिन्नानां साधर्म्यमित्युक्तम् । तत्राकारणत्व-घटकस्य कारणत्वस्य स्वरूपभेदादिसहिततद्घटकान्यथासिद्धनिरूपणानन्तरं पुनः साधर्म्यवैधर्म्य एव निरूपयति विश्वनाथः समवायिकारणत्वमित्यादिना ।समवायिकारणत्वं नवानां द्रव्याणां साधर्म्यमिति ।यतो हि द्रव्याणि सर्वाणि कस्यचन भावकार्यस्य समवायिकारणानि भवन्त्येव ।तत्र समवेतं कार्यं द्रव्यगुणकर्मात्मकमेव, एतानि च द्रव्यगुणकर्माण्युत्पत्तौ समवायेन द्रव्य एव तिष्ठन्तीति भावकार्यस्य समावायिकारणं द्रव्यमेव । गुणकर्मणी चासमवायिकारणेऽपि भवतः, न तु समवायिकारणेऽतः समवायि-कारणत्वं द्रव्यस्यैव साधर्म्यमित्युक्तम् । अत्र एवकारपदेन द्रव्यातिरिक्तानां गुणादीनां समवायिकारणत्वं सर्वथा निषिध्यते ।

सर्वे गुणा असमवायिकारणानि न भवन्ति, कतिचन गुणा एवासमवायिकारणान्यात्म-विशेषगुणानां कुत्राप्यसमवायिकारणत्वाभावादतो न गुणकर्मणोः साधर्म्यमसमवायिकारणत्वमिति किन्तु गुणकर्मातिरिक्ताः केऽपि पदार्था असमवायिकारणानि न भवन्तीति गुणकर्मव्यतिरिक्तानामसमवायि-कारणत्वं वैधर्म्यमिति वैधर्म्याभिप्रायेणोक्तम् । यदि च साधर्म्यप्रकरणोक्तत्वात् साधर्म्यमेवेत्युच्यते तदा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं गुणकर्मणोः साधर्म्यमिति कृत्वा साधर्म्यं व्याख्येयम्, कश्चिद् गुणः, कर्माणि च केषाञ्चन कार्याणामसमायिकारणकारणानीत्यसमवायिकारणवृत्तिसत्ताभिन्नाजातिः गुणत्वं कर्मत्वञ्च तद्वत्वञ्च सर्वेषु गुणेषु कर्मसु च सत्त्वाल्लक्षणसमन्वयः । तथा च ज्ञानादीना-मसमवायिकारणत्वाभावेऽपि गुणत्वजातिमत्त्वस्य तत्रापि सत्त्वाल्लक्षणसमन्वयः ।इदानीं नित्यद्रव्यभिन्नानां सर्वेषां पदार्थानां साधर्म्यं वक्ति विश्वनाथः -

**मूलम्-** **अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते ।**

**अन्यत्रेति । नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः । आश्रितत्वं तु समवायादिसम्बन्धेन वृत्तिमत्त्वम्, विशेषणतया नित्यानामपि कालादौ वृत्तेः ।**

**व्याख्या-** नित्यद्रव्यातिरिक्ताः सर्वेऽपि पदार्थाः कुत्रचित् कालिकातिरिक्तयत्किञ्चित् सम्बन्धेनाप्याश्रिता भवन्ति । कालिकेन तु सम्बन्धेन नित्यद्रव्याण्यपि कालादौ वर्तन्त एवेत्यत्राश्रितत्वं कालिकातिरिक्तसम्बन्धेन बोध्यम् । तथा च नित्यद्रव्याणि = परमाण्वाकाशकालदिगात्ममनांसि विहाय सप्तसु पदार्थेषु कालिकातिरिक्तयत्किञ्चित्सम्बन्धेन वर्तमानत्वं साधर्म्यमिति । परमाण्वाकाशादीनि तु नित्यद्रव्याणि कालिकातिरिक्तवृत्तिनियामकसमवायादिसम्बन्धेन न कुत्रापि तिष्ठन्तीति न तत्र लक्षणातिव्याप्तिः । वस्तुतः परमाणूनामपि वृत्तिनियामकसंयोगेन पृथिव्यादिषु वर्तमानत्वसम्भवादाश्रितत्वमत्र समवायस्वरूपान्यतरसम्बन्धेनैव बोध्यम् । स्वरूपमपि सम्बन्धो दैशिककालिकविशेषणताभिन्नो भावाभावसाधारणो बोध्यः । तेन नित्यद्रव्याणां दैशिकविशेषणतया दिशि, कालिकविशेषणतया काले च वर्तमानत्वेऽपि नातिव्याप्तिः । समवायत्वाभावत्वादीनामुपाधीनामपि स्वरूपसम्बन्धेन वर्तमानत्वाच्च तत्र लक्षणसमन्वयः । इदानीं पुनः द्रव्याणामेव साधर्म्यं वक्ति विश्वनाथः

**मूलम्-** **क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ॥२४॥**

**इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते- क्षित्यादीनामिति स्पष्टम् ॥२४॥**

**व्याख्या-** पृथिवीजलतेजोवाय्वाकाशकालदिगात्ममनःसु नवसु द्रव्येषु द्रव्यत्वं साधर्म्यमित्युक्तप्रायम् । एवमेव गुणयोगित्वमपि साधर्म्यं नवानां द्रव्याणाम् । यद्यप्युत्पत्तिकालीनद्रव्येऽव्याप्तिः सम्भवति तथापि गुणवद्वृत्तिसत्ताभिन्नजातिमत्त्वमिति तस्यार्थः करणीयः । तथा च गुणवद्वृत्तिसत्ताभिन्नजातिमत्त्वं नवानां द्रव्याणां साधर्म्यमिति । सा च जातिः द्रव्यत्वं तच्च सर्वत्र द्रव्येष्विति लक्षणसमन्वयः ।

सम्प्रति नवानां द्रव्याणां साधर्म्यमुक्त्वा पृथिवीजलतेजोवायुमनसां पञ्चानां द्रव्याणां पञ्चसाधर्म्याणि प्रतिपादयति ग्रन्थकारः -

**मूलम्-** **क्षितिर्जलं तथा तेजः पवनो मन एव च ।**

**परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥२५॥**

**क्षितिरिति । पृथिव्यप्तेजोवायुमनसां परत्ववत्त्वम्, अपरत्ववत्त्वम्, मूर्तवत्त्वम्, वेगवत्त्वम्, कर्मत्ववत्त्वं च साधर्म्यम् । न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नम्, तत्राव्याप्तिरिति वाच्यम् । परत्वादिसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वाद् । मूर्तत्वमपकृष्टपरिमाणवत्त्वम्, तच्चैषामेव, गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावाद् । पूर्ववत् कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वार्थकम्, वेगवत्त्वञ्च वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वार्थकं बोध्यम् ॥२५॥**

**व्याख्या-** पृथिवीजलतेजोवायुमनसां परत्ववत्त्वमपरत्ववत्त्वञ्च समवायेन वर्तेतेऽतस्ते पृथिवीजलतेजोवायुमनसां साधर्म्ये । परत्वापरत्वे चात्र दिक्कृते बोध्ये, कालिकपरत्वापरत्वयोः पृथिवीजलतेजोवायूनां परमाणुषु, मनसि चावर्तमात्वाद् । परत्वापरत्वयोर्गुणत्वेन यत्र प्रथमक्षणे घटादिषु जन्येषु पृथिवीजल-

तेजोवायुषु त उत्पन्न एव न, तत्राव्याप्तिवारणाय परत्वसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वम्, अपरत्वसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वञ्च तयोरर्थौ करणीयौ । एवमेव तेषां पञ्चानां मूर्तत्ववत्त्वमपि साधर्म्यं बोध्यम् । अत्र मूर्तत्वन्नामापकृष्टपरिमाणवत्त्वं ग्राह्यम्, न तु क्रियावत्त्वं तस्य स्वतन्त्रविशेषणस्य सत्त्वाद् । तच्चापकृष्टपरिमाणवत्त्वरूपं मूर्तत्वं तेष्वेव पृथिवीजलतेजोवायुमनःस्वस्तीति लक्षणसमन्वयः । गगनादिपरिमाणस्य कुतोऽप्यकृष्टत्वाभावात् । अत्राप्युत्पत्तिकालीने घटादावतिव्याप्तिवारणायापकृष्टपरिमाणसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं लक्षणं करणीयम् । साक्षात्पदं पृथिवीत्वादिद्रव्यविभाजकजात्युपादानाय । तेन घटत्वादिजातिमादाय न पटादावव्याप्तिः । कर्मवत्त्वमपि तेषामेव पञ्चानां साधर्म्यम् । कर्मवत्त्वञ्च कर्मसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तच्च तेष्वेव । वेगवत्त्वमपि वेगवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तदपि तेष्वेव पञ्चस्विति । अत्र सर्वत्रोत्पत्तिकालीनघटादावव्याप्तिदोषवारणाय जातिघटितं लक्षणं कार्यमिति ।

इदानीमाकाशादिचतुर्णां विभूनां साधर्म्यं गदति विश्वनाथः -

**मूलम्-** **कालखात्मदिशां सर्वगतत्वं परमं महत् ।**

**कालेति । कालाकाशात्मदिशां सर्वगतत्वम् । सर्वगतत्वम् = सर्वमूर्तद्रव्यसंयोगित्वम्, परममहत्त्वं च । परममहत्त्वत्वं जातिविशेषः, अपकर्षानाश्रयपरिमाणवत्त्वं वा ।**

**व्याख्या-** आकाशकालदिगात्मानश्चत्वारो विभवस्तेषां चतुर्णां विभूनां सर्वगतत्वम्, परममहत्परिमाणवत्त्वञ्च साधर्म्यम् । अत्र सर्वगतत्वं नाम सर्वमूर्तद्रव्यसंयोगित्वम्, तदेव च विभुत्वम्, तच्चाकाशकालदिगात्मसु चतुर्षु वर्तते, तेषां परिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्तेषु परममहत्परिमाणवत्त्वमपि साधर्म्यं बोध्यम् । सर्वमूर्तद्रव्यसंयोगित्वमित्यत्र संयोगस्यानित्यत्वात् सर्गादौ तदभावात् तेष्वव्याप्तिवारणाय जातिघटितं लक्षणं कार्यम् । तेषु नित्यसंयोगस्वीकारे तु यथोक्तमेव सम्यक् ।

आकाशादीनां चतुर्णां साधर्म्यं प्रतिपाद्येदानीं पृथिव्यादीनां पञ्चानां साधर्म्यं निरूपयति ग्रन्थकारः -

**मूलम्-** **क्षित्यादि पञ्च भूतानि ............ ।**

क्षित्यादीति । पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वम् । तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् । अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यम् । तेन ज्ञातो घट इत्यादिप्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वात्तद्वत्यात्मनि नातिव्याप्तिः । न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः, तस्यापि स्वरूपयोग्यत्वाद् । महत्त्वलक्षणकारणान्तरासन्निधानाच्च न प्रत्यक्षम् । अथवात्मावृत्तिविशेषगुणवत्त्वं तत्त्वम् ।

**व्याख्या-** पृथिवीजलतेजोवाय्वाकाशानां पञ्चानां भूतत्वं साधर्म्यम्, पृथिवीजलतेजोवाय्वाकाशाः

पञ्चभूतास्तेषां भूतत्वं साधर्म्यमित्यर्थः । तत्र किं नाम भूतत्वमित्याकाङ्क्षायामाह तच्चेति । अर्थात् बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं भूतत्वमिति । बहिरिन्द्रियैः चक्षुरसनाघ्राणत्वक्श्रोत्रैर्ग्राह्याः = प्रत्यक्षीकृता ये विशेषगुणाः रूपरसगन्धस्पर्शशब्दादयः, तद्वन्तः पृथिवीजलतेजोवाय्वाकाशा भूतास्तत्र वर्तमानाः शब्दादयो गुणा एव भूतत्वम् । अत्र लक्षणे ग्राह्यत्वन्नाम नेन्द्रियजन्यप्रत्यक्षविषयत्वमात्रम्, तथा सति बहिरिन्द्रियैः परम्परया जन्यं प्रत्यक्षं "मया घटो ज्ञातः" इत्यपि मानसं प्रत्यक्षं भवितुं शक्नोति, यतो हि चक्षुषायं घट इति प्रत्यक्षानन्तरमेव मनसा ज्ञातोऽयं घट इति साक्षात्क्रियतेऽत इदं ज्ञातोऽयं घट इति ज्ञानं परम्परया चक्षुर्जन्यमिति वक्तुं शक्यतेऽतो बहिरिन्द्रियजन्यप्रत्यक्षं ज्ञातोऽयं घट इति प्रत्यक्षं तद्विषयो विशेषगुणो ज्ञानरूपविशेषगुणः, तद्वत्त्वस्यात्मनि सत्त्वाद् भूतलक्षणस्यात्मन्यतिव्याप्तिः स्यात् । एवमेव यदि ग्राह्यत्वमिन्द्रियजन्यप्रत्यक्षविषयत्वमात्रं तदा पार्थिवादिपरमाणुरूपादेरिन्द्रियाग्राह्यतया, बहिरिन्द्रियग्राह्यविशेषगुणपदेन परमाणुरूपादेर्ग्रहणासम्भवात् परमाण्वादावव्याप्तिः स्यादतोऽत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वमित्यर्थः । तथा सति नात्मन्यतिव्याप्तिर्नवा परमाण्वादावव्याप्तिश्च, यतो हि ज्ञातोऽयं घटः इति प्रत्यक्षस्य चक्षुर्जन्यत्वेऽपि तत्प्रत्यक्षं न लौकिकमपि तु ज्ञानलक्षणसन्निकर्षरूपालौकिकसन्निकर्षजन्यमलौकिकं प्रत्यक्षं तदिति बहिरिन्द्रियजन्यलौकिकप्रत्यक्षमिदं रूपमयं रस इत्यादिकमेव न तु ज्ञातोऽयं घट इति ज्ञानम् । तथा च बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयविशेषगुणा रूपरसगन्धस्पर्शशब्दादयो विशेषगुणास्तद्वत्त्वस्य पृथिव्यादिषु पञ्चसु सत्त्वाल्लक्षणसमन्वयः । परमाणुरूपस्य बहिरिन्द्रियाग्राह्यत्वेऽपि बहिरिन्द्रियजन्यलौकिकप्रत्यक्षस्वरूपयोग्यत्वं तत्राप्यस्त्येव महत्त्वरूपप्रत्यक्षकारणीभूतगुणस्यासत्त्वान्न परमाणोः प्रत्यक्षम् । यथारण्यस्थेन दण्डेन कारणान्तरासन्निधानाद् घटाजननेऽपि तत्र दण्डे घटजननस्वरूपयोग्यत्वमस्त्येव, तथैव परमाणुरूपेऽपि लौकिकप्रत्यक्षस्वरूपयोग्यत्वमस्त्येवेति तत्रापि बहिरिन्द्रियजन्यलौकिकप्रत्यक्षस्वरूपयोग्यविशेषगुणवत्त्वरूपस्य भूतलक्षणस्य सत्त्वात् सोऽपि परमाणुर्भूतपदवाच्यो भवति । प्रसङ्गवसादत्रेदमपि ज्ञेयं यद् गुणाश्चतुर्विंशतिसङ्ख्यकास्तेषु षोडशगुणा विशेषगुणपदवाच्याः शेषा दशसङ्ख्यकास्तु सामान्या गुणा इति । ते च विशेषगुणा यथा-

बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ।
अदृष्टभावनाः शब्दा अमी वैशेषिका गुणाः ॥

अथवा

रूपं गन्धो रसस्पर्शौ स्नेहः सांसिद्धिको द्रवः ।
बुद्ध्यादिभावनान्ताश्च शब्दो वैशिषिका गुणाः ॥ इति

सामान्यगुणाश्च-

सङ्ख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ।

गुरुत्ववेगौ सामान्या गुणा एते प्रकीर्तिताः ॥ इति

सम्प्रति भूतानां साधर्म्यमुक्त्वा पृथिवीजलतेजोवायूनां चतुर्णां साधर्म्यमाह विश्वनाथः-

**मूलम्- .......................चत्वारि स्पर्शवन्ति हि ॥२६ ॥**

**द्रव्यारम्भश्चतुर्षु स्यात् ...................... ।**

**पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् ।। २६ ॥ द्रव्यारम्भ इति । पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वं साधर्म्यम् । न च द्रव्यानारम्भके घटादावव्याप्तिः । द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।**

**व्याख्या-** पृथिवीजलतेजोवायूनां चतुर्णां साधर्म्यं स्पर्शवत्त्वम्, द्रव्यारम्भकत्वञ्च ।तत्र पृथिवीजलतेजोवायुषु स्पर्शास्तिष्ठन्ति । तेषु जले शीतस्पर्शस्तेजस्युष्णस्पर्शः, पृथिवीवाय्वोरनुष्णाशीतस्पर्शस्तिष्ठतीति विवेकः । उत्पत्तिकालीनघटादावव्याप्तिवारणायात्रापि जातिघटितं लक्षणं कार्यम् । स्पर्शसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमिति । एवमेव पृथिवीजलतेजोवायुषु द्रव्यारम्भकत्वम् = द्रव्यसमवायिकारणत्वं तच्च तेष्वेव चतुर्षु । यतोहि द्रव्यस्य समवायिकारणानि स्वावयवा एव, आकाशादीनामवयवाभावात्ते न द्रव्यसमवायिकारणानि तस्माद् द्रव्यसमवायिकारणत्वरूपं द्रव्यारम्भकत्वं चतुष्वेव पृथिवीजलतेजोवायुष्विति तत्र लक्षणसमन्वयः । द्रव्यानारम्भके घटादावव्याप्तिवारणाय द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य जातिघटितलक्षणस्य स्वीकारान्नाव्याप्तिः ।

सम्प्रत्याकाशशरीरिणामर्थादाकाशात्मनोः साधर्म्यं प्रतिपादयति विश्वनाथः -

**मूलम्- ....................अथाकाशशरीरिणाम् ।**

**अव्याप्यवृत्तिक्षणिको विशेषगुण इष्यते ॥ २७ ॥**

**अथाकाशेति । आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं साधर्म्यमित्यर्थः । आकाशस्य विशेषगुणः शब्दः, स चाव्याप्यवृत्तिः, यदा किञ्चिदवच्छेदेन शब्द उत्पद्यते, तदान्यावच्छेदेन तदभावस्यापि सत्त्वाद् । क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् । योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिविशेषगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः । एवं ज्ञानादीनामपि । ज्ञानादिकं यदात्मनि विभौ शरीरावच्छेदेनोत्पद्यते, तदा घटाद्यवच्छेदेन तदभावोऽस्त्येव । एवं ज्ञानादिकमपि क्षणद्वयावस्थायि । इत्थं चाव्याप्यवृत्तिविशेषगुणवत्त्वम्, क्षणिकविशेषगुणवत्त्वं चार्थः । पृथिव्यादौरूपादिर्विशेषगुणोऽस्तीत्यतोऽव्याप्यवृत्तीत्युक्तम् ।पृथिव्यादावव्याप्यवृत्तिः संयोगादिरस्तीतिविशेषगुणेत्युक्तम्। न च रूपादीनामपि कदाचित् तृतीयक्षणे नाशसम्भवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यम् । चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वाद् । अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति, रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तत इति तद्व्युदासः ।ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वाद्**

**ज्ञानत्वस्य तद्वृत्तित्वाज्जन्येत्युक्तम् । यद्याकाशजीवात्मनोः साधर्म्यम्, तदा जन्येति न देयम्, द्वेषत्वमादाय लक्षणसमन्वयाद् । परममहत्त्वस्य तादृशगुणत्वात्, चतुर्थक्षणे द्वित्वादीनां नाशाभ्युपगमाद् द्वित्वादीनामपि तथात्वात् तद्वारणाय विशेषेति । त्रिक्षणवृत्तित्वं वा वक्तव्यम् । द्वेषत्वादिकमादायात्मनि लक्षणसमन्वयः ॥२७॥**

**व्याख्या-** आकाशात्मनां साधर्म्यन्तावदव्याप्यवृत्तिविशेषगुणवत्त्वम्, क्षणिकविशेषगुणवत्त्वञ्च । तत्राव्याप्यवृत्तित्वन्नाम स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वम्, यथा संयोगोऽव्याप्यवृत्तिरिति तत्र स्वम् = संयोगः, स्वाधिकरणम् = द्रव्यं तत्र वृत्त्यत्यन्ताभावो देशभेदेन कालभेदेन वा संयोगाभाव एव, तत्प्रतियोगित्वस्य संयोगे सत्त्वात् संयोगोऽव्याप्यवृत्तिरिति । एवमेवाकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः यतो हि यदा विभावाकाशे प्रकोष्ठावच्छेदेन शब्द उत्पद्यते तदैवाकाशे बहिर्देशावच्छेदेन शब्दाभावोऽपि वर्ततेऽतः स्वाधिकरणवृत्त्यत्यन्ताभावः शब्दाभावः तत्प्रतियोगित्वस्य शब्दे सत्त्वात् शब्दोऽप्यव्याप्यवृत्तिः । तथा चाकाशेऽव्याप्यवृत्तिविशेषगुणवत्त्वमायातम् । एवमेवात्मनो विशेषगुणा ज्ञानादयस्ते सर्वेऽप्यव्याप्यवृत्तयः, यतो हि यदा विभावात्मनि शरीरावच्छेदेन ज्ञानादिकमुत्पद्यते तदैव तस्मिन्नेवात्मनि बहिर्घटाद्यवच्छेदेन ज्ञानाद्यभावोऽपि वर्तत एव तस्मादात्मनो विशेषगुणा ज्ञानादयोऽव्याप्य-वृत्तय इत्यात्मन्यप्यव्याप्यवृत्तिविशेषगुणवत्त्वमागतम् । तथा चाकाशात्मनामव्याप्यवृत्तिविशेषगुणवत्त्वं साधर्म्यं सिद्धम् । एवमेवाकाशात्मनां क्षणिकविशेषगुणवत्त्वमपि साधर्म्यं बोध्यम् । यतो ह्याकाशस्य विशेषगुणः शब्दः स च क्षणिकः । तत्र क्षणिकत्वन्नाम तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम् । आकाशस्य विशेषगुणः शब्दः स च प्रथमे क्षणे कण्ठताल्वाद्यभिघातसंयोगेन जिह्वाग्रवर्त्त्याकाश उत्पद्यते ततो द्वितीयक्षणे वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन स्वोत्तरदेशे शब्दान्तरमारभते ततो योग्यविभुविशेषगुणानां स्वोत्तरवर्तिविशेषगुणनाश्यत्वनियमात् प्रथमशब्दादुत्पन्नद्वितीयशब्दः प्रथमं शब्दं तृतीयक्षणे नाशयतीति तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वरूपं क्षणिकत्वं शब्द आयातमिति क्षणिकविशेषगुणवत्त्वमाकाशे सिद्धम् । एवमेवात्मनो विशेषगुणा ज्ञानादयोऽपि प्रथमक्षण आत्मन्युत्पद्यन्ते द्वितीयक्षणे स्वसंस्कारमुत्पादयन्ति ततः तृतीयक्षणे नश्यन्तीति क्षणिकविशेषगुणवत्त्वमाकाशमत्मनोः साधर्म्यमिति । अत्र प्रथमे साधर्म्ये यदि विशेषपदं न दीयते तदाव्याप्यवृत्तिगुणवत्त्वमात्रं स्याल्लक्षणं तथा सति पृथिव्यामतिव्याप्तिः स्यात्, संयोगस्याव्याप्यवृत्तिगुणस्य पृथिव्यां सत्त्वादतोक्तं विशेषेति । तथा च संयोगस्य सामान्यगुणत्वेनाव्याप्यवृत्तिविशेषगुणवत्त्वं न पृथिव्यामतिव्याप्तमिति । विशेषगुणवत्त्वमात्रोक्तौ पुनः रूपादिगुणमादाय पृथिव्यामतिव्याप्तिरिति अव्याप्यवृत्तिरिति पदं देयम् । तथा च निर्दुष्टं साधर्म्यमिदमव्याप्यवृत्तिविशेषगुणवत्त्वमिति । द्वितीयसाधर्म्यघटकीभूतक्षणिकत्वं विचारयति- न च रूपादीनामपीत्यादिना । अयमाशयः- यद्रूपं स्वोत्पत्तितृतीयक्षणे कदाचिन्नष्टं तद्रूपमादाय क्षणिकविशेषगुणवत्त्वस्य पृथिव्यां सत्त्वादतिव्याप्तिरिति चेत्तत्रातिव्याप्तिवारणाय

चतुःक्षणावृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वमाकाशात्मनां साधर्म्यमिति वक्तव्यं तथा सति न पृथिव्यामतिव्याप्तिर्यतो हि चतुःक्षणवृत्तिजन्यावृत्तिजातिः न रूपत्वं जातिः रूपत्वस्य बहुक्षणवृत्तिरूपादावपि सत्त्वात् तादृशी च जातिः शब्दत्वज्ञानत्वाद्यो जातय एव । शब्दत्वं न कस्मिन्नपि चतुःक्षणवृत्तिनि जन्ये वर्तते, यतो हि कोऽपि शब्दः चतुःक्षणपर्यन्तं तिष्ठत्येव नहि, तृतीय एव क्षणे तस्य नाशात्, अतः चतुःक्षणवृत्तिजन्यावृत्तिजातिः शब्दत्वं जातिः तादृशजातिमद्विशेषगुणवत्त्वस्याकाशे सत्त्वादाकाशे लक्षणसमन्वयः ।

एवमेव ज्ञानत्वमपि चतुःक्षणवृत्तिजन्यावृत्तिजातिरस्ति, यतः किमपि ज्ञानं चतुःक्षणपर्यन्तं न तिष्ठति तृतीये क्षण एव तस्य नाशाद् । अपेक्षाबुद्धेरपि चतुर्थक्षणे नाशस्वीकाराच्चतुःक्षणवृत्तिजन्यं न किमपि ज्ञानादिकं किन्तु रूपादिकमेव तत्र रूपादाववर्तमाना जातिर्ज्ञानत्वं जातिस्तादृशजातिमद्विशेषगुणवत्त्वस्यात्मनि सत्त्वादात्मनि लक्षणसमन्वयः । तादृशजातिं शब्दत्वमादाय तद्वत्त्वस्याकाशे सत्त्वादाकाशे लक्षणसमन्वयः । रूपत्वन्तु जातिः क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तत इति न तदादाय पृथिव्यामतिव्याप्तिः । ननु तर्ह्यत्र जन्यपदं न देयमिति चेन्न जन्यपदानुक्तौ चतुःक्षणवृत्तिपदेनेश्वरज्ञानमादाय तत्रावृत्तिजातिपदेन ज्ञानत्वस्य ग्रहणसम्भवादीश्वरेऽव्याप्तिः स्यादतो जन्येत्युक्तम्, तथा सति चतुःक्षणवृत्तिजन्यं नेश्वरज्ञानं तस्य नित्यत्वादिति चतुःक्षणवृत्तिजन्यं रूपादिकमेव, तदवृत्तिजातिः शब्दत्वज्ञानत्वाद्यो जातयस्तद्वद्विशेषगुणाः शब्दज्ञानादयस्तद्वत्त्वस्याकाशात्मसु सत्त्वाल्लक्ष्ये लक्षणसमन्वयः । यदि चेदं साधर्म्यमाकाशजीवात्मनामेव न त्वीश्वरस्य, मूल आकाशशरीरिणामित्युक्तत्वा-दिति चेत्तदा जन्येति पदं न देयम्, चतुःक्षणवृत्त्यवृत्तिजातिमद्विशेषगुणवत्त्वस्य साधर्म्यसम्भवात् । द्वेषत्वमा-दाय लक्षणसमन्वयात् । ज्ञानत्वन्तु न तादृशी जातिरतस्तादृशद्वेषत्वजातिमद्द्वेषादेरीश्वरेऽभावान्नेश्वरे लक्षणसमन्वयः । अत्र द्वितीयसाधर्म्ये विशेषपदानुक्तौ चतुःक्षणवृत्तिजन्यावृत्तिजातिपदेन परममहत्त्वत्वं द्वित्वत्वं वा ग्रहीतुं शक्यं यतो हि परममहत्त्वत्वं जातिः चतुःक्षणवृत्तिजन्यावृत्तिजातिरस्ति, परममहत्त्वस्य गुणस्य नित्यत्वात्तन्मात्रवृत्तिमहत्त्वत्वं चतुःक्षणवृत्तिजन्यावृत्तिजातिरिति एवमेव द्वित्वत्वमपि तादृशी जातिर्वर्तते द्वित्वत्वस्य त्रिक्षणमात्रवृत्तिद्वित्वगुणवृत्तित्वाच्चतुःक्षणवृत्तिजन्यावृतिजातिस्तत्परममहत्त्वत्वं द्वित्वत्वञ्चेति तदादाय तादृशजातिमद्गुणवत्त्वस्य कालादौ, घटादौ चातिव्याप्तिः स्यादतो विशेषपदं देयम् । तथा सति परममहत्त्वस्य द्वित्वस्य च सामान्यगुणत्वेन न तदादायातिव्याप्तिरिति । अथवा त्रिक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वमेव लक्षणं कार्यम्, जीवात्मनि द्वेषत्वमादाय लक्षणसमन्वयः कार्यः, द्वेषमात्रस्य त्रिक्षणवृत्तित्वाभावात् । एवञ्च जन्यपदमपि न देयमेव तथा चाकाशजीवात्मनोः साधर्म्यं त्रिक्षणवृत्तिजातिमद्विशेषगुणवत्त्वमिति ।

इदानीं पृथिवीजलतेजसां त्रयाणां द्रव्याणां साधर्म्यं प्रतिपादयति ग्रन्थकारः -

**मूलम्-** रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रयः ।

**रूपद्रवत्वेति । पृथिव्यप्तेजसां रूपवत्त्वम्, द्रवत्ववत्त्वम्, प्रत्यक्षविषयत्वञ्च साधर्म्यमित्यर्थः । न च चक्षुरादीनां भर्जनकपालस्थवह्नेरूष्मणश्च रूपवत्त्वे किं मानमिति वाच्यम् । तत्रापि तेजस्त्वेन रूपानुमानाद् । एवं वाय्वानीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम् । न च घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तमिति वाच्यम् । द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । घृतजतुप्रभृतिषु पृथिवीषु जलेषु द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वात्तत्र च पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणसमन्वयः । न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तम्, अतिव्याप्तञ्च रूपादाविति वाच्यम् । चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वाद् । आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति ।**

**व्याख्या-** पृथिवीजलतेजसां रूपवत्त्वम्, द्रवत्ववत्त्वम्, प्रत्यक्षविषयत्वञ्च साधर्म्यम् । तत्र रूपं पृथ्वीजलतेजःसु वर्तते ऽतस्तेषां त्रयाणां रूपवत्त्वं साधर्म्यम् । न च चक्षुरादीनां भर्जनकपालस्थवह्नेरुष्मणश्च रूपवत्त्वे किं मानमिति चेच्चक्षुःरूपवत् तेजस्त्वाद् दीपवद् । एवमादिपदेन रसनाघ्राणयोर्ग्रहणम् तथा च रसना रूपवती जलत्वाद् हिमवद् । एवं घ्राणं रूपवत् पृथिवीत्वात् पुष्पवदित्यनुमानेन चक्षुरादौ रूपवत्त्वसिद्धिः । भर्जनकपालस्थवह्निः रूपवान् तेजस्त्वाज्ज्वालावदित्यनुमानेन भर्जनकपालस्थवह्नौ रूपवत्त्वसिद्धेः, उष्मा रूपवान् तेजस्त्वाद् वह्निवदित्यनुमानेन चोष्माणि रूपवत्त्वसिद्धेर्न काप्यनुपपत्तिः। एवमेव वाय्वानीतपृथिवीजलतेजोभागेष्वपि पृथिवीत्वादिना रूपानुमानं कार्यम् । यत्र पृथिव्यादौ रूपमुत्पन्नमेव नहि तत्राव्याप्तिवारणाय रूपसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वमिति लक्षणकरणेन तत्र तत्र लक्षणं सङ्गमनीयम् । तथा च पृथिवीजलतेजसां रूपवत्त्वं साधर्म्यम् ।

द्रवत्ववत्त्वमपि पृथिवीजलतेजसां साधर्म्यम् । घृतादौ पृथिव्याम्, द्रुतसुवर्णादौ तेजसि, जले च द्रवत्ववत्त्वस्य सत्त्वात्तत्र लक्षणं सङ्गच्छते । द्रवत्वमपि पृथिवीतेजसोर्नैमित्तिकं जले च सांसिद्धिकं ग्राह्यम् । न च घटादौ पृथिव्यां द्रुतसुवर्णादिभिन्ने तेजसि द्रवत्ववत्त्वमव्याप्तमिति चेत् तत्र लक्षणसमन्वयार्थं जातिघटितं लक्षणं कार्यं तथा च द्रवत्वसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं पृथिवीजलतेजसां साधर्म्यमिति ।

एवमेव प्रत्यक्षविषयत्वमपि पृथिवीजलतेजसां साधर्म्यम् । वैशेषिकमते वायोरप्रत्यक्षत्वेन पृथिवीजल-तेजांस्येव द्रव्याणि बहिरिन्द्रियजन्यप्रत्यक्षविषयाणीत्यर्थः । न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तं रूपादावतिव्याप्तञ्चेति चेन्न, प्रत्यक्षविषयत्वमित्यस्य चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्य-जातिमत्त्वमित्यर्थः, तादृशी च जातिः पृथिवीत्वम्, जलत्वम्, तेजस्त्वञ्चेति तद्वत्त्वस्य सर्वेषु पृथिवीजलतेजःसु सत्त्वाद्रूपादावसत्त्वाच्च नाव्याप्त्यतिव्याप्ती दोषौ । आत्मन्यतिव्याप्तिवारणायात्र लक्षणे चाक्षुषेति पदम् । तथा च सिद्धं चाक्षुषलौकिकप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं पृथिवीजलतेजसां

साधर्म्यमिति ।

सम्प्रति पृथिवीजलयोर्द्वयोः साधर्म्यं वक्ति विश्वनाथः -

**मूलम्- गुरुणी द्वे रसवती.......................... ।**

**गुरुणी इति । गुरुत्ववत्त्वं रसवत्त्वं च पृथिवीजलयोरित्यर्थः । न च घ्राणेन्द्रियादीनां वाय्वानीतपृथिव्यादिभागानाञ्च रसादिमत्त्वे किं मानमिति वाच्यम् । तत्रापि पृथिवीत्वादिना तदनुमानात् ।**

**व्याख्या-** अत्र कारिकायां द्वे इति पदस्य देहलीदीपन्यायेनोभयत्रान्वयः । तथा च द्वे गुरुणी द्वे रसवतीत्यर्थः । अर्थात् पृथिवीजलयोर्द्वयोः गुरुत्ववत्त्वम् । सर्वत्र पृथिवीजलयोः साधर्म्यम्, रसवत्त्वञ्च सार्धर्म्यमिति । तत्राद्यपतनसमवायिकारणं गुरुत्वं तच्च पृथिवीजलयोरिति तयोर्लक्षणसमन्वयः । रसवत्त्वमपि तयोर्द्वयोरेवेति । न च घ्राणरसनेन्द्रिययोः रसवत्त्वे किं मानमिति चेदनुमानमेव तत्र प्रमाणमिति । तथा च घ्राणेन्द्रियं रसवत् पृथिवीत्वाद् रसगोलकवदित्यनुमानेन घ्राणेन्द्रिये रसवत्त्वमनुमेयम्, एवमेव रसनेन्द्रियं रसवज्जलत्वादित्यनुमानेन रसवत्त्वं कल्पनीयं रसनेन्द्रिये । एवमेव वाय्वानीतपरमाणुभागे पृथिव्याम्, जले च पृथिवीत्वजलत्वाभ्यां रसवत्त्वमनुमेयम् ।

इदानीं पृथिवीतेजसोः साधर्म्यमाह विश्वनाथः -

**मूलम्- ...................द्वयोर्नैमित्तिको द्रवः ॥२८॥**

**द्वयोरिति । पृथिवी तेजसोरित्यर्थः । न च नैमित्तिकं द्रवत्वं घटादौ, वह्न्यादौ चाव्याप्तमिति वाच्यम् । नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥२८॥**

**व्याख्या-** पृथिवीतेजसोर्नैमित्तिकद्रवत्ववत्त्वं साधर्म्यमिति, पृथिव्यां घृतादौ, तेजसि च द्रुतसुवर्णादौ तत्सत्त्वाल्लक्षणसमन्वयः । सर्वत्र पृथिवीजलयोर्लक्षणसमन्वयार्थं नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वान्न कोऽपि दोष इति । अन्ते पृथिवीजलतेजोवाय्वाकाशात्मनां षण्णां साधर्म्यमाह-

**मूलम्- आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ।**

**आत्मान इति । पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वं साधर्म्यमित्यर्थः ।**

**व्याख्या-** आत्मनि ज्ञानादयो विशेषगुणाः सन्ति । भूतवर्गेषु पृथिवीजलतेजोवाय्वाकाशेषु पञ्चसु गन्धरसरूपस्पर्शशब्दादयो विशेषगुणाः सन्तीति आत्मनि भूतवर्गेषु च विशेषगुणवत्त्वं साधर्म्यमित्यर्थः । कालदिङ्मनःसु विशेषगुणा न तिष्ठन्तीत्यर्थः ।

सर्वेषां पदार्थानां सामान्यतो विशेषतश्च साधर्म्यमुक्त्वेदानीं पदार्थानां वैधर्म्यमाह विश्वनाथः-

**मूलम्- यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥२९॥**

**ज्ञेयत्वादिकं विहायेति बोध्यम् । तत्तु न कस्यापि वैधर्म्यं केवलान्वयित्वाद् ॥२९॥**

**व्याख्या-** इदानीं यावद्ज्ञेयत्वादिकं विहाय यद्यद् यस्य यस्य साधर्म्यमुक्तं तत्तत् तदितराणां वैधर्म्यम् = विरुद्धो धर्म इत्यर्थः । ज्ञेयत्वादिकन्तु न कस्यापि वैधर्म्यं तेषां केवलान्वयित्वाद् । ज्ञेयत्वादिभिन्नास्तु साधर्म्यधर्माः, सधर्मेतराणां वैधर्म्यमित्यर्थः, यथा पञ्चानां पदार्थानां साधर्म्यमनेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वम्, एतच्च समवायाभावयोर्वैधर्म्यम् । यथा वा सत्तावत्त्वं द्रव्यादीनां त्रयाणां साधर्म्यं तच्च चतुर्णां सामान्यादीनां वैधर्म्यमित्यादिकम् । एवमेव यद्यद्यस्य यस्य साधर्म्यमुक्तं तत्तत् तदितराणां वैधर्म्यं बोध्यम् ।

इदानीं कस्मिन् द्रव्ये कति गुणाः ? के के च गुणाः कस्मिन् कस्मिन् द्रव्ये तिष्ठन्तीति ? व्याख्याति ग्रन्थकारः -

**मूलम्-** **स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः ।**
**स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥३०॥**
**स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकम् ।**
**रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥३१॥**
**स्नेहहीना गन्धयुता क्षितावेते चतुर्दश ।**
**बुद्ध्यादिषट्कं सङ्ख्यादिपञ्चकं भावना तथा ॥३२॥**
**धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ।**
**सङ्ख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥३३॥**
**सङ्ख्यादिपञ्चकं बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।**
**परापरत्वे सङ्ख्याद्याः पञ्च वेगश्च मानसे ॥३४॥**
**ते च पञ्च सङ्ख्यादयः । खे आकाशे ॥३०-३४॥**

**व्याख्या-** गुणाः द्रव्येष्वेव तिष्ठन्ति नान्यत्र, ते च गुणाः चतुर्विंशतिसङ्ख्यकाः पूर्वोक्ता एव । तेषु चतुर्विंशतिगुणेषु मध्ये पृथिव्यादिषु द्रव्येषु प्रत्येकेषु कति गुणास्तिष्ठन्तीति विषये केनचिदुक्तम्-

वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश ।
दिक्कालयोः पञ्च षडेव चाम्बरे महश्वरेऽष्टौ मनसस्तथैव च ॥

अर्थान्नवद्रव्येषु मध्ये वायौ नवसङ्ख्यका गुणास्तिष्ठन्ति ते च स्पर्शादयोऽष्टौ = स्पर्श आदिर्येषान्तेऽष्टौ स्पर्शः, सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः परत्वम्, अपरत्वमित्यष्टावपरश्च वेगाख्यः संस्कार इति नवसङ्ख्याका गुणा वायौ तिष्ठन्ति । एकादशसङ्ख्यका गुणास्तेजसि सन्ति, ते च

पूर्ववदेव स्पर्शाद्यष्टौ अर्थात्, स्पर्शः, सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, एवञ्च रूपम्, वेगाख्यः संस्कारः, नैमित्तिकं द्रवत्वमित्येकादश गुणास्तेजसि वर्तन्ते । जले च चतुर्दश गुणाः सन्ति ते च स्पर्शादयोऽष्टावर्थात् स्पर्शः, सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वमेते एवञ्च वेगाख्यः संस्कारः, गुरुत्वम्, सांसिद्धिकम्, द्रवत्वम्, रूपम्, रसश्चैते चतुर्दश गुणा वारिणि = जले तिष्ठन्ति । एवमेव पृथिव्यामपि चतुर्दश गुणा एव तिष्ठन्ति । तत्र जलवृत्तिचतुर्दशसु गुणेषु स्नेहमपहाय तत्स्थाने गन्धं संयोज्यान्ये जलवृत्तित्रयोदश गुणाः पृथिव्यां वर्तन्ते । ते च स्पर्शः, सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, वेगाख्यः संस्कारः, गुरुत्वम्, नैमित्तिकं द्रवत्वम्, रूपम्, रसः, गन्धश्चेति चतुर्दशसङ्ख्यका गुणाः पृथिव्यां सन्ति । जीवात्मन्यपि चतुर्दश गुणाः सन्ति, ते च बुद्ध्यादिषट्कमर्थाद् बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नश्चेति षट्, सङ्ख्यादिपञ्चकमर्थात् सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागश्चेति पञ्चैवं भावनाख्यः संस्कारः, धर्माधर्मौ चेति चतुर्दश गुणा जीवात्मनि तिष्ठन्ति । काले दिशि च सङ्ख्यादिपञ्चकं सामान्यगुणा एव तिष्ठन्ति ते च सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागश्चेति । खे = आकाशे च सङ्ख्यादिपञ्चकं सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागश्चेति ततोऽपरः शब्द इति षड्गुणा आकाशे तिष्ठन्ति । ईश्वरेऽष्टौ गुणाः सन्ति ते च सङ्ख्यादिपञ्चसङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागश्चेति ततो बुद्धिः, इच्छा, यत्नश्चेत्यष्टौ गुणा ईश्वरे सन्ति । मनस्यप्यष्टौ गुणाः सन्ति, ते च सङ्ख्यादिपञ्चार्थात् सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागश्चेति ततः परत्वम्, अपरत्वम्, वेगाख्यः संस्कारश्चेत्यष्टौ गुणा मनसि सन्ति । इत्येवं रीत्या पृथिव्यादिषु नवसु द्रव्येषु यथायथं गुणास्तिष्ठन्ति ।

## पदानामर्थाः

विशिष्य = एकैकं कृत्वा

अपकृष्टम् = स्वल्पपरिमाणम्

आश्रितत्वम् = वर्तमानत्वम् (वृत्तिमत्त्वम्)

अव्याप्तवृत्तित्वम् = स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वम्

अपेक्षाबुद्धिः = अनेकेष्वेकत्वप्रकारिका बुद्धिः

भूतत्वम् = बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम्

मूर्तत्वम् = क्रियावत्त्वम् (अपकृष्टपरिमाणवत्त्वं वा)

विभुत्वम् = सर्वमूर्तद्रव्यसंयोगित्वम्

अभ्युपगमः = स्वीकारः

| | | |
|---|---|---|
| नैमित्तिकम् | = | निमित्तादुत्पन्नम् |
| द्रुतम् | = | द्रवः |
| भर्जनकपालम् | = | पाकभाण्डम् |
| भूतवर्गाः | = | पृथिवीजलतेजोवाय्वाकाशाः |
| मूर्तवर्गाः | = | पृथिवीजलतेजोवायुमनांसि |
| विभुवर्गाः | = | आकाशकालदिगात्मानः |
| स्वरूपयोग्यत्वम् | = | कारणतावच्छेदकधर्मवत्त्वम् |
| उपनीतभानम् | = | ज्ञानालक्षणसन्निकर्षजन्यं ज्ञानम् |
| वेगः | = | द्वितीयादिपतनासमवायिकारणम् |

## अभ्यासाः

**१. अतिसङ्क्षिप्तमुत्तरं देयम्**

(क) समवायिकारणत्वं कस्य साधर्म्यम् ?

(ख) परत्ववत्त्वं कस्य साधर्म्यम् ?

(ग) किं नाम भूतत्वम् ?

(घ) अव्याप्यवृत्तित्वमित्यस्य कोऽर्थः ?

(ङ) के गुरुणी ?

(च) द्रव्यत्वं कस्य वैधर्म्यम् ?

(छ) वायौ कति गुणाः सन्ति ?

(ज) मनसि कति गुणाः सन्ति ?

(झ) अपेक्षाबुद्धिः का ?

(ञ) सर्वगतत्वं कस्य साधर्म्यम् ?

**२. सङ्क्षिप्तमुत्तरं देयम्**

(क) असमवायिकारणत्वं गुणकर्मणोः साधर्म्यं भवति न वा ?

(ख) आश्रितत्वं केषां साधर्म्यम् ?

(ग) भूतानां साधर्म्यं प्रतिपादयत ।

(घ) पृथिव्यादिचतुर्णां साधर्म्यं प्रतिपादयत ।

(ङ) प्रत्यक्षविषयत्वं केषां साधर्म्यम् ?

(च) पृथिव्यां कति गुणाः सन्ति ? के च ते गुणाः ?

(छ) जीवात्मनि कति गुणाः ? के च ते ?

(ज) विशेषगुणाः कतिसङ्ख्यकाः के च ते ?

**३. विस्तृतं मौलिकञ्चोत्तरं देयम्**

(क) आकाशात्मनां साधर्म्यमुपपाद्य क्षणिकत्वं सोदाहरणं परिभाषयत ।

(ख) मूर्तानां साधर्म्यं प्रतिपाद्य मूर्तत्वं परिचीयत ।

(ग) कति गुणाः कुत्र सन्तीति विचारयत ।

**४. कक्षाभ्यासः**

(क) द्रव्येषु पृथिव्यादिषु कति गुणाः? के च त इति सखिभिः सह विचारयत ।

(ख) क्षणिकत्वस्य परिभाषामाधारीकृत्याकाशात्मनां साधर्म्यविषये कक्षायां चर्चयत ।

## सप्तमः पाठः

# पृथिवीनिरूपणम्

पदार्थानां साधर्म्यवैधर्म्ये निरूप्य सम्प्रति प्रत्येकं पृथिव्यादिकं निरूपयति ग्रन्थकारः -

**मूलम्-** तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता ।

षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥ ३५॥

**गन्धहेतुरिति । गन्धसमवायिकारणमित्यर्थः । यद्यपि गन्धवत्त्वमात्रं पृथिव्या लक्षणमुचितम्, तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम् । तथा हि पृथिवीत्वं हि गन्धसमवायिकारण-तावच्छेदकतया सिद्धयति, अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः । न च पाषाणादौ गन्धाभावाद् गन्धवत्त्वमव्याप्तमिति वाच्यम् । तत्रापि गन्धसत्त्वादनुपलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते । कथमन्यथा तद् भस्मनि गन्ध उपलभ्यते ? भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सिद्धयति, यद्द्रव्यं यद्द्रव्यध्वंसजन्यम्, तत्तदुपादानोपादेयमिति व्याप्तेः । दृष्टं चैतत्खण्डपटे महापटध्वंसजन्ये । इत्थं च पाषाणपरमाणोः पृथिवोत्वात्तज्जन्यपाषाणस्यापि पृथिवीत्वं । तथा च तस्यापि गन्धवत्त्वे बाधकाभावः ।**

**व्याख्या-** नवद्रव्येषु मध्ये पृथिवी गन्धवती वर्तते । समवायसम्बन्धेन गन्धनामको गुणो यत्र वर्तते सा पृथिवीत्यर्थः । तथा च समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठाधेयतानि रूपितपृथिवीत्वावच्छिन्नपृथिवीनिष्ठाधिकरणतावती पृथिवीत्यर्थः । मुक्तावल्यां गन्धवतीत्यस्य गन्धसमवायिकारणमित्यर्थः कृतो विश्वनाथेन । तत्रेयं जिज्ञासा समुदेति यद् गन्धवत्त्वमित्यनेनैव लघुलक्षणेन निर्वाहे गन्धसमवायिकारणत्वार्थकरणं व्यर्थम्, यतो हि गन्धसमवायिकारणमित्यस्यार्थो भवति। समवायसम्बन्धावच्छिन्न-गन्धत्वावच्छिन्न-गन्धनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नपृथिवी-निष्ठकारणतावती पृथ्वीति । अत्र च लक्षणे कारणत्वं प्रविष्टं तच्च व्यापकत्वघटितं व्यापकत्वञ्चाभावघटितमिति एतल्लक्षणस्यातिगुरुतया लघुभूतगन्धवत्त्वलक्षणमेव श्रेयस्करं स्यादिति मुक्तावलीकृता किमर्थं गुरुभूतं लक्षणं स्वीकृतमिति चेत् । सत्यम् यद्यपि गन्धवत्त्वमेव लक्षणं लघुभूतं निर्दुष्टं वर्तते तथापि गन्धसमवायिकारणमिति लक्षणकरणेन पृथिवीत्वजातिसिद्धौ परिशेषानुमानप्रमाणमपि तत एव लब्धमित्येकेनैव पदेन कार्यद्वयं निष्पन्नं भवतीति गन्धवत्त्वमित्यस्यार्थो गन्धसमवायिकारणत्वं कृतम् । तथा च पृथिवीत्वजातिः गन्धसमवायिकारणतावच्छेदकतया सिद्धयति । तद्यथा समवायसम्बन्धा-वच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नपृथिवीनिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् । या या कारणता सा किञ्चिद्धर्मावच्छिन्ना, यथा घटनिष्ठकार्यता-निरूपिततादात्म्यसम्बन्धावच्छिन्नकपालनिष्ठा कारणता कपालत्वावच्छिन्ना

भवति । यद्धर्मावच्छिन्ना सा पृथिवीनिष्ठाकारणता स धर्मः पृथिवीत्वम्, जातिबाधकाभावात् स धर्मो जातिरिति रीत्या पृथिवीत्वजातिः सिद्धा भवति । लक्षणन्तु गन्धवत्त्वमात्रमपि सम्भवत्येव । ननु पृथिव्यां गन्धसमवायिकारणत्वे किं मानमर्थाद् गन्धः पृथिव्यामेवोत्पद्यत इत्यत्र किं मानमिति चेद्यदि गन्धसमवायिकारणं पृथिवीति न स्वीक्रियतेऽर्थात् समवायेन गन्धं प्रति तादात्म्येन पृथिवी कारणमिति नियमो न स्वीक्रियेत तदा गन्धस्याकस्मिकत्वापत्तिः स्यात् । गन्धसमवायिकारणं पृथिवीति यदि न स्वीक्रियते तदा पृथिवीसम्बन्धाभावेऽपि जलादौ गन्धः प्रतीयादर्थाद् यस्मात् कस्मादपि जलादेः गन्ध उपलभ्येत । अर्थात् कारणं विनैव गन्ध उत्पद्येत उत वा गन्ध उत्पद्येतैव नहि, अतो गन्धस्य नियतोत्पत्तिकत्वाद् गन्धसमवायिकारणं पृथिवीति । न च गन्धसमवायिकारणत्वं लक्षणमुत वा गन्धवत्त्वलक्षणं पाषाणेऽव्याप्तं पाषाणे गन्धाभावादिति चेन्न, पाषाणेऽपि गन्धोऽस्त्येव । ननु यदि पाषाणे गन्धोऽस्ति तर्हि कथं नोपलभ्यत इति चेन्न, यतो हि वस्तुनोऽनुपलब्धिर्नहि वस्त्वभावादेव किन्त्वनुत्कटत्वेनापि सम्भवति । यथा वाय्वानीतत्रसरेणुभागः । यथा वा चक्षूरूपादिकम् । एवमेव पाषाणेऽपि गन्धो वर्तते परमनुत्कटत्वेन नैवोपलभ्यते । यदि च पाषाणे गन्धो न स्यात्तदा तद्भस्मन्यपि गन्धो नोपलभ्येत । उपलभ्यते च पाषाणभस्मनि गन्ध इति विपक्षबाधकतर्कात् पाषाणेऽपि गन्धः सिद्धयति, ननु तर्को न वस्तुसाधकः तस्य प्रमाणत्वाभावादिति चेन्न तर्कसनाथीकृतानुमानेन पाषाणे गन्धः सिद्धयति । ननु किमिदमनुमानं यत्पाषाणे गन्धः साधयेदिति चेत् श्रूयताम्, पाषाणभस्मद्रव्यं पाषाणोपादानोपादेयम्, पाषाणध्वंसजन्यत्वात्, यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति सामान्यव्याप्त्या पाषाणध्वंसजन्यं पाषाणभस्मद्रव्यं पाषाणोपादानोपादेयमिति विशेषव्याप्त्या च पाषाणभस्मनि पाषाणोपादानोपादेयत्वसिद्धौ, पाषाणभस्मपाषाणयोरेकोपादानोपादेयत्वसिद्धौ च यदि पाषाणभस्मनि गन्धो वर्तते चेत् पाषाणेऽपि गन्धो मन्तव्य एव । यथा महापटध्वंसजन्ये खण्डपटे महापटोपादानोपादेयत्वं महापटरूपद्रव्यध्वंसजन्यद्रव्यत्वेन सिद्धौ खण्डपटे भासमानं रूपादिकं महापटेऽपि सिद्धयत्येव, तथैवात्रापि बोध्यम् । तथा च पाषाणभस्मनि गन्धवत्त्वसिद्धौ पाषाणेऽपि गन्धवत्त्वं सिद्धयति, पाषाणे गन्धवत्त्वसिद्धौ च पाषाणेऽपि पृथिवीत्वसिद्धौ न कापि बाधा । एवञ्च पृथिव्या लक्षणं गन्धवत्त्वमिति सिद्धम् । उत्पत्तिप्रथमक्षणेऽव्याप्तिवारणाय गन्धसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमिति तस्यार्थः करणीयः ।

नानारूपाणि पृथिव्यां तिष्ठन्तीति नानारूपवत्त्वमपि पृथिव्या लक्षणं सम्भवतीत्याह ग्रन्थकारः -

**मूलम्- नानेति । शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते, न तु जलादौ, तत्र शुक्लस्यैव सत्त्वात्, पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसम्भवात् ।**

**न च यत्र नानारूपं नोत्पन्नम्, तत्राव्याप्तिरिति वाच्यम् । रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य**

**विवक्षितत्वाद्, रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वाद् । वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वाद्, न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः ।**

**व्याख्या-** शुक्लनीलपीतरक्तहरितकपिशचित्रभेदाद्रूपं सप्तविधम् । तानि च रूपाणि पृथिवीजलतेजःसु वर्तन्ते तेषु पृथिव्यां सप्तविधान्येव रूपाणि तिष्ठन्ति । जलेऽभास्वरशुक्ल एव तेजसि च भास्वर शुक्लरूपमेव तिष्ठति । तथा च नानारूपवत्त्वमपि पृथिव्या लक्षणं सम्भवति । यतो हि पृथिव्यामेकस्यामपि विजातीयतेजःसंयोगरूपपाकवशेन नानारूपाणि तिष्ठन्ति, अत एव एकस्मादेव पार्थिवपरमाणोः पाकभेदेन विभिन्नकाले तृणदुग्धदधिनवनीतादिकमुत्पद्यते । यत्र च श्वेतपटादौ नानारूपमुत्मन्नमेव नहि तत्राव्याप्तिवारणाय रूपद्वयवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं पृथिव्या लक्षणमिति लक्षणं कार्यम् । काञ्चित् रूपद्वयवतीं पृथिवीमादाय तत्र वृत्तिद्रव्यत्वसाक्षाद्व्याप्यपृथिवीत्वजातिमादाय सर्वत्र पृथिव्यां लक्षणं समन्वेयम् । अथवा रूपनाशवद्वृत्तिदव्यत्वव्याप्यजातिमत्त्वस्य लक्षणसम्भवान्न दोषः । वैशेषिकं दर्शनं पीलुपाकवादि वर्ततेऽतस्तन्मते पृथिवीपरमाणौ रूपनाशसम्भवाद् रूपनाशवान् पार्थिवपरमाणुः तत्र वृत्तिद्रव्यत्वव्याप्यजातिः पृथिवीत्वजातिः तद्वत्त्वस्य सर्वत्र पृथिव्यां सत्त्वाल्लक्षणसमन्वयः । न्यायमते च पीठरपाकस्वीकारादवयविन्यपि रूपनाशसम्भवाल्लक्षणसमन्वयः सम्भवति ।

पृथिव्यां मधुराम्ललवणकटुकषायतिक्तभेदेन ये षड्विधा रसास्ते सर्वेऽपि रसाः तिष्ठन्ति तस्मात् पृथिव्या लक्षणं षड्विधरसवत्त्वमित्यपि भवितुं शक्नोतीत्याह विश्वनाथः -

**मूलम्- षड्विध इति । मधुरादिभेदेन यः षड्विधो रसः, स पृथिव्यामेव । जले मधुर एव रसः । अत्रापि पूर्ववद् रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवसेयः ।**

**व्याख्या-** मधुरादिनानारसवत्त्वं पृथिव्यातिरिक्ते कुत्रापि न सम्भवति, यतो हि रसाः पृथिवी-जलयोरेव तिष्ठन्ति । तयोरपि जले मधुर एव रस इति नानारसवत्त्वं पृथिव्या असाधारणधर्मः । यत्र नानारसा नोत्पन्नास्तत्राव्याप्तिवारणाय रसद्वयवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वरूपं जातिघटितं लक्षणं तु करणीयमेव, लक्षणस्य समन्वयश्च यत्र नानारसा उत्पद्यन्ते तां पृथिवीमादायैव करणीयः । तादृशी जातिश्च पृथिवीत्वमिति सर्वत्र पृथिव्यां लक्षणसमन्वयः । गन्धवत्त्वमपि पृथिव्या लक्षणं भवितुं शक्नोतीति पूर्वमुक्तमेव, परं स गन्धो द्विविधो भवतीत्याह ग्रन्थकारः -

**मूलम्- गन्धस्तु इति । द्विविध इति वस्तुस्थितिमात्रम्, न तु द्विविधगन्धवत्त्वं लक्षणम्, द्विविधत्वस्य व्यर्थत्वाद् द्वैविध्यन्तु सौरभासौरभभेदेन बोध्यम् ॥३५॥**

**व्याख्या-** सौरभासौरभयोर्द्विविधयोर्गन्धयोः पृथिवीमात्रवृत्तित्वाद् गन्धवत्त्वमात्रमेव पृथिव्या लक्षणं न तु द्विविधगन्धवत्त्वमपि, द्विविधपदस्य लक्षणे निवेशने प्रयोजनं नास्तीति प्रयोजनशून्यं द्विविधपदं लक्षणे न देयम् । यतो हि लक्षणन्तावदितरभेदानुमितेर्हेतुर्भवति, अत एव लक्षणस्य प्रयोजनं व्यावृत्तिरिति

व्यवहारो वेति । तत्र व्यावृत्तिर्नाम - इतरभेदानुमितिजनकोऽर्थादितरभेदानुमितेर्हेतुरित्यर्थः । हेतुश्च व्यर्थविशेषशून्य एव भवति । व्यर्थविशेषणघटितस्य हेतोर्व्याप्यत्वासिद्धहेत्वाभासत्वस्वीकारादतः पृथिव्या लक्षणं गन्धवत्त्वमात्रम् । ननु तर्हि द्विविधेति पदं किमर्थमुक्तं ग्रन्थकृतेति चेद् गन्धौ द्विप्रकारकौ भवत इति स्वरूपबोधनायैव न तु लक्षणघटकत्वेनेति । ननु यदि गन्धवत्त्वं पृथिव्यामेव तर्हि जलादौ कथं गन्धः प्रतीयते इति चेत्तत्तु पृथिवीसम्बन्धादेवेति अन्वयव्यतिरेकाभ्यामवसेयम् ।

पृथिव्याः स्पर्शश्चानुष्णाशीत इत्याह ग्रन्थकारः -

**मूलम्-** **स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ।**

**स्पर्श इति । तस्याः पृथिव्याः । अनुष्णाशीतस्पर्शवत्त्वं वायावपि वर्तत इत्युक्तं पाकज इति । इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तम् । वस्तुतस्तु पाकजस्पर्शवत्त्वमात्रं लक्षणम्, अधिकस्य वैयर्थ्याद् । यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः ।**

**व्याख्या-** तस्याः पृथिव्याः स्पर्शोऽनुष्णाशीतस्तथा पाकजश्च तथा च पाकजानुष्णाशीतस्पर्शवत्त्वं पृथिव्या लक्षणम् । अनुष्णाशीतस्पर्शस्य वायावपि सत्त्वात्तत्रातिव्याप्तिरत उक्तं पाकज इति । पाकजस्पर्शश्च पृथिव्यामेव अन्यत्र पाकासम्भवात् । अत एव पाकजस्पर्शवत्त्वमात्रं लक्षणं पृथिव्या उचितमधिकस्य व्यर्थत्वादिति । यत्र पटादौ पाकजस्पर्शोऽनुत्पन्नस्तत्राव्याप्तिवारणाय पाकजस्पर्शसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमिति जातिघटितं लक्षणं करणीयम् । इदानीं लक्षितस्याः पृथिव्या विभागं दर्शयति ग्रन्थकारः -

**मूलम्-** **नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा ॥३६॥**

**नित्येति । सा पृथिवी द्विविधा, नित्या अनित्या चेत्यर्थः । अणुलक्षणा परमाणुरूपा पृथिवी नित्या ॥३६॥**

**व्याख्या-** सा गन्धवती पृथिवी नित्यानित्या चेति द्विविधा तत्र नित्यत्वन्नाम ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वम् । तादृशी च पृथिवी परमाणुरूपा, अन्त्यावयवरूपा पृथिवी नित्या इत्यर्थः । नित्यां पृथिवीं निरूप्येदानीमनित्यां पृथिवीं प्रतिपादयति ग्रन्थकारः -

**मूलम्-** **अनित्या तु तदन्या स्यात्सैवावयवयोगिनी ।**

**अनित्येति । तदन्या = परमाणुभिन्ना पृथिवी द्व्यणुकादिसर्वाप्यनित्येत्यर्थः । सैव अनित्या पृथिव्येवावयववतीत्यर्थः ।**

**व्याख्या-** परमाणुभिन्ना सर्वा अपि पृथिवी द्व्यणुकादितो ब्रह्माण्डान्ता अनित्या उत्पादविनाशशालिन्य इत्यर्थः । सा अनित्यैव पृथिवी, अवयवशालिनी = अवयवतीत्यर्थः । अत्रावयवती पृथिवीति कथनेन

बौद्धानां परमाणुपुञ्जवादो निरसनीयः । तत्र बौद्धाः स्वतन्त्रावयविनं न स्वीकुर्वन्ति अतो बौद्धानां परमाणुपुञ्जवादमुद्भाव्य निरस्यति ग्रन्थकारः -

**मूलम्- नन्ववयविनि किं मानम् ? परमाणुपुञ्जैरेवोपपत्तेः । न च परमाणूनामतीन्द्रियत्वाद् घटादेः प्रत्यक्षं न स्यादिति वाच्यम् । एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात् । यथैकस्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम् । न चैको घटः स्थूल इति बुद्धेरनुपपत्तिरिति वाच्यम् । एको महान् धान्यराशिरितिवदुपपत्तेः ।**

**व्याख्या-** बौद्धाः स्वतन्त्रमवयविनमवयवपुञ्जातिरिक्तं न स्वीकुर्वन्ति । तेऽवयवपुञ्जमेवावयवीति कथयन्ति । अतिरिक्तावयविस्वीकारे गौरवादिति । तत्र नैय्यायिका आपत्तिं प्रदाय तन्मतं निवारयन्ति तत्र नैय्यायिका वदन्ति यदि परमाणुपुञ्ज एव घटः तर्हि परमाणोरप्रत्यक्षत्वेन तत्पुञ्जस्य घटस्याप्यप्रत्यक्षत्वमित्यापत्तिः स्यादिति शङ्कायां बौद्धा वदन्ति, एकस्य परमाणोरप्रत्यक्षत्वमिष्टं परं परमाणुसमुदायरूपस्य परमाणुपुञ्जरूपस्य घटस्य तु प्रत्यक्षं भवत्येव यथा दूरदेशे स्थितस्यैकस्य केशस्याप्रत्यक्षत्वेऽपि केशसमुदायस्य तत्र प्रत्यक्षं भवत्येवेत्युत्तरे पुनर्नैय्यायिकानां यदि घटः परमाणुपुञ्जस्तदा पुञ्जस्य समुदायरूपत्वेन बहुत्वादेको घट महानिति प्रत्ययो न स्यादिति प्रश्ने पुनर्बौद्धा वदन्ति एको महान् धान्यराशिरितिवदेको महान् घट इति बुद्धिस्तु जात्यवलम्बिनी, तस्माज्जात्यभिप्रायेणार्थाज्जातिगतैकत्वमादाय परमाणुपुञ्जरूपघटादौ एकत्वप्रतीतिरिति बौद्धानामाक्षेप उत्तरयन्ति नैय्यायिकास्तथा चाह ग्रन्थकारः -

**मूलम्- मैवं परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगाद्, दूरस्थकेशस्तु नातीन्द्रियः, सन्निधाने तस्यैव प्रत्यक्षत्वात् । न च तदानीमदृश्यपरमाणुपुञ्जाद् दृश्यपरमाणुपुञ्जस्योत्पन्नत्वान्न प्रत्यक्षत्वे विरोध इति वाच्यम् । अदृश्यस्य दृश्यानुपादानत्वात् । अन्यथा चक्षुरूष्मादिसन्ततेः कदाचिद्दृश्यत्वप्रसङ्गात् । न चातितप्ततैलादौ कथमदृश्यदहनसन्ततेर्दृश्यदहनोत्पत्तिरिति वाच्यम्, तत्र तदन्तःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरूपगमात् । न चादृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम्, यतो न दृश्यत्वमदृश्यत्वं वा कस्यचित्स्वभावादाचक्ष्महे, किन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवतो दृश्यत्वम्, तदभावे चादृश्यत्वम् । तथा च त्रसरणोर्महत्त्वात्प्रत्यक्षत्वम्, न तु द्व्यणुकादेस्तदभावात् । न हि त्वन्मतेऽपि सम्भवतीदम्, परमाणौ महत्त्वाभावात् ।**

**व्याख्या-** परमाणुपुञ्जवादिनां बौद्धानां मतं न समीचीनं यतोहि यदि घटः परमाणुपुञ्जरूपस्तदा परमाणोरप्रत्यक्षत्वेन तत्समुदायेऽपि प्रत्यक्षयोग्यता नायातीति घटस्य प्रत्यक्षत्वं न स्याद् । यथैकोऽन्धो यदि चाक्षुषप्रत्यक्षं कर्तुं न शक्नोति तदान्धशतैरपि घटादिकं प्रत्यक्षयितुं न शक्यते तद्वद्यद्येकपरमाणुः प्रत्यक्षायोग्यस्तदा परमाणुपुञ्जरूपो घटोऽपि प्रत्यक्षायोग्य एव स्यादतो न घटः परमाणुपुञ्जरूपः, किन्तु परमाणुपुञ्जैरुत्पन्नोऽतिरिक्तोऽवयवी घटः । एकस्य केशस्याप्रत्यक्षत्वेऽपि केशसमुदायस्य प्रत्यक्षत्वमिति

यो दृष्टान्तः प्रदत्तः स न समीचीनः यतो हि स एव एककेशो यदि सन्निकट आयाति चेत्तदा स एवैककेशः समीपे प्रत्यक्षयोग्यो भवति। अतो दूरस्थेन केशरूपदृष्टान्तेन घटे परमाणुपुञ्जरूपत्वं साधयितुं न शक्यते। अत्र पुनर्बौद्धा वदन्ति। प्रत्यक्षघटस्थले परमाणुपुञ्जाददृश्याद् दृश्यपरमाणुपुञ्जस्योत्पत्तिः स्वीक्रियतां तेन परमाणुसमुदायेऽपि घटे प्रत्यक्षयोग्यत्वमायतीति चेन्न, यतोऽदृश्यं दृश्यस्य समवायिकारणं भवत्येव नह्यतोऽदृश्याद् दृश्यस्योत्पत्तिः न सम्भवति, यदि चादृश्यादपि दृश्यस्योत्पत्तिः सम्भवतीत्युच्यते तर्ह्यदृश्यायाश्चक्षुरूष्मादिसन्ततेर्दृश्यचक्षुरुष्मादिसन्ततेरुत्पत्तिः कदाचित् स्यात् परं कदापि चक्षुरुष्मसन्ततिर्दर्शनयोग्या न भवतीत्यदृश्येन दृश्यमुत्पादयितुं न शक्यतेऽतोऽदृश्यपरमाणुपुञ्जाद् दृश्यपरमाणुपुञ्जस्योत्पत्तिः न सम्भवति। तस्माद्यदि घटः परमाणुपुञ्जरूपस्तदा तस्याप्रत्यक्षत्वं तदवस्थमेव स्यात्। यदि चोच्यते यदेकान्तेनेदं वक्तुं न शक्यते यददृश्याद् दृश्यस्योत्पत्तिः सम्भवत्येव नहीति। यतो हि कदाचिद् दृश्यतेऽतितप्ततैलसमुदायादपि महानसादावदृश्याददतितप्ततैलस्थदहनाद् दृश्यतैलदहनस्योत्पत्तिरिति चेन्न, यतो ह्यतितप्ततैलस्थवह्निः पूर्वमपि दृश्य एवासीत्तेनैव च तत्रातितप्ततैले दृश्यदहनस्योत्पादात्तत्रस्थं दहनं चाक्षुषयोग्यमिति तत्र नादृश्याद् दृश्यस्योत्पत्तिरिति नैय्यायिकानां समाधाने पुनर्बौद्धा हसन्ति यद् यद्यदृश्याद् दृश्यस्योत्पत्तिर्भवत्येव नहि तदा कथमदृश्याद् द्व्यणुकाद् दृश्यस्य त्रसरेणोरुत्पत्तिर्भवन्मते स्वीक्रियत इति प्रश्ने नैय्यायिकास्तं प्रत्येव हसन्तो वास्तवंमुत्तरं ददति यत् कस्यापि पदार्थस्य दृश्यत्वम् = प्रत्यक्षयोग्यत्वम्, अदृश्यत्वम् = प्रत्यक्षायोग्यत्वं वा न स्वभावादायाति किन्तु यत्र महत्त्वोद्भूतरूपादिप्रत्यक्षकारणं विद्यते तत्र दृश्यत्वं यत्र च तदभावस्तत्रादृश्यत्वमिति नियमं सर्वत्र वयं स्वीकुर्मः। तथा च त्रसरेणौ महत्त्वपरिमाणस्योद्भूतरूपस्य प्रत्यक्षकारणस्य सम्भवात् तस्य प्रत्यक्षत्वम्, द्व्यणुके परमाणौ च महत्त्वपरिमाणस्यासत्त्वान्न प्रत्यक्षत्वमिति दृश्यादृश्यत्वव्यवस्थां वयमाचक्ष्महे इति न कापि बाधास्मन्मते। युष्माकं बौद्धानां मते न सम्भवतीयं व्यवस्था, यतो हि परमाणोरणुत्वपरिमाणवत्त्वेन परमाणुपुञ्जरूपे घटे महत्त्वं कुत आगतमर्थान्नागतमेव परमाणुपुञ्जरूपे घटे महत्त्वपरिमाणमिति परमाणुपुञ्जरूपस्य घटस्याप्रत्यक्षत्वं तदवस्थमेव। यदि तत्र परमाणुपुञ्जरूपे घटे महत्त्वपरिमाणमुत्पद्यत इति स्वीक्रियते तदा घट एव उत्पन्न इति किं न स्वीक्रियतेऽतो व्यवहारबलात् परमाणुतो द्व्यणुकादिक्रमेण स्थूलावयवी घटादिरुत्पद्यते तत्र च महत्त्वादिगुणा आयान्तीति स्वीकारादवयव्यवयवपुञ्जादतिरिक्त इति सिद्धम्। इत्थं रीत्यातिरिक्तावयविसाधनानन्तरमन्त्यावयवरूपस्य परमाणोः साधनाय प्रमाणं प्रस्तौति ग्रन्थकारः -

**मूलम्- इत्थञ्चावयविसिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वम्। तेषाञ्चावयवावयवधाराया अनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः। अतः क्वचिद्विश्रामो वाच्यः, यत्र तु विश्रामस्तस्यानित्यत्वेऽसमवेतभावकार्योत्पत्तिप्रसङ्ग इति तस्य नित्यत्वम्। महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः।**

**न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यम् । त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वाद् घटवदित्यनुमानेन तदवयवसिद्धौ, त्रसरेणोरववयवाः, सावयवाः, महदारम्भकत्वात्, कपालवदित्यनुमानेन तदवयवसिद्धेः । न चेदमप्रयोजकम्, अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् । न चैवं क्रमेण तदवयवधारापि सिद्ध्येदिति वाच्यम् । अनवस्थाभयेन तदसिद्धेरिति ।**

**व्याख्या-** परमाणोरप्रत्यक्षत्वेन तत्समुदायस्य यदि घटत्वं तर्हि घटस्याप्यप्रत्यक्षत्वापत्तिरिति घटस्य महत्त्वपरिमाणवत्त्वेन घटः परमाणुभिन्नो ऽवयवीति स्वतन्त्रस्यावयविनः सिद्धौ तेषामवयविनामुत्पादविनाशस्यापि प्रत्यक्षप्रमाणेनानुभवादुत्पादविनाशशालिनोऽवयविनः पदार्थस्या-नित्यत्वमपि सिद्धम् । तेषाञ्चावयविनां घटादीनामनित्यद्रव्याणामवयवधारा = अवयवानां परम्परा = घटाद्यवयविनामवयवस्तस्याप्यवयवस्तस्याप्यवयव इत्याद्यवयवानां परम्परा सा यद्यनन्ता-अर्थादवयविनामवयवधारा यदि कदापि न विश्राम्यतीति स्वीक्रियते तदात्यन्तविषमयोरपि मेरुसर्षपयोरवयविनोः समानपरिणवत्त्वापत्तेरुभयोरनन्तावयववत्त्वेन परस्परमधिकन्यूनावयववत्त्वा-भावात् परस्परपरिमाणतारतम्याभावात्तयोः साम्यापत्तिः स्यात् । तच्च विरुद्धम् । यतोहि मेरुपरिमाणतः सर्षपपरिमाणं सर्वथा भिन्नमिति लोकानुभवो वर्तते ऽतः परस्परमत्यन्तभिन्नपरिमाणवतोः मेरुपर्वतसर्षपयोराकारभेदसिद्ध्यर्थं तयोरवयवसङ्ख्यायां न्यूनाधिकत्वं कल्पनीयम्, तदर्थञ्चावयवधारायाः कुत्रचिद् विश्रान्तिः कल्पनीया या च सर्षपस्य दशसङ्ख्याकावयवे भवति चेन्मेरोः पर्वतस्यायुतसङ्ख्याकावयवे कल्पनीयेति तयोरवयवानां न्यूनाधिकतया तयोः परिमाणमपि भिन्नमिति न भिन्नपरिमाणवतोर्मेरुसर्षपयोः साम्यापत्तिर्दोषो ऽतो ऽवयवधारायाः विश्रान्तिः क्वचित्कल्पनीयैव यत्र चावयवधाराया विश्रान्तिस्तस्यानित्यत्वे सर्वद्रव्यनाशात् सर्गान्तरे समवायिकारणं विनैव भावकार्यस्योत्पत्तिः प्रसज्येत, यतो हि प्रथमावयवस्योत्पादकाभावात्तस्यानाद्यनन्तत्वमनायत्या कल्पनीयमिति यत्रावयवधाराया विश्रान्तिः, तादृशं वस्तु नित्यमिति तस्य नित्यस्य परमाणुत्वसिद्धिः । अतो महत्परिमाणस्य तारतम्यस्य गगनपरिमाणे विश्रान्तिर्यथा तथैवाणुपरिमाणस्य विश्रान्तिर्यत्र तस्य परमाणुत्वनियमात् परमाणुद्रव्यं सिद्ध्यतीति ।

केचन दीधितिकारादयो नैय्यायिका अणुपरिमाणतारतम्यस्य विश्रान्तिः त्रसरेणावेव स्वीकुर्वन्ति अतस्ते वदन्ति त्रसरेणावेवाणुपरिमाणतारतम्यस्य विश्रामोऽस्तु किं परमाणुकल्पनयेति, परन्तु तेषां कथनं नोचितं यतो हि त्रसरेणुरन्तिमावयवो भवितुं नार्हति, त्रसरेणावनुमानप्रमाणेनावयववत्त्वसिद्धेः, तथाहि त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वाद् घटवदित्यनुमानप्रयोगे, यत्र यत्र चाक्षुषद्रव्यत्वं तत्र सावयवयत्वमिति व्याप्त्या चाक्षुषद्रव्यत्ववान् त्रसरेणुरिति पक्षधर्मताबलात् सावयवत्वव्याप्यचाक्षुषद्रव्यत्ववान् त्रसरेणुरिति परामर्शद्वारा त्रसरेणुः सावयव इत्यनुमितेः त्रसरेणोरवयवः सिद्ध्यति । स च त्रसरेणोरवयवो

द्व्यणुकः । न च तर्हि तस्यैव द्व्यणुकस्यान्तिमावयवत्वमस्त्विति चेन्न त्रसरेणोरवयवाः सावयवा महदारम्भकत्वादित्यनुमानेन यद्यन्महदारम्भकं तत्सावयं यथा कपालमिति व्याप्त्या महदारम्भकत्ववन्तः त्रसरेणोरवयवा इति पक्षधर्मताबलात् सावयवत्वव्याप्यमहदारम्भकत्ववन्तस्त्रसरेणोरवयवा इति परामर्शद्वारा त्रसरेणोरवयवेष्वपि सावयवत्वसिद्धौ ये त्रसरेणोरवयवानामवयवास्ते परमाणव इति परमाणुसिद्धिः । न च त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वादित्यनुमानमप्रयोजकमित्यर्थात् चाक्षुषद्रव्यत्वं त्रसरेणावस्तु सावयवत्वं मास्त्विति व्यभिचारशङ्कायां जातायां तन्निवारकस्य तर्कस्यात्राभावादयं हेतुर्व्यभिचारशङ्कानिवारकतर्कशून्यत्वेनाप्रयोजक इति चेन्न, यतो ह्यपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वादर्थाद् यत्र यत्र चाक्षुषद्रव्यत्वं तत्रापकृष्टमहत्त्वमिति व्याप्त्या चाक्षुषद्रव्यत्वस्य व्यापकत्वमपकृष्टमहत्त्वे एवञ्च यत्रापकृष्टमहत्त्वं तत्रानेकद्रव्यवत्त्वमिति व्याप्त्यापकृष्टमहत्त्वव्यापकत्वमनेकद्रव्यवत्त्वे तथैव यत्रानेकद्रव्यवत्त्वं तत्र सावयवत्वमिति व्याप्त्या चानेकद्रव्यवत्त्वव्यापकत्वं यदा सावयवत्वे सिद्ध्यति तदा चाक्षुषद्रव्यत्वस्य त्रसरेणौ प्रत्यक्षसिद्धत्वात् त्रसरेणुः सावयव इत्यनुमितेः सिद्धौ चाक्षुषद्रव्यत्वरूपे हेतौ सावयवत्वव्याप्यत्वमपि ततः पूर्वमेव सिद्धमिति चाक्षुषद्रव्यत्वं लिङ्गं नाप्रयोजकमपि त्वत्र व्यभिचारनिवारकस्य तर्कस्य सत्त्वान्नायं हेतुर्व्यभिचारी । स च तर्को यथा- चाक्षुषद्रव्यत्वं यदि सावयवत्वव्यभिचारि स्यात् तर्हि सावयवत्वव्याप्यानेकद्रव्यवत्त्वव्याप्यापकृष्टमहत्त्वस्य व्याप्यं न स्याद् भवति च चाक्षुषद्रव्यत्वं सावयवत्वव्याप्यानेकद्रव्यवत्त्वव्याप्यापकृष्टमहत्त्वव्याप्यमिति विपक्षबाधकर्तबलाद् बलवता च हेतुना साध्यानुमितिरुत्पद्यत अतस्त्रसरेणोरवयवावयवत्वेन परमाणुसिद्धिः । न चैवं क्रमेण परमाणोरप्यवयवोऽनुमानेन सिद्धेदिति चेन्न, तथा सत्यप्रामाणिकानामनन्तपदार्थानां कल्पनाया विश्रान्तेरभावादर्थादनवस्थाभयेन परमाणोरवयवोऽनुमानेन न सिद्ध्यति । अतः परमाणोरेवान्तिमावयवत्वसिद्धिर्भवतीति परमाणोरन्तिमावयवस्य नित्यत्वमपि स्वीकार्यमन्यथा सर्गान्तरेऽसमवेतभावकार्यस्यापत्तिः स्यात्तथा च परमाणुरूपा पृथिवी नित्या तदन्या द्व्यणुकादारभ्य ब्रह्माण्डान्ता पृथिव्यनित्येति । साप्यनित्या पृथिवी त्रिप्रकारिका भवतीत्याह ग्रन्थकारः -

**मूलम्- सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥३७॥**

**सा चेति । सा कार्यरूपा पृथिवी त्रिधेत्यर्थः । शरीरेन्द्रियविषयभेदादित्यर्थः ॥३७॥**

**व्याख्या-** अवयववती पृथिवी त्रिधा = त्रिप्रकारिका वर्तते, तासां प्रकारश्च शरीरम्, इन्द्रियम्, विषयश्चेति । कार्यरूपा पृथिवी शारीरात्मिका, इन्द्रियात्मिका, विषयात्मिका चेति त्रिप्रकारिकेत्यर्थः । तत्र पृथिव्याः शरीरं किमत आह विश्वनाथः -

**मूलम्- योनिजादिर्भवेद्देहं** ........ ........... ।

**तत्र देहमुदाहरति- योनिजादिरिति । योनिजमयोनिजञ्चेत्यर्थः । योनिजमपि द्विविधं- जरायुजमण्डजञ्चेति । जरायुजं मानुषादीनाम् । अण्डजं सर्पादीनाम् । अयोनिजं स्वेदजोद्भिज्जादिकम् । स्वेदजाः कृमिदंशाद्याः । उद्भिज्जाः तरुगुल्माद्याः । नारकिणां शरीरमप्ययोनिजम् । न च मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यम् । गन्धादिमत्त्वस्यैव प्रमाणत्वात् । न च क्लेदोष्मादेरूपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम् । तथा सति जलत्वपृथिवीत्वादिना सङ्करप्रसङ्गात् । न च तर्हि जलीयत्वादिकमेवास्तु, न तु पार्थिवत्वमिति वाच्यम् । क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानाद् । गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः । तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम् ।**

**व्याख्या-** कार्यरूपाया अवयविन्याः पृथिव्याः त्रिविभागाः सन्तीति पूर्वमुक्तम् तेषु त्रिविभागेषु मध्ये शरीरात्मिका पृथिवी केति जिज्ञासायां पूर्वं शरीरं विभज्य दर्शयति विश्वनाथः- योनिजादीत्यादिना- अर्थात् पार्थिवं शरीरं द्विविधं योनिजमयोनिजञ्चेति । योनेर्जायते यच्छशीरं तच्छरीरं योनिजम् । मातापित्रोः शुक्रशोणितयोर्मीलनेन जायमानं शरीरं योनिजम् । तद्भिन्नं शरीरमयोनिजम् । तत्र योनिजं पार्थिवं शरीरं मनुष्यपशुपक्षिमत्स्यमशकादीनाम् । योनिजमपि द्विविधम्, जरायुजमण्डजञ्च । तत्र जरायुर्नाम गर्भवेष्टनचर्मपुटकम्, गर्भाशय इत्यर्थः । ततो जायते यच्छरीरम्, तच्छीरं जरायुजं मनुष्यपश्वादीनां शरीरमित्यर्थः । अण्डम् = पक्ष्यादिडिम्बं ततो जायते यच्छरीरं तदण्डजमण्डोत्पन्नं पक्षिसर्पादीनां शरीरमण्डजमित्यर्थः । योनिजभिन्नं शरीरं सर्वं योनिं विना जायमानं शरीरमयोनिजम् । तदपि द्विविधं स्वेदजमुद्भिज्जञ्च । तत्र स्वेदजं शरीरं स्वेदाद् = दूषितजलबिन्दुतो जायमानानि कृमिदंशमशकादीनां शरीराण्ययोनिजानि । तत्र मशकादीनां शरीरं कदाचित् स्वेदजं कदाचिच्चाण्डजमिति ध्येयम् । ऊर्ध्वं भित्त्वा जायमानानि शरीराणि, नरकस्वर्गादिलोके प्रसिद्धानि भोगमात्रपराणि शरीराण्यप्ययोनिजानि सन्ति, तानि च नारकीयादीनि शरीराणि तृतीयाणि विधान्ययोनिजशरीराणाम् । ननु मानुषादीनां शरीराणां पार्थिवत्वे किं मानं यतो हि मानुषादिशरीरे जलादीनामप्युपलब्धेः मानुषं शरीरं जलीयं स्यादूष्णादिप्रतीतेश्च तैजसादिकं वा स्यादिति चेन्न, यतो मनुष्यादीनां शरीरेषु सर्वदैव गन्धवत्त्वोपलब्धेर्जलादीनां कदाचिदेवोलब्धेर्मानुषं शरीरं पार्थिवमेव । न च क्लेदादीनामपि मानुषशरीरे सर्वदैवोपलब्धिर्भवत्येव, अन्यथा रक्तादौ जलीयपदार्थाभावे शरीरं शुष्कं स्यादिति चेन्न शुष्केऽपि शरीरे शरीरत्वव्यवहारान्मानुषं शरीरं पार्थिवमेव यदि च मानुषादिशरीरेषु क्लेदादीनामुपलब्धौ जलत्वं तेजस्त्वं वा स्वीक्रियते तदा पृथिवीत्वजलत्वयोः पृथिवीत्वतेजस्त्वयोर्वैकत्र समावेशाद् विरुद्धधर्मयोरेकत्रसमावेशरूपं साङ्कर्यं पृथिवीत्वजलत्वादिषु धर्मेषु स्यात्, तच्च न सम्भवति यतो हि पृथिवीत्वं गन्धसमवायिकारणतावच्छेदकतया जातिरिति पूर्वमुक्तं जलत्वादेरपि जातित्वमग्रे साधयिष्यतेऽतः प्रमाणान्तरेण सिद्धजातौ साङ्कर्यं दोषो न स्वीकार्य इति पृथिवीत्वजलत्वयोरेकत्र मानुषादिशरीरेषु साङ्कर्यम् । न स्वीकार्यम् न च पृथिवीत्वजलत्वयोर्न विरोध इति वक्तुं शक्यः

पृथिवीत्वाभाववति जले जलत्वस्य, जलत्वाभाववति च घटादौ पृथिवीत्वस्य प्रत्यक्षसिद्धत्वात्तयोर्विरोधः स्फुट एव । न च तर्हि मानुषादीनां शरीराणां जलीयत्वमेव स्वीक्रियतां न तु पृथिवीत्वं येन साङ्कर्यं स्यादिति चेन्न, यतो हि क्लेदादीनां विनाशेऽपि शुष्केऽपि शरीरे पार्थिवशरीरत्वेन व्यवहाराद् गन्धस्य तु मानुषादिशरीरेऽभावः कदापि न भवतीति मानुषादीनां शरीराणि पार्थिवान्येव । न च तर्हि मानुषादीनां शरीरेषु जलादीनि सन्त्येव नहि किमिति चेन्न, मानुषादीनां शरीरेष्वल्पांशानां जलादीनां सम्बन्धस्त्वस्त्येव । अत एव मानुषादीनां शरीरे जलादीनां निमित्तत्वमात्रमिति । तथा च मानुषादीनां शरीराणि पार्थिवानि तेषु जलतेजोवाय्वाकाशानां निमित्तत्वमात्रम् । अत एव पार्थिवं शरीरमिति सर्वानुभवगम्यो व्यवहारः । शरीरस्य विभागं प्रदर्श्येदानीं शरीरलक्षणं प्रस्तुत्य लक्ष्ये समन्वयञ्च प्रदर्शयति विश्वनाथः -

**मूलम्- शरीरत्वन्तु न जातिः, पृथिवीत्वादिना साङ्कर्यात्, किन्तु चेष्टाश्रयत्वम् । वृक्षादीनामपि चेष्टाश्रयत्वान्नाव्याप्तिः । न च वृक्षादेः शरीरत्वे किं मानमिति वाच्यम् । आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात् । तत्रैव किं मानमिति चेत्, भग्नक्षतसंरोहणादिना तदुन्नयनात् । यदि हस्तादौ शरीरव्यवहारो न भवति, तदान्त्यावयवित्वेन विशेषणीयम् । न च यत्र शरीरे चेष्टा न जाता तत्राऽव्याप्तिरिति वाच्यम् । तादृशे प्रमाणाभावात् । अथवा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वम्, अन्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा तत्, मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः । न च नृसिंहशरीरे कथं लक्षणसमन्वयः । तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावाद्, जलीयतैजसादिशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यम् । कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात् ।**

**व्याख्या-** ननु किन्नाम शरीरम् ? यदि शरीरत्वजातिमच्छरीरमित्युच्यते तदपि न समीचीनम् । यतो हि शरीरत्वं न जातिः, जातिबाधकदोषसम्भवात् । ननु शरीरत्वे को जातिबाधको दोषो येन शरीरत्वन्न जातिरिति चेत् साङ्कर्यं दोषः शरीरत्वे । यतो हि साङ्कर्यं नाम परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः तथा च शरीरत्वे पृथिवीत्वाभाववति जलीयशरीरे शरीरत्वं शरीरत्वाभाववति च घटादौ पृथिवीत्वमिति पृथिवीत्वशरीरत्वयोः परस्परात्यन्ताभावसमानाधिकरणधर्मयोर्विरुद्धयोरेकत्रपार्थिवेशरीरेसत्त्वात्शरीरत्वपृथिवीत्वधर्मौसङ्कीर्णौ तयोश्च पृथिवीत्वे प्रमाणान्तरेण जातित्वसाधनाच्छरीरत्वं न जातिः । यतो हि साङ्कर्यस्थल एकस्यैव जातित्वस्वीकाराद् यथा भूतत्वमूर्तत्वयोः मूर्तत्वं क्रियासमवायिकारणतावच्छेदकतया जातिरिति । ननु यदि शरीरत्वं न जातिस्तर्हि किं नाम शरीरत्वमिति चेत् चेष्टाश्रयत्वं शरीरत्वमिति तल्लक्षणम् । तत्र चेष्टा नाम हिताहितप्राप्तिपरिहारानुकूला क्रिया, तस्याः क्रियाया आश्रयश्च शरीरमिति शरीरे लक्षणसमन्वयः । ननु यदि चेष्टाश्रयत्वमेव शरीरत्वन्तदा वृक्षादिशरीरे कथं तल्लक्षणसङ्गतिरिति चेत्तत्रापि चेष्टा वर्तत एव । अत एव वृक्षं स्वानुकूलं जलादिकं गृह्णाति प्रतिकूलं वाय्वादिकञ्च त्यजति, अतो वृक्षादावपि

चेष्टा वर्तत एव । ननु वृक्षादेः शरीरत्वे किं मानमिति चेद्, वृक्षादावपि आध्यात्मिकस्य वायोः सत्त्वमेव वृक्षस्य शरीरत्वे प्रमाणम्, यतो ह्याध्यात्मिकवायुर्नाम आत्मनि = शरीरे इति अध्यात्मम्, अध्यात्मं भव इति आध्यात्मिकमिति व्युत्पत्त्या शरीरमधिकृत्य शरीराभ्यन्तरवर्तमानो वायुरेवाध्यात्मिकवायुः = प्राणः स च वृक्षादावप्यस्तीति वृक्षस्यापि शरीरत्वं सिद्ध्यति तत्र च चेष्टायाः सत्त्वाल्लक्षणस्य सङ्गतिरपि भवति । न च वृक्षादावाध्यात्मिकप्राणवायोः सत्त्वे किं मानमिति चेद् वृक्षस्यापि शाखादीनां विच्छेदे सति, वृक्षस्य त्वगादीनां क्षतिदशायामथवा वृक्षस्यैव विच्छेदेऽपि पुनः वृक्षादेः संरोहणोन्नयनत्वग्वर्धनादिना तत्रापि प्राणवायुरस्तीति कल्पयितुं शक्यतया वृक्षादौ प्राणस्य सिद्धिर्भवति । तस्माद् वृक्षस्यापि शरीरत्वं सिद्ध्यत्येव । न च यदि चेष्टाश्रयत्वं शरीरस्य लक्षणं तदा तस्य लक्षणस्य शरीरावयवे हस्तादौ सत्त्वादतिव्याप्तिः, हस्तादीनां शरीरावयवानां शरीरत्वाभावात्, शरीरत्वस्यावयविधर्मत्वादिति चेदिष्टं हस्ताद्यवयवेऽपि शरीरत्वमस्त्येव यदि नास्तीत्यहंकारस्तदान्त्यावयवित्वे सति चेष्टाश्रयत्वमिति शरीरलक्षणं करणीयम् । हस्ताद्यवयवानामन्त्यावयवित्वविरहान्नातिव्याप्तिः ।

न च यत्र शरीरे चेष्टैव नोत्पन्ना तत्र शरीरेऽव्याप्तिरिति चेन्न कदापि चेष्टैव यत्र नोत्पन्ना तादृशस्य शरीरस्य सत्त्वे प्रमाणाभावात् । यदि च तत्राप्यहंकारस्तदा चेष्टावदन्त्यावयविवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य लक्षणस्य करणान्नाव्याप्तिः जीवच्छशीरमादाय तत्र वृत्तिपृथिवीत्वजातिमादाय सर्वत्र पार्थिवशरीरे लक्षणसमन्वयात् । यदि च तादृशपृथिवीत्वजातेर्घटादावपि सत्त्वाद् घटादावतिव्याप्तिरित्युच्यते तदान्त्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं लक्षणं करणीयम् । पृथिवीत्वजातेर्मध्यमावयविन्यपि सत्त्वात् सा जातिः न ग्राह्यापि तु मानुषत्वं जातिं चैत्रत्वादिं वा जातिमादाय लक्षणं सङ्गमनीयम् । न च नृसिंहशरीरे कथं लक्षणसङ्गतिः नृसिंहत्वस्यैकव्यक्तिवृत्तित्वादेकमात्रवृत्तिधर्मस्य जातित्वाभावात् । ननु देवत्वमादायलक्षणसङ्गतिस्तत्रेति चेन्न जलीयत्वतेजस्त्वादिभिर्देवत्वस्य साङ्कर्याद् देवत्वं न जातिरिति वाच्यम् । कल्पभेदेन नानानृसिंहशरीराणां सम्भवात् तदेवनृसिंहशरीरमादाय तत्र लक्षणसमन्वयात् । शरीरस्य भेदं लक्षणञ्च निरूप्येदानीं पार्थिवेन्द्रियस्य घ्राणेन्द्रियस्य पार्थिवत्वे प्रमाणमाह विश्वनाथः -

**मूलम्- ......... .............इन्द्रियं घ्राणलक्षणम् ।**

**इन्द्रियमिति । घ्राणेन्द्रियं पार्थिवमित्यर्थः । पार्थिवत्वं कथमिति चेदित्थम् । घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जकगोघृतवत् । न च दृष्टान्ते स्वीयरूपादि व्यञ्जकत्वादसिद्धिरिति वाच्यम् । परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् । न च नवशरावगन्धव्यञ्जकजलेऽनैकान्तिकत्वमिति वाच्यम् । तस्य सक्तुरसाभिव्यञ्जकत्वात् । यद्वा परकीयेति न देयं वायूपनीतसुरभिभागानां दृष्टान्तत्वसम्भवात् । न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्राभिव्यञ्जकत्वात्तत्र व्यभिचार इति वाच्यम् । द्रव्यत्वे सतीति विशेषणात् ।**

**व्याख्या-** पार्थिवमिन्द्रियं घ्राणेन्द्रियम् । घ्राणेन्द्रिये पार्थिवत्वे त्वनुमानं प्रमाणम्, तथा च- घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकगोघृतवदिति । अत्र घ्राणेन्द्रियं पक्षः, पार्थिवत्वं साध्यम्, रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वं हेतुः, कुङ्कुमगन्धाभिव्यञ्जकगोघृतमिति दृष्टान्तः । यत्र यत्र रूपादिषु मध्ये गन्धस्यैवाभिव्यञ्जकत्वं तत्र पार्थिवत्वं यथा कुङ्कुमगन्धाभिव्यञ्जकगोघृतमित्यन्वयव्याप्त्या पक्षधर्मताज्ञानपुरस्सरपरामर्शेण घ्राणेन्द्रिये पक्षे पार्थिवत्वं सिद्ध्यति । अत्र हेतोर्विशेष्यं यद् गन्धस्यैवाभिव्यञ्जकत्वं तद्घटकीभूतैवकारस्यान्ययोगव्यच्छेदोऽर्थस्तथा च रूपादिषु मध्ये गन्धेतराव्यञ्जकत्वे सति गन्धव्यञ्जकत्वादिति हेतुः सञ्जातः । अत्र यदि रूपादिषु मध्ये गन्धव्यञ्जकत्वमात्रं हेतुः क्रियते तदा तस्य मनस्यपि विद्यमानत्वान्मनसि व्यभिचारः, मनसः सर्वव्यञ्जकत्वाद् हेतुस्तत्रागतः परं साध्यं पार्थिवत्वं तत्र नास्तीति व्यभिचारः स्यादत एवकारस्य प्रवेश आवश्यकस्तस्यार्थश्च गन्धेतराव्यञ्जकत्वमिति । यदि च रूपादिषु मध्ये गन्धेराव्यञ्जकत्वमात्रं हेतुस्तदा रूपादिषु मध्ये गन्धेतराव्यञ्जके विशेषादौ व्यभिचारोऽतः उक्तं गन्धव्यञ्जकत्वमिति, विशेषस्य गन्धव्यञ्जकत्वाभावान्न व्यभिचारः । न च कुङ्कुमस्य यः सुगन्धस्तस्याभिव्यञ्जकं यद्गोघृतं तस्य स्वकीयरूपव्यञ्जकत्वात्तत्र रूपादिषु मध्ये गन्धेतराव्यञ्जकत्वरूपं यद् हेतुविशेषणं तन्नास्तीति दृष्टान्तासिद्धिनामको हेत्वाभासस्तत्रागतः, यतो हि दृष्टान्ते हेतोरसत्त्वं दृष्टान्तासिद्धिरिति चेत् तत्र हेतुविशेषणरूपादौ परकीयेति विशेषणं देयम् । तथा च रूपादिषु मध्ये परकीयगन्धेतराव्यञ्जकत्वे सति गन्धव्यञ्जकत्वं हेतुस्तस्य च कुङ्कुमगन्धाभिव्यञ्जकगोघृते सत्त्वान्न दृष्टान्तासिद्धिः ।

न चैवं नूतनघटस्य गन्धव्यञ्जके नूतनघटस्थजले व्यभिचारस्तस्य जलस्य स्वकीयरूपादिव्यञ्जकत्वेऽपि परकीयगन्धमात्रस्य व्यञ्जकत्वादिति वाच्यम् तस्य सक्तुरसाभिव्यञ्जकत्वान्न व्यभिचारः ।अथवा रूपादौ परकीयेति विशेषणं न देयम्, दृष्टान्तासिद्धिवारणाय वायूपनीतपार्थिवसुरभिभागस्य दृष्टान्तत्वसम्भवात् तस्य स्वकीयगन्धमात्रव्यञ्जकत्वादिति । न च घ्राणेन्द्रियगन्धसन्निकर्षस्यापि गन्धमात्रव्यञ्जकत्वात् तत्र च साध्याभावाद् व्यभिचार इति चेत् तत्र व्यभिचारवारणाय हेतौ द्रव्यत्वे सतीति विशेषणोपादानान्न व्यभिचारस्तथा चैतादृशानुमानेन घ्राणेन्द्रिये पार्थिवत्वं सिद्ध्यतीति घ्राणेन्द्रियं पार्थिवमिति सिद्धम् ।

पार्थिवेन्द्रियस्य घाणेन्द्रियस्य पार्थिवत्वनिरूपणानन्तरं पार्थिवं विषयं निरूपयति ग्रन्थकारः -

**मूलम्-** **विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ॥३८॥**

**विषय इति । उपभोगसाधनं विषयः । सर्वमेव कार्यजातमदृष्टाधीनम्, यत्कार्यं यददृष्टाधीनम्, तत्तदुपभोगं साक्षात् परम्परया वा जनयत्येव, न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति, तेन द्व्यणुकादि ब्रह्माण्डान्तं सर्वमेव विषयो भवति । शरीरेन्द्रिययोर्विषयत्वेऽपि प्रकारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः ॥३८॥**

**व्याख्या-** पार्थिवं विषयं निरूपयति विषय इत्यादिना। अनित्यपृथिव्या विषया द्व्यणुकादितो ब्रह्माण्डान्ताः सर्वे पदार्थाः सन्ति । यद्यपि परमाणुरपि विषयस्तथाप्यत्र अनित्याया एव पृथिव्या विषयकथनान्न परमाणुस्तादृशविषयः । शरीरेन्द्रिययोरपि विषयान्तर्गतत्वेऽपि बुद्धिवैशद्यार्थं गोबलीवर्दन्यायेन तयोः पार्थक्येन निरूपणम् । विषयलक्षणञ्चोपभोगसाधनत्वम् । एतच्च लक्षणं सर्वत्र पृथिव्यां सङ्गच्छते यतो हि सर्वा अपि पृथिव्यः साक्षात्परम्परया वा कस्यचिज्जीवस्योपभोगं जनयन्त्येव । अत एव विश्वनाथस्तत्र व्याप्तिं प्रदर्शयति- सर्वं हि कार्यजातमदृष्टाधीनमिति सामान्यव्याप्तिरियम् । अर्थात् ये ये विषयास्ते सर्वेऽपि साक्षात्परम्परया वोपभोगसाधनानि भवन्त्येव, यथा घटादय इति सामान्यव्याप्तिं प्रदर्श्य विशेषव्याप्तिमपि दर्शयति विश्वनाथः- यत्कार्यं यददृष्टाधीनं तत्तदुपभोगं जनयत्येव यतो हि बीजप्रयोजनाभ्यां विना कस्यचित् कार्यस्योत्पत्तिरसम्भवैव । अतः सर्वे विषयाः कञ्चिदुपभोगं जनयन्ति । तत्र कश्चिद् विषयः स्वोपभोगं साक्षाज्जनयति चेत् कश्चित् परम्परया जनयत्युपभोगमिति सर्वलोकस्य कारणप्रयोजनाधीनत्वेन सर्वत्र विषयलक्षणं सङ्गच्छत इति ।

## पदानामर्थाः

| | |
|---|---|
| जरायुजम् | = गर्भवेष्टनचर्मपुटकजन्यं शरीरम् |
| उपन्यासः | = प्रवेशः |
| आकस्मिकत्वम् | = कारणं विनैवोत्पन्नम् |
| अनुत्कटत्वम् | = अनुद्भूतत्वम् (प्रत्यक्षायोग्यत्वम्) |
| उपादानम् | = समवायिकारणम् |
| उपादेयम् | = समवेतकार्यम् |
| आचक्ष्महे | = स्वीकुर्मः |
| दृश्यत्वम् | = प्रत्यक्षयोग्यत्वम् |
| क्लेदः | = स्वेदः |
| आध्यात्मिकवायुः | = आत्मानम् = शरीरमधिकृत्य वर्तमानः प्राणवायुः |
| संरोहणम् | = सम्यक् प्रकारेण पुनरुद्भवनम् |
| अभिव्यञ्जकम् | = प्रकाशकः |
| सन्ततिः | = सन्तानः (परम्परा) |
| अन्तःपातिः | = आभ्यन्तरप्रविष्टः |
| पुञ्जः | = समूहः |
| उन्नयनम् | = संवर्धनम् |

| | |
|---|---|
| नवशरावः | = नूतनघटः |
| कुङ्कुमम् | = गन्धद्रव्यम् (केशर इति भाषायाम्) |
| कार्यजातम् | = कार्यसमूहः |
| अनैकान्तिकत्वम् | = व्यभिचारदोषः |

## अभ्यासाः

१. **सङ्क्षिप्तमुत्तरं देयम्**

(क) गन्धवत्वस्थाने गन्धसमवायिकारणत्वपदोपादानस्य प्रयोजनं लिखत ।

(ख) पाषाणे गन्धाभावे का क्षतिः ?

(ग) रसवत्त्वघटितं निर्दुष्टं पृथिव्या लक्षणं लिखत ।

(घ) पाकजस्पर्शः कुत्र तिष्ठति चर्चयत ।

(ङ) नृसिंहशरीरे कथं शरीरलक्षणं सङ्घटत इति विवेचयत ।

(च) परमाणुसाधिका युक्तिः प्रदर्शनीया ।

(छ) पार्थिवशरीरभेदान्नुल्लिखत ।

(ज) वृक्षादेः शरीरत्वे का युक्तिरिति चर्चयत ।

(झ) घ्राणेन्द्रिये पार्थिवत्त्वसाधकानुमाने हेतौ रवकाराप्रवेशे को दोषः ?

(ञ) विषयलक्षणमुल्लिख्य पार्थिवविषयाः के ? इति लिखत ।

२. **विस्तृतमुत्तरं स्वगिरा देयम्**

(क) पृथिवीत्वजातिं संसाध्य पाषाणे गन्धवत्त्वं युक्त्या साधयत ।

(ख) परमाणुपुञ्जवादं निरस्यातिरिक्तावयविवादं प्रतिपादयत ।

(ग) पार्थिवशरीरभेदान्नुल्लिख्य शरीरलक्षणं सपदकृत्यं चर्चयत ।

(घ) घ्राणेन्द्रिये पार्थिवत्वसाधकानुमानमुपस्थाप्य तत्रत्यहेतुविशेषणस्य प्रयोजनमुपपादयत ।

३. **कक्षायां चर्चाङ्कुरुत**

(क) गन्धवत्त्वलक्षणं सर्वत्र पृथिव्यां कथं सङ्गच्छत इति विषये ।

(ख) अवयविनोऽतिरिक्तसत्ताविषये ।

(ग) घ्राणेन्द्रियस्य पार्थिवत्वसाधकानुमानघटकहेतुविशेषणविषये ।

अष्टमः पाठः

# पारिभाषिकपदनिर्वचनम्

षडास्तिकदर्शनेष्वन्यतमं दर्शनं न्यायदर्शनं वर्तते ।न्यायदर्शनस्य प्रणेता महर्षिगौतमोऽस्ति ।महर्षिणा गौतमेन न्यायसूत्रप्रणयनेनास्य दर्शनस्य पल्लवनं कृतम् ।अस्य च न्यायनयस्य द्वे सरण्यौ स्तः ।तत्राद्या प्राचीनन्यायनाम्ना प्रसिद्धा सूत्रभाष्यक्रमेण षोडशपदार्थप्रतिपादिका प्रमेयनिरूपणप्रधाना व्यावहारिकपदबहुला चास्ति चेद् द्वितीया नव्यन्यायनाम्ना प्रसिद्धा विशेषतो गङ्गेशोपाध्यायाद्याचार्यसेविता प्रमाणनिरूपणप्रधाना प्रमाणक्रमेणार्थप्रतिपादिका प्रतियोगितानुयोगिताकार्यताकारणतादिपारिभाषिकपदबहुला परिष्कारप्रधाना च वर्तते । न्यायसिद्धान्तमुक्तावलीनामको विश्वनाथपञ्चाननभट्टाचार्यविरचितो ग्रन्थो नव्यन्यायसरणीमवलम्ब्य वैशेषिकाभिमतसप्तपदार्थानां न्यायदर्शनाभिमतचतुर्भिः प्रमाणैर्नव्यन्यायशैल्या प्रतिपादको ग्रन्थो वर्तते ऽतस्तद्ग्रन्थप्रतिपाद्यविषयाणां परिज्ञानाय पारिभाषिकपदानामर्थज्ञानमावश्यकमिति धिया जिज्ञासूनां छात्राणां पारिभाषिकपदानामर्थबोधायार्थाद्येषां परिभाषयैवार्थबोधो भवति न तु शक्त्यादिवृत्त्या तेषां केषाञ्चन पारिभाषिकपदानामर्थास्तेषां प्रयोगविधिश्च ग्रन्थार्थबोधदिङ्निर्देशनायात्र प्रस्तूयते । यथा-

**कर्तृत्वम्-** उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् । कार्यमात्रं प्रति कस्यचन कर्तुरपेक्षा भवति । कर्तारं विना कार्यमात्रस्योत्पत्तिरसम्भवा । स च कर्ता कः ? इति चेद् यस्मिन् पुरुषे यत्कार्यस्योपादन (समवायिकारण) विषयकापरोक्ष (प्रत्यक्ष) ज्ञानम्, तद्विषयिणी चिकीर्षा, तद्विषयिणी कृतिश्चास्ति स पुरुषः तत्कार्यस्य कर्ता भवति । यथा यो हि घटसमवायिकारणं प्रत्यक्षीकरोति, घटमिच्छति, इषित्वा च घटोत्पत्त्यर्थं यतते स एव घटस्य कर्ता कुलालः । एवञ्च घटः कार्यं तस्य कर्ता च कुलालः, घटे कार्यता, तस्याः कार्यताया अवच्छेदको धर्मो घटत्वम्, यतो हि घटनिष्ठायाः कार्यताया अवच्छेदको धर्मो घटनिष्ठकार्यतासमानाधिकरण एव भवति । समानाधिकरणधर्मयोरेवावच्छेद्यावच्छेदकभाव इति नियमाद् । ननु घटनिष्ठायाः कार्यताया अवच्छेदकस्तादृशकार्यतासमानाधिकरणघटवृत्तिघटत्वभिन्नः कश्चन तद्घटत्वपृथिवीत्वद्रव्यत्वादिष्वन्यतमो धर्मो भवेदिति चेन्न, अन्यूनानतिप्रसक्त-धर्मस्यैवावच्छेदकतया घटनिष्ठकार्यताया अन्यूनानतिप्रसक्तो धर्मो घटत्वमेवेति स एव धर्मोऽवच्छेदको घटनिष्ठकार्यतायाः, एवञ्च यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्न इति नियमाद् घटनिष्ठकार्यता घटत्वधर्मावच्छिन्ना, एवमेव कुलालः कर्ता चेत् कुलाले कर्तृता, कुलालनिष्ठा कर्तृता पूर्वोक्तप्रकारेण कुलालत्वधर्मावच्छिान्ना, एवञ्च कार्यत्वकर्तृत्वयोर्निरूप्यनिरूपकतया, घटत्वावच्छिन्नघटनिष्ठकार्यतानिरूपितकुलालत्वावच्छिन्ना कुलालनिष्ठा कर्तृता जाता । तथा

च घटत्वावच्छिन्नघटनिष्ठकार्यतानिरूपितकुलालत्वावच्छिन्नकुलालनिष्ठा कर्तृता तद्वान् कुलालो घटस्य कर्तृतेति एतत्प्रकृतिकाः प्रयोगा यथायथं स्वयमेवोहनीयाः ।

**कार्यत्वम्-** प्रागभावप्रतियोगित्वं कार्यत्वम् । यद्वस्तु प्रागभावस्य प्रतियोगि भवति तद्वस्तु कार्यं कथ्यते । ननु तर्हि प्रागभावस्य प्रतियोगी को भवतीति चेद्, य उत्पद्यते स प्रागभावस्य प्रतियोगी भवति । यथा कपालस्य कार्यं घटः कपाले घटोत्पत्तिपूर्वकाले घटो नासीत्, कुलालस्य कपालविषयककृत्या कपाले घट उत्पद्यतेऽत एव कुलालस्य कपालविषयककृतिकालं यावत् तत्र घटो भविष्यतीति प्रतीतिर्जायते स एव भविष्यतीति प्रतीतिविषयीभूतोऽभावो घटप्रागभावः तस्य प्रतियोगी च घटः (य उत्पद्यते स प्रागभावप्रतियोगीति नियमात्) प्रतियोगित्वं घटे तस्मात् प्रागभावप्रतियोगित्वस्य घटादौ विद्यमानत्वादुत्पद्यमानं घटादिकं कार्यम् । तथा च कपालनिष्ठकपालत्वावच्छिन्नकारणतानिरूपितघटत्वावच्छिन्नघटनिष्ठकार्यतावान् घट इति घटकपालयोः कार्यकारणभावः ।

**कारणत्वम्-** कार्यनियतपूर्ववृत्त्यनन्यथासिद्धं कारणम् । अर्थादनन्यथासिद्धत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वं तद्वत् कारणम् । यथा घटस्य कारणं दण्डः, दण्डो हि घटनियतपूर्ववृत्तिर्वर्ततेऽनन्यथासिद्धश्चेति दण्डो घटकारणम् । तथा च प्रयोग घटत्वावच्छिन्नघट-निष्ठकार्यतानिरूपितदण्डत्वावच्छिन्नदण्डनिष्ठकारणतावान् दण्ड इति घटदण्डयोः कार्यकारणभावः । तथैवान्यत्राप्यूह्यम् ।

**व्यापारः-** द्रव्यभिन्नत्वे सति तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारस्य लक्षणम् । यथा घटरूपकार्यं प्रति व्यापारो दण्डादेर्भ्रमिरूपक्रिया । भ्रमिक्रिया हि कर्मतया द्रव्यभिन्ना वर्तते । एवञ्चात्रोभयत्र तत्पदेन करणं ग्राह्यम्, करणञ्चात्र दण्डोऽतो दण्डरूपकरणजन्यत्वं भ्रम्यां वर्तते । तथैव दण्डरूपकरणजन्यघट-जनकत्वमपि भ्रम्यां वर्तत इति भ्रमिरूपक्रियायां द्रव्यान्यत्वस्य दण्डरूपकरणजन्यघटजनकत्वस्य च सत्त्वाद् दण्डभ्रमी घटकार्यं प्रति व्यापारः ।

**अव्याप्तिः-** लक्ष्यैकदेशावृत्तित्वमव्याप्तिः । अव्याप्तिः कश्चन लक्षणगतदोषविशेषो वर्तते । यतो हि यदव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रयशून्यो यो लक्ष्यमात्रवृत्त्यसाधारणो धर्मस्तदेव लक्षणम् । यथा गोः श्रृङ्गित्वे सति सास्नावत्त्वमिति । यश्च धर्मो लक्ष्यस्य कस्मिँश्चिदेकदेशे न वर्तते स धर्मो न लक्षणमव्याप्तिदोषग्रस्तत्वाद् । यथा गोः कपिलत्वम्, तद्यदि गोर्लक्षणं क्रियते तदा तस्य कपिलगव्येव वर्तमानत्वेन शुक्लकृष्णादिषु गोष्ववृत्तित्वादव्याप्तिरिति कपिलत्वं न गोर्लक्षणम् । अव्याप्तेर्निष्कृष्टं लक्षणन्तु- लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वमिति । यथा कपिलत्वलक्षणस्य लक्ष्या गौः, लक्ष्यतावच्छेदकं गोत्वम्, तच्च सर्वासु गोषु विद्यतेऽतः शुक्लकृष्णादिषु गोष्वपि वर्तत एव, तत्र च कपिलत्वंनास्तीत्यभावोऽपि वर्तत इति कपिलत्वे लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्य

विद्यमानत्वात् कपिलत्वमव्याप्तमिति कपिलत्वं न गोर्लक्षणम् । एवमेवान्यत्रापि बोध्यम् ।

**अतिव्याप्तिः-** लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वमतिव्याप्तिः । यथा गोर्यदि श्रृङ्गित्वं लक्षणं क्रियते तदा तत्रातिव्याप्त्या तल्लक्षणं भवितु न शक्नोति । यतो हि श्रृङ्गित्वं लक्ष्ये गवि, अलक्ष्ये महिष्यादौ च वर्ततेऽतः श्रृङ्गित्वं गोर्न लक्षणमव्याप्तिदोषग्रस्तत्वाद् । अतिव्याप्तेर्निष्कृष्टं स्वरूपन्तु लक्ष्यतावच्छेदकसामानाधिकरण्ये सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यम् । इदमपि लक्षणमतिव्याप्तेर्दोषस्य स्वरूपमात्रमतिव्याप्तस्य लक्षणस्य तु तटस्थं लक्षणम् । तच्च यथात्रैव- लक्ष्या गौः, लक्ष्यतावच्छेदकं गोत्वम्, तच्च गोषु विद्यते, तत्रैव गोषु श्रृङ्गित्वमपि वर्ततेऽतः श्रृङ्गित्वं लक्ष्यतावच्छेदकगोत्वसमानाधिकरणं जातम्, लक्ष्यतावच्छेदकगोत्वसामानाधिकरण्यं श्रृङ्गित्वे आगतम्, एवञ्च लक्ष्यतावच्छेदकगोत्वावच्छिन्नप्रतियोगिताको भेदो वर्तते गौर्नेत्याकारको भेदः,तादृशभेदो महिष्यादौ वर्तते तत्र च श्रृङ्गित्वमपीति श्रृङ्गित्वे लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यस्य च विद्यमानत्वात् श्रृङ्गित्वमतिव्याप्तमत एव तन्न गोर्लक्षणम् ।

**असम्भवः-** लक्ष्यमात्रावृत्तित्वमसम्भवोऽर्थाल्लक्ष्यमात्रे कुत्रापि लक्षणासत्त्वमसम्भवः । यथा गोरेकशत्त्ववत्त्वम्, एकशफवत्त्वं हि न कास्वपि गोषु वर्तते, गोमात्रस्य द्विशफवत्त्वेन गवि एकशफवत्त्वमसम्भवम् । असम्भवस्य निष्कृष्टं लक्षणन्तु लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम् । यथैकशफवत्त्वे लक्ष्या गौः, लक्ष्यतावच्छेदकं गोत्वं तद्व्यापकीभूताभाव एकशफवत्त्वाभावः तत्प्रतियोगित्वस्यैकशफवत्त्वे सत्त्वादेकशफवत्त्वमसम्भवदोषग्रस्तमिति तन्न गोर्लक्षणम् ।

**प्रतियोगित्वम्-**प्रतियोगित्वानुयोगित्वव्यवहारः त्रिषु स्थलेषु भवति।अभावस्थले,सम्बन्धस्थले,सादृश्यस्थले च । विशेषतो न्यायशास्त्रेषु यस्याभावः स प्रतियोगी तस्य भावः प्रतियोगित्वमित्यभावीयप्रतियोगित्वमादाय चर्चा बहुत्र विधीयते यथा घटो नास्ति, घटो नेत्यादिस्थलेऽभावो घटाभावोऽत एतदभावीयः प्रतियोगी घटः प्रतियोगिता घटे, घटनिष्ठा प्रतियोगिता च केनचिद्धर्मेण केनचित्सम्बन्धेन चावच्छिन्ना भवति । यतो हि धर्मान्तरेण सम्बन्धान्तरेण च घटवत्यपि भूतलादावन्यसम्बन्धेनान्यधर्मेण च घटाभावः तिष्ठत्येव । अतो घटनिष्ठा प्रतियोगिता केनचिद्धर्मेण केनचित्सम्बन्धेन चावच्छिन्ना मन्तव्या । अवच्छेदनीयेत्यर्थः । यथा भूतले संयोगेन घटो नास्तीत्युक्तौ घटनिष्ठा प्रतियोगिता घटत्वधर्मेण संयोगसम्बन्धेन चावच्छिन्ना भवति । यतो हि घटनिष्ठायाः प्रतियोगिताया अवच्छेदको धर्मः स एव यो धर्मो घटनिष्ठायाः प्रतियोगिताया अन्यूनानतिप्रसक्तो भवति । तादृशश्च धर्मो घटत्वमेव । तथा सति यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्न इति नियमाद् घटनिष्ठा प्रतियोगिता घटत्वधर्मावच्छिन्ना जाता । एवमेव येन सम्बन्धेन यत्र यन्नास्तीत्युच्यते स सम्बन्धः तन्निष्ठायाः प्रतियोगिताया अवच्छेदकः सम्बन्ध इति नियमाच्च भूतले यदि संयोगेन घटो नास्तीत्युच्यते तदा घटनिष्ठा प्रतियोगिता संयोगसम्बन्धावच्छिन्नाथ च

घटत्वधर्मावच्छिन्नेति वाच्या । तथा च प्रतियोगित्वानुयोगित्वयोर्निरूप्यनिरूपकतया प्रयोगो भवति- संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रतियोगितानिरूपितानुयोगितावदभावो घटाभाव इति । अथवा संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रतियोगितानिरूपकोऽभावो घटाभावः, तादृशप्रतियोगिताकाभावो वा घटाभाव इति वा । अयञ्च व्यवहारः (प्रयोगः) अभावस्थले भवति । अत्र प्रतियोगिताया निरूपकत्वसम्बन्धेनाभावेऽन्वयो भवति । अतः प्रतियोगितानिरूपकोऽभाव इत्युच्यते । सम्बन्धस्थले तु येन सम्बन्धेन यस्तिष्ठति स तस्य सम्बन्धस्य प्रतियोगी, यत्र च तेन सम्बन्धेन तिष्ठति सोऽनुयोगी । यथा संयोगेन भूतले घटस्तिष्ठति चेद् घटः संयोगसम्बन्धस्य प्रतियोगी, भूतलञ्च तस्य सम्बन्धस्यानुयोगि कथ्यते । तथा च प्रयोगः - घटप्रतियोगिको भूतलानुयोगिकः संयोगसम्बन्धः सादृश्यस्थले तु यस्य सादृश्यं स तस्य सादृश्यस्य प्रतियोगी, यस्मिन् सादृश्यं स तस्य सादृश्यस्यानुयोगी । यथा चन्द्रवन्मुखमित्यत्र चन्द्रः प्रतियोगी मुखमनुयोगि, तथा च चन्द्रवन्मुखमित्यत्र प्रयुज्यते चन्द्रप्रतियोगिकमुखानुयोगिकसादृश्यवन्मुखमिति ।

**अनुयोगिता-** अनुयोगित्वव्यवहारोऽपि प्रतियोगित्वव्यवहारवत् त्रिषु स्थलेषु एव भवति । तत्राभावस्थले घटादयः प्रतियोगिनोऽभावानुअयोगिनो भवन्ति । सम्बन्धस्थले येन सम्बन्धेन यस्मिन् तिष्ठति यद्वस्तु तद्वस्तु तस्य सम्बन्धस्यानुयोगि कथ्यते । यथा संयोगेन भूतले घटस्तिष्ठति चेद् भूतलमनुयोगि भवति । सादृश्यस्थले च यस्य सादृश्यं स प्रतियोगी यस्मिन् सादृश्यं सोऽनुयोगी, अतश्चन्द्रवन्मुखमित्यत्र सादृश्यस्य मुखमनुयोगि वर्तते ।

**पक्षः -** सन्दिग्धसाध्यवान् पक्षोऽर्थाद्यत्र साध्यस्य सन्देहो भवति स साध्यसन्देहस्य धर्मी पक्षः । यथा पर्वतो वह्निमान् धूमादित्यनुमानप्रयोगे पर्वतः पक्षः, वह्निः साध्यः, धूमो हेतुर्भवति । तत्रेत्थं बोध्यम्- अनुमानवाक्यस्य चत्वारोंऽशा भवन्ति । पक्षः साध्यो हेतुर्दृष्टान्तश्चेति । तत्र पक्षः कः ? इति चेद्यत्र हेतोर्निश्चयो वर्तते साध्यस्य च निर्णयो न वर्तते किन्तु सन्देहोऽस्ति, तत्र हेतुज्ञानपुरस्सरं व्याप्तिपक्षधर्मतादिनिश्चयेन यत्र साध्यस्य निर्णयो जायते स पक्षः । यथा पर्वतो वह्निमान् धूमाद् महानसवदित्यनुमानवाक्यस्थले पर्वतः पक्षो वर्तते तत्र पर्वते इदानीं वह्निरूपस्य साध्यस्य निश्चयो नास्ति, व्याप्तिज्ञानादिना पश्चाद् वह्नेरनुमितिर्भवतीत्यनुमित्युद्देश्यः पक्षः इत्यपि वक्तुं शक्यते । पक्षे साध्यस्य निश्चयाभावादेव नवीनैः सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता तद्वान् पक्ष इत्यपि पक्षस्वरूपं प्रतिपाद्यते । तस्यार्थश्च साधयितुमिच्छा सिषाधयिषा तस्या यो विरहोऽभावस्तेन विशिष्टो यः साध्यवत्तानिश्चयरूपायाः सिद्धेरभावः सैव पक्षतेति ।

**साध्यम्-** अनुमानप्रमाणेन पक्षे साधयितुं योग्यं साध्यं कथ्यते । तच्च साध्य पक्षेऽनिश्चितं सपक्षे च निश्चितं भवति प्रायः । यथा पर्वतो वह्निमान् धूमाद् महानसवदित्यत्रानुमानस्थले पर्वते पक्षे साधयितुं

योग्यो वह्निः साध्यो भवति । तथैव अयमात्मा ज्ञानदित्यत्र आत्मत्वं साध्यम्, अयं कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगः साध्यः । एवमेवान्यत्रापि स्थलेषु बोध्यम् ।

**हेतुः-** अनुमानवाक्यस्थले पञ्चम्यन्तः तृतीयान्तो वा साध्यस्य ज्ञापकोऽर्थाद्यस्य ज्ञानेन पक्षे साध्यस्यानुमितिर्भवति स लीनसाध्यस्य गमको हेतुर्भवति । यथा पर्वतो वह्निमान् धूमाद् महानसवदित्यत्रानुमानस्थले पर्वते पक्षे वह्निरूपस्य साध्यस्यानुमापको धूमो हेतुपदवाच्यो भवति । हेतौ च पञ्चधर्मा भवन्ति ते च धर्माः पक्षसत्त्वम्, सपक्षसत्त्वम्, विपक्षाद् व्यावृतत्त्वम्, अवाधितविषयत्वम्, असत्प्रतिपक्षितत्वञ्चेति । तत्र हेतुः पक्षे विद्यमानो भवेत् तदैव स पक्षे विद्यमानो हेतुरज्ञायमानं साध्यं साधयितुमर्हति नान्यथेति हेतौ पक्षसत्त्वमावश्यकम् । एवमेव पक्षे हेतुना साध्यसाधनायो दाहरणस्यापेक्षा भवति, उदाहरणं विना हेतुज्ञानमात्रेण पक्षे साध्यस्यानुमितेरभावाद्, उदाहरणञ्च यत्र साध्यस्य निश्चयः पूर्वतो विद्यते तदेव भवतीति निश्चितसाध्यवान् सपक्षः स एवोदाहरणं तत्र च हे तोर्वृत्तिरावश्यकीति हेतौ सपक्षसत्त्वमपेक्षितम् । यदि हेतुः विपक्षे निश्चितसाध्याभाववति वर्तते तदा स हेतुः व्यभिचारी भवति । व्यभिचारिहेतुश्च साध्यं साधयितु नार्हतीति साध्यसाधनाय हेतौ विपक्षाद् व्यावृत्तत्वज्ञानमपेक्षितं भवतीति हेतोस्तृतीयो धर्मो विपक्षाद् व्यावृत्तत्वम् । एवं हेतुना साधनीयं वस्तु साध्यं पक्षे प्रमाणान्तरेणाबाध्यं भवितव्यमिति । अर्थाद् हेतौ अबाधितविषयत्वमपेक्षितं भवति तस्माद्धेतोः चतुर्थो धर्मोऽबाधितविषयत्वम् । हेतुना पक्षे साध्यसाधनाय यथा हेतौ व्याप्तिपक्षधर्मतादेरपेक्षा भवति तथैव स्वसमानबलशालिविरोधिहत्वन्तराभावस्याप्यपेक्षा भवति । अन्यथा स्वसमानबलशालिविरोधिहेतोः सत्त्वेन व्याप्त्यादिना पक्षेऽनुमितिः प्रतिरुध्येतेति बलशाल्यपि हेतुः साध्यं साधयितुं न शक्नोति । अतो निष्फलः स्यादतः हेतावसत्प्रतिपक्षितत्वमपि अपेक्षितं भवत्येव । तस्यार्थश्च सन् = विद्यमानः, प्रतिपक्षो = विरोधीति सत्प्रतिपक्षः, सत्प्रतिपक्षः, सञ्जातः अस्य इति सत्प्रतिपक्षितः, न सत्प्रतिपक्षितः इति असत्प्रतिपक्षितः तस्य भावोऽसत्प्रतिपक्षितत्वम् । यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते सः सत्प्रतिपक्षितः तद्भिन्नोऽसत्प्रतिपक्षितः सद्धेतुः तत्र च हेतौ असत्प्रतिपक्षितत्त्वं यदा ज्ञायते तदैव तस्य हेतोर्ज्ञानेन साध्यस्यानुमितिर्भवतीति सद्धेतौ असत्प्रतिपक्षितत्त्वमपेक्षिमिति रीत्या पञ्च धर्माः सद्धेतौ वर्तन्ते । तेषु द्वाभ्यां त्रिभिर्वा हीनोऽसद्धेतुः कथ्यते ।

**दृष्टान्तः-** दृष्टः = अपरोक्षज्ञानविषयीकृतः, अन्तः = साध्यो यत्र स दृष्टान्तः । अर्थाद्यत्र वादिप्रतिवादिभ्यां साध्यस्य निर्णयः पूर्वतः कृतो वर्तते स वादिप्रतिवादिभ्यां साध्यवत्त्वेन पूर्वतः स्वीकृतोऽर्थो दृष्टान्तः । दृष्टान्त एव उदाहरणपदेनापि व्यवह्रीयते । यथा पर्वतो वह्निमान् धूमाद् महानसवदित्यत्र महानसं दृष्टान्तः । महानसे वह्नेर्ज्ञानं वादिप्रतिवादिनोरनुमितेः पूर्वमेवासीदिति निश्चितसाध्यवान् सपक्ष एव दृष्टान्तो भवितुं शक्नोति ।

**प्रतिबन्धकत्वम् -** कारणीभूताभावप्रतियोगित्वम् प्रतिबन्धकत्वम् । यथा दाहरूपकार्यं प्रति चन्द्रकान्तमण्यभावः कारणीभूताभावः, यतो हि चन्द्रकान्तमणिसत्त्वे वह्नौ सत्यपि दाहाभावात् । एवञ्च कारणीभूतचन्द्रकान्तमण्यभावस्य प्रतियोगि चन्द्रकान्तमणिः, तादृशप्रतियोगिनि चन्द्रकान्तमणौ प्रतियोगित्वस्य चन्द्रकान्तमणौ सत्त्वाच्चन्द्रकान्तमणिः दाहप्रतिबन्धकस्तत्र च प्रतिबन्धकत्वम् । अयञ्च स्वरूपेण प्रतिबन्धकः । ज्ञातं सत्प्रतिबन्धकन्तु ज्ञानमेव तच्च लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धिं प्रत्यनाहार्याप्रामाण्यज्ञानानास्कन्दिततदभाववत्ताबुद्धिः, तदभावव्याप्यवत्ताबुद्धिश्च प्रतिबन्धिका । यथा लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यायां पर्वतो वह्निमानित्यनुमितौ शब्दबुद्धौ च अनाहार्याप्रामाण्यज्ञानानास्कन्दितपर्वतो वह्न्यभाववानिति बुद्धिः प्रतिबन्धिका भवति ।

**उत्तेजकत्वम्-** प्रतिबन्धकसत्त्वे यत्सत्त्वे कार्योत्पत्तिः तत्तत्कार्यं प्रत्युत्तेजकम्, तत्र च वर्तमानो धर्म उत्तेजकत्वम् । यथा दाहरूपे कार्ये सूर्यकान्तमणिरुत्तेजकः । सूर्यकान्तमणिसत्त्वे चन्द्रकान्तमणिसमवधानेनापि वह्निना दाहजननात्सूर्यकान्तमणिर्दाहं प्रत्युत्तेजकः ।

**अप्रयोजकत्वम् -** व्यभिचारशङ्कानिवारकतर्कशून्यत्वम् । अनुमानप्रक्रियायां पक्षे साध्यसाधनाय प्रयुक्तहेतौ यदि पूर्वपक्षी व्यभिचारदोषमुद्भावयति तदा तं व्यभिचारं दोषं निवर्तयितुं यदि सिद्धान्ती व्यभिचारनिवारकं तर्कं नोद्भावयति चेत् स सिद्धान्तिना प्रयुक्तो हेतुरप्रयोजको भवति । यथा पर्वतो धूमवान् वह्नेरित्यनुमानस्थले यदि कश्चिद् वह्नौ हेतौ वह्निरस्तु धूमो मास्त्विति व्यभिचारदोषमुद्भावयेत् तदा तादृशव्यभिचारशङ्कानिवारणाय यदि कश्चन तर्कः प्रयोक्तुं न शक्यते चेत्तदायं वह्निहेतुरप्रयोजको भवति, अप्रयोजकहेतुज्ञानेन च पक्षे साध्यस्यानुमितिरसम्भवा, व्यभिचारशङ्कया तत्र व्याप्तिज्ञानप्रतिबन्धात् ।

## पदानामर्थाः

सरणी = पन्था, विधिः, पद्धतिः

पल्लवनम् = विस्तारः

प्रणयनम् = रचना

अन्यतमम् = बहुष्वेकम्

पारिभाषिकं पदम् = परिभाषयार्थबोधकं पदम्

दिङ्निर्देशः = पथप्रदर्शनम्

सपक्षः = निश्चितसाध्यवान्

विपक्षः = निश्चितसाध्याभाववान्

दृष्टान्तः = यस्मिन्नर्थे वादिप्रतिवादिनोः बुद्धिसाम्यं स दृष्टान्तः

| | | |
|---|---|---|
| आहार्यम् | = | बाधकालीनेच्छाजन्यं ज्ञानम् |
| प्रामाण्यम् | = | ज्ञानगतं याथार्थ्यम् |
| आस्कन्दितम् | = | गृहीतम् |
| व्यभिचारः | = | हेतुगतदोषविशेषः । स च साध्याभाववद्वृत्तित्वरूपः |
| तर्कः | = | अनिष्टापादानम् |
| उद्भावनम् | = | उत्थापनम् |

## अभ्यासाः

**१. अतिसङ्क्षिप्तमुत्तरं देयम्**

(क) न्यायदर्शनस्य प्रणेता कः ?

(ख) पारिभाषिकपदानां बहुशः प्रयोगः कुत्र कृतो वर्तते ?

(ग) कारणस्य लक्षणं किम ?

(घ) अव्याप्तेरेकमुदाहरणं दत्त ।

(ङ) अभावीयप्रतियोगित्वन्नाम किम् ?

(च) घटाभावीयप्रतियोगितावच्छेदको धर्मः कः ?

(छ) समाप्तौ विघ्नध्वंसः करणं वा व्यापारः ?

(ज) अप्रयोजकत्वमित्यस्य कोऽर्थः ?

(झ) तद्वत्ताबुद्धिं प्रति प्रतिबन्धकं किम् ?

(ञ) पारिभाषिकपदमित्यस्य कोऽर्थः ?

**२. स्वोपज्ञतया व्याख्याङ्कुरुत**

(क) कर्तृत्वं परिभाष्य कुलालनिष्ठकर्तृतावच्छेदकं किमिति विवेचयत ।

(ख) व्यापारलक्षणं कुत्रचिल्लक्ष्ये समन्वयं कुरुत ।

(ग) लक्षणस्य लक्षणं विलिख्यातिव्याप्तेरेकमुदाहरणं दत्त ।

(घ) प्रतियोगित्वव्यवहारः कुत्र कुत्रेति पाठमनुसृत्य प्रतिपादयत ।

(ङ) अनुमानवाक्यस्याङ्गानि कानि ? इति प्रतिपाद्य पक्षस्य परिचयो देयः ।

(च) सद्धेतौ कति धर्मा भवन्ति के च ते ?

(छ) प्रतिबन्धकत्वन्नाम किमित्युदाहरणसहितं लिखत ।

(ज) पाठमनुसृत्यावच्छेदकावच्छेद्यधर्मौ परिचायत ।

# व्याकरणखण्डः

# लकारपरिचयः

**येनाक्षरसमाम्नायमधिगम्य महेश्वरात्**

**कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥**

महामुनिपाणिनिविरचितस्य अष्टाध्यायीग्रन्थस्य तृतीयाध्याये लडादिप्रत्यया विहिताः सन्ति । ते च प्रत्यया धातोर्भवन्ति । धातवः तिङन्तपदानां प्रकृतयः सन्ति । पाणिनिना धातूनां पाठः पृथग् विहितोऽस्ति । स च पाणिनीयधातुपाठ इति प्रसिद्धः । तथैव मैत्रेय-काश्यप-शाकटायनादीनामपि धातुपाठा दृश्यन्ते । तेषामर्थनिर्देशोऽपि व्याख्यातृभिर्विहितः । 'भूवादयो धातवः' (पा. सू. १।३।१) इति सूत्रेण निर्दिष्टाः क्रियावाचिनो भूवादय (भूप्रभृतयो वासदृशाः) धातवो भवन्ति । एते मूलधातव इत्युच्यन्ते । 'सनाद्यन्ता धातवः' (पा.सू. ३।१।३२) इति सूत्रेण येषां धातुसंज्ञा विहिता ते निष्पादिताः धातवो भवन्ति । सामान्यतो मूलधातूनामर्थः 'भू सत्तायाम्', 'डुकृञ् करणे' इत्यादिरीत्या तत्र तत्र प्रदर्शितोऽस्ति । प्रसङ्गभेदेन धातूनामनेकार्थत्वमपि दृश्यते ।

धात्वर्थविचारक्रमे सर्वेषां धातूना फलं व्यापारश्चेति द्विधा अर्थविभागो बोद्धव्यः । सर्वेभ्योऽपि धातुभ्यो 'धातोः' (पा. सू. ६।१।९१) इति सूत्राधिकारप्राप्ता लडादयः प्रत्ययाः कृत्प्रत्ययाश्च भवन्ति । तत्र लडादिस्थाने तिङादिप्रत्ययानां विधानेन सिद्धानि पदानि तिङन्तपदानि भवन्ति । तिङन्तत्वेन 'सुप्तिङन्तं पदम्' (पा. सू. १।४।१४) इति तेषां पदसंज्ञा भवति । तादृशानां तिङन्तपदानां सिद्धिप्रक्रिया तिङन्तप्रकरणे प्रदर्श्यते ।

**तत्र भ्वादिगणप्रकरणम्**

पाणिनीयधातुपाठे पठितानां धातूनां विभागः विकरणभेदेन दशधा विधीयते ।धातोः परं तिङादिप्रत्ययात्पूर्व धातुमध्ये वा विधीयमानः प्रत्ययो विकरणम् इत्युच्यते । विकरणभेदेन भ्वादिप्रकरणानां भेदो बोद्धव्यः । तथा हि भ्वादिगणे शप्, अदादिगणे शब्लुक्, जुहोत्यादिगणे शपः श्लुः, दिवादिगणे श्यन्, स्वादिगणे श्नुः, तुदादिगणे शः, रुधादिगणे श्नम्, तनादिगणे उः, क्र्यादिगणे श्ना, चुरादिगणे णिच् इत्यादीनि विकरणानि भवन्ति । तत्र शब्विकरणा धातवः भ्वादिगणे सन्निविष्टाः सन्ति । प्रकरणारम्भे भूधातोः पाठात् भ्वादिप्रकरणमिति प्रकरणनामनिर्देशो विहितः ।

| **क्र.सं.** | **गणः** | **विकरणम्** | **उदाहरणम्** |
|---|---|---|---|
| १. | भ्वादि | शप् (अ) | भू - भवति । |
| २. | अदादि | शप् (लुक्) | अद् - अत्ति । |

| | | | |
|---|---|---|---|
| ३. | जुहोत्यादि | शप् (श्लु) | हु - जुहोति । |
| ४. | दिवादि | श्यन् (य) | दिव् - दीव्यति । |
| ५. | स्वादि | श्नु (नु) | सु - सुनोति |
| ६. | तुदादि | श (अ) | तुद् - तुदति |
| ७. | रुधादि | श्नम् (न) | रुध् - रुणद्धि |
| ८. | तनादि | उ | तनु - तनोति |
| ९. | क्र्यादि | श्ना (ना) | क्री - क्रीणाति |
| १०. | चुरादि | णिच् (इ) + शप् (अ) | चुर् - चोरयति |

**दशलकारनिर्देशस्तेषां परिचयश्च**

लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् । एषु पञ्चमो लकारश्छन्दोमात्रगोचरः ।

लडादयो दश लकाराः सन्ति । लातिरिक्तानां वर्णानामनुबन्धलोपो भवतीति लकार इति एतेषां नाम । एतेषु दशसु लकारेषु पञ्चमो लेट्-लकारो वेद एव प्रयुज्यते । लौकिकसंस्कृते एतस्य प्रयोगो न भवति । अतोऽत्र लेट्लकारस्य रूपाणि न व्युत्पाद्यन्ते । लिङ्लकारो विध्याद्याशीर्वादभेदेन द्विविधः । अतः तिङन्तप्रकरणे धातूनां लेड्भिन्नानां दशानां लकाराणां रूपाणि व्युत्पाद्यन्ते ।

**लकारपरिचयः**

धातोर्विविधेष्वर्थेषु लडादयो लकारा भवन्ति । लकारेणैव धातुवाच्यक्रियायाः कालादीनां च बोधो भवति । इदानी लकारबोध्यस्य कर्त्राद्यर्थस्य कालस्य च परिचयार्थं लकारार्थबोध आवश्यक इति तन्निरूप्यते ।

| क्रमः | लकारः | अर्थः | प्रयोगनिदर्शनम् |
|---|---|---|---|
| १. | लट् - | वर्तमानेऽर्थे विद्यमानाद्धातोर्लट्-लकारो विधीयते । सामान्यवर्तमाने गौणवर्तमाने च लट्-लकारस्य क्रियापदानि प्रयुज्यन्ते । | रामः पठति । कदा गमिष्यसि ? अहं गच्छामि । |
| २. | लिट् - | भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट्-लकारो भवति । | त्रेतायां रामो राजा बभूव । |
| ३. | लुट् - | भविष्यत्यनद्यतनेऽर्थे धातोर्लुट्-लकारो भवति । अनद्यतनभविष्यत्काले लुटः क्रियापदानि प्रयोक्तव्यानि । | अहं श्वो विद्यालयं गन्तास्मि । |

| | | | |
|---|---|---|---|
| ४. | लृट् - | भविष्यदर्थाद्धातोर्लृट्-लकारो भवति । सामान्यभविष्यत्काले अस्य प्रयोगः कर्तव्यः । | त्वं पठिष्यसि । |
| ५. | लोट् - | विध्यादिष्वर्थेषु आशीर्वादेऽर्थे च धातोर्लोट्लकारो भवति । | भवान् अत्र तिष्ठतु । (त्वम्) आयुष्मान् भव । |
| ६. | लङ् - | अनद्यतनभूतार्थवृत्तेर्धातोर्लङ्लकारो भवति | यथा- स ह्यः कुत्र आसीत् ? |
| ७. | विधिर्लिङ् | विध्यादिष्वर्थेषु द्योत्येषु धातोर्लिङ्लकारो भवति । | यथा-स पूजायामागच्छेत् । |
| ८. | आशीर्लिङ् | आशीर्वादेऽर्थे द्योत्ये धातोर्लिङ्लकारो भवति । अप्राप्तस्य प्राप्तेरिच्छा आशीर्वादः । | यथा- शुभं भूयात् । |
| ९ | लुङ् | भूतार्थवृत्तेर्धातोर्लुङ्लकारो भवति । अद्यतन-सामान्य-व्यामिश्र-गौणभूतकाले लुङ्लकारस्य क्रियापदानि प्रयुज्यन्ते । | स अद्य प्रातः स्नानम् अकार्षीत्/अकृत । सोऽगमत् । ह्योऽद्य वाऽगमत् । देवश्चेदवर्षीत्, धान्यमवाप्स्म |
| १०. | लृङ् | क्रियाया अनिष्पत्तौ गम्यमानायां हेतुहेतुमद्भावादि-लिङ्निमित्ते भविष्यत्यर्थे धातोर्लृङ्लकारो भवति । | यथा- सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत् |

तत्र विशेषतः लट्, लोट्, लङ्, विधिर्लिङ् लकारेषु रूपनिर्माणार्थं विकरणज्ञानमावश्यकम् । अन्येषु लकारेषु विकरणज्ञानेन विनापि रूपावलिनिर्माणं कर्तुं शक्यत इति विकरणस्य तावान् प्रभावो न दृश्यते ।

**कालपरिचयः**

**भूतकालः**

अद्यतनानद्यतन-परोक्ष-गौण-व्यामिश्र-सामान्यभेदेन भूतकालः षड्विधो भवति । अत्र परोक्षत्वं अद्यतनेऽनद्यतने च सम्भवतीति परोक्षभूतकालम् अद्यतनानद्यतनभूतकालेऽन्तर्भाव्य पञ्चविध एव भूतकाल इति व्यवह्रियते ।

व्यतीताया रात्रेः पश्चार्द्धेन आगामिन्या रात्रेः पूर्वार्द्धेन च सहितः कालः (सकलो दिवसः) अद्यतनः, तद्भिन्नः कालोऽनद्यतनः । अनद्यतनकालो द्विविधः- भूतानद्यतनो भविष्यदनद्यतनश्च । अद्यतनभिन्नो व्यतीतः कालो भूतानद्यतनः, आगामी तु भविष्यदनद्यतनः । परोक्षत्वं प्रयोक्तुरिन्द्रियागोचरत्वम् ।

अद्यतनाद्यतनयोर्मिश्रितः कालो व्यामिश्रः, व्यतीतो व्यामिश्रकालो व्यामिश्रभूतः ।आशंसादीनामतिदिश्यमानो भूतकालो गौणभूतः । भूतानद्यतनपरोक्षे लिटः, भूतानद्यतने लङः, अद्यतन-सामान्य-व्यामिश्र-गौणभूते लुङः क्रियापदानां प्रयोगः कार्यः ।

**वर्तमानकालः**

प्रारब्धापरिसमाप्तिक्रियाश्रयत्वं वर्तमानत्वम् । वर्तमानकालो द्विविधः, मुख्यो गौणश्च । वर्तमानकालापेक्षो मुख्यः । वर्तमानसामीप्ये अतिदिश्यमानो वर्तमानकालो गौणः । गौणे सामान्ये च वर्तमानकाले लट्-लकारस्य प्रयोगो भवति ।

**भविष्यत्कालः**

अद्यतनानद्यतन-व्यामिश्र-सामान्यभेदेन भविष्यत्कालश्चतुर्विधोऽस्ति । अद्यतनभिन्नागामिकालो भविष्यदनद्यतनस्तत्र लुट्-लकारः प्रयोज्यः । अद्यतन-व्यामिश्र-सामान्यभविष्यत्काले लृटः क्रियापदानि प्रयोक्तव्यानि ।

**धातुपरिचयः**

सर्वेषामपि धातूनामर्थद्वयं भवति- फलं व्यापारश्च । तत्र व्यापारो नाम क्रिया, स च फलजनको भवति । व्यापारस्य आश्रयो यो भवति स कर्तेत्युच्यते । फलाश्रयन्तु कर्म भवति । येषां धातूनां फलं व्यापारश्च एकत्रैव वर्तेते ते धातवोऽकर्मका भवन्ति । येषां धातूनां फलं व्यापारश्च पृथग् भवतः स धातुः सकर्मको भवति । अतोऽर्थदृष्ट्या धातवः द्विधा भवन्ति- सकर्मका अकर्मकाश्च । यत्र धातोः फलाश्रयरूपेण कर्मणोऽपेक्षा भवति स धातुः सकर्मक इत्युच्यते । यस्य च धातोः कर्म न सम्भवति सोऽकर्मको भवति । यथा- रामो ग्रामं गच्छति इत्यत्रोत्तरदेशसंयोगानुकूलो व्यापारो गमेरर्थः । उत्तरदेशसंयोगः ग्रामे तिष्ठति । तदनुकूलः पादचालनादिव्यापारो रामे तिष्ठतीति फलव्यापारयोरसमानाधिकरणत्वाद् गम्धातुः सकर्मकः । भूधातोरात्मधारणानुकूलव्यापारोऽर्थः । तत्र आत्मधारणं तदनुकूलव्यापारश्च एकत्र तिष्ठत इति भूधातुरकर्मकः ।

एवञ्च धातवोऽजन्ता हलन्ताश्चेति द्विधा भवन्ति । भूकृप्रभृतयो धातवः अजन्ताः सन्ति । तथैव अत्प्रभृतयो हलन्ताः सन्ति । तत्र डुकृञ् करणे, डुधाञ् धारणपोषणयोः इत्यत्र डु इत्यस्य ञकारस्य च इत्संज्ञा भवति । एषु धातुषु ङकारस्य इत्संज्ञा भवति ते ङितः भवन्ति । एवम् एध वृद्धौ इत्यादौ अकारस्य अनुदात्तस्य इत्संज्ञा भवति । अनुदात्तस्य इत्संज्ञायां धातौ अनुदात्तेत्वमायाति । यज देवपूजासङ्गतिकरणदानेषु, भज सेवायाम्, वह प्रापणे इत्यादौ स्वरितस्य इत्संज्ञायां स्वरितेत्त्वं च बोध्यम् ।

## प्रथमः पाठः

# भूधातोर्लटि रूपसाधनम्

**लः कर्मणि च भावे चाकर्मकेभ्यः ३।४।६९।**

लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च ॥

लडादिलकाराः सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि च भवन्ति, अकर्मकेभ्यो धातुभ्यस्तु कर्तरि भावे च भवन्ति ।

फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम् । फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, कस्यचिदपि धातोर्द्वावर्थौ भवतः- फलं व्यापारश्च । क्रियोद्देश्यं फलं, तत्पूर्तये ये केऽपि यत्ना विधीयन्ते, यानि कान्यपि कार्याणि सम्पाद्यन्ते तानि व्यापारत्वेन व्यवह्रियन्ते । धातुवाच्यफलव्यापारयोराश्रयः (अधिकरणम्) यस्य धातोः पृथग्भवति स सकर्मकः, यस्य च एकत्र भवति सोऽकर्मकः ।यथा- देवदत्त ओदनं पचतीति वाक्ये पचनक्रियाया विक्लितिरूपफलमोदने (कर्मणि) भवति चेत् तण्डुलप्रक्षालनादिकार्यव्यापाराः देवदत्तादिकर्त्रा सम्पाद्यन्ते । अत एव फलव्यधिकरणव्यापारवाचकत्वात् पच्-धातुः सकर्मकः । परन्तु देवदत्तः शेते इत्यत्र शयनक्रियायाः फलं (निद्रा) व्यापारश्च (नयननिमीलनादिः) देवदत्तादिकर्तरि एव तिष्ठतीति फलसमानाधिकरणव्यापारवाचकत्वात् शीङ्-धातुरकर्मकः ।

**वर्तमाने लट् ३।२।१२३।**

वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात् । अटावितौ । उच्चारणसामर्थ्याल्लस्य नेत्वम् । भू सत्तायाम् ॥ १ ॥
कर्तृविवक्षायां भू ल् इति स्थिते-

(वर्तमानेऽर्थे विद्यमानाद्धातोर्लट्-लकारो भवतीति सूत्रार्थः । लट् इत्यत्र अकारटकारौ इतौ स्तः । लकारस्य तूच्चारणसामर्थ्यादित्संज्ञा न भवति ।)

सत्तार्थको भूधातुः सेडकर्मको वर्तते, तस्माद् वर्तमानेऽर्थे द्योत्येऽनेन सूत्रेण कर्तरि लट्-लकारेऽनुबन्धलोपे 'भू+ल्' इत्यवस्थायाम्-

**तिप्तस्झिसिप्थस्थमिप्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ३।४।७८।**

एते अष्टादश लादेशाः स्युः ।

(तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आताम् झ थास् आथाम् ध्वम् इट् वहि महिङ् एते अष्टादश लकारस्य स्थान आदिश्यन्त इति सूत्रार्थः । एते तिङ्-प्रत्ययत्वेन व्यवह्रियन्ते । तिङ् इति महिङ् इत्यस्य इता ङकारेण प्रत्याहारः । एतेषामन्त्यपकारटकारङकारा आद्यझकारौ च इताः सन्ति । लस्य स्थाने आदिश्यमानत्वादेते लादेशा अपि कथ्यन्ते । एतेषां 'विभक्तिश्च'

इत्यनेन विभक्तिसंज्ञा भवति ।)

लः स्थाने अष्टादशसु लादेशेषु प्राप्तेषु-

**लः परस्मैपदम् १।४।९९।**

लादेशाः परस्मैपदसंज्ञाः स्युः ।

अनेन अष्टादशानामेव तिङ्प्रत्ययानां परस्मैपदसंज्ञा भवति । परन्तु वक्ष्यमाणसूत्रेण तङ्प्रत्याहारे समागतानामन्त्यानां नवानामात्मनेपदसंज्ञा विधीयते । अत आद्यानां नवानामेव परस्मैपदसंज्ञा भवति । अतः परस्मैपदिधातुभ्यः तिबादयो नव लादेशा एव विधीयन्ते ।

**तङानावात्मनेपदम् १ । ४ । १०० ।**

तङ्प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः । पूर्वसंज्ञापवादः ।

तङ् इति तिङां मध्ये दशमस्य त इत्यस्य अन्त्यङकारेण प्रत्याहारस्तस्मिन्नन्त्यानां तादिनवप्रत्ययाः समायान्ति । पूर्वसूत्रेण प्राप्तं परस्मैपदसंज्ञां बाधित्वा तादिनवानामनेन आत्मनेपदसंज्ञा विधीयते । तादिनवानां लादेशानां तिङां शानच् प्रत्ययस्य कानच्प्रत्ययस्य च आत्मनेपदसंज्ञा भवतीति सूत्रार्थः । शानच्कानचावपि लस्य स्थान एव आदिश्येते, अतः सूत्रस्थेन 'आन'शब्देन एतौ द्वौ प्रत्ययौ गृह्येते । आत्मनेपदिधातुभ्य एते नव प्रत्यया लस्य स्थाने विधीयन्ते ।

| संज्ञा | प्रथमपुरुषे | मध्यमपुरुषे | उत्तमपुरुषे |
|---|---|---|---|
| परस्मैपदम् | तिप् (ति), तस्, झि | सिप् (सि), थस्, थ | मिप् (मि), वस्, मस् |
| आत्मनेपदम् | त, आताम्, झ | थास्, आथाम्, ध्वम् | इट् (इ), वहि, महिङ् (महि) |

**अनुदात्तङित आत्मनेपदम् १ । ३ । १२ ।**

अनुदात्तेतो ङितश्च धातोरात्मनेपदं स्यात् ।

(अनुदात्तश्च ङ्च अनुदात्तङौ, तौ इतौ यस्य स अनुदात्तङित्, तस्माद् अनुदात्तङितः । अनुदात्तेद्धातुभ्यो ङिद्धातुभ्यश्च लस्य स्थाने आत्मनेपदसंज्ञकाः प्रत्यया आदिश्यन्त इति सूत्रार्थः । अनुदात्तङिद्धातवो नित्यमात्मनेपदिनो भवन्ति । यथा- एध वृद्धौ इति धातोऽकारोऽनुदात्त इच्च, एध् इत्यस्मात् लस्य आत्मनेपदे एधते इत्यादिरूपाणि जायन्ते । एवञ्च शीङ् स्वप्ने इति धातोः ङित्वादात्मनेपदे शेते इति रूपम् ।)

**स्वरितञितः कर्त्रभिप्राये क्रियाफले १ । ३ । ७२ ।**

स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले ।

(स्वरितेद्धातुभ्यो ञिद्धातुभ्यश्च लस्य क्रियाफले कर्तृगे सति आत्मनेपदं भवतीति सूत्रार्थः । क्रियाफलेऽकर्तृगे तु परस्मैपदं भवति । स्वरितेञ्ञिद्धातव उभयपदिनो भवन्तीति कुत्र

किं पदं प्रयोज्यमित्याकाङ्क्षायां यत्र धात्वर्थफलं कर्तारं गच्छति तत्रात्मनेपदम्, कर्तृभिन्नमभिप्रैति चेत्परस्मैपदं प्रयोक्तव्यम् । यथा- डुकृञ् करणे इति धातुर्ञित्वादुभयपदी । देवदत्तः कर्मकारैर्गृहं कुरुते, अत्र गृहनिर्माणक्रियायाः प्रधानफलं गृहोपभोगोऽस्ति तत्कर्तृरूपदेवदत्तं गच्छति । अत एवात्र कुरुते इति आत्मनेपदस्य प्रयोगोऽस्ति । कर्मकारा गृहं कुर्वन्ति इत्यत्र तु क्रियाफलं कर्तृभिन्नगृहस्वामिनं गच्छति न तु कर्तृरूपकर्मकारान् । अतोऽत्र परस्मैपदस्य प्रयोगो वर्तते । कर्मकारा अपि प्रारिश्रमादिकं फलन्तु लभन्ते परन्तु तन्न क्रियाफलम्, लोकतो वेदतो वा यदुद्देश्येन क्रियाप्रवृत्तिः तस्यैवात्र क्रियाफलशब्देन विवक्षिततत्वात् । कर्तृगामिफलकक्रियावृत्तेरुभयपदिधातोरात्मनेपदं भवति तच्च धात्वर्थफलस्य कर्तृगामित्वं द्योतयति ।)

**शेषात्कर्तरि परस्मैपदम् १ । ३ । ७८ ।**

आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् ।

(उक्तादन्यः शेषः, आत्मनेपदनिमित्तधातवः पूर्वसूत्रयोरुक्ताः, तदन्येभ्यो धतुभ्यः कर्तरि परस्मैपदं भवति । भावकर्मणोस्तु सर्वेभ्योऽपि धातुभ्य आत्मनेपदमेव भवति । अनेनैन सूत्रेण भूधातोः अनुदात्तेत्वाद्यात्मनेपदनिमित्तित्वाभावात् कर्तृविवक्षायां लस्य परस्मैपदं सिद्धम् ।)

अनेन लस्य स्थाने परस्मैपदसंज्ञकेषु तिबादिषु नवसु आदेशेषु प्राप्तेषु-

**तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः १ । ४ । १०१ ।**

तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः ।

(तिङः परस्मैपदात्मनेपदयोरुभयोरपि प्रत्येकं त्रयस्त्रिकाः सन्तीति यथासङ्ख्यं प्रथम-मध्यम-उत्तमपुरुषसंज्ञा भवतीति सूत्रार्थः । तेन तिप् तस् झि इत्येतेषां त आताम् झ इत्येतेषाञ्च प्रथमपुरुषसंज्ञा, सिप् थस् थ/थास् आथाम् ध्वम् इत्येतेषां मध्यमपुरुषसंज्ञा, मिप् वस् मस्/इट् वहि महिङ् इत्येतेषामुत्तमपुरुषसंज्ञा सिद्धा ।)

**तान्येकवचनद्विवचनबहुवचनान्येकशः १ । ४ । १०२ ।**

लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञानि स्युः ।

(प्रथम-मध्यम-उत्तमपुरुषसंज्ञकानां तिङ्विभक्तीनामुभयोरपि पदयोः त्रयाणां वचनानां प्रत्येकमेकवचन-द्विवचन-बहुवचनसंज्ञा भवतीति सूत्रार्थः । तेन तिप् सिप् मिप्/त थास् इट् इत्येतेषामेकवचनसंज्ञा, तस् थस् वस्/आताम् आथाम् वहि इत्येतेषां द्विवचनसंज्ञा, झि थ मस्/झ ध्वम् महिङ् इत्येतेषां बहुवचनसंज्ञा सिद्धा ।)

**युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः १ । ४ । १०२ ।**

तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः ।

(युष्मच्छब्दस्य तिङः सामानाधिकरण्येन प्रयुज्यमाने सति, विवक्षास्ति चेदप्रयुज्यमानेऽपि मध्यमपुरुषो भवति । त्वं पाठं पठसि इत्यत्र युष्मद्-शब्दस्य पठनक्रियायाः सामानाधिकरण्येन प्रयोगो वर्तते । किं पठसि ? आयुष्मान् भव इत्येतयोस्तु युष्मद्-शब्देऽप्रयुक्तेऽपि तस्य विवक्षया मध्यमपुरुषस्य प्रयोगोऽनेन सुलभ इति ।)

**अस्मद्युत्तमः १ । ४ । १०७ ।**

तथाभूतेऽस्मद्युत्तमः ।

(अस्मच्छब्दस्य तिङः सामानाधिकरण्येन प्रयुज्यमाने सति, विवक्षास्ति चेदप्रयुज्यमानेऽपि उत्तमपुरुषो भवतीति सूत्रार्थः । यथा- अहं पठामि । किं पठानि गुरवः ?)

**शेषे प्रथमः १ । ४ । १०८ ।**

मध्यमोत्तमयोरविषये प्रथमः स्यात् । भू ति इति जाते ।

(तिङ्वाच्यकारकवाचिषु युष्मद् अस्मद् इति शब्दद्वयभिन्नेषु सर्वेष्वपि शब्देषु प्रयुज्यमानेषु विवक्षास्ति चेदप्रयुज्यमानेष्वपि प्रथमपुरुषो भवति । यथा- स पठति । भवान् गच्छति । रामोऽकरोत् । बालकाः कन्दुकेन क्रीडन्ति ।)

अनेन लस्य स्थाने परस्मैपदसंज्ञकेषु 'तिप्, तस्, झि' इति प्रथमपुरुषेषु प्राप्तेषु एकत्वविवक्षायामेकवचने तिबादेशेऽनुबन्धलोपे 'भू+ति' इत्यवस्थायाम्-

**तिङ्शित्सार्वधातुकम् ३ । ४ । ११३ ।**

तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः ।

शकार इत् यस्य स शित् । "धातोः ३ । १ । ९१" इति सूत्रेण आतृतीयाध्यायसमाप्तेरधिक्रियते, तत्र ये केऽपि प्रत्ययाः कथ्यन्ते ते धातोः परे भवन्ति । तेषु अष्टादश तिङ्प्रत्ययाः शित्प्रत्ययाश्च सार्वधातुकसंज्ञका भवन्तीति सूत्रार्थः ।

अनेन सूत्रेण ति इत्यस्य सार्वधातुकसंज्ञायाम्-

**कर्तरि शप् ३ । १ । ६८ ।**

कर्त्रर्थे सार्वधातुके परे धातोः शप् ।

कर्तरि अर्थे विहिते सार्वधातुकसंज्ञकप्रत्यये परे सति धातोः शप्प्रत्ययो भवति । शप् इत्यस्य शकारस्य "लशक्वतद्धिते" इति पकारस्य च "हलन्त्यम्" इति इत्संज्ञायां लोपे अ इत्येवावशिष्यते ।

अनेन शप्यनुबन्धलोपे 'भू+अ+ति' इति जाते शित्वाद् 'अ' इत्यस्यापि सार्वधातुकसंज्ञायाम् भू इत्यस्य अङ्गसंज्ञायाम्-

**सार्वधातुकार्धधातुकयोः ७ । ३ । ८४ ।**

अनयोः परयोरिगन्ताङ्गस्य गुणः । अवादेशः । भवति ॥ भवतः ।

इक् अन्ते यस्य स इगन्तः । इगन्तस्य अङ्गस्य अन्त्यस्य गुणो भवति सार्वधातुकसंज्ञकेषु आर्धधातुकसंज्ञकेषु च प्रत्ययेषु परेषु ।

अनेन सूत्रेण ऊकारस्य गुणे ओकारे 'भो+अ+ति' इति जाते "एचोऽयवायावः" इत्यनेन अवादेशे वर्णयोगे 'भवति' इति सिद्ध्यति ।

एवमेव प्रथमपुरुषस्य द्विवचने तसि, शपि, गुणे, अवादेशे, पदत्वे सकारस्य रुत्वे विसर्गे च 'भवतः' इति रूपं सिध्यति ।

बहुवचने 'झि'आदेशे पूर्ववद् 'भव झि' इत्यवस्थायाम्-

**झोऽन्तः ७।१।३।**

प्रत्ययावयवस्य झस्यान्तादेशः ।

"अतो गुणे" । भवन्ति । भवसि । भवथः । भवथ ।

(प्रत्ययावयवस्य झकारस्य स्थाने 'अन्त्' इत्यादेशो विधीयते, तेन झि इत्यस्य अन्ति इति भवति ।)

अनेन झकारस्य स्थाने 'अन्त्'आदेशे 'भव+अन्ति' इत्यवस्थायां सवर्णदीर्घं बाधित्वा भव इत्यस्यापदान्तस्य अकारस्य अकाररूपगुणे परे "अतो गुणे" इत्यनेन पररूपे 'भवन्ति' इति सिध्यति ।

मध्यमपुरुषैकवचने सिपि शपि गुणेऽवादेशे 'भवसि' इति रूपं जायते । मध्यमपुरुषस्य द्विवचने थसि शपि, गुणेऽअवादेशे, पदत्वे सकारस्य रुत्वे विसर्गे च 'भवथः' इति रूपं सिध्यति । मध्यमपुरुषस्य बहुवचने थादेशे शपि, गुणेऽवादेशे, 'भवथ' इति रूपं सिध्यति ।

उत्तमपुरुषस्यैकवचने मिपि शपि, गुणेऽअवादेशे च 'भव मि' इत्यवस्थायाम् 'प्रकृतिप्रत्ययोर्मध्ये यः पतितः स विकरणः, विकरणविशिष्टस्यापि अङ्गसंज्ञार्थं तदादिग्रहणम्' इति नियमेन शब्विशिष्टस्य भूधातोः 'भव' इत्यस्य अङ्गसंज्ञायाम्-

**अतो दीर्घो यञि ७।३।१०१।**

अतोऽङ्गस्य दीर्घो यञादौ सार्वधातुके । भवामि । भवावः । भवामः ।

(अकारान्तस्य अङ्गस्य अन्त्यस्य दीर्घो भवति सार्वधातुकसंज्ञकेषु यञादिप्रत्ययेषु परेषु । यञ् इति प्रत्याहारः, यञ् आदौ यस्य स यञादिः, तस्मिन् यञादौ ।) अनेन अकारस्य दीर्घे आकारे 'भवामि' इति रूपं जायते ।

उत्तमपुरुषस्य द्विवचने वसि शपि गुणेऽवादेशे च एवमेव 'भव' इत्यस्य अङ्गत्वाद् अकारस्य दीर्घे पदत्वे रुत्वे विसर्गे च 'भवावः' इति रूपं सिध्यति । उत्तमपुरुषस्य बहुवचने मसि अपि अनयैव प्रक्रियया 'भवामः' इति रूपं जायते ।

(कर्तरि युष्मद्-शब्दस्य त्वम् युवाम् यूयम् इत्येतानां रूपाणां प्रयोगस्यावस्थायां विवक्षायां वैव मध्यपुरुषस्य रूपाणि प्रयुज्यन्ते । यथा- त्वं भवसि । युवां भवथः । यूयं भवथः । तथैव कर्तरि अस्मद्-शब्दस्य प्रयोगे विवक्षायां वैववोत्तमपुरुषस्य रूपाणि प्रयोक्तव्यानि । यथा- अहं भवामि । आवां भवावः । वयं भवामः । शेषासु सर्वास्वप्यवस्थासु प्रथमपुरुषस्यैव प्रयोगः कार्यः । यथा- स भवति । तौ भवतः । ते भवन्ति । भवान् भवति । पितरौ भवतः । बालका बालिका मित्राणि अन्यानि च भवन्ति ।)

**रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति |
| मध्यमपुरुषः | भवसि | भवथः | भवथः |
| उत्तमपुरुषः | भवामि | भवावः | भवामः |

'प्र नि' उपसर्गपूर्वकात् सत्तार्थकभूधातोः लटि तिपि शपि गुणे अवादेशे 'प्रनि भवति' इति जाते-

**शेषे विभाषाऽकखादावषान्त उपदेशे ८।४।१८।**

उपदेशे कादिखादिषान्तवर्जे गदनदादेरन्यस्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्यात् । प्रणिभवति । प्रनिभवति ॥

(ककारः आदौ वर्तते यस्य धातोः स कादिः, खकारः आदौ वर्तते यस्य धातोः स खादिः, षकारः अन्ते वर्तते यस्य धातोः स षान्तः, उपदेशावस्थायाम् एभ्यो भिन्नेषु, गदादिभ्यश्च भिन्नेषु धातुषु परेषु उपसर्गस्थाभ्यां रेफषकाराभ्यां परस्य 'नि' इत्यस्य नकारस्य स्थाने णकारादेशो भवति ।)

अनेन सूत्रेण वैकल्पिकणत्वे 'प्रणिभवति' इति, णत्वाभावपक्षे 'प्रनिभवति' इति च रूपद्वयं सिद्ध्यति ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः ।

(ख) लः कर्मणि च भावे चाकर्मकेभ्यः ।

(ग) तिप्तस्झिसिप्थस्थमिप्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ।

(घ) तान्येकवचनद्विवचनबहुवचनान्येकशः ।

(ङ) फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम् ।

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) भूधातोरर्थं लिखत ।

(ख) लकाराणां सङ्ख्या कति ? के च ते ?

(ग) के टिल्लकाराः ?

(घ) लकाराः कस्माद्विधीयन्ते ?

(ङ) कस्मिन्नर्थे लट्-लकारस्य प्रयोगो भवति ?

(च) लट्-लकारविधायकं सूत्रं किम् ?

(छ) कालः कतिविधः ? के च ते ?

(ज) भूधातोर्लटि मध्यमपुरुषे कानि रूपाणि जायन्ते ?

(झ) 'भवामि' इत्यत्र को लकारः का च विभक्तिः ?

(ञ) परस्मैपदितिङ्विभक्तयः काः ?

(ट) परस्मैपदसंज्ञा केन सूत्रेण क्रियते ?

(ठ) सार्वधातुकसंज्ञा कस्य केन सूत्रेण भवति ?

(ड) अस्मद्युत्तमः इति सूत्रं किं करोति ?

(ढ) आत्मनेपदे प्रथमपुरुषसंज्ञकाः प्रत्ययाः के ?

(ण) लादेशाः के सन्ति ?

(त) 'भवामः' इत्यत्र दीर्घसम्पादकं सूत्रं किम् ?

(थ) भूतसामान्ये कस्य लकारस्य प्रयोगः कर्तव्यः ?

(द) अकर्मकधातोर्लक्षणं किम् ?

(ध) भ्वादिगणस्य विकरणप्रत्ययः कः ?

(न) अकर्मकेभ्यो धातुभ्यः कयोरर्थयोर्लकारा भवन्ति ?

**३. सोदाहरणं सूत्राणामर्थं लिखत**

(क) लः कर्मणि च भावे चाकर्मकेभ्यः । (ख) तङानावात्मनेपदम् ।

(ग) अनुदात्तङित आत्मनेपदम् । (घ) स्वरितञित कर्त्रभिप्राये क्रियाफले ।

(ङ) तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः ।

**४. भूधातोः कर्तरि लटि रूपाणि लिखत ।**

**५. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) भवति (ख) भवन्ति (ग) भवथः (घ) भवामि (ङ) भवामः

**६. धातूनां सकर्मकत्वाकर्मकत्वनिर्धारणविधिं लिखत ।**

**७. धातूनां पदव्यवस्थायाः ससूत्रं परिचयं दत्त ।**

**८. पदानां वाक्येषु प्रयोगं निदर्शयत**

(क) भवथ (ख) भवामः (ग) भवन्ति (घ) भवावः (ङ) भवसि

## द्वितीयः पाठ

# भूधातोर्लिटि लुटि लृटि च रूपसाधनम्

**परोक्षे लिट् ३।२।११५॥**

भूताऽनद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् । लस्य तिबादयः ।

(लिट्लकारः भूते अनद्यतने परोक्षे च अर्थे भवति । अतीतकालो भूतकाल इति प्रसिद्धमेव । स च अत्र अनद्यतनरूपोऽपेक्षितः । अनद्यतने लङ् इति पूर्वसूत्राद् अनद्यतने इत्यनुवर्तते । अद्य भवः अद्यतनः । अविद्यमानः अद्यतनः यत्र स अनद्यतनः । अतीतायाः रात्रेः पश्चार्द्धेन आगामिन्या रात्रेः पूर्वार्द्धेन सहितः कालः अद्यतनः । तद्भिन्नः अनद्यतनः । एवञ्च भूते इत्यप्यनुवर्तते । भूतेऽनद्यतने परोक्षे चार्थे धातोर्लिट्लकारो भवतीति सूत्रार्थः । तत्र 'रामो रावणं जघान' इत्युदाहरणम् । 'रामः रावणं हतवान्' परन्तु तादृशं राममद्यतनवक्ता न दृष्टवान् इति एतदीयपरोक्षभावाद् लिट्लकारस्य प्रयोगः । उत्तमपुरुषे तु चित्तविक्षेपाद्यवस्थायां सुषुप्तौ वा परोक्षत्वं सम्भवति । यथा 'सुप्तोऽहं किल विललाप' इति । एवञ्च अस्वीकारेऽर्थेऽप्युत्तमपुरुषे लिट्लकारो भवति । यथा 'नाहं कलिङ्गान् जघान' इत्यादि ।)

इति परोक्षे अनद्यतने भूते लिट्लकारेऽनुबन्धलोपे 'भू ल्' इति जाते लकारस्य स्थाने परस्मैपदस्य प्रथमपुरुषस्यैकवचने तिबादेशेऽनुबन्धलोपे 'भू ति' इति जाते-

**परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ३।४।८२।**

**लिटस्तिबादीनां णलादयः स्युः ।**

(लिट्लकारसम्बद्धानां तिबादीनां नवानां स्थाने णलादयो नव आदेशा भवन्ति । स च क्रम इत्थं वर्तते–

| | एकवचने | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | तिप् – णल् (अ) | तस् – अतुस् | झि – उस् |
| मध्यमपुरुषः | सिप् – थल् | थस् – अथुस् | थ – अ |
| उत्तमपुरुषः | मिप् – णल् (अ) | वस् – व | मस् – म |

एतेन 'तिप्' इत्यस्य स्थाने 'णल्' आदेशे णकारलकारयोः इत्संज्ञात्वे च 'भू अ' इति स्थिते

**भुवो वुग्लुङ्लिटोः ६।४।८८।**

भुवो वुगागमः स्यात् लुङ्लिटोरचि ।

(भूधातोः 'वुक्' इत्यागमो भवति, लुङ्लिट्सम्बन्धिनि अचि परे । वुक् इत्यस्य उकारककारयोरित्संज्ञायां वकार एव शिष्यते । कित्त्वात्तस्य अन्त्यावयवत्वं भवति ।)

इति सूत्रेण वुगागमेऽनुबन्धलोपे 'भूव् अ' इति जाते-

**एकाचो द्वे प्रथमस्य ६।१।१।**

अजादेर्द्वितीयस्य

इत्यधिकृत्य ।

**लिटि धातोरनभ्यासस्य ६।१।८।**

लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः, आदिभूतादचः परस्य तु द्वितीयस्य । 'भूव् भूव् अ' इति स्थिते ।

(लिटि परे अभ्यासभिन्नस्य धातोरवयवस्य प्रथमस्य एकाचो द्वित्वं भवति, अजादेः धातोस्तु अचः परस्य द्वितीयस्य एकाचो द्वित्वं भवति । अत्र हलादौ धातौ सर्वत्र प्रथमस्य एकाचोऽवयवस्य द्वित्वं भवति । अजादिः धातुः यदि एकाच् वर्तते तर्हि व्यपदेशिवद्भावेन तस्यैव द्वित्वं भवति । अजादिः धातुः यदि अनेकाज् वर्तते तर्हि आदिभूतादचः परस्य द्वितीयस्य एकाचोऽवयवस्य द्वित्वं भवति । द्वित्वे कर्तव्ये वृक्षः प्रचलने शाखावयवैः प्रचलति इति न्यायेन अजाश्रितानां हलामपि द्वित्वं भवति ।)

इति भूव् इत्यस्य द्वित्वे भूव् भूव् अ इति जाते-

**पूर्वोऽभ्यासः ६।१।४।**

अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् ।

(षष्ठाध्यायस्य द्वित्वप्रकरणे ये द्वे विधीयेते, तयोः पूर्वतनः अभ्याससंज्ञको भवति ।)

अनेन पूर्वतनस्य भूव् इत्यस्य अभ्याससंज्ञायाम्-

**हलादिः शेषः ७।४।६०।**

अभ्यासस्याऽऽदिर्हल् शिष्यतेऽन्ये हलो लुप्यन्ते । इति 'व'लोपः ।

(अभ्यासस्य आदौ वर्तमानो हल् एव शिष्यते, तदतिरिक्तानां हलां तु लोपो भवति । यदि अभ्यासे आदौ हल् वर्तते तर्हि तं विहाय अन्ये हलो लुप्ता भवन्ति । यदि च अभ्यासस्यादौ हल् नास्ति तर्हि सर्वे एव हलो लुप्ता भवन्ति ।)

अनेन अभ्यासस्य वकारस्य लोपे 'भू भुव् अ' इति जाते-

**ह्रस्वः ७।४।५९।**

अभ्यासस्याऽचो ह्रस्वः स्यात् ।

(अभ्यासस्थस्य दीर्घस्याचो सर्वत्रैव ह्रस्वं भवति । अतो न कुत्रापि अभ्यासे दीर्घः अच् अवशिष्यते । सर्वत्र तस्य ह्रस्वं भवत्येव ।)

अनेन ऊकारस्य ह्रस्वे भु भूव् अ इति जाते-

**भवतेरः ७।४।७३।**

भवतेरभ्यासोकारस्य अः स्याल्लिटि ।

(लिटि परे भूधातोः अभ्यासस्य उकारस्य स्थाने अकारादेशो भवति ।)

अनेन अभ्यासोकारस्य अकारादेशे 'भ भूव् अ' इत्यवस्थायाम्-

**अभ्यासे चर्च ८।४।५४।**

अभ्यासे झलां चरः स्युर्जशश्च । 'झशां जशः, खयां चरः' इति विवेकः । बभूव । बभूवतुः । बभूवुः ।

(अभ्यासादौ स्थितानां झश्प्रत्याहारस्थवर्णानां स्थाने जश्प्रत्याहारस्था वर्णा आदिश्यन्ते, खय्प्रत्याहारस्थवर्णानां स्थाने तु चर्प्रत्याहारस्था वर्णा आदिश्यन्ते । अनेन अभ्यासादौ वर्गद्वितीयाः वर्गप्रथमा जायन्ते, वर्गचतुर्थास्तु वर्गतृतीया भवन्ति ।)

अनेन अभ्यासस्थस्य भकारस्य जश्त्वेन बकारादेशे वर्णयोगे 'बभूव' इति रूपं जायते ।

प्रथमपुरुषस्य द्विवचने तसि अतुसादेशे वुगागमे द्वित्वेऽभ्यासत्वे हलादिशेषे ह्रस्वे अत्वे जश्त्वे पदत्वे रुत्वे विसर्गे च 'बभूवतुः' इति रूपं सिध्यति ।

एवमेव प्रथमपुरुषस्य बहुवचने झौ उसादेशे 'बभूवुः' इति रूपं जायते ।

मध्यमपुरुषस्य द्विवचने सिपि थलादेशे 'भू थ' इति जाते स्थानिवद्भावे तिङ्त्वात्-

**लिट् च ३।४।११५।**

लिडादेशस्तिङ्ङार्धधातुकसंज्ञः स्यात् ।

(लिटः स्थाने आदिश्यमानाः तिबादय आर्धधातुकसंज्ञका भवन्ति ।)

इति 'थ' इत्यस्य आर्धधातुकत्वे-

**आर्धधातुकस्येड्वलादेः ७।२।३५।**

वलादेरार्धधातुकस्येडागमः स्यात् । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ॥

(आर्धधातुकसंज्ञकस्य प्रत्ययस्य आदौ वल्प्रत्याहारस्थाः वर्णा सन्ति चेत् तस्य 'इट्' इत्यागमो भवति । टकारस्य इत्संज्ञा भवति । टित्त्वादाद्यवयवत्वम् ।)

अनेन इडागमेऽनुबन्धलोपे 'भू इ थ' इत्यवस्थायां वुगागमे द्वित्वेऽभ्यासत्वे हलादिशेषे ह्रस्वे अत्वे जश्त्वे पदत्वे रुत्वे विसर्गे च 'बभूविथ' इति रूपं सिध्यति ।

थसि अथुसि पूर्ववद् 'बभूवथुः' इति रूपं जायते ।

थादेशे 'अ' इत्यादेशे च पूर्ववद् 'बभूव' इति रूपं निष्पद्यते ।

मिपि णलि च पूर्ववद् 'बभूव' इति रूपं निष्पद्यते ।

वसि 'व' इत्यादेशे इडागमे च पूर्ववद् 'बभूविव' इति रूपं सम्पद्यते ।

एवं मसि 'म' इत्यादेशे इडागमे च पूर्ववद् 'बभूविम' इति रूपं सम्पद्यते ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | बभूव | बभूवतुः | बभूवुः |
| मध्यमपुरुषः | बभूविथ | बभूवथुः | बभूव |
| उत्तमपुरुषः | बभूव | बभूविव | बभूविम |

**अनद्यतने लुट् ३।३।१५।**

भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् ।

वर्तमानात् समयात् आगामिन्या रात्रेः पूर्वार्धकालिकः समयोऽद्यतनभविष्यत्कालो वर्तते । तदूर्ध्वं यः कालः सोऽनद्यतनभविष्यत्कालोऽस्ति । यदि श्वः, परश्वः इत्यादयो अनद्यतनभविष्यत्कालबोधकानि पदानि वाक्ये प्रयुज्यन्ते, तर्हि लुट्लकारस्यैव क्रियापदस्य प्रयोगो भवति । यथा- श्वः अहम् आपणं गन्तास्मि । परश्वः माता मातुलगृहं गन्ता । आगामिनि सप्ताहे युष्माकं परीक्षा भविता । आगामिनि वर्षे मम भ्रातरौ प्रवेशिकाम् उत्तरितारौ । एवम् अनद्यतनभविष्यदर्थे विवक्षिते धातोर्लुट्लकारो विधीयते । लुट्लकारस्य उकारटकारयोः इत्संज्ञा भवति ।

इति सूत्रेण भूधातोः अनद्यतनभविष्यत्यर्थे लुट्लकारेऽनुबन्धलोपे 'भू ल्' इति स्थिते लकारस्य स्थाने तिबादेशे सार्वधातुकत्वे शपि प्राप्ते-

**स्यतासी लृलुटोः ३।१।३३।**

धातोरेतौ स्तो लृलुटोः परतः । शबाद्यपवादः । 'लृ' इति लृङ्लृटोर्ग्रहणम् ।

('लृ' इत्यनेन लृङ्लकारलृट्लकारयोर्बोधो भवति । लृलकारलुट्लकारयोः परयोः शबाद्यपवादेन धातोः स्यतासिप्रत्ययौ भवतः । अर्थात् लृट्लृङ्लकारयोः परयोः धातोः स्यप्रत्ययो भवति चेत् लुट्लकारे परे धातोः तासिप्रत्ययो भवति । स्यतासिप्रत्ययौ शबाद्यपवादेन भवतः । तासेः इकारस्य इत्संज्ञा भवति ।

अनेन भूधातोः लुटि परे शपोऽपवादेन तासिप्रत्ययेऽनुबन्धलोपे 'भू तास् ति' इति जाते

**आर्धधातुकं शेषः ३।४।११४।**

तिङ्शिद्भ्योऽन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात् । इट् ।

(उक्ताद् अन्यः शेषः । तिङ्शितौ सार्वधातुकसंज्ञकौ इति पूर्वमेव उक्तम् । 'धातोः' इति सूत्रस्य अधिकारे विहितेषु प्रत्ययेषु तिङ्शिद्भिन्नाः प्रत्यया आर्धधातुकसंज्ञका भवन्ति ।)

इति 'तास्' इत्यस्य आर्धधातुकसंज्ञायां वलादित्वाद् इडागमे ऊकारस्य गुणे अवादेशे च 'भवितास् ति' इति जाते-

**लुटः प्रथमस्य डारौरसः २।४।८५।**

एते क्रमादादेशाः स्युः । डित्त्वसामर्थ्यादभस्यापि टेर्लोपः । भविता ।

लुटः स्थाने आदिष्टानां प्रथमपुरुषसंज्ञकानां तिङां स्थाने क्रमेण डा, रौ, रस् एते आदेशा भवन्ति । एतेन 'ति' इत्यस्य स्थाने 'डा' आदेशो भवति । डकारस्य 'चुटू' इत्यनेन इत्संज्ञा भवति । 'भवितास्' इत्यस्य आस्भागस्य टिसंज्ञायां भसंज्ञाया अभावेन 'टेः' इत्यस्य अप्रवृत्तौ अपि 'डा' इत्यत्र डित्त्वविधानस्य सामर्थ्याद् अभस्यापि टेर्लोपो भवति ।)

अनेन 'ति' इत्यस्य स्थाने 'डा'आदेशेऽनुबन्धलोपे 'भवितास् आ' इति जाते 'आस्' इत्यस्य टिसंज्ञायां डित्त्वसामर्थ्यादभस्यापि टेर्लोपे वर्णसम्मेलने 'भविता' इति रूपं सिध्यति ।

तसि तासिप्रत्यये आर्धधातुकत्वेन इडागमे गुणेऽवादेशे तसो 'रौ' आदेशे च 'भवितास् रौ' इति जाते

**तासस्त्योर्लोपः ७।४।५०।**

सादौ प्रत्यये परे ॥

(सकारादौ प्रत्यये परे 'तास्' इत्यस्य सकारस्य 'अस्'धातोः सकारस्य च लोपो भवति ।)

**रि च ७।४।५१।**

रादौ प्रत्यये तथा । भवितारौ । भवितारः । भवितासि । भवितास्थः । भवितास्थ । भवितास्मि । भवितास्वः । भवितास्मः ।

(रेफादौ प्रत्यये परे 'तास्' इत्यस्य सकारस्य 'अस्'धातोः सकारस्य च लोपो भवति ।)

अनेन सकारस्य लोपे 'भवितारौ' इति रूपं जायते ।

बहुवचने झौ रसादेशे अनेनैव सकारस्य लोपे 'भवितारः' इति रूपं जायते ।

सिपि पूर्ववद् 'भवितास् सि' इत्यत्र 'तासस्त्योर्लोपः' इत्यनेन सकारस्य लोपे 'भवितासि' इति रूपं जायते ।

थसि सलोपाभावे 'भवितास्थः' इति रूपं जायते ।

एवमेव 'भवितास्थ' 'भवितास्मि' 'भवितास्वः' 'भवितास्मः' इति रूपाणि सिध्यन्ति ।

**रूपाणि**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविता | भवितारौ | भवितारः |
| मध्यमपुरुषः | भवितासि | भवितास्थः | भवितास्थ |
| उत्तमपुरुषः | भवितास्मि | भवितास्वः | भवितास्मः |

**लृट् शेषे च ।३।३।१३।**

भविष्यदर्थाद्धातोर्लृट् क्रियार्थायां क्रियायामसत्यां सत्यां च । स्यः । इट् । भविष्यति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः ।

(क्रियानिमित्तिकायां क्रियायां सत्यामसत्यां च भविष्यति अर्थे धातोः लृट्लकारो भवति ।)

भूधातोर्लृटि तिपि शपं प्रबाध्य स्यप्रत्यये 'भू स्य ति' इति जाते 'स्य' इत्यस्य आर्धधातुकत्वे इडागमे 'भू इ स्य ति' इति जाते धातोः अङ्गत्वे ऊकारस्य गुणेऽवादेशे सस्य षत्वे च 'भविष्यति' इति रूपं सिध्यति । तसादौ एवमेव कार्येषु विहितेषु लटि इव 'भविष्यतः' इत्यादीनि रूपाणि निष्पद्यन्ते ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथः |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) परस्मैपदानां णलतुसुस्थलथुसणल्वमाः

(ख) लिटि धातोरनभ्यासस्य

(ग) आर्धधातुकस्येड्वलादेः

(घ) लुटः प्रथमस्य डारौरसः

(ङ) डित्त्वसामर्थ्यादभस्यापि टेर्लोपः

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) लिट्लकारः कस्मिन्नर्थे विधीयते ?

(ख) कस्याभ्याससंज्ञा भवति ?

(ग) 'झशां जशः, खयां चरः' इति विवेकस्य कोऽभिप्रायः ?

(घ) को नामाद्यतनभविष्यत्कालः ?

(ङ) 'आर्धधातुकं शेषः' इत्यत्र कः शेषः ?

(च) लृट्-लकारः कस्मिन्नर्थे विधीयते ?

(छ) 'भविष्यति' इत्यत्र केन इडागमः ?

(ज) कौ लृलकारौ ?

**३. सोदाहरणं सूत्राणामर्थं लिखत**

(क) लिटि धातोरनभ्यासस्य

(ख) अभ्यासे चर्च

(ग) तासस्त्योर्लोपः

(घ) लृट् शेषे च

**४. भूधातोः कर्तरि लुटि रूपाणि लिखत ।**

**५. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) बभूव (ख) बभूविथ (ग) भविता (घ) भवितासि (ङ) भविष्यति

**६. अधस्तनपदानां लकारपुरुषवचनानि निर्दशत**

(क) बभूवतुः (ख) बभूविम (ग) भवितारः (घ) भवितास्वः (ङ) भविष्यामि

**७. सिद्धपदानि दर्शयत**

(क) भू + लिट् (झि) (ख) भू + लुट् (थस्)

(ख) भू + लिट् (थ) (ख) भू + लृट् (मस्)

**८. अद्यतनानद्यतनयोः पार्थक्यं सोदाहरणं प्रदर्शयत ।**

**९. पदानां वाक्ये प्रयोगं निदर्शयत**

(क) बभूविथ (ख) बभूविम (ग) भवितास्मि

(घ) भवितारः (ङ) भविष्यन्ति (च) भविष्यामः

# तृतीयः पाठः

## भूधातोर्लोटि लङि विधिलिङि च रूपसाधनम्

**लोट् च ३।३।१६२।**

विध्यादिष्वर्थेषु धातोर्लोट् ।

(विध्यादिष्वर्थेषु धातोर्लोट्लकारो विधीयते । विध्याद्यर्था 'विधिनिमन्त्रणा...' इति सूत्रप्रसङ्गे व्याख्यास्यन्ते ।)

**आशिषि लिङ्लोटौ ३।३।१७३**

(आशीर्वादेऽर्थे लिङ्लकार-लोट्लकारौ विधीयेते ।)

भूधातोः विध्यादिष्वर्थेषु आशीर्वादेऽर्थे वा लोट्लकारे विहिते 'भू ल्' इति जाते तिपि शपि गुणेऽवादेशे च 'भवति' इति जाते-

**एरुः ३।४।८६।**

लोट इकारस्य उः । भवतु ।

(लोट्लकारसम्बन्धिन इकारस्य स्थाने उकारादेशो भवति ।)

अनेन सूत्रेण इकारस्य उत्वे 'भवतु' इति जाते-

**तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् ७।१।३५।**

आशिषि तुह्योस्तातङ् वा ।परत्वात्सर्वादेशः ।'ननु ङिच्चेत्यस्य क्वावकाश' इति चेच्छृणु, अनन्यार्थङकार युक्ताऽनङादिष्विति गृहाण । भवतात् ।

(आशीर्वादार्थकस्य लोट्लकारस्य 'तु' 'हि' अनयोः स्थाने विकल्पेन 'तातङ्' आदेशो भवति ।ङित्त्वाद् 'ङिच्च' इत्यनेन 'तातङ्'आदेशः अन्त्यस्य स्थाने एव प्राप्तो भवति, परं परत्वात् 'अनेकाल्शित्सर्वस्य' इत्यनेन सर्वस्य स्थाने भवति । 'ङिच्च' इति सूत्रस्य प्रवृत्तिस्तु ङित्त्वस्य अन्यप्रयोजनहीने 'अनङ्' 'अवङ्' इत्याद्यादेशस्थलेषु एव भवति ।)

अनेन 'तु' इत्यस्य स्थाने विकल्पेन 'तातङ्' आदेशेऽनुबन्धलोपे 'भवतात्' इति रूपं जायते । 'तातङ्' आदेशाभावे तु 'भवतु' इत्येव रूपं भवति ।

**लोटो लङ्वत् ३।४।८५।**

लोटस्तामादयः, सलोपश्च ।

('तस्थस्थमिपां तान्तन्तामः' इति सूत्रेण तामादिविधाने 'नित्यं ङितः' इत्यनेन सलोपविधाने च लोट्लकारो लङ्लकारवद् भवति । एतेन लोटि ङित्त्वं जायते ।)

**तस्थस्थमिपां तान्तन्तामः ३।४।१०१**

ङितश्चतुर्णां तसादीनां तामादयः स्युः । भवताम् । भवन्तु ।

(ङिल्लकारसम्बद्धानां तस्, थस्, थ, मिप् एतेषां स्थाने क्रमेण ताम्, तम्, त, अम् एते आदेशा भवन्ति ।)

लोटि तसि 'भवतस्' इति जाते 'लोटो लङ्वत्' इत्यनेन लङ्वद्भावेन लोटोऽपि ङित्त्वाद् 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन 'तस्' इत्यस्य स्थाने 'ताम्' आदेशे 'भवताम्' इति रूपं सिध्यति ।

**सेर्ह्यपिच्च ३।४।८७।**

लोटः सेर्हिः, सोऽपिच्च ।

(लोट्लकारस्य 'सि' इत्यस्य स्थाने 'हि' आदेशो भवति, स हिः अपित् च भवति ।)

लोटि मध्यमपुरुषस्यैकवचने सिपि शपि गुणेऽवादेशे च 'भवसि' इत्यत्र अनेनैव 'सि' इत्यस्य स्थाने 'हि' आदेशे 'भवहि' इत्यत्र विकल्पेन 'तातङ्' आदेशे 'भवतात्' इति रूपं जायते । तदभावे तु 'भवहि' इति स्थिते-

**अतो हेः ६।४।८९।**

अतः परस्य हेर्लुक् । भव, भवतात् । भवतम् । भवत ।

(अकारात् परस्य 'हि' इत्यस्य लुग्भवति ।)

अनेनैव सूत्रेण 'हि' इत्यस्य लुकि 'भव' इति रूपं सिध्यति ।

मध्यमपुरुषस्य द्विवचने थसि लङ्वद्भावेन थसस्तमादेशे 'भवतम्' इति रूपं जायते । मध्यमपुरुषस्य बहुवचनेऽपि लङ्वद्भावेन 'थ' इत्यस्य 'त' आदेशे 'भवत' इति रूपं भवति ।

उत्तमपुरुषस्यैकवचने मिपि शबादिभिः 'भव मि' इति जाते-

**मेर्निः ३।४।८।**

लोटो मेर्निः स्यात् ।

(लोट्लकारसम्बन्धिनो 'मि' इत्यस्य स्थाने 'नि' आदेशो भवति ।)

अनेन 'मि' इत्यस्य स्थाने 'नि' आदेशे 'भव नि' इति स्थिते

**आडुत्तमस्य पिच्च ३।४।९२।**

लोडुत्तमस्याऽऽट् स पिच्च । 'हिन्योरुत्वं न, इकारोच्चारणसामर्थ्यात् ।' भवानि ।

(लोट्लकारसम्बद्धस्य उत्तमपुरुषस्य आडागमो भवति, स आडागमः पित् च भवति । आदेशसूत्रयोः 'हि' 'नि' एतयोः इकारस्य उत्त्वं न भवति ।)

स्थानिवद्भावेन 'नि' इत्यस्यापि उत्तमपुरुषत्वाद् अनेनैव आडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे च 'भव आ नि' इति जाते सवर्णदीर्घे 'भवानि' इति रूपं जायते ।

अत्र 'मेर्निः' इति सूत्रे 'नु' इति कथनीये 'नि' इति इकारोच्चारणसामर्थ्याद् 'एरुः' इत्यनेन इकारस्य उत्वं न भवति ।

**ते प्राग्धातोः १।४।८०।**

ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्याः ।

(गतिसंज्ञका उपसर्गसंज्ञकाश्च प्रादयो धातोः पूर्वमेव प्रयुज्यन्ते ।)

'प्र' इत्युपसर्गपूर्वकाद् 'भू'धातोर्लोटि मिपि शबादिषु न्यादेशे आडागमे सवर्णदीर्घे 'प्र भवानि' इति जाते

**आनि लोट् ८।४।१६।**

उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्याऽऽनीत्यस्य नस्य णः स्यात् । प्रभवाणि ।

(णत्वनिमित्तं रेफषकारौ, उपसर्गस्थाभ्यां रेफहकाराभ्यां परस्य लोट्लकारस्य स्थाने आदिष्टस्य 'आनि' इत्यस्य नकारस्य णत्वं भवति अट्कुप्वाङ्नुम्व्यवायेऽपि ।)

अनेनैव सूत्रेण उपसर्गस्थाद् रेफात् परस्य 'आनि' इत्यस्य नकारस्य स्थाने णत्वे 'प्रभवाणि' इति रूपं सिध्यति ।

(वा.- दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः) । दुःस्थितिः । दुर्भवानि ।

(षत्वविधौ णत्वविधौ च 'दुर्' इत्यस्य उपसर्गत्वं निषिध्यते ।)

'दुर्' इति उपसर्गपूर्वकाद् भूधातोर्लोटि मिपि पूर्ववत् शबादिषु 'दुर् भवानि' इति जाते अनेन वार्तिकेन दुर उपसर्गत्वनिषेधेन 'आनि लोट्' इत्यस्य अप्रवृत्तौ णत्वाभावे 'दुर्भवानि' इत्येव रूपं भवति ।

(वा.- अन्तःशब्दस्याऽङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्) । अन्तर्भवाणि ।

(अङ्विधौ, किविधौ, णत्वविधौ च 'अन्तर्' शब्दस्य उपसर्गत्वं जायते ।)

'अन्तर्' उपपदपूर्वकाद् भूधातोर्लोटि मिपि पूर्ववत् शबादिषु 'अन्तर् भवानि' इति जाते अनेन वार्तिकेन णत्वविधौ 'अन्तर्' इत्यस्य उपसर्गत्वाद् 'आनि लोट्' इत्यनेन 'आनि' इत्यस्य नकारस्य णत्वे 'अन्तर्भवाणि' इति रूपं जायते ।

**नित्यं ङितः ३।४।९९।**

सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः स्यात् । अलोऽन्त्यस्येति सलोपः । भवाव । भवाम ।

(ङिल्लकारसम्बन्धिनः सकारान्तस्य उत्तमपुरुषस्य नित्यं लोपो भवति । अत्र 'अलोऽन्त्यस्य' इति सूत्रनियमेन अन्त्यस्य सकारस्य लोपो भवति ।)

भूधातोर्लोटि वसि शबादिषु आडागमे च 'भव आ वस्' इति जाते सवर्णदीर्घे 'भवावस्' इति जाते अनेन सूत्रेण सकारस्य लोपे 'भवाव' इति रूपं सिध्यति । एवं बहुवचने च 'भवाम' इति रूपं सिध्यति ।

रूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवतु/भवतात् | भवताम् | भवन्तु |
| मध्यमपुरुषः | भव/भवतात् | भवतम् | भवत |
| उत्तमपुरुषः | भवानि | भवाव | भवाम |

**अनद्यतने लङ् ३।२।१११।**

अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् ।

(वर्तमानात् कालात् पूर्वं गतदिनस्य मध्यरात्रिं यावद् यः कालः सोऽद्यतनभूतकालोऽस्ति । ततः पूर्वतनः कालः अनद्यतनभूतकालः कथ्यते । तस्मिन् अनद्यतनभूतकाले द्योत्ये धातोर्लङ्लकारो भवति ।)

अनेन अनद्यतनभूतेऽर्थे लङ्लकारेऽनुबन्धलोपे 'भू ल्' इति जाते अङ्गसंज्ञात्वे च-

**लुङ्लङ्लृङ्क्ष्वडुदात्तः ६।४।७१।**

एष्वङ्गस्याऽट् ।

(लुङ्-लङ्-लृङ्लकारेषु परेषु अङ्गसंज्ञकस्य धातोः अडागमो भवति ।)

अनेन अडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे च 'अ भू ल्' इति जाते तिपि शपि गुणेऽवादेशे च 'अभवति' इति जाते-

**इतश्च ३।४।१००।**

ङितो लस्य परस्मैपदमिकारान्तं यत्तस्य लोपः । अभवत् । अभवताम् । अभवन् । अभवः । अभवताम् । अभवत । अभवम् । अभवाव । अभवाम ॥

(ङिल्लकारसम्बद्धस्य इकारान्तस्य परस्मैपदस्य लोपो भवति । 'अलोऽन्त्यस्य' इति सूत्रसहकारेणात्र ङिल्लकारसम्बद्धस्य परस्मैपदावयवस्यान्त्यस्य इकारस्य लोपो भवति ।)

अनेनात्र इकारस्य लोपे 'अभवत्' इति रूपं सिध्यति ।

प्रथमपुरुषस्य द्विवचने तसि 'अभवतस्' इत्यत्र 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तसस्तामादेशे 'अभवताम्' इति रूपं जायते । प्रथमपुरुषस्य बहुवचने झौ 'अभव झि' इत्यत्र झकारस्यान्तादेशे पररूपे च 'अभवन्ति' इति जाते 'इतश्च' इति इकारस्य लोपे 'अभवन्त्' इति स्थिते नकारतकारयोः संयागसंज्ञायां संयोगान्तस्य तकारस्य लोपे च 'अभवन्' इति रूपं सिध्यति ।

मध्यमपुरुषस्यैकवचने सिपि 'अभवसि' इत्यत्र अन्त्यस्य इकारस्य लोपे पदत्वे रुत्वे विसर्गे च 'अभवः' इति रूपं भवति ।

मध्यमपुरुषस्य द्विवचने थसि 'अभवथस्' इत्यत्र 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन थसस्तमादेशे 'अभवतम्' इति रूपं जायते। मध्यमपुरुषस्य बहुवचने थादेशे 'अभवथ' इत्यत्र 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन थस्य तादेशे 'अभवत' इति रूपं सिध्यति ।

उत्तमपुरुषस्यैकवचने मिपि 'अभव मि' इत्यत्र 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन मिपः अमादेशे 'अभव अम्' इति जाते 'अमि पूर्वः' इत्यनेन पूर्वरूपे 'अभवम्' इति रूपं निष्पद्यते । उत्तमपुरुषस्य द्विवचने वसि 'अभव वस्' इत्यत्र 'अतो दीर्घो यञि' अतोऽङ्गस्य दीर्घे 'अभवा वस्' इति जाते 'नित्यं ङितः' इत्यनेन सकारस्य लोपे 'अभवाव' इति रूपं जायते ।

उत्तमपुरुषस्य बहुवचने मसि 'अभव मस्' इत्यत्र 'अतो दीर्घो यञि' अतोऽङ्गस्य दीर्घे 'अभवा मस्' इति जाते 'नित्यं ङितः' इत्यनेन सकारस्य लोपे 'अभवाम' इति रूपं जायते ।

**रूपाणि**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुषः | अभवः | अभवतम् | अभवत |
| उत्तमपुरुषः | अभवम् | अभवाव | अभवाम |

**विधिनिमन्त्रणाऽऽमन्त्रणाऽधीष्टसंप्रश्नप्रार्थनेषु लिङ् ३।३।१६१।**

एष्वर्थेषु धातोर्लिङ् ।

(विध्यर्थे, निमन्त्रणार्थे, आमन्त्रणार्थे, अधीष्टार्थे, सम्प्रश्नार्थे, प्रार्थनार्थे च धातोर्लिङ्लकारो विधीयते ।

- विधिः प्रेरणम् । स्वापकृष्टानामाज्ञापनं विधिरस्ति । विध्यर्थे धातोर्लिङ्लकारो विधीयते । यथा- सेवकादीनामाज्ञापने 'भारं भवान् वहेत्' इत्यादीनि वाक्यानि ।
- निमन्त्रणं नियोगकरणम् । अवश्यकर्तव्यतायै प्रेरणं निमन्त्रणमस्ति, यस्याकरणे प्रत्यवायो जायते । निमन्त्रणार्थेऽपि धातोर्लिङ्लकारो विधीयते । यथा- 'श्राद्धं भवान् कुर्वीत' इत्यादीनि वाक्यानि ।
- आमन्त्रणं कामचारकरणम् । यदृच्छया प्रवृत्तिनिमित्ते कार्ये प्रेरणमामन्त्रणं विद्यते, यस्य करणे पुण्यस्य, अकरणे च पापस्य सम्भूतिर्न भवति । आमन्त्रणार्थेऽपि धातोर्लिङ्लकारो जायते । यथा- 'भवान् अत्र आसीत' इत्यादीनि वाक्यानि ।
- अधीष्टं सत्कारपूर्वको व्यापारः । सत्कारपूर्वकं सम्मान्यानां पुरतोऽनुरोधः अधीष्टमस्ति । अधीष्टार्थेऽपि धातोर्लिङ्लकारो जायते । यथा- 'मत्पुत्रं भवान् शिक्षयेत्' इत्यादीनि वाक्यानि ।

- सम्प्रश्नः सम्प्रधारणम् । कस्यचित् सन्दिग्धस्य विषयस्य निश्चयार्थ विज्ञेषु विहितः प्रश्नः सम्प्रश्नोऽस्ति । सम्प्रश्नार्थेऽपि धातोर्लिङ्लकारो जायते । यथा- 'वाराणसी गच्छेयम् उत हरिद्वारम् ?' इत्यादीनि वाक्यानि ।
- प्रार्थनं याच्ञा । याचनमेव प्रार्थनं कथ्यते । प्रार्थनार्थेऽपि धातोर्लिङ्लकारो जायते । यथा- 'प्रभो ! भोजनं लभेय ?' इत्यादीनि वाक्यानि ।

अनेन विध्यादिष्वर्थेषु लिङ्लकारे विहिते तिपि शपि गुणेऽवादेशे च 'भवति' इति जाते-

**यासुट् परस्मैपदेषूदात्तो ङिच्च ३।४।१०३।**

लिङः परस्मैपदानां यासुडागमो, ङिच्च । ङित्त्वोक्तेर्ज्ञायते- 'क्वचिदनुबन्धकार्येऽप्यनल्विधाविति प्रतिषेधः' इति, तेन वक्ष्यमाणेत्यत्र टित्त्वादुगित्त्वाच्च ङीब्न ।

(लिङ्सम्बद्धानां परस्मैपदानां यासुडागमो भवति । स यासुट् ङिच्च भवति । अत्र लिङो ङित्त्वेन तिपो ङित्त्वाद् यदागमपरिभाषया यासुटो ङित्त्वं सम्भवति चेत् सूत्रे पुनर्ङित्त्वकथनं द्विरुक्तं न मन्तव्यम्, अनुबन्धकार्यस्य अल्विधित्वेन स्थानिवद्भावे ङित्त्वं नागच्छति । यदि स्थानिवद्भावेन अनुबन्धधर्म आगमिष्यत् तर्हि लृटः स्थाने शानचि विहिते स्थानिवद्भावेन शानचः टित्त्वाद् उगित्त्वाच्च 'वक्ष्यमाण' इत्यतः स्त्रीत्वविक्षायां ङीप्प्रत्ययः अभविष्यत् । परम् अल्विधित्वेन स्थानिवत्त्वाभावात् टित्त्व-उगित्त्वयोर नुपस्थित्यां तथा न भवति ।)

अनेनात्र 'ति' इत्यस्य यासुडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे च 'भव यास् ति' इति जाते-

**लिङः सलोपोऽनन्त्यस्य ७।२।७९।**

सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः । इति प्राप्ते ।

(विध्याद्यर्थेषु विहितो लिङ्लकारः सार्वधातुकलिङ् अस्ति । अन्ते भवः अन्त्यः, न अन्त्यः अनन्त्यः । सार्वधातुकलिङः अन्त्यभिन्नस्थाने स्थितस्य सकारस्य लोपो भवति ।)

अनेन सकारस्य लोपे प्राप्ते

**अतो येयः ।७।२।८०।**

अतः परस्य सार्वधातुकावयवस्य 'यास्' इत्यस्य इय् । गुणः । 'लोपो व्योर्वलि' । भवेत् । भवेताम् ।

(अकारात् परस्य सार्वधातुकावयवस्य 'यास्' इत्यस्य स्थाने 'इय्' आदेशो भवति । सार्वधातुकलिङि 'यास्' इत्यतः पूर्वम् अकारो वर्तते चेत् सकारस्य लोपो न भवति, 'यास्' इत्यस्य स्थाने 'इय्' आदेशो भवति परम् 'यास्' इत्यतः पूर्वम् अकारो नास्ति, अन्ये वर्णा वर्तन्ते चेत् तत्र 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन सकारस्य लोपो भवति ।)

अनेन 'यास्' इत्यस्य स्थाने 'इय्' आदेशे 'भव इय् ति' इति जाते अकार-इकारयोर्गुणे 'लोपो व्योर्वलि'

इत्यनेन यकारस्य लोपे च 'भवेति' इति जाते 'इतश्च' इति इकारस्य लोपे 'भवेत्' इति रूपं सिध्यति । प्रथमपुरुषस्य द्विवचने तसि शपि गुणेऽवादेशे यासुडागमे इयादेशे गुणे च 'भवेय् तस्' इति जाते तसस्तामादेशे यकारस्य लोपे च 'भवेताम्' इति रूपं जायते । प्रथमपुरुषस्य बहुवचने झौ शपि गुणेऽवादेशे यासुडागमे इयादेशे गुणे च 'भवेय् झि' इति जाते

**झेर्जुस् ३।४।१०८।**

लिङो झेर्जुस् ।

(लिङ्लकारस्य 'झि' इत्यस्य स्थाने जुस् आदेशो भवति । जकारस्य 'चुटू' इत्यनेन इत्संज्ञायाम् 'उस्' इत्येवावशिष्यते ।)

इत्यनेन 'झि' इत्यस्य स्थाने जुसादेशेऽनुबन्धलोपे च 'भवेय् उस्' इति जाते वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'भवेयुः' इति रूपं जायते ।

**उस्यपदान्तात् ६।१।९६**

अपदान्तादवर्णादुसि परे पररूपमेकादेशः स्यात् । इति प्राप्ते । परत्वान्नित्यत्वाच्चाऽतो येय इति प्राञ्चः । यद्यप्यन्तरङ्गत्वात्पररूपं न्याय्यम्, तथापि 'यास्' इत्यस्य 'इय्' इति व्याख्येयम् । एवञ्च सलोपस्याऽपवाद इय् । 'अतो येयः' इत्यत्र तु सन्धिरार्षः । भवेयुः । भवेः । भवेतम् । भवेत । भवेयम् । भवेव । भवेम ।

(अपदान्ताद् अवर्णाद् उसि परे पूर्वपरयोः स्थाने पररूपमेकादेशो भवति । 'भव यास् उस्' इत्यत्र सलोपानन्तरम् अनेन सूत्रेण पररूपं भवितुम् अर्हति, अन्तरङ्गत्वेन पररूपम् उचितमपि दृश्यते, परं परत्वाद् नित्यत्वाच्च अत्र 'इय्'आदेश एव कर्तव्य इति प्राचां मतमस्ति । तेन 'यास्' इत्यस्य स्थाने 'इय्' आदेशः कर्तव्य इति व्याख्या सूत्रस्य कार्या । 'येयः' इत्यत्र सन्धिस्तु आर्षो वर्तते ।)

मध्यमपुरुषस्यैकवचने सिपि शपि गुणेऽवादेशे यासुटि इयादेशे गुणे यलोपे च 'भवेसि' इत्यत्र इकारस्य लोपानन्तरं पदत्वे रुत्वे विसर्गे च 'भवेः' इति रूपं सिध्यति ।

मध्यमपुरुषस्य द्विवचने थसि शपि गुणेऽवादेशे यासुटि इयादेशे गुणे यलोपे च 'भवेथस्' इत्यत्र थसस्तमादेशे 'भवेतम्' इति रूपं सिध्यति । मध्यमपुरुषस्य बहुवचने थादेशे शपि गुणेऽवादेशे यासुटि इयादेशे गुणे यलोपे च 'भवेथ' इत्यत्र 'थ' इत्यस्य स्थाने तादेशे 'भवेत' इति रूपं सिध्यति ।

उत्तमपुरुषस्यैकवचने मिपि शपि गुणेऽवादेशे यासुटि इयादेशे गुणे च 'भवे मि' इत्यत्र मिपः अमादेशे वर्णसम्मेलने च 'भवेयम्' इति रूपं जायते ।

**उत्तमपुरुषस्य द्विवचने वसि शपि गुणेऽवादेशे यासुटि इयादेशे गुणे यलोपे च 'भवेवस्' इत्यत्र 'नित्यं ङितः' इति सकारस्य लोपे 'भवेव' इति रूपं सिध्यति ।**

एवमेव 'भवेम' इत्यपि सिध्यति ।

रूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवेत् | भवेताम् | भवेयुः |
| मध्यमपुरुषः | भवेः | भवेतम् | भवेत |
| उत्तमपुरुषः | भवेयम् | भवेव | भवेम |

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्

(ख) सेर्ह्यपिच्च

(ग) हिन्योरुत्वं न, इकारोच्चारणसामर्थ्यात् ।

(घ) ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्याः ।

(ङ) अन्तःशब्दस्याऽङ्किविधिणत्वेषूपसर्गत्वं वाच्यम

(च) लुङ्लङ्लृङ्क्ष्वडुदात्तः

(छ) यासुट् परस्मैपदेषूदात्तो ङिच्च

(ज) परत्वान्नित्यत्वाच्चाऽतो येय इति प्राञ्चः ।

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) आशीर्वादेऽर्थे कौ लकारौ विधीयेते ?

(ख) लोट्लकारसम्बन्धिनः सेः स्थाने क आदेशो भवति ?

(ग) 'ते प्राग्धातोः' इति सूत्रस्य कोऽभिप्रायः ?

(घ) को नामाद्यतनभूतकालः ?

(ङ) 'दुर्' इत्यस्य उपसर्गत्वं केन कुत्र निषिद्धं भवति ?

(च) केषु लकारेषु परेषु अङ्गस्य अडागमो भवति ?

(छ) कुत्रत्यस्य सकारस्य लोपो भवति ?

(ज) केन 'भवेय् ति' इत्यत्र यलोपो भवति ?

३. सोदाहरणं सूत्राणामर्थं लिखत

(क) अतो हेः

(ख) आडुत्तमस्य पिच्च

(ग) आनि लोट्

(घ) इतश्च

(ङ) झेर्जुस्

(च) उस्यपदान्तात्

४. भूधातोः कर्तरि लङि रूपाणि लिखत ।

५. 'तस्थस्थमिपां तान्तन्तामः' इत्यस्य स्थानिनामादेशाः परस्परमेलनेन दर्शनीयाः ।

६. के विध्यदयोऽर्थाः ? तानर्थान् सोदाहरणमर्थापयत ।

७. 'प्रभवाणि' इत्यत्र कथं णत्वं जायते ?

८. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत

(क) भवतु/भवतात् (ख) भवताम् (ग) भव (घ) भवानि (ङ) भवाव

(च) अभवत् (छ) अभवन् (ज) भवेत् (झ) भवेयुः

९. अधस्तनपदानां लकारपुरुषवचनानि निर्दशत

(क) भवतम् (ख) भवाम (ग) अभवत (घ) अभवम् (ङ) भवेः (च) भवेव

१०. सिद्धपदानि दर्शयत

(क) भू + लोट् (झि) (ख) भू + लोट् (थस्) (ग) भू + लङ् (सि)

(घ) भू + लङ् (वस्) (ङ) भू + विधिलिङ् (तस्) (च) भू + विधिलिङ् (मिप्)

११. पदानां वाक्ये प्रयोगं निदर्शयत

(क) भवन्तु (ख) भव (ग) अभवः (घ) अभवाव (ङ) भवेताम् (च) भवेम

## चतुर्थः पाठः

### भूधातोः लिङि लुङि लृङि च रूपसाधनम्

भूधातोः 'आशिषि लिङ्लोटौ' इत्यनेन आशीर्वादेऽर्थे लिङ्लकारे विहिते 'भू ल्' इति जाते लः स्थाने तिपि 'भू ति' इति जाते

**लिङाशिषि ३।४।११६।**

आशिषि लिङस्तिङार्धधातुकसंज्ञः स्यात् ।

(आशीर्वादार्थे विहितस्य लिङः स्थाने आदिष्टस्तिङ् आर्धधातुकसंज्ञको भवति ।)

इति 'ति' इत्यस्य आर्धधातुकसंज्ञायां यासुडागमेऽनुबन्धलोपे टित्त्वादाद्यावयवे च 'भू यास् ति' इति जाते-

**किदाशिषि ३।४।१०४।**

आशिषि लिङो यासुट् कित्स्यात् । 'स्को'रिति सलोपः ।

(आशीर्वादार्थे विहितेन लिङा सम्बद्धस्य यासुटः कित्त्वं भवति ।)

इति यासुटः कित्त्वे ऊकारस्य गुणे प्राप्ते

**क्ङिति च १।१।५।**

गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः । भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ।

(गिति किति ङिति च परे इको गुणवृद्धी न भवतः ।)

इत्यनेन गुणनिषेधे च 'भूयास् ति' इति जाते 'इतश्च' इति सूत्रेण इकारस्य लोपे सकारतकारयोः संयोगसंज्ञायां 'स्कोः संयोगाद्योरन्ते च' इत्यनेन संयोगादेः सकारस्य लोपे 'भूयात्' इति रूपं जायते । प्रथमपुरुषस्य द्विवचने तसि आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् तस्' इति जाते तसस्तामादेशे च 'भूयास्ताम्' इति रूपं जायते ।

प्रथमपुरुषस्य बहुवचने झौ आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् झि' इति जाते झेर्जुसादेशे पदत्वे रुत्वे विसर्गे च 'भूयासुः' इति रूपं सम्पद्यते ।

मध्यमपुरुषस्यैकवचने सिपि आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् सि' इति जाते इकारस्य लोपे सकारयोः संयोगसंज्ञात्वे संयोगादेः सकारस्य लोपे पदत्वे रुत्वे विसर्गे च 'भूयाः' इति रूपं सम्पद्यते । मध्यमपुरुषस्य द्विवचने थसि आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् थस्' इति जाते थसस्तमादेशे च 'भूयास्तम्' इति रूपं जायते । मध्यमपुरुषस्य बहुवचने

थादेशे आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् थ' इति जाते 'थ' इत्यस्य तादेशे च 'भूयास्त' इति रूपं जायते ।

उत्तमपुरुषस्य एकवचने मिपि आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् मि' इति जाते मिपः अमादेशे वर्णसम्मेलने च 'भूयासम्' इति रूपं जायते । उत्तमपुरुषस्य द्विवचने वसि आर्धधातुकत्वे यासुटि कित्त्वे प्राप्तस्य गुणस्य निषेधे च 'भूयास् वस्' इति जाते 'नित्यं ङितः' इति सूत्रेण सकारस्य लोपे 'भूयास्व' इति रूपं जायते ।

एवमेव मसि 'भूयास्म' इति रूपं भवति ।

**लुङ् ३।२।११०।**

भूतार्थे धातोर्लुङ् ।

(भूतसामान्यार्थे धातोर्लुङ्लकारो विधीयते ।)

भूधातोः भूतसामान्यार्थे अनेन सूत्रेण लुङि अङ्गत्वे अडागमे तिपि च 'अ भू ति' इति जाते-

माङि लुङ् ३।३।१७५।

माङ्युपपदे धातोर्लुङ् स्यात् । सर्वलकाराऽपवादः ।

(माङि उपपदे सति धातोः सर्वेषां लकाराणामपवादेन लुङ्लकारो भवति । यथा- 'मा भूत्' इति ।)

**स्मोत्तरे लङ् च ३।३।१७६।**

स्मोत्तरे माङि लङ् स्याल्लुङ् च ।

(स्मोत्तरे माङि उपपदे धातोर्लङ्लकारोऽपि विधीयते, लुङ्लकारोऽपि विधीयते । यथा- मा स्म भवत्, मा स्म भूत् इति ।)

भूधातोः सामान्यभूतेऽर्थे लुङि अडागमे तिपि सार्वधातुकत्वे च शपि प्राप्ते-

**च्लि लुङि ३।१।४३।**

शबाद्यपवादः ।

(शप्-श्यन्नादिविकरणप्रत्ययान् बाधित्वा लुङि परे धातोश्च्लिप्रत्ययो भवति ।)

इति सूत्रेण च्लिप्रत्यये 'अ भू च्लि ति' इति जाते-

**च्लेः सिच् ३।१।४४।**

इचावितौ ।

(च्लेः स्थाने 'सिच्' आदेशो भवति । सिचः चकारस्य इकारस्य च इत्संज्ञायां 'स्' इत्येव शिष्यते ।)

अनेन च्लेः स्थाने 'सिच्' आदेशेऽनुबन्धलोपे 'अभूस् ति' इति जाते-

**गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु २।४।७७।**

एभ्यः परस्य सिचो लुक् स्यात् परस्मैपदेषु । गापाविहेणादेशपिबती गृह्येते ।

(इणः स्थाने आदिश्यमानाद् गाधातोः, स्थाधातोः, घुसंज्ञकधातोः, पानार्थकपाधातोः, भूधातोश्च परस्य सिचो लुग् भवति परस्मैपदसंज्ञकेषु प्रत्ययेषु परेषु । अत्र 'गा' इत्यनेन 'इण्'धातोः स्थाने आदिष्टो 'गा' इत्यादेशो बोध्यते चेत् 'पा' इत्यनेन पानार्थकः पाधातुरेव गृह्यते । घुसंज्ञकास्तु 'दाप्' इति, 'दैप्' इति च विहाय दारूपा धारूपाश्च धातवः ।)

अनेन भूधातोः परस्य सिचः सकारस्य लोपे 'अभूति' इति जाते ऊकारस्य गुणे प्राप्ते-

**भूसुवोस्तिङि ७।३।८८।**

'भू' 'सू' एतयोः सार्वधातुके तिङि परे गुणो न । अभूत् । अभूताम् । अभूवन् । अभूः । अभूतम् । अभूत । अभूवम् । अभूव । अभूम ।

(सार्वधातुके तिङि परे 'भू' इत्यस्य, 'सू' इत्यस्य च ऊकारस्य गुणो न भवति ।)

अनेन तिङि परे 'भू' इत्यस्य ऊकारस्य गुणनिषेधे अन्त्यस्य इकारस्य लोपे च 'अभूत्' इति रूपं सिध्यति ।

प्रथमपुरुषस्य द्विवचने तसि च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे तसस्तामादेशे च 'अभूताम्' इति रूपं जायते । प्रथमपुरुषस्य बहुवचने झौ च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे झेरन्तादेशे 'अभू अन्ति' इति जाते वुगागमेऽनुबन्धलोपे कित्त्वादन्त्यावयवे 'अभूवन्ति' इति जाते अन्त्यस्य इकारस्य लोपे नकारतकारयोः संयोगसंज्ञायां संयोगान्तस्य तकारस्य लोपे च 'अभूवन्' इति रूपं निष्पद्यते ।

मध्यमपुरुषस्यैकवचने सिपि च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे अन्त्यस्य इकारस्य लोपे पदत्वे रुत्वे विसर्गे च 'अभूः' इति रूपं जायते । मध्यमपुरुषस्य द्विवचने थसि च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे थसस्तमादेशे च 'अभूतम्' इति रूपं जायते । मध्यमपुरुषस्य बहुवचने थे च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे थस्य तादेशे च 'अभूत' इति रूपं जायते ।

उत्तमपुरुषस्यैकवचने मिपि च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे मिपः अमादेशे वुगागमे च 'अभूवम्' इति रूपं भवति । उत्तमपुरुषस्य द्विवचने वसि च्लौ सिचि सिचो लुकि प्राप्तस्य गुणस्य निषेधे अन्त्यस्य सकारस्य लोपे च 'अभूव' इति रूपं जायते ।

मसि च एवमेव 'अभूम' इति रूपं जायते ।

**न माङ्योगे ६।४।७४।**

माङ्योगे अडाटौ न स्तः । मा भवान् भूत् । मा स्म भवत् । मा स्म भूत् ।

('माङ्' इत्युपपदस्य योगे धातोः अडागम-आडागमौ न भवतः ।)

'माङ्' इत्युपपदपूर्वकाद् भूधातोः लुङ्लकारे, अनुबन्धलोपे, अडागमे प्राप्ते 'न माङ्योगे' इति सूत्रेण निषेधे 'मा भू ल्' इति जाते तिपि च्लिप्रत्यये सिजादेशे सिचो लुकि च 'मा भू ति' इति जाते प्राप्तस्य गुणस्य 'भूसुवोस्तिङि' इति निषेधे इकारस्य लोपे च ' मा भूत्' इति रूपं सिध्यति । 'मा अभूत्' इत्यत्र सवर्णदीर्घे विहितेऽपि 'मा भूत्' इति भवति । अतोऽत्र अडागमाभावं निश्चेतुं सवर्णादीर्घाभावप्रदर्शनाय 'मा भवान् भूत्' इत्युदाहृतमस्ति । माङि उपपदे माङ्धात्वोरन्तः अन्यपदस्य वर्तमानत्वेऽपि धातोः अडागमो न भवति ।

स्मोत्तरे माङि उपपदे भूधातोः 'स्मोत्तरे लङ् च' इत्यनेन लङ्लकारे प्राप्तस्य अडागमस्य 'न माङ्योगे' इति निषेधे तिपि शपि गुणेऽवादेशे इकारस्य लोपे च 'मा स्म भवत्' इति रूपं भवति । सूत्रे चकारपाठाद् लुङ्लकारे पूर्ववद् 'मा स्म भूत्' इति रूपं जायते ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अभूत् | अभूताम् | अभूवन् |
| मध्यमपुरुषः | अभूः | अभूतम् | अभूत |
| उत्तमपुरुषः | अभूवम् | अभूव | अभूम |

**लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३।३।१३९**

हेतुहेतुमद्भावादि लिङ्निमित्तम्, तत्र भविष्यदर्थाद्धातोर्लृङ्, क्रियाया अनिष्पत्तौ गम्यमानायाम् । अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत ।अभविष्यम् । अभविष्याव । अभविष्याम । 'सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत्' इत्यादि ज्ञेयम् ।

(हेतुः कारणममस्ति । हेतुमत् कार्यमस्ति । हेतुहेतुमद्भावः कार्यकारणभावः । लिङ्लकारविधायकैर्विविध-सूत्रैः निर्दिष्टं कार्यकारणभावादिकमेव लिङ्निमित्तमस्ति । क्रियातिपत्तिर्नाम क्रियाया असिद्धिः । क्रियाया असिद्धिर्वर्तते चेत् तादृशे लिङ्निमित्ते यत्र भविष्यत्कालस्य विवक्षा भवति, तत्र लृङ्लकारो भवति । यथा- 'यदि सुवृष्टिः अभविष्यत्, तर्हि सुभिक्षम् अभविष्यत्' इत्यादि ।)

हेतुहेतुमद्भावादौ भविष्यत्यर्थे लृङि, अडागमे, तिपि, स्यप्रत्यये, आर्धधातुकत्वे, इडागमे ऊकारस्य गुणे, अवादेशे, सकारस्य षत्वे, इकारस्य लोपे च 'अभविष्यत्' इति रूपं सिध्यति । तसादौ तु लङ्लकारवत् तामादिविधानेन 'अभविष्यताम्' इत्यादीनि रूपाणि सिध्यन्ति ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अभविष्यत् | अभविष्यताम् | अभविष्यन् |
| मध्यमपुरुषः | अभविष्यः | अभविष्यतम् | अभविष्यतः |
| उत्तमपुरुषः | अभविष्यम् | अभविष्याव | अभविष्याम |

'प्रणिभवति' इत्यादौ उपसर्गाणामसमस्तत्वेऽपि संहिता नित्या । तदुक्तम्-

**'संहितैकपदे नित्या, नित्या धातूपसर्गयोः ।**
**नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते ॥**

'प्र नि' इत्युपसर्गद्वयपूर्वकाद् 'भू' धातोर्लटि तिपि शपि गुणेऽवादेशे च 'प्र नि भवति' इत्यत्र उपसर्गयोः असमासेऽपि संहिताया नित्यत्वाद् नेर्नकारस्य णत्वं भवति । अन्यथा संहिताया विवक्षायां णत्वं भवति, अविवक्षायां न भवति । एवं सति 'शेषे विभाषा' इति सूत्रे विभाषाग्रहणस्य वैयर्थ्यं सिध्यति । अत एव 'संहितैकपदे नित्या' इति कारिका ग्रन्थे निर्दिष्टा वर्तते । अत्र संहिताया नित्यत्वस्य त्रीणि स्थानानि निर्दिश्य संहिताया वैकल्पिकत्वस्यैकं स्थलं निर्दिष्टमस्ति-

(क) **संहितैकपदे नित्या -** एकस्मिन् अखण्डपदे संहिता नित्या भवति । यथा- 'भो अति' इत्यत्र संहिताया नित्यत्वाद् अवादेशो भवत्येव ।

(ख) **नित्या धातूपसर्गयोः-** धातूपसर्गयोर्मध्येऽपि संहिता नित्या भवति । यथा- 'उत् भवति' इत्यत्र संहिताया नित्यत्वाद् जश्त्वं भवति ।

(ग) **नित्या समासे-** समस्तयोः पदयोर्मध्येऽपि संहिता नित्या भवति । यथा- 'गणानाम् ईशः = गण ईशः' इत्यत्र संहिताया नित्यत्वाद् गुणो भवति ।

(घ) **वाक्ये तु सा विवक्षामपेक्षते-** वाक्ये तु संहिता यादृच्छिकी भवति । विवक्षानुसारेण सन्धिं विधातुमपि शक्यते, न विधातुमपि शक्यते । यथा- 'अत्र आगच्छ' इत्येव वक्तुमपि शक्यते, 'अत्रागच्छ' इति वक्तुमपि शक्यते ।

एवं धातूपसर्गयोः संहिताया नित्यत्वात् 'प्रणिभवति' इत्यादौ विकल्पेन णत्वार्थं विभाषाग्रहणं समुचितमेव ।

**धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्त्तते ।**
**विशिनष्टि तमेवार्थमुपसर्गगतिस्त्रिधा । इति ।**

'ते प्राग्धातोः' इत्यनेन उपसर्गाणां धातोः पूर्वं विधानं निश्चितमस्ति । धातोः पूर्वं प्रयुक्ता उपसर्गाः प्रायेण धात्वर्थपरिवर्तनं कुर्वन्ति । तत्र सोपसर्गाणां धातूनामर्थनिश्चयने धातूनां गतिबोधनाय ग्रन्थे 'धात्वर्थं बाधते' इति कारिका उल्लिखिता वर्तते । कारिकानुसारेण धात्वर्थनिश्चयने उपसर्गाणां त्रिविधा गतिर्भवति-

(क) **धात्वर्थं बाधते कश्चित्-** धातौ योजितः कश्चिद् उपसर्गो धातुपाठे निर्दिष्टं धात्वर्थं प्रबाध्य नूतनमर्थं द्योतयति । यथा- 'प्रभवति' इत्यत्र 'प्र' इत्युपसर्गो 'भू'धातोः धातुपाठे निर्दिष्टं सत्तार्थं प्रबाध्य नवीनं सामर्थ्यार्थं द्योतयति ।

(ख) **कश्चित्तमनुवर्त्तते-** धातौ योजितः कश्चिद् उपसर्गो धातुपाठे निर्दिष्टस्यैव धात्वर्थस्य अनुवर्तनं करोति । यथा- 'प्रणमति' इत्यत्र 'प्र' इत्युपसर्गः 'नम्'धातोः धातुपाठे निर्दिष्टस्य प्रह्वत्वरूपस्य धात्वर्थस्यैव अनुवर्तनं करोति ।

(ग) **विशिनष्टि तमेवार्थम् (कश्चित्)-** धातौ योजितः कश्चिद् उपसर्गो धातुपाठे निर्दिष्टं धात्वर्थं विशिष्य निर्दिशति । यथा- 'उपगच्छति' इत्यत्र 'उप' इत्युपसर्गो धातुपाठे निर्दिष्टं गत्यर्थं विशिष्य समीपगमनार्थं निर्दिशति ।

सत्ताद्यर्थनिर्देशश्चोपलक्षणम् । 'यागात्स्वर्गो भवती'त्यादौ 'उत्पद्यते' इत्याद्यर्थात् ।

धातूनां सत्ताद्यर्थनिर्देश उपलक्षणमस्ति । स्वार्थबोधकत्वे सति स्वेतरार्थबोधकत्वम् उपलक्षणस्य लक्षणमस्ति । निर्दिष्टार्थबोधनपूर्वकं प्रसङ्गानुरूपं तदितरार्थबोधनम् उपलक्षणं कथ्यते । यथा- 'भू' धातुः स्वस्य धातुपाठनिर्दिष्टस्य सत्तार्थस्य बोधनपुरःसरं 'यागात्स्वर्गो भवति' इत्यादौ उत्पत्त्याद्यर्थबोधनं च करोति । अतो 'भू'धातोः सत्तार्थनिर्देश उपलक्षणमस्ति ।

उपसर्गास्त्वर्थविशेषस्य द्योतकाः । प्रभवति । पराभवति । सम्भवति । अनुभवति । अभिभवति । उद्भवति । परिभवति-इत्यादौ विलक्षणार्थावगतेः । उक्तञ्च-

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।**

**प्रहाराऽऽहारसंहार-विहार-परिहारवत् ॥**

उपसर्गाणां प्रत्येकं विशेषार्थं भवति । ते प्रायेण स्वस्य तेनैव विशेषार्थेन धात्वर्थं विशिष्टं कारयन्ति । उपसर्गाणां विशेषार्था अत्र निर्दिश्यन्ते-

प्र- । गतिः । आरम्भः । उत्कर्षः । सर्वतोभावः । प्राथम्यम् । ख्यातिः । उत्पत्तिः । व्यवहारः ।

परा- विमोक्षः । प्राधान्यम् । प्रातिलोम्यम् । धर्षणम् । आभिमुख्यम् । भृशार्थम् । विक्रमः । गतिः । वधः ।

अप- अनादरः । भ्रंशः । असाकल्यम् । वैरूप्यम् । त्यागः । नञर्थः । इति दुर्गादासः ॥ अपकृष्टार्थः । वर्ज्जनार्थः । वियोगः । विपर्य्ययः । विकृतिः । चौर्य्यं । निर्द्देशः । हर्षः ।

सम्- शोभनार्थः । समार्थः । सङ्गतार्थः । प्रकृष्टार्थः ।

अनु- पश्चात् । सादृश्यम् । लक्षणम् । वीप्सा । इत्थम्भावः । भागः । हीनः । सहार्थः । आयामः । समीपम् । परिपाटी ।

अव- निश्चयः । असाकल्यम् । अनादरः । आलम्बनम् । विज्ञापनम् । व्यापनम् । शुद्धिः । अल्पम् । परिभवः । नियोगः । पालनम् ।

निस्- निश्चयः । निषेधः । साकल्यम् । अतीतम् ।

निर्- निर्णयः । निषेधः ।

दुस्- दुःखभावनम् । कोपः ।

दुर्- निषेधः । दुःखम् । निन्दा । अवक्षेपणम् ।

वि- निग्रहः । नियोगः । पदपूरणम् । निश्चयः । असहनम् । हेतुः । अव्याप्तिः । विनियोगः । ईषदर्थः । परिभवः । शुद्धम् । अवलम्बनम् । विज्ञानम् । विशेषः । गतिः । आलम्भः । पालनम् । वैरूप्यम् । नञर्थः ।

आङ्- ईषत् । अभिव्याप्तिः । सीमा । समन्तात् । ग्रहणम् । प्रत्यावृत्तिः ।

नि- निषेधः । निश्चयः । निवेशः । भृशार्थः । नित्यार्थः । संशयः । क्षेपः । कौशलम् । उपरमः । सामीप्यम् । आश्रयः । दानम् । मोक्षः । अन्तर्भावः । बन्धनम् । राश्यधो- भावः । विन्यासः ।

अधि- उपरिभागः । अधिकारः । ईश्वरः । अधिकम् ।

अपि- आहरणम् । सम्भावनम्। निन्दा । अनुज्ञा । अल्पत्वम् । समुञ्चयः । प्रश्नः । शङ्का । युक्तपदार्थः । कामाचारक्रिया ।

अति- प्रशंसा । प्रकर्षम् । लङ्घनम् । अतिशयम् । क्रान्तम् । पूजनम् । असम्भावना ।

सु- निर्भरम् । पूजा । शोभनम् । अनुमतिः । कृच्छ्रम् । समृद्धिः । अनायासः । अतिशयः ।

उत्- ऊर्ध्वम् । उत्कर्षः । प्राकट्यम् । नैकट्यम् । प्रकाशः । विभागः । प्राबल्यम् । अस्वास्थ्यम् । शक्तिः । प्राधान्यम् । बन्धनम् । भावः । मोक्षः । लाभः । ऊर्ध्वकर्म ।

अभि- समन्तात् । उभयार्थः । वीप्सा । इत्थम्भावः । धर्षणम् । अभिलाषः । आभिमुख्यम् ।

प्रति- प्रतिनिधिः । मुख्यसदृशः । वीप्सा । लक्षणम् । चिह्नम् । इत्थम्भूताख्यानम् । भागः । प्रतिदानम् । स्तोकम् । अल्पम् । क्षेपः । निश्चयः । व्यावृत्तिः । प्रशस्तिः । विरोधः । समाधिः । आभिमुख्यम् । स्वभावः ।

परि- सर्वतोभावः । अतिशयः । वीप्सा । इत्थम्भावः । चिह्नम् । भागः । त्यागः । नियमः ।

उप- अनुगतिः । पश्चाद्भावः । अनुकम्पा । आधिक्यम् । सामीप्यम् । प्राथम्यम् । दाक्षिण्यम् । सामर्थ्यम् । अत्ययः । भूषणम् । दोषाख्यानम् । निदर्शनम् । आश्चर्यकरणम् । दानम् । मारणम् । व्याप्तिः । लिप्सा । उपालम्भनम् । पूजा । उद्योगः ।

प्रायेण उपसर्गो धात्वर्थपरिवर्तनं करोति । धातुपाठे निर्दिष्टं धात्वर्थम् उपसर्गो बलाद् अन्यत्रैव नयति । यथा-

हृ + घञ् = हारः = हरणम्

प्र + हारः = प्रहारः = प्रहरणम्, आघातः

आङ् + हारः = आहारः = भोजनम्

सम् + हारः = संहारः = विनाशः

वि + हारः = विहारः = भ्रमणम्

परि + हारः = परिहारः = अनादरः, त्यागः ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) क्क्ङिति च

(ख) स्मोत्तरे लङ् च

(ग) गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ।

(घ) लिङ्निमित्ते लृङ् क्रियातिपत्तौ ।

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) कीदृशस्य यासुटः कित्त्वं भवति ?

(ख) आशीर्वादार्थे विहितो लिङादेशस्तिङ् किं संज्ञः ?

(ग) च्लेः स्थाने क आदेशो भवति ?

(घ) स्मोत्तरे माङि उपपदे कौ लकारौ विधीयेते ?

(ङ) परस्मैपदेषु केभ्यो धातुभ्यः सिचो लुक् ?

(च) माङ्योगे किं न भवति ?

(छ) कस्मिन्नर्थे लृङ् भवति ?

(ज) 'परा' इत्युपसर्गस्य केऽर्थाः ?

(झ) वीप्सार्थे क उपसर्गः प्रयुज्यते ?

(ञ) निर्णयनिश्चययोरर्थयोः क उपसर्गः प्रयुज्यते ?

३. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) क्ङिति च

(ख) माङि लुङ्

(ग) भूसुवोस्तिङि

(घ) लिङ्निमित्ते लृङ् क्रियातिपत्तौ

४. **सत्तार्थकभूधातोः कर्तरि लुङि रूपाणि लिखत ।**

५. **'संहितैकपदे नित्या...' इति कारिकायाः सोदाहरणमर्थं लिखत ।**

६. **उपसर्गगतिः कतिविधा भवति ? सोदाहरणं प्रदर्शयत ।**

७. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) भूयात्   (ख) भूयासम्   (ग) अभूत्   (घ) अभूवम्   (ङ) अभविष्यत्

९. **अधस्तनपदानां लकारपुरुषवचनानि निर्दशत**

(क) भूयासुः   (ख) भूयास्त   (ग) अभूताम्   (घ) अभूत

(ङ) अभविष्यः   (च) अभविष्याव

१०. **सिद्धपदानि दर्शयत**

(क) भू + लोट् (झि)   (ख) भू + लोट् (थस्)   (ग) भू + लङ् (सि)

(घ) भू + लङ् (वस्)   (ङ) भू + विधिलिङ् (तस्)   (च) भू + विधिलिङ् (मिप्)

११. **पदानां वाक्ये प्रयोगं निदर्शयत**

(क) भूयाः   (ख) भूयासम्   (ग) अभूवन्

(घ) अभूतम्   (ङ) अभविष्यन्   (च) अभविष्यम्

## पञ्चमः पाठः

# अतप्रभृतीनां परस्मैपदिधातूनां प्रयोगसिद्धिनिदर्शनम्

अत सातत्यगमने । अतति । अततः । अतन्ति । अतसि । अतथः । अतथ । अतामि । अतावः । अतामः । सातत्यगमनं नदीनामिव नैरन्तर्येण चलनम् । तस्मिन्नर्थे वर्तमानस्य 'अत' इति शब्दस्य 'भूवादयो धातवः' इति सूत्रेण धातुसंज्ञा भवति । तत उपदेशत्वाद् अकारस्य इत्संज्ञा भवति । अनन्तरं लटि तिपि शपि 'अतति' इति रूपं जायते । एवं भूधातोर्लट्लकारस्येव अस्यापि धातोर्लटि सर्वाणि रूपाणि जायन्ते ।

'अत्' धातोर्लिटि तिपि तिपो णलादेशे च 'अत् अ' इत्यत्र द्वित्वेऽभ्यासत्वे हलादिशेषे च 'अ अत् अ' इति जाते-

**अत आदेः ७।४।७०।**

अभ्यासस्याऽऽदेरतो दीर्घः स्यात् । पररूपाऽपवादः । आत । आततुः । आतुः । आतिथ । आतथुः । आत । आत । आतिव । आतिम । अतिता । अतिष्यति । अततु ।

('अतो गुणे' इति सूत्रेण प्राप्तं पररूपं प्रबाध्य अभ्यासस्य आदौ वर्तमानस्य अकारस्य दीर्घो भवति ।) अनेन सूत्रेण अभ्यासादेः अकारस्य दीर्घे 'आ अत् अ' इति जाते सवर्णदीर्घे वर्णसम्मेलने च 'आत' इति रूपं सिध्यति । एवं लिट्लकारस्य सर्वाणि रूपाणि जायन्ते । सिपि वसि मसि च इडागमो भवति तदर्थम् आर्धधातुकसंज्ञा चानिवार्या ।

लुटि तिपि तासिप्रत्यये इडागमे च 'अतितास् ति' इति जाते तिपो 'डा' आदेशे टिसंज्ञायां डित्त्वसामर्थ्यादभस्यापि टेर्लोपे 'अतिता' इति रूपं जायते । एवं भूधातोर्लुटि इव अस्यापि लुटि सर्वाणि रूपाणि जायन्ते । लृटि तिपि स्यप्रत्यये इडागमे षत्वे च 'अतिष्यति' इति रूपं जायते । एवमेव लृटि सर्वाणि रूपाणि जायन्ते । लोटि तिपि शपि इकारस्य उत्वे च 'अततु' इति जाते विकल्पेन 'तातङ्' आदेशे 'अततात्' इति रूपं जायते । 'तातङ्' आदेशाभावपक्षे तु 'अततु' इति रूपं भवति ।

लङि 'अत् ल्' इति जाते-

**आडजादीनाम् ६।४।७२।**

अजादेरङ्गस्याऽऽड् लुङ्-लङ्-लृङ्क्षु । आतत् । अतेत् । अत्यात् । अत्यास्ताम् । लुङि सिचि इडागमे कृते ।

(लुङ्-लङ्-लृङ्लकारेषु परेषु अजादेः अङ्गस्य (धातोः) 'आट्' आगमो भवति । 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' इत्यनेन लुङ्-लङ्-लृङ्लकारेषु परेषु सर्वेषां धातूनाम् अडागमो भवति । तं प्रबाध्य अनेन सूत्रेण

लुङ्-लङ्-लृङ्लकारेषु परेषु अजादीनां धातूनां 'आट्' आगमो भवति । अतो लुङ्-लङ्-लृङ्लकारेषु परेषु हलादीनां धातूनाम् 'अट्' आगमो भवति चेत् अजादीनां धातूनां तु 'आट्' आगमो भवति । माङि उपपदे तु अडाटौ एव न भवतः ।)

अनेनैव 'आट्' आगमेऽनुबन्धलोपे टित्त्वादाद्यवयवे 'आ अत् ल्' इति जाते 'आटश्च' इति सूत्रेण वृद्धौ 'आत् ल्' इति जाते तिपि शपि अन्त्यस्य इकारस्य च लोपे 'आतत्' इति रूपं जायते । एवं तसादौ तामादीनां विधानेन भूधातोर्लङि इव अस्यापि सर्वाणि रूपाणि जायन्ते । आडागमोऽत्र विशेषः । विध्याद्यर्थेषु लिङि तिपि शपि 'अतति' इत्यत्र यासुडागमे सलोपं प्रबाध्य इयादेशे यकारस्य लोपे अन्त्यस्य इकारस्य च लोपे 'अतेत्' इति रूपं जायते । एवं भूधातोरिव अस्यापि विध्याद्यर्थके लिङि सर्वाणि रूपाणि जायन्ते ।

आशीर्वादेऽर्थे लिङि तिपि आर्धधातुकत्वे यासुडागमे 'अत्यास् ति' इति जाते अन्त्यस्य इकारस्य लोपे सकारतकारयोः संयोगसंज्ञायां संयोगादेः सकारस्य लोपे 'अत्यात्' इति रूपं सिध्यति । एवं भूधातोरिव अस्यापि आशीर्वादार्थके लिङि सर्वाणि रूपाणि जायन्ते ।

भूतसामान्येऽर्थे लुङि आडागमे वृद्धौ च 'आत् ल्' इति जाते तिपि च्लिप्रत्यये सिचि आर्धधातुकत्वे इडागमे अन्त्यस्य इकारस्य लोपे च 'आतिस् त्' इति जाते तकारस्य अपृक्तसंज्ञात्वे-

**अस्तिसिचोऽपृक्ते ७।३।९६।**

विद्यमानात्सिचोऽस्तेश्च परस्याऽपृक्तस्य हल ईडागमः ।

(विद्यमानात् सिचः सकारात् 'अस्'धातोः सकारात् च परस्य अपृक्तस्य हलः 'ईट्' आगमो भवति ।)

अनेन अपृक्तस्य तकारस्य 'ईट्' आगमेऽनुबन्धलोपे टित्त्वादाद्यवयवे च 'आतिस् ईत्' इति जाते-

**इट ईटि ८।२।२८।**

इटः परस्य सस्य लोपः स्यादीटि ।

(इडागमस्य इकारात् परस्य सकारस्य लोपो भवति ईडागमस्य ईकारे परे ।)

इति सूत्रेण इटः परस्य सकारस्य लोपे 'आति ईत्' इति जाते सवर्णदीर्घे कर्तव्ये 'अकः सवर्णे दीर्घः' इति सपादसप्ताध्यायीसूत्रस्य दृष्टौ 'इट ईटि' त्रिपादीसूत्रस्य असिद्धत्वे प्राप्ते

(सिज्लोप एकादेशे सिद्धो वाच्यः) । आतीत् । आतिष्टाम् ।

(पूर्वपरयोः स्थाने एकादेशे कर्तव्ये सति त्रिपाद्या विहितोऽपि सिज्लोपः सिद्धो भवति ।)

पूर्वपरयोः स्थाने सवर्णदीर्घे एकादेशे कर्तव्ये अनेनैव वार्तिकेन सिज्लोपस्य सिद्धत्वाद् 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घे 'आतीत्' इति रूपं सिध्यति ।

लुङि आडागमे वृद्धौ प्रथमपुरुषस्य द्विवचने तसि च्लिप्रत्यये सिचि इडागमे तसस्तामादेशे सकारस्य

षत्वे च 'आतिष् ताम्' इति जाते तकारस्य ष्टुत्वे 'आतिष्टाम्' इति रूपं सिध्यति ।

लुङि आडागमे वृद्धौ प्रथमपुरुषस्य बहुवचने झौ च्लिप्रत्यये सिचि इडागमे च 'आतिस् झि' इति जाते-

**सिजभ्यस्तविदिभ्यश्च ३।४।१०९।**

सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्सम्बन्धिनो झेर्जुस् । आतिषुः । आतीः । आतिष्टम् । आतिष्ट । आतिषम् । आतिष्व । आतिष्म । आतिष्यत् ।

(सिचः, अभ्यस्तसंज्ञकाद् धातोः, विद्धातोश्च परस्य ङिल्लकारसम्बन्धिनो झेः स्थाने 'जुस्' आदेशो भवति । स्थानिवत्त्वेन प्रत्ययत्वात् 'चुटू' इति सूत्रेण जकारस्य इत्संज्ञा भवति । तेन 'जुस्' इत्यस्य 'उस्' इत्येव अवशिष्यते ।)

अत्र सिचः परस्य 'झि' इत्यस्य स्थाने जुसादेशेऽनुबन्धलोपे 'आतिस् उस्' इति जाते सकारस्य षत्वे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'आतिषुः' इति रूपं जायते ।

पूर्ववद् 'आतीः' इत्यादिरूपाणि जायन्ते ।

लृङ्लकारे आडागमे वृद्धौ तिपि स्यप्रत्यये इडागमे सकारस्य षत्वे अन्त्यस्य इकारस्य लोपे च 'आतिष्यत्' इति रूपं सिध्यति । एवं भूधातोरिव लृङ्लकारस्य सर्वाणि रूपाणि जायन्ते ।

**उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् ८।३।६५।**

उपसर्गस्थान्निमित्तादेषां सस्य षः ।

(उपसर्गस्थाद् निमित्ताद् इणः परस्य सु-सू-सो-स्तु-स्तुभ्-स्था-सेनय-सिध्-सिच्-सञ्ज्-स्वञ्ज्धातूनां सकारस्य षत्वं भवति ।)

गद व्यक्तायां वाचि । गदति ।

'स्पष्टवदनम्' इत्यर्थे वर्तमानस्य 'गद'शब्दस्य धातुसंज्ञानन्तरं अकारस्य इत्त्वं भवति । ततो गद्धातोर्लटि तिपि शपि 'गदति' इति रूपं जायते ।

'प्र नि' इत्युपसर्गपूर्वकाद् गद्धातोर्लटि तिपि शपि 'प्रनिगदति' इति जाते-

**नेर्गद-नद-पत-पद-घु-मा-स्यति-हन्ति-याति-वाति-द्राति-प्साति-वपति-वहति-शाम्यति-चिनोति-देग्धिषु च ८।४।१७।**

उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्यात् गदादिषु परेषु । प्रणिगदति ।

(उपसर्गस्थाद् णत्वनिमित्ताद् रेफात् षकाराद् वा परस्य 'नि' इत्यस्य नकारस्य स्थाने णकारादेशो भवति गदादिषु धातुषु परेषु ।)

अनेन सूत्रेण उपसर्गाद् रेफात् परस्य 'नि' इत्यस्य नकारस्य स्थाने णकारादेशे 'प्रणिगदति' इति रूपं सिध्यति ।

परोक्षानद्यतनभूतार्थे गद्धातोर्लिटि तिपि तिपो णलादेशे च 'गद् अ' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे 'ग गद् अ' इति जाते-

**कुहोश्चुः ७।४।६२।**

अभ्यासकवर्गहकारयोश्चवर्गादेशः ।

**(अभ्यासस्थयोः कवर्गहकारयोः स्थाने चवर्गादेशो भवति । एतेन अभ्यासस्थानां क-ख-ग-घ-ङवर्णानां स्थाने क्रमेण च-छ-ज-झ-ञवर्णा आदेशा भवन्ति चेद् हकारस्य स्थाने बाह्यप्रयत्नसाम्याद् झकारादेशो भवति ।)**

अनेन अभ्यासस्थस्य गकारस्य स्थाने जकारादेशे 'ज गद् अ' इति जाते दकारात्पूर्ववर्तिनः अकारस्य उपधासंज्ञायाम्-

**अत उपधायाः ७।२।११६।**

**उपधाया अतो वृद्धिः स्याद् ञिति, णिति च प्रत्यये । जगाद । जगदतुः । जगदुः । जगदिथ । जगदथुः । जगद ।**

(ञकारस्य णकारस्य वा इत्संज्ञा भवति यस्मिन् प्रत्यये, तस्मिन् परे उपधाया अकारस्य वृद्धिर्भवति ।)

इति उपधाया अकारस्य वृद्धौ आकारादेशे वर्णसम्मेलने 'जगाद' इति रूपं सिध्यति ।

तसादौ णित्प्रत्ययाभावात् वृद्धिर्न भवति । सिपि तु इडागमो भवति ।

उत्तमपुरुषस्यैकवचने मिपि, मिपो णलादेशे, द्वित्वेऽभ्यासत्वे, हलादिशेषे, चुत्वे च 'जगद् अ' इति जाते-

**णलुत्तमो वा ७।१।९१।**

**उत्तमो णल् वा णित्स्यात् । जगाद/जगद । गदिता । गदिष्यति । गदतु । अगदत् । गदेत् । गद्यात् ।**

(उत्तमपुरुषसम्बद्धः अर्थात् मिपः स्थाने आदिष्टो णल् विकल्पेन णिद् भवति ।)

इति णलः अकारस्य विकल्पेन णित्त्वे उपधात्वे च 'अत उपधायाः' इति सूत्रेण उपधाया अकारस्य वृद्धौ वर्णसम्मेलने 'जगाद' इति रूपं भवति चेद् णित्त्वाभावपक्षे 'जगद् अ' इत्यत्रैव वर्णसम्मेलने 'जगद' इति रूपं जायते । वसि मसि च इडागमो भवति ।

लुटि, लृटि, लोटि च 'अत्' धातोरिव सर्वाणि रूपाणि सिध्यन्ति । लङि अत्र अडागमो भवति । विध्याद्यर्थके लिङि, आशीर्वादार्थके लिङि च पुनः 'अत्' धातोरिव रूपाणि जायन्ते ।

लुङि अडागमे तिपि च्लिप्रत्यये च्लेः सिचि सिच आर्धधातुकत्वे इडागमे च 'अ गद् इस् ति' इति जाते-

**अतो हलादेर्लघोः ७।२।७।**

**हलादेर्लघोरतो वृद्धिर्वेडादौ सिचि परस्मैपदे । अगादीत्/अगदीत् । अगदिष्यत् ।**

(इडागमो वर्तते आदौ यस्य सिचः, तस्मिन् परे हलादेर्धातोः लघोः अकारस्य विकल्पेन वृद्धिर्भवति ।)

इति सूत्रेण 'गद्' इत्यस्य अकारस्य विकल्पेन वृद्धौ आकारादेशे वर्णसम्मेलने 'अगादिस् ति' इति जाते अन्त्यस्य इकारस्य लोपे तकारस्य अपृक्तसंज्ञायाम् अपृक्तस्य तकारस्य ईडागमे 'इट ईटि' इति सकारस्य लोपे एकादेशे कर्तव्ये सिज्लोपस्य सिद्धत्वात् सवर्णदीर्घे 'अगादीत्' इति रूपं जायते । वृद्ध्यभावपक्षे तु 'अगद् इस् ति' इति जाते वर्णसम्मेलने पूर्ववद् इकारलोपादिना 'अगदीत्' इति रूपं भवति ।

एवमेव तसादौ अपि प्रत्येकं रूपद्वयं भवति । रूपाणि तु 'अत्' धातोर्लुङि इव जायन्ते ।

लृङि अडागमे 'अत्' धातोरिव 'अगदिष्यत्' इत्यादीनि रूपाणि जायन्ते ।

णद अव्यक्ते शब्दे ।

वाद्यादीनाम् अव्यक्तशब्दरूपक्रियार्थे 'णद' शब्दो वर्तते, तस्य धातुसंज्ञानन्तरम् अकारस्य इत्संज्ञा भवति । एवं सति 'णद्' इति जाते-

**णो नः ६।१।६५।**

**धात्वादेर्णस्य नः स्यात् । णोपदेशास्त्वनर्द-नाटि-नाथ-नाध्-नन्द्-नक्क-नृ-नृतः ॥**

(धातोरादौ वर्तमानस्य णकारस्य स्थाने नकारादेशो भवति । एवं सति नकारादयो धातवो णोपदेशाः, नोपदेशाश्चेति द्विविधा भवन्ति । धातुपाठे एव नकारादित्वेन निर्दिष्टा नर्द्-नाटि-नाथ्-नाध्-नन्द्-नक्क्-नृ-नृत्-धातवः नोपदेशा वर्तन्ते चेत् तद्भिन्ना नकारादयो धातवो णोपदेशाः सन्ति ।)

इति धात्वादेर्णकारस्य स्थाने नकारादेशे लटि तिपि शपि 'गद्'धातोरिव 'नदति' इति रूपं जायते । एवं तसादीनामपि रूपाणि जायन्ते ।

'प्र' इत्युपसर्गपूर्वकाद् 'नद्'धातोर्लटि तिपि शपि 'प्र नदति' इति जाते-

**उपसर्गादसमासेऽपि णोपदेशस्य ८।४।१४।**

**उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेऽपि । प्रणदति । प्रणिनदति । नदति । ननाद ।**

(उपसर्गस्थाद् निमित्ताद् रेफात् षकाराद् वा परस्य णोपदेशस्य नकारादेर्धातोर्नकारस्य स्थाने णकारादेशो भवति, समासेऽपि, असमासेऽपि ।)

अनेन सूत्रेण उपसर्गस्थाद् रेफात् परस्य 'नद्'धातोर्नकारस्य णत्वे 'प्रणदति' इति रूपं जायते ।

'प्र नि' इत्युपसर्गपूर्वकाद् नद्धातोर्लटि तिपि शपि 'प्रनिनदति' इति जाते 'नेर्गद-नद-...' इत्यादिसूत्रेण उपसर्गाद् रेफात् परस्य 'नि' इत्यस्य नकारस्य स्थाने णकारादेशे 'प्रणिनदति' इति रूपं सिध्यति ।

नद्धातोर्लिटि तिपि तिपो णलादेशे द्वित्वेऽभ्यासत्वे हलादिशेषे उपधात्वे उपधाया अकारस्य वृद्धौ च 'ननाद' इति रूपं जायते ।

द्विवचने तसि तसः स्थाने अतुसादेशे द्वित्वे 'नद् नद् अतुस्' इति जाते अभ्यासत्वे हलादिशेषे प्राप्ते-

**असंयोगाल्लिट् कित् १।२।५।**

असंयोगात्परोऽपिल्लिट् कित्स्यात् ।

(अविद्यमानः संयोगो यस्मिन् स धातुः असंयोगः, तस्मात् परस्य अपितो लिटः कित्त्वं भवति ।)

इति 'अतुस्' इत्यस्य कित्त्वे-

**अत एकहल्मध्येऽनादेशादेर्लिटि ६।४।१२०।**

**लिण्निमित्तादेशादिकं न भवति यदङ्ग, तदवयवस्याऽसंयुक्तहल्मध्यस्थस्याऽत एत्वमभ्यासलोपश्च किति लिटि । नेदतुः । नेदुः ।**

(लिटो निमित्तेन आदिश्यमानेषु आदेशेषु यत्र कश्चिदपि आदेशो न भवति, तस्य अङ्गसंज्ञकस्य अनभ्यासस्य धातोः अवयवस्य असंयुक्तहलोर्मध्ये वर्तमानस्य अकारस्य स्थाने एकारादेशो भवति, अभ्यासस्य समग्रस्य लोपश्च भवति, कित्सु लिडादेशेषु परेषु ।)

इति सूत्रेण अनभ्यासस्य 'नद्' इत्यस्य अकारस्य स्थाने एकारादेशे, अभ्यासस्य 'नद्' इत्यस्य च लोपे 'नेद् अतुस्' इति जाते वर्णसम्मेलने 'नेदतुः' इति रूपं जायते । एवमेव झौ उसादेशे पूर्ववद् 'नेदुः' इति रूपं सिध्यति ।

लिटि सिपि थलि आर्धधातुकत्वे इडागमे द्वित्वे 'नद् नद् इ थ' इति जाते अभ्यासत्वे हलादिशेषे प्राप्ते-

**थलि च सेटि ६।४।१२१।**

**इड्वति थलि च प्रागुक्तं स्यात् । नेदिथ । नेदथुः । नेद । ननाद/ननद । नेदिव । नेदिम । नदिता । नदिष्यति । नदतु । अनदत् । नदेत् । नद्यात् । अनादीत्/अनदीत् । अनदिष्यत् ।**

(लिटो निमित्तेन आदिश्यमानेषु आदेशेषु यत्र कश्चिदपि आदेशो न भवति, तस्य अङ्गसंज्ञकस्य अनभ्यासस्य धातोः अवयवस्य असंयुक्तहलोर्मध्ये वर्तमानस्य अकारस्य स्थाने एकारादेशो भवति, अभ्यासस्य समग्रस्य लोपश्च भवति, इड्वति थलि परे ।)

अनेन सूत्रेण सेटि थलि परे अनभ्यासस्य 'नद्' इत्यस्य अकारस्य स्थाने एकारादेशे, अभ्यासस्य 'नद्' इत्यस्य च लोपे 'नेद् इ थ' इति जाते वर्णसम्मेलने 'नेदिथ' इति रूपं जायते ।

मध्यमपुरुषस्य द्विवचने बहुवचने च प्रथमपुरुषस्य द्विवचने इव 'नेदथुः' 'नेद' इति रूपद्वयं जायते । उत्तमपुरुषस्यैकवचने मिपि तु 'गद्' धातोरिव 'ननाद/ननद' इति रूपं जायते । उत्तमपुरुषस्य द्विवचने वसि वादेशे आर्धधातुकत्वे इडागमे ततः तसि इव द्वित्वादिकार्येषु 'नेदिव' इति रूपं जायते । एवमेव बहुवचने 'नेदिम' इति रूपं भवति ।

नद्धातोर्लुटि, लृटि, लोटि, लङि, विध्यद्यर्थके लिङि, आशीर्वादार्थके लिङि, लुङि, लृङि च गद्धातोरिव रूपाणि सिध्यन्ति ।

टुनदि समृद्धौ ।

समृद्ध्यर्थे वर्तमानस्य 'टुनदि' शब्दस्य धातुसंज्ञायाम् इकारस्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्संज्ञायां लोपे च-

**आदिर्ञिटुडवः १।३।५।**

**उपदेशे धातोराद्या एते इतः स्युः ।**

(धातोः आदौ वर्तमाना 'ञि' 'टु' 'डु' एते इत्संज्ञका भवन्ति ।)

अनेन 'टु' इत्यस्य इत्संज्ञयां तस्य लोपे च 'नद्' इति जाते-

**इदितो नुम् धातोः ७।१।५८।**

**नन्दति । ननन्द । नन्दिता । नन्दिष्यति । नन्दतु । अनन्दत् । नन्देत् । इदित्त्वान्नलोपो न । नन्द्यात् । अनन्दीत् । अनन्दिष्यत् ।**

(यस्मिन् धातौ इकारस्य इत्संज्ञा भवति, स धातुः इदित् कथ्यते । तस्य धातोर्नुमागमो भवति । 'नुम्' इत्यत्र उकारमकारयोः इत्संज्ञा जायते, तेन नुमागमे नकार एवावशिष्यते । मकारेत्त्वाद् अयं मिदागमः । मिदागमो 'मिदचोऽन्त्यात् परः' इति सूत्रनियमेन अन्त्यादचः परस्तिष्ठति, स च तस्यैवावयवो भवति ।)

इति सूत्रेण नुमागमेऽनुबन्धलोपे मित्त्वादन्त्यादचः परे तस्यैवावयवे 'नन्द्' इति जाते ततो लटि तिपि शपि 'नन्दति' इति रूपं जायते ।

लिडादौ तु सर्वाणि रूपाणि पूर्ववदेव सिध्यन्ति । आशीर्लिङि इदित्त्वेन नुमागमनिष्पन्नत्वाद् नकारस्य 'अनिदितां हल उपधायाः क्ङिति' इति सूत्रेण लोपो न भवति ।

**मन्थ विलोडने । मन्थति । ममन्थ । कित्त्वान्नलोपः । मथ्यात् ।**

विलोडनार्थे वर्तमानस्य 'मन्थ'शब्दस्य धातुसंज्ञायाम् अकारस्यानुबन्धलोपे 'मन्थ्' लटि तिपि शपि 'मन्थति' इति रूपं सिध्यति । लुङ्लृङोश्च रूपाणि पूर्ववदेव सिध्यन्ति ।

लिडादौ तु सर्वाणि रूपाणि पूर्ववदेव सिध्यन्ति । आशीर्लिङि 'मन्थ् यास् ति' इत्यत्र यासुटः कित्त्वे थकारात् पूर्ववर्तिनो नकारस्य उपधासंज्ञायाम् 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नकारस्य लोपे 'मथ्यास् ति' इति जाते अन्त्यस्य इकारस्य लोपे संयोगत्वे संयोगादेः सकारस्य लोपे 'मथ्यात्' इति रूपं जायते । लुङ्लृङोश्च रूपाणि पूर्ववदेव सिध्यन्ति ।

अर्च पूजायाम् । अर्चति ।

पूजार्थकस्य 'अर्च'शब्दस्य धातुसंज्ञानन्तरम् अकारस्यानुबन्धलोपो भवति । ततस्तस्माद् लटि तिपि शपि 'अर्चति' इति रूपं सिध्यति ।

लिटि तिपि तिपो णलादेशे द्वित्वेऽभ्यासत्वे हलादिशेषे अभ्यासादेः अकारस्य दीर्घे च 'आ अर्च् अ' इति जाते-

**तस्मान्नुड् द्विहलः ७।४।७१।**

**द्विहलो धातोर्दीर्घीभूतादकारात् परस्य नुट् । आनर्च । आनर्चतुः । आनर्चुः । अर्चिता । अर्चिष्यति । अर्चतु । आर्चत् । अर्चेत् । अर्च्यात् । आर्चीत् । आर्चिष्यत् ।**

(यस्मिन् अकारादौ धातौ संयुक्तरूपेण द्वौ हल्वर्णौ आगच्छतः, स धातुरत्र द्विहल् धातुः कथितो वर्तते । दीर्घीभूताद् अकारात् परस्य तादृशस्य द्विहलो धातोः 'नुट्' आगमो भवति ।)

अनेन सूत्रेण आकारात् परस्य 'अर्च्' धातोः 'नुट्' आगमेऽनुबन्धलोपे टित्त्वादाद्यवयवे वर्णयोगे च 'आनर्च' इति रूपं जायते । एवमन्यत्रापि भवति ।

लुडादौ तु 'अत्' धातोरिव रूपाणि सम्पद्यन्ते ।

व्रज गतौ । व्रजति । वव्राज । व्रजिता । व्रजिष्यति । व्रजतु । अव्रजत् । व्रजेत् । व्रज्यात् ।

गत्यर्थकस्य 'व्रज'शब्दस्य धातुसंज्ञानन्तरम् अकारस्यानुबन्धलोपो भवति । ततो लटि तिपि शपि 'व्रजति' इति रूपं जायते ।

लिडादौ तु पूर्ववद् रूपाणि जायन्ते । लुङि अडागमे तिपि च्लिप्रत्यये च्लेः सिचि आर्धधातुकत्वेन इडागमे च 'अ व्रज् इस् ति' इति जाते-

**वदव्रजहलन्तस्याचः ७।२।३।**

**एषामचो वृद्धिः स्यात् परस्मैपदे सिचि । अव्राजीत् । अव्रजिष्यत् ।**

(परस्मैपदसम्बद्धे सिचि परे 'वद्'धातोः, 'व्रज्'धातोः, हलन्तधातोश्च अचो वृद्धिर्भवति ।)

अनेन सूत्रेण व्रज् धातोः अकारस्य वृद्धौ आकारादेशे 'अव्राज् इस् ति' इति जाते वर्णसम्मेलने अन्त्यस्य इकारस्य लोपे तकारस्य अपृक्तत्वे ईडागमे ईटि परे इटः परस्य सकारस्य लोपे एकादेशविधाने सिज्लोपस्य सिद्धत्वाद् सवर्णदीर्घे 'अव्राजीत्' इति रूपं जायते । एवं लुङि सर्वत्र वृद्धौ पूर्ववत् सर्वाणि रूपाणि सिध्यन्ति । लृङि अपि पूर्ववद् रूपाणि भवन्ति ।

गुपू रक्षणे ।

'गुपू'शब्दो रक्षणार्थे वर्तते । क्रियावाचित्वात् तस्य धातुसंज्ञा भवति । तत ऊकारस्यानुबन्धलोपो भवति । ततः-

**गुपूधूपविच्छिपणिपनिभ्य आयः ३।१।२८।**

**एभ्य 'आय' प्रत्ययः स्यात् स्वार्थे । 'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ती'ति न्यायात् ।**

(गुपू रक्षणे, धूप सन्तापे, विच्छ गतौ, पण व्यवहारे स्तुतौ च, पन स्तुतौ एभ्यः पञ्चभ्यो धातुभ्यः स्वार्थे 'आय' प्रत्ययो भवति । येषां प्रत्ययानामर्थनिर्देशो न भवति, ते प्रत्ययाः स्वार्थे विधीयन्ते ।)

अनेन स्वार्थे आयप्रत्यये 'गुप् आय' इति जाते 'आय' इत्यस्य आर्धधातुकसंज्ञायाम्, धातोः अङ्गसंज्ञायाम्, उकारस्य लघुसंज्ञायाम्, उपधासंज्ञायां च-

**पुगन्तलघूपधस्य च ७।३।८६।**

**पुगन्तस्य, लघूपधस्य चाऽङ्गस्येको गुणः, सार्वधातुकार्धधातुकयोः ।**

('पुक्' आगमः अन्ते भवति यस्य अङ्गस्य स पुगन्तः कथ्यते । लघ्वी अस्ति उपधा यस्य अङ्गस्य स लघूपधः कथ्यते । सार्वधातुके आर्धधातुके च परे पुगन्तस्य अङ्गस्य लघूपधस्य अङ्गस्य च इको गुणो भवति ।)

अनेन लघूपधस्य अङ्गस्य लघोः उकारस्य गुणे वर्णसम्मेलने 'गोपाय' इति जाते-

**सनाद्यन्ता धातवः ३।१।३२।**

सनादयः कमेर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः स्युः ।

**सन्-क्यच्-काम्यच्-क्यङ्-क्यषोऽथाऽऽचारक्विब् णिज्यङौ तथा ।**
**यगाय-ईयङ्-णिङ् चेति द्वादशामी सनादयः ।।१।।**

(सन्-क्यच्...' इति कारिकायां निर्दिष्टाः सन्, क्यच्, काम्यच्, क्यङ्, क्यष्, आचारार्थे विहितः क्विप्, णिच्, यङ्, यक्, आय, ईयङ्, णिङ् एते द्वादश प्रत्ययाः सनादयः कथ्यन्ते । एते सनादयो द्वादश प्रत्यया येषामन्ते भवन्ति, ते धातुसंज्ञका भवन्ति ।

सनाद्यन्तधातूनां निदर्शनानि-

| | | | | |
|---|---|---|---|---|
| १. | गुप् + सन् | गुप्तिज्किद्भ्यः सन् | जुगुप्स | जुगुप्सते । |
| २. | पुत्र अम् + क्यच् | सुप आत्मनः क्यच् | पुत्रीय | पुत्रीयति |
| ३. | पुत्र अम् + काम्यच् | काम्यच्च | पुत्रकाम्य | पुत्रकाम्यति । |
| ४. | श्येन + क्यङ् | कर्तुः क्यङ् सलोपश्च | श्येनाय | श्येनायते । |
| ५. | क्यष् | लोहितादिडाज्भ्यः क्यष् | लोहिताय | लोहितायते |
| ६. | आचारार्थ क्विप् | सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः | कृष्ण | कृष्णाति । |
| ७. | णिच् | हेतुमति च | भावि | भावयति । |
| ८. | यङ् | धातोरेकाचो हलादेः | | |
| | | क्रियासमभिहारे यङ् | बोभूय | बोभूयते । |
| ९. | यक् | कण्वादिभ्यो यक् | कण्डूय | कण्डूयति । |

| | | | | |
|---|---|---|---|---|
| १०. | आय | गुपूधूपविच्छिपणिपनिभ्य आयः | गोपाय | गोपायति । |
| ११. | ईयङ् | ऋतेरीयङ् | ऋतीय | ऋतीयते । |
| १२. | णिङ् | कमेर्णिङ् | कामि | कामयते । |

'गोपाय' इत्यस्य 'सनाद्यन्ता धातवः' इति धातुसंज्ञायाम् धातुत्वाद् लटि तिपि शपि पररूपे च 'गोपायति' इति रूपं सिध्यति । तसादौ अपि एवमेव पूर्ववत् सर्वाणि रूपाणि जायन्ते ।

लिटि विधातव्ये

**आयादय आर्धधातुके वा ३।१।३१।**

**आर्धधातुकविवक्षायामायेयङ्णिङो वा स्युः ।**

(आर्धधातुकस्य विवक्षायाम् आय्, ईयङ्, णिङ् चेति प्रत्यया विकल्पेन विधीयन्ते । तेन आयादयः प्रत्ययाः सार्वधातुकलकारेषु लट्-लोट्-लङ्-विधिलिङ्क्षु नित्यं भवन्ति चेद् आर्धधातुकलकारेषु लिट्-लुट्-लृट्-आशीर्लिङ्-लुङ्-लृङ्क्षु विकल्पेन भवन्ति ।)

अत्र आर्धधातुकलकारस्य लिटो विवक्षायां विकल्पेन आयप्रत्यये 'आय' इत्यस्य आर्धधातुकसंज्ञायाम्, धातोः अङ्गसंज्ञायाम्, उकारस्य लघुसंज्ञायाम्, उपधासंज्ञायां लघूपधस्य अङ्गस्य लघोः उकारस्य गुणे वर्णसम्मेलने च 'गोपाय' इति जाते सनाद्यन्तत्वाद् 'गोपाय' इत्यस्य धातुसंज्ञात्वे लिटि 'गोपाय ल्' इति जाते-

**(कास्यनेकाच आम्वक्तव्यो लिटि)** कास आम्विधानान्मस्य नेत्त्वम् ।

(लिट्लकारे परे 'कास्'धातोः अनेकाच्धातोश्च आम्प्रत्ययो भवति । 'आम्' इत्यस्य मकारस्य इत्संज्ञा विधीयते चेत् 'मिदचोऽन्त्यात् परः' इति सूत्रनियमेन अवशिष्ट आकारः अन्त्यादचः परे तस्यैवावयवत्वेन विधीयते । 'कास्'धातोः 'आम्'विधाने अन्त्यादच आकाराद् परे तस्यैवावयवत्वेन आकारो विधीयते, ततः सवर्णदीर्घे 'कास्' इत्येव रूपं भवति । अत्र 'आम्'प्रत्ययविधानेन न कोऽपि लाभः । अतस्तत्र 'आम्'प्रत्ययस्य विधातव्यत्वेन कुत्रापि 'आम्'प्रत्ययस्य मकारस्य इत्संज्ञा न विधेया ।)

लिटि परे अनेनैव सूत्रेण 'आम्'प्रत्यये 'गोपाय आम् ल्' इति जाते 'आम्' इत्यस्य आर्धधातुकसंज्ञायाम्-

**अतो लोपः ६।४।४८।**

**आर्धधातुकोपदेशे यददन्तं, तस्यातो लोप आर्द्धधातुके ।**

(आर्धधातुकस्य उपदेशकाले यद् अकारान्तम् अङ्गं भवति, तस्य लोपो भवति, आर्धधातुके परे । अत्र 'अलोऽन्त्यस्य' इति सूत्राधारेण अन्त्यस्य अकारस्य लोपो भवति । तेन आर्धधातुके परे आर्धधातुकप्रत्ययान्तस्य अङ्गस्य अकारस्य लोपो भवतीति बोध्यम् ।)

अनेन सूत्रेण 'गोपाय' इत्यस्य अकारस्य लोपे वर्णसम्मेलने 'गोपायाम् ल्' इति जाते-

**आमः २।४।८१।**

**आमः परस्य लुक् ।**

(आमः परस्य लकारस्य लुग् भवति ।)

इति सूत्रेण लकारस्य लुकि 'गोपायाम्' इति जाते 'कृन्मेजन्तः' इति सूत्रेण मान्तत्वाद् 'गोपायाम्' इत्यस्य अव्ययसंज्ञायां समुदायात् सुप्रत्यये 'अव्ययादाप्सुपः' इति सोर्लुकि सुबन्तत्वात् पदसंज्ञायाम्-

**कृञ्चानुप्रयुज्यते लिटि ३।१।४०।**

**आमन्ताल्लिट्पराः कृभ्वस्तयोऽनुप्रयुज्यन्ते । तेषां द्वित्वादि ।**

(आमन्ताद् लिट्लकारपरकाः कृञ्-भू-अस्धातूनाम् अनुप्रयोगो भवति । आमन्तात् कृञ्, भू, अस् एषां धातूनाम् अनुप्रयोगो भवति । ते क्रमेण अनुप्रयुज्यन्ते । अनुप्रयुक्तास्ते धातवो लिट्लकारं च सहैवानयन्ति ।)

एतेन लिट्परकस्य कृञ्धातोरनुप्रयोगे 'गोपायाम् कृ ल्' इति जाते लकारस्य स्थाने तिपि तिपः स्थाने णलि च 'गोपायाम् कृ अ' इति जाते धातोर्द्वित्वेऽभ्यासत्वे च-

**उरत् ७।४।६६।**

**अभ्यासस्य ऋतोऽत्स्यात्प्रत्यये । वृद्धिः । गोपयाञ्चकार । द्वित्वात्परत्वाद्यणि प्राप्ते ।**

(प्रत्यये परे अभ्यासे वर्तमानस्य ऋकारस्य स्थाने अकारादेशो भवति । ऋकारस्य स्थाने प्रयुज्यमानत्वाद् अकारस्यात्र रपरत्वं च जायते । तेनात्र ऋकारस्य स्थाने 'अर्' इत्यादेशो भवति ।)

एवमत्र अभ्यासे वर्तमानस्य ऋकारस्य अत्वे रपरत्वे च 'गोपायाम् कर् कृ अ' इति जाते हलादिशेषे ककारस्य चुत्वे च 'गोपायाम् च कृ अ' इति जाते कृधातोः अङ्गत्वे 'अचो ञ्णिति' इति सूत्रेण वृद्धौ रपरत्वे वर्णसम्मेलने च 'गोपायाम् चकार' इति जाते 'मोऽनुस्वारः' इत्यनेन मकारस्यानुस्वारे 'गोपायां चकार' इति जाते 'वा पदान्तस्य' इति अनुस्वारस्य विकल्पेन परसवर्णे 'गोपायाञ्चकार' इति रूपं सिध्यति । परसवर्णाभावे तु 'गोपायां चकार' इत्येव रूपं भवति ।

प्रथमपुरुषस्य द्विवचने तसि पूर्ववद् 'गोपायाम् कृ अतुस्' इति जाते यणि प्राप्ते-

**द्विर्वचनेऽचि १।१।५९।**

**द्वित्वनिमित्तेऽचि परे अच आदेशो न स्याद् द्वित्वे कर्तव्ये । गोपायाञ्चक्रतुः । गोपायाञ्चक्रुः ।**

(यदि द्वित्वं कर्तव्यमस्ति, तर्हि द्वित्वनिमित्ते अचि परे अचः स्थाने कोऽपि आदेशो न भवति । यस्य कारणेन द्वित्वं भवति, स द्वित्वनिमित्तः, लिटि लिट एव कारणेन धातोर्द्वित्वं भवति, तेन लिडेवात्र द्वित्वनिमित्तोऽस्ति । लिट् तु अत्र 'अतुस्' एव । अतो द्वित्वविधानात् पूर्वम् अतुसि ऋकारस्य स्थाने

यणादेशो न भवति ।)

इति यणो निषेधे द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे चुत्वे च 'गोपायाम् चकृ अतुस्' इति जाते-

**असंयोगाल्लिट् कित् १।२।५।**

असंयोगात्परोऽपिल्लिट् कित्स्यात् ।

(संयोगभिन्नाद् धातोः परस्य पिद्भिन्नस्य लिडादेशस्य कित्त्वं भवति ।)

इति 'अतुस्' इत्यस्य कित्त्वे प्राप्तस्य गुणस्य 'क्ङिति च' इति सूत्रेण निषेधे 'इको यणचि' इति यणि ऋकारस्य स्थाने रेफादेशे 'गोपायाम् चक्रतुस्' इति जाते अनुस्वारे परसवर्णे पदत्वे रुत्वे विसर्गे च 'गोपायञ्चक्रतुः' इति रूपं जायते । परसवर्णाभावे तु 'गोपायां चक्रतुः' इति भवति ।

प्रथमपुरुषस्य बहुवचने झौ पूर्ववद् 'गोपायाञ्चक्रुः' 'गोपायां चक्रुः' इति रूपद्वयं सिध्यति ।

मध्यमपुरुषस्यैकवचने सिपि पूर्ववत् 'गोपायाम् कृ थ' इति जाते थल आर्धधातुकत्वेन 'आर्धधातुकस्येड्वलादेः' इति सूत्रेण इडागमे प्राप्ते-

**एकाच उपदेशेऽनुदात्तात् ७।२।१०**

उपदेशे यो धातुरेकाजनुदात्तश्च, ततः परस्य वलादेरार्धधातुकस्येण्न ।

(एकः अच् यस्य स धातुः एकाच् । अनुदात्तत्वेन परिगणितेषु त्र्यधिकशतसङ्ख्यकेषु अन्यतमो धातुः अनुदात्तः । उपदेशावस्थायाम् एकाचो धातोः अनुदात्तधातोश्च परस्य वलादेः आर्धधातुकस्य इडागमो न भवति ।)

**ऊदृदन्तैर्यौति-रु-क्ष्णु-शीङ्-स्नु-नु-क्षु-श्वि-डीङ्-श्रिभिः ।**
**वृङ्-वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ।१॥**

(अजन्तेषु एकाज्धातुषु ऊकारान्तेभ्यो धातुभ्यः, ॠकारान्तेभ्यो धातुभ्यः, यु-रु-क्ष्णु-शीङ्-स्नु-नु-क्षु-श्वि-डीङ्-श्रि-वृङ्-वृञ्धातवः सेटो भवन्ति, तद्भिन्ना अन्ये अजन्ता एकाज्धातवः अनिटो भवन्ति । अर्थाद् कारिकायामुल्लिखितेभ्य एकाज्धातुभ्यः परस्य वलादेः आर्धधातुकस्य इडागमो भवति, तद्भिन्नेभ्य एकाज्धातुभ्यः परस्य वलादेः आर्धधातुकस्य इडागमनिषेधो भवति । अनेकाचो धातवस्तु सर्वे सेट एव ।)

**कान्तेषु-शक्लेकः । चान्तेषु- पच्-मुच्-रिच्-वच्-सिचः षट् । छान्तेषु- प्रच्छेकः । जान्तेषु- त्यज्-निजिर्-भज्-भञ्ज्-भुज्-भ्रस्ज्-मस्ज्-युज्-रुज्-रञ्ज्-विजिर्-सञ्ज्-सृजः पञ्चदश । दान्तेषु -अद्-क्षुद्-खिद्-छिद्-तुद्-नुद्-पद्य-भिद्-विद्य-विनद्-विन्द्-शद्-सद-स्विद्य्-स्कन्द-हदः षोडश । धान्तेषु- क्रुध्-क्षुध्-बुध्य-बन्ध्-युध्-रुध्-राध्-व्यध्-शुध्-साध्-सिध्या एकादश । नान्तेषु- मन्य-हनौ द्वौ । पान्तेषु -आप्-क्षिप्-छुप्-तप्-तिप्-तृप्य-दृप्य-लिप्-लुप्-वप्-शप्-स्वप्-सृपस्त्रयोदश ।**

**भान्तेषु- यभ्-रभ्-लभस्त्रयः । मान्तेषु- गम्-नम्-रम्-यमश्चत्वारः । शान्तेषु- क्रुश्-दंश्-दिश्-दृश्-मृश्-रिश्-रुश्-लिश्-विश्-स्पृशो दश । षान्तेषु- कृष्-त्विष्-तुष्-द्विष्-दुष्-पुष्य-पिष्-विष्-शिष्-शुष्-श्लिष्या एकादश । सान्तेषु- घस्-वसती द्वौ । हान्तेषु- दह्-दुह्-दिह्-नह्-मिह्-रुह्-लिह्-वहोऽष्टौ । अनुदात्ता हलन्तेषु धातवस्त्र्यधिकं शतम् ॥**

**गोपायाञ्चकर्थ । गोपायाञ्चक्रथुः । गोपायाञ्चक्र । गोपायाञ्चकार/गोपायाञ्चकर । गोपायाञ्चकृव । गोपायाञ्चकृम । गोपायाम्बभूव । गोपायामास । जुगोप । जुजुपतुः । जुगुपुः ।**

(उपर्युल्लिखिताः त्र्यधिकशतसङ्ख्यका धातवः अनुदात्ताः कथ्यन्ते । हलन्तेषु धातुषु एते अनुदात्ता धातवः अनिटो भवन्ति, अनुदात्तभिन्ना अन्ये हलन्तधातवस्तु सेटो भवन्ति अर्थाद् अनुदात्तेभ्यो धातुभ्यः परस्य वलादेः आर्धधातुकस्य इडागमनिषेधो भवति, तद्भिन्नेभ्यो धातुभ्यः परस्य वलादेः आर्धधातुकस्य इडागमो भवति ।)

'एकाच उपदेशेऽनुदात्तात्' इति प्राप्तस्य इडागमस्य निषेधे द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे चुत्वे च 'गोपायाम् चकृ थ' इति जाते 'कृ' इत्यस्य अङ्गसंज्ञायां गुणे वर्णसम्मेलने अनुस्वारे परसवर्णे च 'गोपायाञ्चकर्थ' इति रूपं सिध्यति, पररूपाभावे 'गोपायां चकर्थ' इति रूपं जायते । मध्यमपुरुषस्य द्विवचनबहुवचनयोस्तु पूर्ववदेव रूपाणि जायन्ते ।

उत्तपुरुषस्यैकवचने पूर्ववद् 'गोपायाम् चकृ अ' इति जाते 'कृ' इत्यस्य अङ्गसंज्ञायाम् उत्तमपुरुषसम्बद्धस्य णलो विकल्पेन णित्त्वे 'अचो ञ्णिति' इति सूत्रेण वृद्धौ 'गोपायाम् चकार' इति जाते अनुस्वारे परसवर्णे च 'गोपायाञ्चकार' इति रूपं जायते, णित्त्वाभावे 'गोपायाञ्चकर' इति रूपं जायते, परसवर्णाभावे 'गोपायां चकार/गोपायां चकर' इति रूपे जायेते ।

उत्तमपुरुषस्य द्विवनचने वसि 'गोपायाम् कृ व' इति जाते प्राप्तस्य इडागमस्य निषेधे द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे धातोः अङ्गत्वे 'व' इत्यस्य कित्त्वे च प्राप्तस्य गुणस्य निषेधे अनुस्वारे परसवर्णे च 'गोपायाञ्चकृव' इति रूपं जायते, परसवर्णाभावे 'गोपायां चकृव' इति रूपं भवति । मसि अपि एवमेव रूपद्वयं सिध्यति ।

लिटा सहितस्य भूधातोः अनुप्रयोगे 'गोपायाम् भू ल्' इति जाते लः स्थाने तिपि णलि वुगागमे द्वित्वेऽभ्यासत्वे हलादिशेषे ह्रस्वे अत्वे जश्त्वे च 'गोपायाम् बभूव' इति जाते अनुस्वारे परसवर्णे च 'गोपायाम्बभूव' इति रूपं जायते, परसवर्णाभावे तु 'गोपायां बभूव' इति रूपं भवति । एवमेव तसादौ अपि रूपाणि सिध्यन्ति ।

लिटा सहितस्य 'अस्'धातोरनुप्रयोगे तु 'गोपायाम् अस् ल्' इत्यत्र तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे 'अत आदेः' इति अकारस्य दीर्घे 'गोपायाम् आ अस् अ' इति जाते सवर्णदीर्घे वर्णसम्मेलने च 'गोपायामास' इति रूपं जायते । एवमेव तसादौ सर्वाणि रूपाणि सिध्यन्ति ।

आयप्रत्ययाभावे 'गुप्'धातोर्लिटि 'गुप् ल्' इति जाते तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे चुत्वे च 'जु गुप् अ' इति जाते णल आर्धधातुकत्वे धातोः अङ्गत्वे उकारस्य लघुत्वे उपधात्वे च लघूपधगुणे वर्णसम्मेलने 'जुगोप' इति रूपं जायते । तसि झौ च कित्त्वेन गुणनिषेधात् 'जुगुपतुः' 'जुगुपुः' इति रूपद्वयं सिध्यति ।

सिपि थलि च 'गुप् थ' इति जाते आर्धधातुकत्वेन इडागमे प्राप्ते-

**स्वरतिसूतिसूयतिधूञूदितो वा ७।२।४४।**

**स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड् वा स्यात् । जुगोपिथ/जुगोप्थ । गोपायिता/गोपिता/ गोप्ता । गोपायिष्यति/गोपिष्यति/गोप्स्यति । गोपायतु । अगोपायत् । गोपायेत् । गोपाय्यात्/गुप्यात् । अगोपायीत् ।**

(स्वृ शब्दोपतापयोः, षूङ् प्राणिगर्भविमोचने, षूङ् प्राणिप्रसवे, धूञ् कम्पने एभ्यो धातुभ्यः, ऊकारेत्संज्ञकेभ्यो धातुभ्यश्च परस्य वलादेः आर्धधातुकस्य विकल्पेन इडागमो भवति ।)

अनेन सूत्रेण विकल्पेन इडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे 'गुप् इ थ' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे चुत्वे लघूपधगुणे च 'जुगोपिथ' इति रूपं जायते । इडागमाभावे द्वित्वादिना 'जुगोप्थ' इति रूपं सिध्यति । थसादीनां रूपाणि च पूर्ववद् भवन्ति ।

लुड्विवक्षायामपि विकल्पेन आयप्रत्यये लघूपधगुणे च जातस्य 'गोपाय' इत्यस्य धातुसंज्ञायाम्, लुटि तिपि तासिप्रत्यये आर्धधातुकत्वे इडागमे च 'गोपाय इ तास् ति' 'अतो लोपः' इति सूत्रेण अकारस्य लोपे वर्णसम्मेलने च 'गोपायितास् ति' इति जाते तिपो डादेशे टित्वे डित्त्वसामर्थ्यादभस्यापि टेर्लोपे वर्णसम्मेलने च 'गोपायिता' इति रूपं जायते । आयप्रत्ययाभावे 'गुप्'धातोरेव लुटि तिपि तासिप्रत्यये आर्धधातुकत्वे 'स्वरतिसूतिसूयतिधूञूदितो वा' इति सूत्रेण विकल्पेन इडागमे लघूपधगुणे च 'गोपिता' इति रूपं सिध्यति । इडागमाभावे 'गोप्ता' इति रूपं भवति । तसादौ अपि एवमेव पूर्ववद् रूपाणि जायन्ते ।

लृटि तिपि अपि एवमेव 'गोपायिष्यति/गोपिष्यति/गोप्स्यति' इति रूपत्रयं जायते । तसादौ अपि तथैव रूपाणि जायन्ते ।

लोटि लङि विधिलिङि च आयप्रत्ययं विधाय पूर्ववद् लघूपधगुणादिकं कृत्वा भूधातोरिव रूपाणि साधयितुं शक्यन्ते ।

आशीर्लिङो विवक्षायामपि विकल्पेन आयप्रत्यये लघूपधगुणादिना निर्मिताद् 'गोपाय'धातोर्लिङि तिपि आर्धधातुकत्वे यासुडागमे आर्धधातुकोपदेशस्य अकारस्य लोपे च 'गोपाय्यास् ति' इति जाते इकारस्य लोपे सकारतकारयोः संयोगत्वे संयोगादेः सकारस्य लोपे च 'गोपाय्यात्' इति रूपं जायते ।

आयप्रत्ययाभावे तु आशीर्लिङि तिपि आर्धधातुकत्वे यासुडागमे यासुटः कित्त्वे च प्राप्तस्य लघूपधगुणस्य निषेधे 'गुप्यास् ति' इति जाते इकारस्य लोपे सकारतकारयोः संयोगत्वे संयोगादेः सकारस्य लोपे च 'गुप्यात्' इति रूपं सिध्यति ।

लुङो विवक्षायामपि विकल्पेन आयप्रत्यये लघूपधगुणादिना 'गोपाय' इति जाते धातुसंज्ञायाम् लुङि अडागमे तिपि च्लौ सिचि इडागमे अतो लोपे वर्णसम्मेलने 'अगोपायिस् ति' इति जाते इकारस्य लोपे अपृक्तत्वे ईडागमे सकारस्य लोपे सवर्णदीर्घे च 'अगोपायीत्' इति रूपं सिध्यति । तसादौ अपि पूर्ववद् रूपाणि जायन्ते ।

आयप्रत्ययाभावे 'गुप्'धातोर्लुङि अडागमे तिपि च्लौ सिचि विकल्पेन इडागमे 'अ गुप् इस् ति' इति जाते हलन्तत्वाद् 'वदव्रजहलन्तस्याचः' इति सूत्रेण उकारस्य वृद्धौ प्राप्तायाम्-

**नेटि ७।२।४।**

**इडादौ सिचि हलन्तलक्षणा वृद्धिर्न स्यात् । अगोपीत् । अगौप्सीत् ।**

(हलन्तत्वाद् 'वदव्रजहलन्तस्याचः' इति सूत्रेण या वृद्धिर्भवति, सा इडादौ सिचि न भवति ।)

इति सूत्रेण वृद्धिनिषेधे लघूपधगुणे वर्णसम्मेलने 'अगोपिस् ति' इति जाते इकारस्य लोपे अपृक्तत्वे ईडागमे सकारस्य लोपे सवर्णदीर्घे च 'अगोपीत्' इति रूपं जायते । तसादौ अपि पूर्ववद् रूपाणि जायन्ते ।

इडागमाभावे 'अगुप् स् ति' इति जाते हलन्तलक्षणवृद्धौ 'अगौप् स् ति' इति जाते इकारस्य लोपे अपृक्तत्वे ईडागमे वर्णसम्मेलने 'अगौप्सीत्' इति रूपं जायते ।

तसि 'अ गौप् स् तस्' इत्यत्र तसस्तामादेशे च 'अ गौप् स् ताम्' इति जाते-

**झलो झलि ।८।२।२६।**

**झलः परस्य सस्य लोपः स्याज्झलि परे । अगौप्ताम् । अगौप्सुः । अगौप्सीः । अगौप्तम् । अगौप्त । अगौप्सम् । अगौप्स्व । अगौप्स्म । अगोपायिष्यत्/अगोपिष्यत्/अगोप्स्यत् ।**

(झलि परे झलः परस्य सकारस्य लोपो भवति ।)

इति सकारस्य लोपे वर्णसम्मेलने 'अगौप्ताम्' इति रूपं सिध्यति ।

झौ 'अ गौप् स् झि' इति जाते 'सिजभ्यस्तविदिभ्यश्च' इति सूत्रेण झेर्जुसादेशे 'अ गौप् स् उस्' ग्यति जाते वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'अगौप्सुः' इति रूपं जायते ।

सिपि तिपि इव, थसि थे च तसि इव रूपाणि जायन्ते । मिपि अमादेशे 'अगौप्सम्' इति रूपं जायते चेद् वसि मसि च 'नित्यं ङितः' इति सकारलोपे 'अगौप्स्व' 'अगौप्स्म' इति रूपे जायेते ।

लृङि अपि लृटि इव त्रिविधानि रूपाणि जायन्ते । अडागम-इकारलोपौ अत्र विशेषौ ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) अस्तिसिचोऽपृक्ते
(ख) अतो हलादेर्लघोः
(ग) उपसर्गादसमासेऽपि णोपदेशस्य
(घ) तस्मान्नुड् द्विहलः
(ङ) आयादय आर्धधातुके वा
(च) असंयोगाल्लिट् कित्
(छ) सिजभ्यस्तविदिभ्यश्च
(ज) अत एकहल्मध्येऽनादेशादेर्लिटि
(झ) कृञ्चानुप्रयुज्यते लिटि
(ञ) स्वरतिसूतिसूयतिधूञूदितो वा

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) अतधातोः कोऽर्थः ?
(ख) लुङ्लङ्लृङक्षु अजादेरङ्गस्य क आगमो भवति ?
(ग) उपसर्गस्थान्निमित्तात् परस्य केषां धातोः सकारस्य षत्वं भवति ?
(घ) कुत्र उपधाया अकारस्य वृद्धिर्भवति ?
(ङ) धात्वादेर्णकारस्य स्थाने क आदेशो भवति ?
(च) 'प्रणदति' इत्यत्र णत्वे कस्य सूत्रस्य प्रवृत्तिः ?
(छ) कीदृशो लिडादेशः किद् भवति ?
(ज) 'टुनदि'धातोः 'टु' इत्यस्य इत्संज्ञा केन सूत्रेण भवति ?
(झ) 'मन्थ' धातोः कोऽर्थः ?
(ञ) कीदृशस्य धातोर्नुडागमो भवति ?
(ट) व्रज्धातोर्लुङि केन सूत्रेण वृद्धिर्भवति ?
(ठ) कीदृशाः प्रत्ययाः स्वार्थे भवन्ति ?
(ड) कुत्र आयादयो विकल्पेन विधीयन्ते ?
(ढ) आमन्ताल्लिट्पराः केऽनुप्रयुज्यन्ते ?
(ण) कुत्र हलन्तलक्षणा वृद्धिर्न भवति ?
(त) चान्तेषु के धातवोऽनुदात्ताः ?
(थ) मान्तेषु के धातवोऽनुदात्ताः ?

३. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) इट ईटि (ख) कुहोश्चुः

(ग) उपसर्गादसमासेऽपि णोपदेशस्य (घ) थलि च सेटि

(ङ) पुगन्तलघूपधस्य च (च) अतो लोपः (छ) द्विर्वचनेऽचि

(ज) एकाच उपदेशेऽनुदात्तात् (झ) झलो झलि

४. **अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत**

(क) अत्धातोर्लुङि (ख) गद्धातोर्लङि (ग) नद्धातोर्लिटि

(घ) टुनदिधातोर्विधिलिङि (ङ) अर्च्धातोर्लिटि (च) व्रज्धातोराशीर्लिङि

(छ) गुप्धातोर्लुङि (ज) गुप्धातोर्लिटि

५. **'णेर्गदनद...' इति सूत्रं प्रपूर्य सोदाहरणं तदर्थं प्रकाशयत ।**

६. **के सनादयः ? सोदाहरणं प्रदर्शयत ।**

७. **अजन्तेषु एकाज्धातूनां सेट्त्वानिट्त्वयोर्विनिश्चयं यथाप्रमाणं कुरुत ।**

८. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) आत (ख) आतीत् (ग) आतिषुः (घ) जगाद/जगद

(ङ) अगादीत्/अगदीत् (च) नेदतुः (छ) नेदिथ (ज) नन्दति

(झ) मथ्यात् (ञ) आनर्च (ट) अव्राजीत् (ठ) गोपायति

(ड) गोपायाञ्चकार (ढ) जुगोपिथ/जुगोप्थ (ण) गोपायिता/गोपिता/गोप्ता

(त) अगोपायीत्/अगोपीत्/अगौप्सीत्

९. **अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दशत**

(क) आतिष्टाम् (ख) गद्यास्तम् (ग) अनदिष्यन्

(घ) आनर्चिथ (ङ) अगौप्त (च) अव्रजम्

१०. **सिद्धपदानि दर्शयत**

(क) गद् + लङ् (झि) (ख) अर्च् + लोट् (वस्) (ग) मन्थ् + आशीर्लिङ् (सि)

(घ) व्रज् + लुट् (थ) (ङ) गुप् + विधिलिङ् (मस्) (च) गुप् + लृङ् (मिप्)

११. **पदानां वाक्ये प्रयोगं निदर्शयत**

(क) अत्याः (ख) नेद (ग) गदानि (घ) आनर्चुः (ङ) अव्राजीत् (च) गोप्ता

# षष्ठः पाठः

## क्षिप्रभृतीनां धातूनां रूपसिद्धिप्रक्रियानिदर्शनम्

**क्षि** क्षये । क्षयति । चिक्षाय । चिक्षियतुः । चिक्षियुः । 'एकाच' इति निषेधे प्राप्ते ।

क्षयार्थकात् 'क्षि'धातोः लटि तिपि शपि गुणेऽयादेशे च 'क्षयति' इति रूपं जायते । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे चुत्वे च 'चि क्षि अ' इति जाते धातोः अङ्गत्वे 'अचो ञ्णिति' इति इकारस्य वृद्धौ आयादेशे च 'चिक्षाय' इति रूपं सिध्यति । तसि अतुसादेशे द्वित्वादिके विहिते 'चि क्षि अतुस्' इति जाते अतुसः कित्त्वे गुणनिषेधे च 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रेण इकारस्य स्थाने इयङादेशेऽनुबन्धलोपे ङित्त्वादन्तादेशे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'चिक्षियतुः' इति रूपं सिध्यति । एवमेव झौ 'चिक्षियुः' इति रूपं जायते । सिपि थलि 'क्षि थ' इति जाते आर्धधातुकत्वे प्राप्तस्य इडागमस्य एकाच्त्वान्निषेधे-

**कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ७।२।१३।**

**क्रादिभ्य एव लिट इण्न स्यात्, अन्यस्मादनिटोऽपि स्यात् ।**

(कृ-सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रुधातुभ्यः परस्य लिडादेशस्य इडागमो न भवति, तद्भिन्नाद् अनिटोऽपि धातोः परस्य वलादेर्लिडादेशस्य इडागमो भवति । अयं क्रादिनियमः कथ्यते ।)

इति सूत्रेण थलः पुनरिडागमे प्राप्ते-

**अचस्तास्वत्थल्यनिटो नित्यम् ७।२।६१।**

**उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततः परस्य थल इण् न स्यात् ।**

(उपदेशे अजन्तत्वेन पठितो यो धातुस्तासिप्रत्यये नित्यम् अनिड् वर्तते, तस्मात् परस्य थल इडागमो न भवति ।)

इति सूत्रेण थलः प्राप्तस्य इडागमस्य पुनर्निषेधे-

**उपदेशेऽत्वतः ७।२।६२।**

**उपदेशेऽकारवतस्तासो नित्यानिटः परस्य थल इण्न ।**

(उपदेशे अकारवत्त्वेन पठितो यो धातुस्तासिप्रत्यये नित्यम् अनिड् वर्तते, तस्मात् परस्य थल इडागमो न भवति ।)

**ऋतो भारद्वाजस्य ७।२।६३**

**तासौ नित्यानिट ऋदन्तादेव थलो नेट् भारद्वाजस्य मतेन । तेनान्यस्य स्यादेव ।**

(य ऋकारान्तो धातुस्तासिप्रत्यये नित्यम् अनिड् वर्तते, भारद्वाजस्य मते तस्माद् ऋकारान्ताद् धातोरेव

परस्य थल इडागमो न भवति । तद्भिन्नेभ्यो धातुभ्यः परस्य थलस्तु इडागमो भवत्येव ।)

अयमत्र सङ्ग्रहः-

**अजन्तोऽकारवान् वा यस्तास्यनिट् थलि वेडयम् ।**

**ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत् ।।१।।**

**चिक्षयिथ/चिक्षेथ । चिक्षियथुः । चिक्षिय । चिक्षाय-चिक्षय । चिक्षियिव । चिक्षियिम । क्षेता । क्षेष्यति । क्षयतु । अक्षयत् ।**

(तासिप्रत्यये नित्यम् अनिट्त्वेन उक्ताः 'ऊदृदन्तैः...' इति कारिकायाम् अपठिता अजन्तधातवः, त्र्यधिकशतसङ्ख्यकेषु अनुदात्तधातुषु पठिता अकारवन्तो धातवश्च थलि वेटो भवन्ति । तासिप्रत्यये नित्यम् अनिट ऋकारान्ता धातवस्तु थलि नित्यम् अनिट एव भवन्ति । क्रादिभिन्ना धातवो थल्भिन्ने वलादौ लिडादेशे सर्वत्र क्रादिनियमेन सेटो भवन्ति ।)

'ऋतो भारद्वाजस्य' इति सूत्रेण भारद्वाजस्य मते थल इडागमे 'क्षि इ थ' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे अङ्गत्वे गुणेऽयादेशे च 'चिक्षयिथ' इति रूपं जायते । अन्येषां मते तु इडागमाभावे 'चिक्षेथ' इति रूपं भवति । इतः परं थसादौ तु पूर्ववदेव रूपाणि सिध्यन्ति ।

लुटि तिपि तासिप्रत्यये प्राप्तस्य इडागमस्य निषेधे अङ्गत्वेन गुणे डादेशे टित्वे डित्त्वसामर्थ्यादभस्यापि टेर्लोपे 'क्षेता' इति रूपं जायते । एवमेव इडागमनिषेधे पूर्ववत् तसादौ रूपाणि सिध्यन्ति ।

लृटि अपि स्यप्रत्ययस्य इडागमनिषेधो भवति । अन्यत् सर्व पूर्ववत् सिध्यति ।

लोटि, लङि, विधिलिङि च सर्वाणि रूपाणि भूधातोरिव जायन्ते ।

आशीर्लिङि तिपि आर्धधातुकत्वे यासुडागमे यासुटः कित्त्वे धातोः अङ्गत्वे च प्राप्तस्य गुणस्य निषेधे 'क्षि यास् ति' इत्यत्र-

**अकृत्सार्वधातुकयोर्दीर्घः ।७।४।२५।**

**अजन्ताङ्गस्य दीर्घः स्याद्यादौ प्रत्यये, न तु कृत्सार्वधातुकयोः । क्षीयात् ।**

(कृद्भिन्ने सार्वधातुकभिन्ने च यकारादौ प्रत्यये परे अजन्तस्य अङ्गस्य दीर्घो भवति ।)

अनेन सूत्रेण इकारस्य दीर्घे 'क्षीयास् ति' इति जाते इकारस्य लोपे सकारतकारयोः संयोगत्वे संयोगादेः सकारस्य लोपे च 'क्षीयात्' इति रूपं सिध्यति । एवं तसादौ अपि दीर्घे भूधातोरिव रूपाणि जायन्ते ।

लुङि तिपि च्लिप्रत्यये च्लेः सिचि सिचः प्राप्तस्य इडागमस्य निषेधे 'अ क्षि स् ति' इति जाते-

**सिचि वृद्धिः परस्मैपदेषु ७।२।१**

**इगन्ताङ्गस्य वृद्धिः परस्मैपदे सिचि । अक्षैषीत् । अक्षेष्यत् ।**

(परस्मैपदे सिचि परे इगन्तस्य अङ्गस्य वृद्धिर्भवति ।)

अनेन सूत्रेण वृद्धौ इकारस्य ऐकारे ‘अक्षैस् ति’ इति जाते इकारस्य लोपे अपृक्तत्वे ईडागमे वर्णसम्मेलने षत्वे च ‘अक्षैषीत्’ इति रूपं जायते । तसि तामादेशे षत्वे ष्टुत्वे च ‘अक्षैष्टाम्’ इति रूपं जायते । झौ जुसादेशे वर्णसम्मेलने षत्वे पदत्वे रुत्वे विसर्गे च ‘अक्षैषुः’ इति रूपं जायते । एवमेव सिबादौ अपि रूपाणि भवन्ति ।

लृङि अडागमे लृटि इव स्यादिषु विहितेषु अन्त्ये इकारस्य लोपे ‘अक्षेष्यत्’ इति रूपं जायते । तसादौ तु पूर्ववद् रूपाणि सिध्यन्ति ।

तप सन्तापे । तपति । तताप । तेपतुः । तेपुः । तेपिथ । ततप्थ । तप्ता । तप्स्यति । तपतु । अतपत् । तपेत् । तप्यात् । अताप्सीत् । अताप्ताम् । अतप्स्यत् ।

सन्तापेऽर्थे वर्तमानस्य ‘तप’ इति शब्दस्य धातुत्वेन लटि तिपि शपि ‘तपति’ यति रूपं सिध्यति ।

‘निस्’ इत्युपसर्गपूर्वकात् ‘तप्’धातोर्लटि तिपि शपि ‘निस् तपति’ इति जाते-

**निसस्तपतावनासेवने ८।३।१०२।**

**षः स्यात् । आसेवनं-पौनःपुन्यम्, ततोऽन्यस्मिन्विषये । निष्टपति ।**

(पौनःपुन्येन सेवनम् आसेवनमस्ति । तद्भिन्नेऽर्थके ‘तप्’धातौ परे ‘निस्’ इत्यस्य सकारस्य स्थाने षकारादेशो भवति ।)

अनेन सूत्रेण सकारस्य षत्वे तकारस्य ष्टुत्वे च ‘निष्टपति’ इति रूपं जायते ।

‘तप्’धातोर्लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे उपधावृद्धौ च ‘ततापे’ इति रूपं जायते । तसि अतुसि द्वित्वेऽभ्यासत्वे अतुसः कित्त्वे हलादिशेषे प्राप्ते अभ्यासस्य लोपे अनभ्यासस्य अकारस्य एत्त्वे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च ‘तेपतुः’ इति रूपं सिध्यति । झौ अपि एवमेव ‘तेपुः’ इति रूपं जायते । सिपि थलि आर्धधातुकत्वेन प्राप्तस्य इडागमस्य अनुदात्तत्वाद् निषेधे पुनः क्रादिनियमेन प्राप्तस्य इडागमस्य अकारवत्त्वाद् निषेधे ततो भारद्वाजस्य मते इडागमे ‘तप् इथ’ इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे प्राप्ते ‘थलि च सेटि’ इति सूत्रेण अभ्यासस्य लोपे अनभ्यासस्य अकारस्य एत्त्वे वर्णसम्मेलने च ‘तेपिथ’ इति रूपं जायते, भारद्वाजेतरमते तु इडागमाभावे द्वित्वेऽभ्यासत्वे हलादिशेषे ‘ततप्थ’ इति रूपं भवति । ततस्थसादौ तु पूर्ववदेव रूपाणि सिध्यन्ति ।

लुटि, लृटि च अनुदात्तत्वाद् इडागमनिषेधो भवति । अन्यत् पूर्ववदेव भवति । लोटि, लङि, विधिलिङि, आशीर्लिङि च ‘गद्’धातोरिव रूपाणि जायन्ते । लुङि तिपि च्लौ सिचि अनुदात्तत्वाद् इडागमनिषेधे हलन्तलक्षणवृद्धौ च ‘अ ताप् स् ति’ इति जाते इकारस्य लोपे अपृक्तत्वे ईडागमे वर्णसम्मेलने च ‘अताप्सीत्’ इति रूपं भवति । तसि ‘अताप् स् तस्’ इत्यत्र तसस्तामादेशे ‘झलो झलि’ इति सकारस्य लोपे च ‘अताप्ताम्’ इति रूपं जायते । झौ सिचः परस्य झेर्जुसि वर्णसम्मेलने पदत्वे रुत्वे

विसर्गे च 'अताप्सुः' इति रूपं जायते । सिबादौ तु पूर्ववदेव रूपाणि सिध्यन्ति । लृङि च गद्धातोरिव रूपाणि भवन्ति ।

**क्रमु** पादविक्षेपे ।

पादविक्षेपार्थे वर्तमानस्य 'क्रमु' इति शब्दस्य धातुत्वे उकारस्यानुबन्धलोपे लटि तिपि प्राप्तं शपं प्रबाध्य-

**वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ३।१।७०।**

**एभ्यः श्यन्वा, कर्तरि सार्वधातुके । पक्षे शप् ।**

(कर्त्रर्थे विहिते सार्वधातुके परे भ्राश्, भ्लाश्, भ्रम्, क्रम्, क्लम्, त्रस्, त्रुट्, लष् एभ्यो धातुभ्यो विकल्पेन श्यन्प्रत्ययो भवति ।)

इति सूत्रेण विकल्पेन श्यन्प्रत्ययेऽनुबन्धलोपे 'क्रम् य ति' इति जाते-

**क्रमः परस्मैपदेषु ७।३।७६।**

**क्रमेर्दीर्घः, परस्मैपदे शिति । क्राम्यति । क्रामति । चक्राम ।**

(परस्मैपदसम्बद्धे शिति परे 'क्रम्'धातोः अकारस्य दीर्घो भवति ।)

अनेन अकारस्य दीर्घे वर्णयोगे 'क्राम्यति' इति रूपं सिध्यति । श्यन्प्रत्ययाभावे तु शपि अकारस्य दीर्घे 'क्रामति' इति रूपं भवति । तसादौ अपि एवमेव रूपाणि भवन्ति ।

लिटि तिपि तसि झौ च पूर्ववद् रूपाणि जायन्ते । सिपि भारद्वाजस्य मते इडागमे 'चक्रमिथ' इति रूपं भवति चेद् अन्येषां मते इडागमाभावे 'चक्रम् थ' इत्यत्र मकारस्यानुस्वारे परसवर्णे च 'चक्रन्थ' इति रूपं जायते । थसादौ तु पूर्ववदेव रूपाणि जायन्ते ।

लुटि तिपि तासिप्रत्यये च 'क्रम् तास् ति' इति जाते आर्धधातुकत्वे-

**स्नुक्रमोरनात्मनेपदनिमित्ते ७।२।३६।**

**अत्रैवेट् । क्रमिता । क्रमिष्यति । क्राम्यतु । क्रामतु । अक्राम्यत् । अक्रामत् । क्राम्येत् । क्रामेत् । क्रम्यात् । अक्रमीत् । अक्रमिष्यत् ॥**

(आत्मनेपदनिमित्तहीनत्वे एव 'स्नु'धातोः 'क्रम्'धातोश्च परस्य वलादेः आर्धधातुकस्य इडागमो भवति । आत्मनेपदनिमित्तत्वे तु ताभ्यां परस्य वलादेः आर्धधातुकस्य इडागमो न भवति ।)

आत्मनेपदनिमित्तहीनत्वाद् अत्र 'तास्' इत्यस्य इडागमे ततः पूर्ववद् डादेशादौ 'क्रमिता' इति रूपं जायते । तसादौ अपि एवमेव रूपाणि भवन्ति । लृटि च एवमेव इडागमे पूर्ववद् रूपाणि निष्पद्यन्ते । लोटि, लङि, विधिलिङि च श्यन्शपोः पक्षे पृथग् रूपाणि पूर्ववद् जायन्ते । आशीर्लिङि 'अत्'धातोरिव रूपाणि जायन्ते । लुङि तिपि च्लौ सिचि आर्धधातुकत्वे परस्मैपदनिमित्तहीनत्वाद् इडागमे 'अक्रम् इस्

ति' इति जाते प्राप्ताया हलन्तलक्षणवृद्धेः 'नेटि' इति निषेधे पुनः 'अतो हलादेर्लघोः' इति वैकल्पिकवृद्धौ प्राप्तायाम्-

**ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ७।२।५।**

**हमयान्तस्य, क्षणादेर्ण्यन्तस्य, श्वयतेरेदितश्च वृद्धिर्नेडादौ सिचि ।**

(इडादौ सिचि हकारान्तानां धातूनाम्, मकारान्तानां धातूनाम्, यकारान्तानां धातूनाम्, क्षण्-श्वस्-जागृ-णि-श्विधातूनां एकारेतो धातोश्च वृद्धिर्न भवति ।)

इति सूत्रेण वृद्धिनिषेधे वर्णसम्मेलने इकारस्य लोपे अपृक्तत्वे ईडागमे सकारस्य लोपे सवर्णदीर्घे च 'अक्रमीत्' इति रूपं सिध्यति । तसादौ अपि एवमेव वृद्धिनिषेधे पूर्ववद् रूपाणि जायन्ते । लृङि अपि पूर्ववद् रूपाणि भवन्ति ।

स्खल सञ्चलने । स्खलति । चस्खाल ।

सञ्चलनार्थकस्य 'स्खल'शब्दस्य धातुत्वे अकारस्यानुबन्धलोपे लटि तिपि शपि 'स्खलति' इति रूपं जायते । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे प्राप्ते तं प्रबाध्य-

**शर्पूर्वाः खयः ७।४।६१।**

**शिष्यन्तेऽभ्यासस्य । हलादिशेषापवादः ।**

(शरो वर्तन्ते पूर्वे येषां ते खयः शर्पूर्वाः खयः । अभ्यासे वर्तमानाः शर्पूर्वाः खयः अवशिष्यन्ते, अन्ये हलो लुप्यन्ते ।)

अनेन सूत्रेण सकारस्य पूर्ववर्तित्वात् खकारस्य शेषे सकारलकारयोर्लोपे 'ख स्खल् अ' इति जाते चुत्वे चर्त्वे उपधावृद्धौ वर्णसम्मेलने च 'चस्खाल' इति रूपं जायते । तसादौ एवं खकारशेषे पूर्ववद् रूपाणि सिध्यन्ति । लुटि, लृटि, लोटि, लङि, विधिलिङि, आशीर्लिङि च पूर्ववद् रूपाणि निष्पद्यन्ते । लुङि तिपि च्लौ सिचि आर्धधातुकत्वे इडागमे च 'अ स्खल् इस् ति इति जाते-

**अतो ल्रान्तस्य ७।२।२।**

**अतः समीपौ यौ ल्रौ, तदन्तस्याङ्गस्यातो वृद्धिः, परस्मैपदपरे सिचि । अस्खालीत् । अस्खलिष्यत् ।**

(परस्मैपदः परो वर्तते यस्य सिचः, तस्मिन् सिचि परे अकारात् समीपे वर्तमानौ रेफलकारौ अन्त्ये वर्तेते यस्याङ्गस्य, तस्याङ्गस्य अकारस्य वृद्धिर्भवति ।)

इति सूत्रेण 'स्खल्'धातोः अकारस्य वृद्धौ वर्णसम्मेलने इकारस्य लोपे अपृक्तत्वे ईडागमे सकारस्य लोपे सवर्णदीर्घे च 'अस्खालीत्' इति रूपं सिध्यति । तसादौ अपि एवमेव वृद्धौ पूर्ववद् रूपाणि सिध्यन्ति । लृङि अपि पूर्ववद् रूपाणि भवन्ति ।

**पा पाने ।**

पानार्थकात् पाधातोर्लटि तिपि शपि 'पा अ ति' इति जाते-

**पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृश्यर्ति-सर्ति-शद-सदां पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्यर्च्छ-धौ-शीय-सीदाः ७।३।७८।**

**पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे । पिबादेशोऽदन्तस्तेन न गुणः । पिबति ।**

(प्रत्ययादौ वर्तमानस्य शकारस्य इत्संज्ञा भवति यस्य प्रत्ययस्य, तस्मिन् प्रत्यये परे पादीनां धातूनां स्थाने पिबादय आदेशा इत्थं भवन्ति-

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| पा | घ्रा | ध्मा | स्था | म्ना | दाण् | दृश् | ऋ | सृ | शद् | सद् |
| पिब | जिघ्र | धम | तिष्ठ | मन | यच्छ | पश्य | ऋच्छ | धौ | शीय | सीद |

'धौ' इति वर्जयित्वा पिबादय ये आदेशाः सन्ति, ते सर्वेऽपि अकारान्ता वर्तन्ते । तेन 'पिब' इत्यत्र लघूपधगुणो न भवति ।)

इति सूत्रेण 'पा' इत्यस्य स्थाने 'पिब' इत्यादेशे 'पिब अ ति' इति जाते गुणे परे अकारस्य पररूपे 'पिबति' इति रूपं सिध्यति । तसादौ अपि एवमेवे रूपाणि जायन्ते ।

लिटि तिपि णलि द्वित्वेऽभ्यासत्वे ह्रस्वे 'प पा अ' इति जाते-

**आत औ णलः ७।१।३४**

**आदन्ताद्धातोर्णल औकारादेशः स्यात् । पपौ ।**

(आकारान्ताद् धातोः परस्य 'णल्' इत्यस्य अकारस्य स्थाने औकारादेशो भवति ।)

इति सूत्रेण णलः अकारस्य स्थाने औकारादेशे 'पपा औ' इति जाते 'वृद्धिरेचि' इति वृद्धौ 'पपौ' इति रूपं निष्पन्नं भवति । तसि अतुसि द्वित्वेऽभ्यासत्वे ह्रस्वे 'प पा अतुस्' इति जाते अतुसः कित्त्वे च-

**आतो लोप इटि च**

**अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः । पपतुः । पपुः । पपिथ । पपाथ । पपथुः । पप । पपौ पपिव । पपिम । पाता । पास्यति । पिबतु । अपिबत् । पिबेत् ।**

(अजादौ किति ङिति आर्धधातुके परे, इटि च परे आकारस्य लोपो भवति ।)

इति सूत्रेण धातोः आकारस्य लोपे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'पपतुः' इति रूपं सम्पद्यते । झौ अपि एवमेव 'पपुः' इति रूपं सिध्यति । सिपि थलि भारद्वाजस्य मते इडागमे द्वित्वेऽभ्यासत्वे ह्रस्वे च 'पपा इथ' इति जाते 'आतो लोप इटि च' इति सूत्रेण आकारस्य लोपे 'पपिथ' इति रूपं जायते । अन्येषां मते तु इडागमाभावे 'पपाथ' इति रूपं भवति । थसादौ अपि एवमेव रूपाणि जायन्ते ।

लुटि इडागमनिषेधे 'पाता' इति रूपं भवति । लृटि अपि एवमेव 'पास्यति' इति रूपं जायते । लोटि लङि विधिलिङि च पिबादेशे पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि तिपि आर्धधातुकत्वे यासुडागमे च 'पा यास् ति' इति जाते-

**एर्लिङि ६।४।६७।**

**घुसंज्ञकानां मास्थागापिबतिजहातिस्यतीनां चाऽऽत एत्वमार्धधातुके किति लिङि । पेयात् । 'गातिस्थे'ति सिचो लुक् । अपात् । अपाताम् ।**

(घुसंज्ञकानां दारूपाणां धारूपाणां च धातूनां, मा माने, ष्ठा गतिनिवृत्तौ, गै शब्दे, पा पाने, ओहाक् त्यागे, षो अन्तःकर्मणि एतेषां धातूनां च आकारस्य एत्वं भवति, लिङ्सम्बद्धे आर्धधातुके किति प्रत्यये परे ।)

अनेन आकारस्य एत्वे इकारस्य लोपे सकारतकारयोः संयोगत्वे संयोगादेः सकारस्य लोपे च 'पेयात्' इति रूपं निष्पद्यते । तसादौ अपि एवमेव एत्वे पूर्ववद् रूपाणि जायन्ते ।

लुङि तिपि च्लौ सिचि 'गाति-स्था...' इति सूत्रेण सिचो लुकि इकारस्य लोपे च 'अपात्' इति रूपं जायते । तसि तसस्तामादेशे 'अपाताम्' इति रूपं भवति । झौ सिज्लुकि 'अपा झि' इति जाते-

**आतः ३।४।११०।**

**सिज्लुकि आदन्तादेव झेर्जुस् ।**

(सिचो लुकि जाते आकारान्ताद् धातोः परस्य झेः स्थाने जुसादेशो भवति, अन्यस्माद् धातोः परस्य झेः स्थाने जुसादेशो न भवति ।)

इति सूत्रेण झेर्जुसादेशेऽनुबन्धलोपे 'अपा उस्' इति जाते-

**उस्यपदान्तात् ६।१।९६।**

**अपदान्तादवर्णादुसि पररूपमेकादेशः । अपुः । अपास्यत् ।**

(अपदान्ते वर्तमानाद् अवर्णाद् उसि परे पूर्वपरयोः स्थाने पररूपम् एकादेशो भवति ।)

इति सूत्रेण पररूपे पदत्वे रुत्वे विसर्गे च 'अपुः' इति रूपं भवति । सिबादौ तु एवमेव रूपाणि जायन्ते । लृटि च पूर्ववद् रूपाणि सिध्यन्ति ।

**गै शब्दे ।**

शब्दार्थकस्य 'गै'शब्दस्य धातुत्वे लटि तिपि शपि आयादेशे 'गायति' इति रूपं सिध्यति ।

लिटि 'गै ल्' इति जाते-

**आदेच उपदेशेऽशिति ६।१।४५।**

**उपदेशे एजन्तस्य धातोरात्त्वं, न तु शिति ।**

(उपदेशे यो धातुः एजन्तो भवति, तस्य एचः स्थाने आकारादेशो भवति, शिति परे न भवति । शित् तु शबादिरेव, शबादिस्तु सार्वधातुकलकारे विधीयते, आर्धधातुकलकारे न विधीयते । अतः सार्वधातुकलकारेषु धातोरेच आत्वं न भवति, आर्धधातुकलकारेषु धातोरेच आत्वं भवति ।)

इति सूत्रेण ऐकारस्य आत्वे 'गा ल्' इति जाते तिपि णलि द्वित्वेऽभ्यासत्वे ह्रस्वे चुत्वे च 'जगा अ' इति जाते 'आत औ णलः' इति जाते इति णलः अकारस्य स्थाने औकारादेशे वृद्धौ च 'जगौ' इति रूपं निष्पद्यते । एवं तसादौ अपि पाधातोरिव रूपाणि जायन्ते । लुटि, लृटि च आत्वविधानानन्तरं पाधातोरिव रूपाणि भवन्ति । लोटि, लङि, विधिलिङि च शबादिना पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि च आत्वानन्तरं पाधातोरिव रूपाणि सम्पद्यन्ते ।

लुङि तिपि च्लौ सिचि 'अ गा स् ति' इति जाते आर्धधातुकत्वे प्राप्तस्य इडागमस्य एकाच्त्वाद् निषेधे प्राप्ते-

**यमरमनमातां सक् च ७।२।७३।**

**एषां सक् स्यात्, एभ्यः सिच इट्, परस्मैपदेषु ।**

(परस्मैपदे परे यम्, रम्, नम् एषां धातूनाम् आकारान्तानां धातूनां च 'सक्' आगमो भवति, ततः परस्य सिच इडागमोऽपि भवति ।)

इति सूत्रेण धातोः 'सक्'आगमे, सिच इडागमे च सकः कित्त्वाद् धातोः अन्त्यावयवे, इटः टित्त्वाद् आद्यवयवे च 'अ गास् इस् ति' इति जाते वर्णसम्मेलने अन्त्यस्य इकारस्य लोपे तकारस्य अपृक्तत्वे ईडागमे सकारस्य लोपे सवर्णदीर्घे च 'अगासीत्' इति रूपं जायते । ततस्तसादौ एवं सगागम-इडागमयोः विहितयोः पूर्ववदेव रूपाणि सिध्यन्ति । लृङि तु पाधातोरिव रूपाणि जायन्ते ।

घ्रा गन्धोपादाने । जिघ्रति । घ्रायात्-घ्रेयात् । अघ्रासीत् । अघ्रास्यत् ।

गन्धोपादानेऽर्थे वर्तमानस्य 'घ्रा' इति शब्दस्य धातुत्वे लटि तिपि शपि 'पा-घ्रा-ध्मा...' इति सूत्रेण 'घ्रा' इत्यस्य स्थाने 'जिघ्र' आदेशे पररूपे च 'जिघ्रति' इति रूपं जायते । लिटि लुटि लृटि च गाधातोरिव रूपाणि जायन्ते । लोटि लङि विधिलिङि च जिघ्रादेशे पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि तिपि आर्धधातुकत्वे यासुडागमे यासुटः कित्त्वे च 'घ्रा यास् ति' इति जाते-

**वाऽन्यस्य संयोगादेः ६।४।६८।**

**घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा, आर्धधातुके किति लिङि ।**

(लिङ्सम्बद्धे किति आर्धधातुके परे 'एर्लिङि' इति सूत्रे उक्तेभ्यो मास्थादिभ्यो भिन्नानां संयोगादीनां धातूनाम् आकारस्य विकल्पेन एत्वं भवति ।)

इति सूत्रेण विकल्पेन आकारस्य एत्वे 'घ्रेयास् ति' इति जाते इकारस्य लोपे सकारतकारयोः संयोगत्वे

संयोगादेः सकारस्य लोपे च 'घ्रेयात्' इति रूपं निष्पद्यते । एत्वाभावे तु 'घ्रायात्' इति रूपं जायते । लुङि अडागमे तिपि च्लौ सिचि 'अ घ्रा स् ति' इति जाते-

**विभाषा घ्राधेट्शाच्छासः २।४।७८।**

**एभ्यः सिचो लुग्वा स्यात् परस्मैपदे ।**

(परस्मैपदे परे घ्रा गन्धोपादाने, धेट् पाने, शो तनूकरणे, छो छेदने, षो अन्तःकर्मणि एभ्यो धातुभ्यः परस्य सिचो विकल्पेन लुग् भवति ।)

इति सूत्रेण विकल्पेन सिचो लुकि इकारस्य लोपे च 'अघ्रात्' इति रूपं सिध्यति । सिचो लुगभावे सगागमादिना 'अघ्रासीत्' इति रूपं सिध्यति । एवं तसादौ अपि सिचो लुकि पाधातोरिव रूपाणि जायन्ते, लुगभावे कृतात्वस्य गैधातोरिव रूपाणि जायन्ते । लृङि पाधातोरिव रूपाणि भवन्ति ।

**ध्यै चिन्तायाम् । ध्यायति । दध्यौ ।**

**चिन्तार्थकस्य 'ध्यै' शब्दस्य धातुसंज्ञायां लटि तिपि शपि आयादेशे 'ध्यायति' इति रूपं सिध्यति । लिटि लुटि लृटि च आत्वे घ्राधातोरिव रूपाणि जायन्ते । लोटि लङि विधिलिङि च शबादिना पूर्ववद् रूपाणि सिध्यन्ति । आशीर्लिङि अपि आत्वे घ्राधातोरिव रूपाणि जायन्ते । लुङि लृङि च गैधातोरिव रूपाणि भवन्ति ।**

ष्ठा गतिनिवृत्तौ । तिष्ठति । 'गातिस्थे'ति सिचो लुक् । अस्थात् ।

गतिनिवृत्त्यर्थकस्य 'ष्ठा'शब्दस्य धातुत्वे धात्वादेः षकारस्य स्थाने सकारादेशे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति नियमेन निमित्तस्य षकारस्य निवृत्त्या नैमित्तिकस्य ष्टुत्वस्यापि निवृत्तौ 'स्था' इति जाते लटि तिपि शपि 'पा-घ्रा-ध्मा...' इत्यादिना 'स्था' इत्यस्य स्थाने 'तिष्ठ'आदेशे पररूपे 'तिष्ठति' इति रूपं सिध्यति । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे शर्पूर्वस्य खयः थकारस्य शेषे ह्रस्वे चर्त्वे णल औकारादेशे वृद्धौ च 'तस्थौ' इति रूपं सिध्यति । लुटि लृटि च घ्राधातोरिव रूपाणि जायन्ते । लोटि लङि विधिलिङि च तिष्ठादेशे पूर्ववद् रूपाणि भवन्ति । आशीर्लिङि लुङि लृङि च पाधातोरिव रूपाणि भवन्ति ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) अचस्तास्वत्थल्यनिटो नित्यम्

(ख) अकृत्सार्वधातुकयोर्दीर्घः

(ग) वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः

(घ) स्नुक्रमोरनात्मनेपदनिमित्ते

(ङ) ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्

(च) अतो ल्रान्तस्य

(छ) विभाषा घ्राधेट्शाच्छासः

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) ध्यैधातोः कोऽर्थः ?

(ख) क्रादिनियमेन केभ्यो धातुभ्यः परस्य लिट इडागमो न भवति ?

(ग) भारद्वाजस्य मते कीदृशाद् धातोः परस्य थल इडागमो न भवति ?

(घ) परस्मैपदे सिचि परे कस्य वृद्धिर्भवति ?

(ङ) 'निष्टपति' इत्यत्र केन सस्य षत्वम् ?

(च) कर्तरि सार्वधातुके परे केभ्यो धातुभ्यो विकल्पेन श्यन्प्रत्ययो भवति ?

(छ) हलादिशेषापवादेन कीदृशाः खयोऽवशिष्यन्ते ?

(ज) के मास्थादयो धातवः ?

(झ) 'क्रमु' धातोः कोऽर्थः ?

(ञ) आर्धधातुके किति लिङि कस्य विकल्पेन एत्वं भवति ?

(ट) 'निमित्तापाये नैमित्तिकस्याप्यपायः' इत्यस्य तात्पर्यं सोदाहरणं स्पष्टयत ।

(ठ) 'पिबति' इत्यत्र किमर्थं लघूपधगुणो न भवति ?

३. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) उपदेशेऽत्वतः

(ख) निसस्तपतावनासेवने

(ग) आतो लोप इटि च

(घ) आदेच उपदेशेऽशिति

(ङ) यमरमनमातां सक् च

(च) सिचि वृद्धिः परस्मैपदेषु

(छ) क्रमः परस्मैपदेषु

(ज) शर्पूर्वाः खयः

(झ) आत औ णलः

(ञ) र्लिङि

(ट) वाऽन्यस्य संयोगादेः

४. **अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत**

(क) क्षिधातोराशीर्लिङि (ख) तप्धातोर्लिटि (ग) क्रम्धातोर्लङि (घ) स्खल्धातोर्लिटि

(ङ) पाधातोर्लुङि (च) घ्राधातोराशीर्लिङि (छ) गैधातोर्लुङि (ज) स्थाधातोर्लिटि

५. **'पा-घ्रा-ध्मा-...' इति सूत्रं प्रपूर्य स्थानिभिरादेशानां परस्परमेलनेन तदर्थं प्रकाशयत ।**

६. **'अजन्तोऽकारवान्...' इति कारिकां प्रपूर्य सोदाहरणं तात्पर्यं स्फुटीकुरुत ।**

८. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) चिक्षयिथ/चिक्षेथ (ख) क्षीयात् (ग) अक्षैषीत् (घ) अक्षैषुः

(ङ) तेपतुः (च) क्राम्यति/क्रामति (छ) क्रमिता (ज) अक्रमीत्

(झ) चस्खाल (ञ) अस्खालीत् (ट) पिबति (ठ) पपौ

(ड) पपतुः (ढ) पपिथ/पपाथ (ण) पेयात् (त) अपुः

(थ) अगासीत् (द) घ्रेयात्/घ्रायात् (ध) अघ्रात् (न) तस्थौ

९. **अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दिशत**

(क) क्षयेयुः (ख) तप्ता (ग) अक्रामः (घ) अस्खलिष्यम्

(ङ) पपुः (च) गास्यावः (छ) ध्यायास्त (ज) अस्थुः

१०. **सिद्धपदानि दर्शयत**

(क) क्षि + लुट् (तस्) (ख) तप् + लोट् (सिप्) (ग) क्रम् + विधिलिङ् (झि)

(घ) स्खल् + लिट् (थ) (ङ) पा + आशीर्लिङ् (मिप्) (च) गै + लृङ् (थस्)

(छ) घ्रा + लृट् (तिप्) (ज) स्था + लट् (मस्) (झ) ध्यै + लङ् (वस्)

११. **पदानां वाक्ये प्रयोगं निदर्शयत**

(क) अक्षयन् (ख) तपामि (ग) क्रामाणि (घ) स्खलिष्यसि

(ङ) पेयात् (च) गातास्मः (छ) जिघ्रेत (ज) तस्थौ

(झ) अध्यास्यम्

## सप्तमः पाठः

# स्मृप्रभृतीनां धातूनां रूपसिद्धिप्रक्रियानिदर्शनम्

**स्मृ चिन्तायाम् ।**

चिन्तार्थे वर्तमानस्य 'स्मृ'शब्दस्य धातुसंज्ञायां लटि तिपि शपि गुणे वर्णसम्मेलने च 'स्मरति' इति रूपं सिध्यति । लिटि तिपि णलि 'स्मृ अ' इति जाते-

**ऋतश्च संयोगादेर्गुणः ।७।४।१०।**

**ऋदन्तस्य संयोगादेरङ्गस्य गुणो लिटि । उपधाया वृद्धिः ।**

(लिटि परे संयोगादेः ऋकारान्तस्य अङ्गस्य गुणो भवति ।)

अनेन सूत्रेण ऋकारस्य गुणे 'स्मर् अ' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे अकारस्य उपधात्वे वृद्धौ च वर्णसम्मेलने च 'सस्मार' इति रूपं सिध्यति । तसि झौ च 'सस्मरतुः' 'सस्मरुः' इति रूपद्वयं सिध्यति । लुटि इडागमनिषेधे 'स्मर्ता' इति रूपं सिध्यति । लृटि तिपि स्यप्रत्यये 'स्मृ स्य ति' इति जाते प्राप्तस्य इडागमस्य एकाच्त्वाद् निषेधे प्राप्ते-

**ऋद्धनोः स्ये ७।२।७०।**

**ऋतो, हन्तेश्च स्यस्य इट् ।**

(ऋकारान्ताद् धातोः 'हन्'धातोश्च परस्य स्यप्रत्ययस्य इडागमो भवति ।)

इति सूत्रेण स्यस्य इडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे 'स्मृ इस्य ति' इति जाते धातोः अङ्गत्वेन ऋकारस्य गुणे वर्णसम्मेलने 'स्मरिष्यति' इति रूपं जायते ।

लोटि लङि विधिलिङि च शबादिना पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि तिपि आर्धधातुकत्वे यासुडागमे 'स्मृ यास् ति' इति जाते-

**गुणोऽर्तिसंयोगाद्योः ७।४।२९।**

**अर्तेः, संयोगादेर्ऋदन्तस्य च गुणो, यकि, यदावार्द्धधातुके लिङि च ।**

(यकि यकारादौ आर्धधातुके च परे ऋधातोः, संयोगादेः ऋकारान्तस्य धातोश्च गुणो भवति ।)

इति सूत्रेण ऋकारस्य गुणे 'स्मर् यास् ति' इति जाते इकारस्य लोपे सकारतकारयोः संयोगत्वे संयोगादेः सकारस्य लोपे च 'स्मर्यात्' इति रूपं जायते ।

लुङि तिपि च्लौ सिचि आर्धधातुकत्वे प्राप्तस्य इडागमस्य एकाच्त्वाद् निषेधे 'अ स्मृ स् ति' इति जाते 'सिचि वृद्धिः परस्मैपदेषु' इति सूत्रेण ऋकारस्य वृद्धौ 'अस्मार् स् ति' इति जाते इकारस्य लोपे अपृक्तत्वे ईडागमे वर्णसम्मेलने सकारस्य षत्वे च 'अस्मार्षीत्' इति रूपं जायते । लृङि तु 'अस्मरिष्यत्' इति रूपं भवति ।

**सृ गतौ ।**

गत्यर्थकस्य सृधातोः लटि तिपि शपि गुणे च 'सरति' इति रूपं जायते । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे अङ्गत्वे वृद्धौ च 'ससार' इति रूपं जायते । तसादौ कित्वाद् गुणनिषेधो भवति । सिपि थलि तु क्रादित्वाद् इडागमनिषेधेन 'ससर्थ' इति रूपं जायते । मिपि णलि च विकल्पेन णित्वे 'ससार/ससर' इति रूपद्वयं जायते । वसि वसि च क्रादित्वाद् इडागमनिषेधो भवति, कित्वाच्च गुणनिषेधो भवति ।

लुटि लृटि च 'स्मृ'धातोरिव रूपाणि जायन्ते । लोटि लङि विधिलिङि च शबादिना पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि तिपि आर्धधातुकत्वे यासुडागमे कित्वे च प्राप्तस्य गुणस्य निषेधे 'सृ यास् ति' इति जाते-

**रिङ् शयग्लिङ्क्षु ७।४।२८।**

**शे, यकि यादावार्धधातुके लिङि च ऋतो रिङ् । रीङि प्रकृते रिङ्विधिसामर्थ्यान्न दीर्घः । स्रियात् । असार्षीत् । असरिष्यत् । शीघ्रगतौ । तु 'पाघ्रे'ति शिति धौरादेशः । धावति ॥**

(शप्रत्यये परे, यक्प्रत्यये परे, लिङ्सम्बद्धे यकारादौ आर्धधातुके च परे ऋकारस्य स्थाने रिङादेशो भवति । ङकारस्य इत्त्वेन 'रि' इत्येवावशिष्यते । रिङ्विधानानन्तरं 'अकृत्सार्वधातुकयोर्दीर्घः' इति सूत्रेण इकारस्य दीर्घो न भवति । यदि दीर्घो विधेयः स्यात् तर्हि सूत्रे 'रिङ्' इत्यत्र 'रीङ्' इत्यस्य उक्तिः स्यात् । सूत्रे रिङ्विधानसामर्थ्यात् तत्र दीर्घो न भवति ।)

इति सूत्रेण ऋकारस्य स्थाने रिङादेशेऽनुबन्धलोपे 'स्रियास् ति' इति जाते इकारस्य लोपे सकारतकारयोः संयोगत्वे संयोगादेः सकारस्य लोपे च 'स्रियात्' इति रूपं जायते । लुङि लृङि च स्मृधातोरिव रूपाणि जायन्ते ।

सार्वधातुकलकारेषु शीघ्रगतौ वर्तमानस्य सृधातोः स्थाने 'धौ' आदेशो भवति, तेन तेषु लकारेषु 'धावति' 'धावतु' 'अधावत्' 'धावेत्' इत्यादीनि रूपाणि जायन्ते । आर्धधातुकलकारेषु तु पूर्ववत् 'ससार' इत्यादीनि रूपाणि जायन्ते ।

**दृशिर् प्रेक्षणे । पश्यति । ददर्श ।**

प्रेक्षणार्थे वर्तमानस्य 'दृशिर्' इति शब्दस्य धातुसंज्ञायाम्-

**वा. इर इत्संज्ञा वाच्या ।**

(धातौ वर्तमानस्य 'इर्' इत्यस्य इत्संज्ञा भवति ।)

इति वार्तिकेन 'इर्' इत्यस्य इत्संज्ञायां 'दृश्' इति जाते लटि तिपि शपि 'पा-घ्रा-ध्मा-...' इत्यनेन 'दृश्' इत्यस्य स्थाने 'पश्य' इत्यादेशे पररूपे च 'पश्यति' इति रूपं जायते । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे

अत्वे रपरत्वे हलादिशेषे च 'द दृश् अ' इति जाते धातोः अङ्गत्वे, 'अ' इत्यस्य आर्धधातुकत्वे, ऋकारस्य लघुत्वे, उपधात्वे च लघूपधगुणे च 'ददर्श' इति रूपं सिध्यति । तसि 'द दृश् अतुस्' इत्यत्र धातोः अङ्गत्वे, 'अ' इत्यस्य आर्धधातुकत्वे, ऋकारस्य लघुत्वे, उपधात्वे च लघूपधगुणे प्राप्ते-

ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन । ददृशतुः । ददृशुः ।

(ऋकार उपधायामस्ति येषां ते धातवः ऋदुपधाः, तेभ्यः परस्य लिटो गुणात् पूर्वविप्रतिषेधेन कित्त्वं भवति ।)

इति वार्तिकेन अतुसः कित्त्वाद् गुणनिषेधे वर्णसम्मेलने पदत्वे रुत्वे विसर्गेच 'ददृशतुः' इति रूपं जायते । झौ अपि एवमेव 'ददृशुः' इति रूपं भवति । सिपि थलि आर्धधातुकत्वेन प्राप्तस्य गुणस्य अनुदात्तत्वाद् निषेधे प्राप्ते-

**विभाषा सृजिदृशोः ७।२।६५**

**आभ्यां थल इड् वा ।**

('सृज्'धातोः, 'दृश्'धातोश्च परस्य थलो विकल्पेन इडागमो भवति ।)

इत्यनेन विकल्पेन इडागमे द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे च 'द दृश् इ थ' इति जाते धातोः अङ्गत्वे, ऋकारस्य लघुत्वे, उपधात्वे च लघूपधगुणे च 'ददर्शिथ' इति रूपं सिध्यति । इडागमाभावे द्वित्वादिना 'द दृश् थ' इति जाते-

**सृजिदृशोर्झल्यमकिति ६।१।५८।**

**अनयोरमागमः स्याज्झलादावकिति । दद्रष्ठ-ददर्शिथ । द्रष्टा ।**

(किद्भिन्ने झलादौ प्रत्यये परे 'सृज्'धातोः, 'दृश्'धातोश्च 'अम्' आगमो भवति ।)

इति सूत्रेण अमागमे मित्त्वाद् अन्त्यादचः परे तस्यैवावयवे 'द दृ अश् थ' इति जाते यणि ऋकारस्य स्थाने रेफादेशे 'दद्रश् थ' इति जाते 'व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-च्छशां षः' इति सूत्रेण शकारस्य षत्वे थकारस्य ष्टुत्वे च 'दद्रष्ठ' इति रूपं सिध्यति । थसादौ अपि तसादेरिव रूपाणि भवन्ति ।

लुटि तिपि तासिप्रत्यये आर्धधातुकत्वे प्राप्तस्य इडागमस्य अनुदात्तत्वाद् निषेधे 'दृश् तास् ति' इतिजाते अमागमे यणि षत्वे ष्टुत्वे च 'द्रष्टास् ति' इति जाते 'डा' आदेशे टित्वे डित्वसामर्थ्याद् अभस्यापि टेर्लोपे वर्णसम्मेलने 'द्रष्टा' इति रूपं जायते । लृटि अपि अमागमे यणि षत्वे च 'द्रष् स्य ति' इति जाते-

**षढोः कः सि ८।२।४१।**

**षस्य ढस्य च कः स्यात्सकारे परे । द्रक्ष्यति । दृश्यात् । इरित्त्वादङ् वा ।**

(सकारे परे षकारस्य ढकारस्य च स्थाने ककारादेशो भवति ।)

इति षकारस्य स्थाने ककारादेशे 'द्रक् स्य ति' इति जाते इति जाते 'आदेशप्रत्यययोः' इति सूत्रेण सकारस्य षत्वे ककारषकारयोः संयोगेन क्षादेशे च 'द्रक्ष्यति' इति रूपं जायते ।

लोटि लङि विधिलिङि च शबादिना पूर्ववद् रूपाणि सिध्यन्ति । आशीर्लिङि तिपि आर्धधातुकत्वे यासुडागमे यासुटः कित्त्वे च प्राप्तस्य लघूपधगुणस्य निषेधे वर्णसम्मेलने इकारस्य लोपे सकारतकारयोः संयोगत्वे संयोगादेः सकारस्य लोपे च 'दृश्यात्' इति रूपं जायते ।

लुङि तिपि च्लौ प्राप्तं सिचं प्रबाध्य-

**इरितो वा ३।१।५७**

**इरितो धातोश्च्लेरङ् वा परस्मैपदे ।**

(परस्मैपदे परे 'इर्' इत्यस्य इत्संज्ञा भवति यस्य धातोः, तस्माद् धातोः परस्य च्लेः स्थाने विकल्पेन 'अङ्' इत्यादेशो भवति ।)

इति सूत्रेण विकल्पेन स्थाने विकल्पेन 'अङ्' इत्यादेशे 'अ दृश् अ ति' इति जाते प्राप्तस्य लघूपधगुणस्य निषेधे प्राप्ते-

**ऋदृशोऽङि गुणः ७।४।१६**

**ऋवर्णान्तानां, दृशेश्च गुणः स्यादङि । अदर्शत् ।**

(अङि परे ऋवर्णान्तानां धातूनां दृश्धातोश्च गुणो भवति ।)

इति सूत्रेण ऋकारस्य गुणे वर्णसम्मेलने इकारस्य लोपे च 'अदर्शत्' इति रूपं जायते । अङभावे-

**शल इगुपधादनिटः क्सः ३।१।४५**

**इगुपधो यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः स्यात् ।**

(इक् अस्ति उपधायां यस्य स धातुः इगुपधः, स एव धातुर्यदि शलन्तो वर्तते चेत् तस्मात् परस्य अनिटः च्लेः स्थाने 'क्स' आदेशो भवति ।)

इति सूत्रेण च्लेः स्थाने क्सादेशे प्राप्ते-

**न दृशः ३।१।४७**

**दृशश्च्लेर्वक्ष्यमाणः क्सो न । अद्राक्षीत् । अद्रक्ष्यत् ।**

(दृश्धातोः परस्य च्लेः स्थाने वक्ष्यमाणः क्सादेशो न भवति ।)

इति निषेधे च्लेः स्थाने सिजादेशे 'अ दृश् स् ति' इति जाते सिच आर्धधातुकत्वेन प्राप्तस्य इडागमस्य अनुदत्तत्वाद् निषेधे अमागमे यणि हलन्तलक्षणवृद्धौ च 'अद्राश् स् ति' इति जाते शकारस्य षत्वे, षकारस्य स्थाने कादेशे 'अद्राक् स् ति' इति जाते सकारस्य षत्वे कषसंयोगेन क्षादेशे च 'अद्राक्ष्

ति' इति जाते इकारस्य लोपे अपृक्तत्वे ईडागमे वर्णसम्मेलने च 'अद्राक्षीत्' इति रूपं जायते । तसि तु 'अद्राक् स् तस्' इत्यत्र तसस्तामादेशे 'झलो झलि' इति सकारस्य लोपे वर्णसम्मेलने च 'अद्राक्ताम्' इति रूपं सिध्यति । झौ सिचः परस्य झेर्जुसादेशे पूर्ववद् 'अद्राक्षुः' इति रूपं सिद्धम् । सिबादौ तु पूर्ववद् रूपाणि भवन्ति ।

लृङि तु 'अद्रक्ष्यत्' इति रूपं भवति ।

**श्रु श्रवणे ।**

श्रवणार्थकस्य श्रुशब्दस्य धातुत्वेन लटि तिपि शपि प्राप्ते-

**श्रुवः शृ च ३।१।७४।**

**श्रुवः 'शृ' आदेशः श्नुप्रत्ययश्च, कर्तरि सार्वधातुके । शृणोति ।**

(श्रुधातोः स्थाने 'शृ' इत्यादेशो भवति, ततः शपं प्रबाध्य श्नुप्रत्ययश्च भवति ।)

इति सूत्रेण 'श्रु' इत्यस्य स्थाने 'शृ' इत्यादेशे ततः श्नुप्रत्यये च शकारस्यानुबन्धलोपे 'शृ नु ति' इति जाते विकरणविशिष्टस्य अङ्गत्वात् तिपि परे 'शृनु' इत्यस्य उकारस्य गुणे 'शृनोति' इति जाते ऋवर्णात् परस्य नकारस्य णत्वे 'शृणोति' इति रूपं सिद्धम् । तसि 'शृनु तस्' इति जाते-

**सार्वधातुकमपित् १।२।४।**

**अपित्सार्वधातुकं ङिद्वत्स्यात् । शृणुतः ।**

(पिद्भिन्नस्य सार्वधातुकस्य ङित्त्वं भवति । 'पिच्च ङिन्न, ङिच्च पिन्न' इति वचनेन सार्वधातुकानां पितां तिप्-सिप्-मिपां ङित्त्वं न भवति, तद्भिन्नानां तिङां तु ङित्त्वं भवति ।)

इति 'तस्' इत्यस्य ङित्त्वे प्राप्तस्य गुणस्य निषेधे नस्य णत्वे पदत्वे रुत्वे विसर्गे च 'शृणुतः' इति रूपं जायते । झौ 'शृनु झि' इत्यत्र अन्तादेशे प्राप्तं यणं प्रबाध्य उवङादेशे प्राप्ते-

**हुश्नुवोः सार्वधातुके ६।४।८७**

**जुहोतेः, श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्यासंयोगपूर्वोवर्णस्य यण् स्यादचि सार्वधातुके । शृण्वन्ति । शृणोषि । शृणुथः । शृणुथ । शृणोमि ।**

(अजादौ सार्वधातुके परे हुधातुना श्नुप्रत्ययेन च सम्बद्धस्य असंयोगपूर्वस्य अनेकाचः अङ्गस्य उवर्णस्य स्थाने यणादेशो भवति ।)

इति सूत्रेण उकारस्य यणि नकारस्य णत्वे च 'शृण्वन्ति' इति रूपं जायते । एवमेव सिबादौ अपि रूपाणि जायन्ते । वसि 'शृनु वस्' इति जाते-

**लोपश्चास्यान्यतरस्यां म्वोः ६।४।१०७**

**असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा, म्वोः परयोः । शृण्वः, शृणुवः । शृण्मः, शृणुमः । शुश्राव शुश्रव ।**

**शुश्रुव । शुश्रुम । श्रोता । श्रोष्यति । शृणोतु शृणुतात् । शृणुताम् । शृण्वन्तु ।**

(पूर्वं संयोगो नास्ति यस्य प्रत्ययस्य, तस्य प्रत्ययस्य उकारस्य विकल्पेन लोपो भवति मकारे वकारे च परे ।)

इति सूत्रेण विकल्पेन उकारस्य लोपे नकारस्य णत्वे पदत्वे रुत्वे विसर्गे च 'शृण्वः' इति रूपं सिध्यति । उकारलोपाभावे तु 'शृणुवः' इति रूपं भवति । मसि एवमेव 'शृण्वः/शृणुमः' इति रूपं सिध्यति । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे 'शु श्रु अ' इति जाते अङ्गत्वेन उकारस्य वृद्धौ च 'शुश्राव' इति रूपं सिध्यति । तसि 'शु श्रु अतुस्' इति जाते उकारस्य स्थाने उवङादेशेऽनुबन्धलोपे पदत्वे रुत्वे विसर्गे च 'शुश्रुवतुः' इति रूपं जायते । झौ एवमेव 'शुश्रुवुः' इति रूपं भवति । सिपि थलि क्रादित्वेन इडागमो न भवति, तेन 'शुश्रोथ' इति रूपं निष्पद्यते । थसि थे च पूर्ववत् 'शुश्रुवथुः''शुश्रुव' इति रूपे भवतः । मिपि णलो विकल्पेन णित्त्वाद् 'शुश्राव/शुश्रव' इति रूपद्वयं जायते । वसि मसि च क्रादित्वाद् इडागमाभावे, कित्त्वाद् गुणाभावे च 'शुश्रुव''शुश्रुम' इति रूपे भवतः ।

लुटि, तिपि तासिप्रत्यये आर्धधातुकत्वे एकाच्त्वाद् इडागमनिषेधे उकारस्य गुणे डादिकार्ये च 'श्रोता' इति रूपं सिध्यति । लृटि तिपि स्यप्रत्यये एवमेव 'श्रोष्यति' इति रूपं जायते । लोटि तिपि शपं प्रबाध्य श्नुप्रत्यये 'शृ'आदेशे णत्वे इकारस्य उत्वे च 'शृणु तु' इति जाते विकल्पेन 'तातङ्' आदेशे 'शृणुतात्' इति रूपं जायते, 'तातङ्' आदेशाभावे तु 'शृणु तु' इत्यत्र गुणे 'शृणोतु' इति रूपं जायते । तसि 'शृणु तस्' इत्यत्र लङ्वद्भावेन तसस्तामादेशे 'शृणुताम्' इति रूपं जायते । झौ लटि इव 'शृण्वन्ति' इति जाते इकारस्य उत्वे 'शृण्वन्तु' इति रूपं सिध्यति । सिपि पूर्ववत् 'शृणु सि' इति जाते सेर्ह्यादेशेऽपित्त्वे च 'शृणु हि' हेस्तातङि ङित्त्वाद् गुणनिषेधे च 'शृणुतात्' इति रूपं जायते, तातङोऽभावे तु हेः अपित्त्वेन ङित्त्वाद् गुणनिषेधे 'शृणु हि' इत्यत्र-

**उतश्च प्रत्ययादसंयोगपूर्वात् ६।४।१०६**

**असंयोगपूर्वात्प्रययोतो हेर्लुक् । शृणु-शृणुतात् । शृणुतम् । शृणुत । गुणावादेशौ । शृणवानि । शृणवाव । शृण्वाम । अशृणोत् । अशृणुताम् । अशृण्वन् । अशृणोः । अशृणुतम् । अशृणुत । अशृणवम् । अशृण्व अशृणुव । अशृण्म अशृणुम । शृणुयात् । शृणुयाताम् ।**

(पूर्वं संयोगो नास्ति यस्य प्रत्ययस्य, तस्य प्रत्ययस्य उकारात् परस्य हेर्लुग् भवति ।)

इति सूत्रेण हेर्लुकि 'शृणु' इति रूपं जायते । थसस्तमि, थस्य ते च 'शृणुतम्' 'शृणुत' इति रूपे जायेते । मिपि न्यादेशे 'शृणु नि' इति जाते उत्तमपुरुषस्य आडागमे गुणेऽवादेशे च 'शृणवानि' इति रूपं सम्पद्यते चेद् वसि मसि च पूर्ववदेव आडागमे गुणेऽवादेशे ततः सकारस्य लोपे च 'शृणवाव''शृणवाम' इति रूपे निष्पद्येते ।

लङि अडागमे तिपि श्नुप्रत्यये 'शृ'आदेशे च 'अशृनु ति' इति जाते अङ्गत्वे उकारस्य गुणे नकारस्य णत्वे इकारस्य लोपे च 'अशृणोत्' इति रूपं सिध्यति । तसि तामादेशे ङित्त्वे गुणनिषेधे च 'अशृणुताम्' इति रूपं भवति । झौ अन्तादेशे यणि इकारलोपे नकारतकारयोः संयोगत्वेन संयोगान्तस्य तकारस्य लोपे 'अशृण्वन्' इति रूपं जायते । सिपि थसि थे च पूर्ववद् रूपाणि भवन्ति । मिपि 'अशृणु मि' इत्यत्र अमादेशे गुणेऽवादेशे च 'अशृणवम्' इति रूपं जायते । वसि मसि च विकल्पेन उकारस्य लोपे 'अशृण्व' 'अशृण्म' इति रूपे भवतः, तदभावे ङित्त्वेन गुणनिषेधे 'अशृणुव' 'अशृणुम' इति रूपे जायेते ।

विधिलिङि तिपि श्नुप्रत्यये 'शृ'आदेशे च 'शृनु ति' इति जाते यासुडागमे ङित्त्वाद् गुणनिषेधे 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे नकारस्य णत्वे इकारस्य लोपे च 'शृणुयात्' इति रूपं जायते । तसि तामादेशे 'शृणुयाताम्' इति रूपं जायते । झौ झेर्जुसि 'शृणुया उस्' इति जाते-

**उस्यपदान्तात् ६।१।६९।**

**अपदान्तादवर्णादुसि पररूपमेकादेशः स्यात् । शृणुयुः । शृणुयाः । शुणुयातम् । शृणुयात । शृणुयाम् । शृणुयाव । शृणुयाम । श्रूयात् । अश्रौषीत् । अश्रोष्यत् ।**

(अपदान्ताद् अवर्णाद् उसि परे पूर्वपरयोः स्थाने पररूपमेकादेशो भवति ।)

इति सूत्रेण पररूपे पदत्वे रुत्वे विसर्गे च 'शृणुयुः' इति रूपं सिध्यति । विधिलिङः अन्यानि रूपाणि एवमेव सिध्यन्ति ।

आशीर्लिङि, लुङि, लृङि च क्षिधातोरिव रूपाणि भवन्ति ।

**गम्लृ गतौ ।**

गत्यर्थकस्य 'गम्लृ'शब्दस्य धातुत्वे तत लृकारस्यानुबन्धलोपे 'गम्' इत्यतो लटि तिपि शपि 'गम् अ ति' इति जाते-

**इषुगमियमां छः ७।३।७७।**

**शिति । गच्छति । जगाम ।**

(इष्धातोः, गम्धातोः, यम्धातोश्च अन्तिमवर्णस्य स्थाने 'छ'आदेशो भवति ।)

इति सूत्रेण मकारस्य स्थाने 'छ'आदेशे पररूपे च 'गछति' इति जाते 'छे च' इत्यनेन तुगागमे तकारस्य श्चुत्वे च 'गच्छति' इति रूपं जायते ।

लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे चुत्वे 'जगम् अ' इत्यत्र उपधावृद्धौ च 'जगाम' इति रूपं जायते । तसि 'जगम् अतुस्' इत्यत्र अकारस्य उपधात्वे ततः-

**गमहनजनखनघसां लोपः क्ङित्यनङि ६।४।९८।**

**एषामुपधाया लोपः स्यादजादौ क्ङिति, न त्वङि । जग्मतुः । जग्मुः । जगमिथ । जगन्थ । जग्मथुः । जग्म । जगाम-जगम । जग्मिव । जग्मिम । गन्ता ।**

(अजादौ किति ङिति च प्रत्यये परे गम्, हन्, जन्, खन्, घस् एषां धातूनाम् उपधाया लोपो भवति, अङि परे तु न भवति ।)

इति सूत्रेण उपधाया अकारस्य लोपे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'जग्मतुः' इति रूपं जायते । एवं झौ 'जग्मुः' इति रूपं सिध्यति । सिपि थलि अनुदात्तत्वाद् भारद्वाजस्य मते इडागमे 'जगमिथ', तदभावे अनुस्वारपसवर्णाभ्यां 'जगन्थ' इति रूपद्वयं जायते । थसि थे च अतुसि इव रूपे भवतः । मिपि णलि विकल्पेन णित्त्वाद् 'जगाम/जगम' इति रूपे जायेते । क्रादिनियमेन वसि मसि च इडागमे कित्त्वाद् उपधालोपे च 'जग्मिव' 'जग्मिम' इति रूपे भवतः ।

लुटि तिपि तासिप्रत्यये प्राप्तस्य इडागमस्य अनुदात्तत्वेन निषेधे अनुस्वारे परसवर्णे च डादेशादिना 'गन्ता' इति रूपं सिध्यति । लृटि तिपि स्यप्रत्यये आर्धधातुकत्वे प्राप्तस्य इडागमस्य अनुदात्तत्वाद् निषेधे प्राप्ते-

**गमेरिट् परस्मैपदेषु ७।२।५८।**

**गमेः परस्य सादेरार्द्धधातुकस्येट् परस्मैपदेषु । गमिष्यिति । गच्छतु । अगच्छत् । गच्छेत् । गम्यात् ।**

(परस्मैपदे परे 'गम्'धातोः परस्य सकारादेः आर्धधातुकस्य इडागमो भवति ।)

इति सूत्रेण इडागमे वर्णसम्मेलने सकारस्य षत्वे च 'गमिष्यति' इति रूपं जायते । लोटि लङि विधिलिङि च शबादिना पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि 'गद्'धातोरिव रूपाणि भवन्ति । लुङि तिपि च्लौ प्राप्तं सिचं प्रबाध्य-

**पुषादिद्युताद्यॢदितः परस्मैपदेषु ३।१।५५।**

**श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ्, परस्मैपदेषु । अगमत् । अगमिष्यत् ।**

(दिवादिगणपठितेभ्यः पुषादिभ्यो धातुभ्यः, द्युतादिभ्यो धातुभ्यः, लृकारस्य इत्संज्ञा भवति येषां धातूनां तेभ्यो धातुभ्यश्च परस्य च्लेः स्थाने 'अङ्'आदेशो भवति परस्मैपदे परे ।)

इति सूत्रेण च्लेः स्थाने 'अङ्'आदेशेऽनुबन्धलोपे वर्णसम्मेलने च 'अगमत्' इति रूपं जायते । लृङि तिपि स्यस्य इडागमे पूर्ववद् 'अगमिष्यत्' इति रूपं जायते ।

त्यज हानौ । त्यजति । तत्याज । तत्यजिथ-तत्यक्थ । त्यक्ता । अत्याक्षीत् । अत्याक्ताम् । अत्यक्ष्यत् । हान्यर्थे वर्तमानस्य 'त्यज'शब्दस्य धातुत्वे लटि तिपि शपि च 'त्यजति' इति रूपं जायते । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे उपधावृद्धौ च 'तत्याज' इति रूपं जायते । सिपि थलि भारद्वाजस्य

मते इडागमे 'तत्यजिथ' इति, इडागमाभावे च जकारस्य कुत्वे चर्त्वे च 'तत्यक्थ' इति रूपद्वयं जायते । अन्यत्र तु पूर्ववद् रूपाणि भवन्ति । लुटि तिपि तासिप्रत्यये अनुदात्तत्वेन इडागमाभावे जकारस्य कुत्वे चर्त्वे च 'त्यक्ता' इति रूपं जायते । लृटि तिपि स्यप्रत्यये इडागमाभावे च 'त्यज् स्य ति' इति जाते जकारस्य कुत्वे चर्त्वे च 'त्यक् स्य ति' इति जाते सकारस्य षत्वे कषसंयोगेन क्षादेशे च 'त्यक्ष्यति' इति रूपं जायते । लोटि, लङि, विधिलिङि च शबादिना पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि 'गद्'धातोरिव रूपाणि जायन्ते । लुङि अडागमे तिपि च्लौ सिचि इडागमनिषेधे च 'अ त्यज् स् ति' इति जाते हलन्तलक्षणवृद्धौ जकारस्य कुत्वे चर्त्वे च 'अ त्याक् स् ति' इति जाते सकारस्य षत्वे कषसंयोगेन क्षादेशे च 'अ त्याक्ष् ति' इति जाते इकारस्य लोपे अपृक्तत्वे ईडागमे वर्णसम्मेलने च 'अत्याक्षीत्' इति रूपं जायते । तसि 'अ त्याक् स् ताम्' इत्यत्र 'झलो झलि' इति सूत्रेण सकारस्य लोपे वर्णसम्मेलने च 'अत्याक्ताम्' इति रूपं जायते । एवम् अन्यत्रापि रूपाणि भवन्ति । लृङि अडागमे तिपि स्यप्रत्यये इडागमनिषेधे जकारस्य कुत्वे चर्त्वे सकारस्य षत्वे कषसंयोगेन क्षादेशे इकारस्य लोपे च 'अत्यक्ष्यत्' इति रूपं जायते ।

**रक्ष पालने ।**

पालनेऽर्थे वर्तमानस्य रक्षशब्दस्य धातुत्वे अकारस्यानुबन्धलोपे लटि तिपि शपि 'रक्षति' इति रूपं सिध्यति । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे वर्णसम्मेलने 'ररक्ष' इति रूपं सम्पद्यते । लुटि तिपि तासिप्रत्यये इडागमे डादेशादिना च रक्षिता इति रूपं निष्पद्यते । लृटि तिपि स्यप्रत्यये इडागमे षत्वे च 'रक्षिष्यति' इति रूपं जायते । लोटि लङि विधिलिङि च शबादिना पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि यासुडागमेन पूर्ववद् 'रक्ष्यात्' इति रूपं सिध्यति । लुङि अडागमे तिपि च्लौ सिचि इडागमे इकारस्य लोपे अपृक्तत्वे ईडागमे सकारस्य लोपे सवर्णदीर्घे च 'अरक्षीत्' इति रूपं निष्पद्यते । लृटि तु पूर्ववद् 'अरक्षिष्यत्' इति रूपं भवति ।

**जि जये ।**

जयार्थकस्य जिशब्दस्य धातुत्वे लटि तिपि शपि गुणेऽयादेशे 'जयति' इति रूपं सिध्यति । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे 'जि जि अ' इति जाते-

**सन्लिटोर्जेः ७।३।५७।**

**सन्लिण्निमित्तादभ्यासात्परस्य जेः कुत्वम् । जिगाय । जिग्यतुः । जिगयिथ-जिगेथ ।**

(सनि लिटि च धातोर्द्वित्वं भवति, द्वित्वविधानानन्तरं पूर्वस्य अभ्याससंज्ञा भवति । एवं सनि लिटि च द्वित्वविधानेन जाताद् अभ्यासात् परस्य जिधातोर्जकारस्य कुत्वेन गकारादेशो भवति ।)

इति सूत्रेण अभ्यासात् परस्य जिधातोर्जकारस्य कुत्वेन गकारे 'जिगि अ' इति जाते धातोः अङ्गत्वे 'अचो

ञ्णिति' इति इकारस्य वृद्धौ आयादेशे च 'जिगाय' इति रूपं जायते । तसि 'जिगि अतुस्' इत्यत्र प्राप्तम् इयङादेशं प्रबाध्य 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणि वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'जिग्यतुः' इति रूपं जायते । एवं झौ 'जिग्युः' इति रूपं भवति । सिपि थलि भारद्वाजस्य मते इडागमे 'जिगयिथ' इति रूपं भवति, इडागमाभावे तु 'जिगेथ' इति रूपं भवति । थसि थे च तसि इव 'जिग्यथुः' 'जिग्य' इति रूपे भवतः । मिपि णलि णलो विकल्पेन णित्त्वाद् 'जिगाय/जिगय' इति रूपद्वयं सिध्यति । वसि मसि च इयङादेशं प्रबाध्य पूर्ववद् यणि 'जिग्यिव' 'जिग्यिम' इति रूपे जायेते ।

लुटि, लृटि, लोटि, लङि, विधिलिङि, आशीर्लिङि, लुङि, लृङि च सर्वाणि रूपाणि क्षिधातोरिव भवन्ति ।

**जीव प्राणधारणे ।**

प्राणधारणार्थे वर्तमानस्य 'जीव'शब्दस्य धातुत्वेन लटि तिपि शपि 'जीवति' इति रूपं भवति । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे ह्रस्वे वर्णसम्मेलने च 'जिजीव' इति रूपं जायते । लुटि, लृटि, लोटि, लङि, विधिलिङि, आशीर्लिङि, लुङि, लृङि च सर्वाणि रूपाणि 'रक्ष्'धातोरिव भवन्ति ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) गुणोऽर्तिसंयोगाद्योः

(ख) रिङ् शयग्लिङ्क्षु

(ग) ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन

(घ) शल इगुपधादनिटः क्सः

(ङ) हुश्नुवोः सार्वधातुके

(च) लोपश्चास्यान्यतरस्यां म्वोः

(छ) गमहनजनखनघसां लोपः क्ङित्यनङि

(ज) पुषादिद्युताद्य्लृदितः परस्मैपदेषु

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) सृधातोः कोऽर्थः ?

(ख) लिटि परे कीदृशस्याङ्गस्य गुणो भवति ?

(ग) केषु परेषु ऋकारस्य रिङादेशो भवति ?

(घ) 'स्त्रियात्' इत्यत्र किमर्थमिकारस्य दीर्घो न ?

(ङ) 'दृशिर्' इत्यत्र केन इर इत्संज्ञा ?

(च) कीदृशेभ्यो धातुभ्यो गुणात् पूर्वविप्रतिषेधेन कित्त्वं भवति ?

(छ) किद्भिन्ने झलादौ प्रत्यये परे कयोः 'अम्'आगमो भवति ?

(ज) सकारे परे षकारस्य ढकारस्य च स्थाने क आदेशो भवति ?

(झ) 'दृशिर्'धातोः कोऽर्थः ?

(ञ) अङि परे कयोर्गुणो भवति ?

(ट) 'न दृशः' इत्यनेन कस्य निषेधो भवति ?

(ठ) 'पिच्च ङिन्न, ङिच्च पिन्न' इत्यस्याशयं स्फुटीकुरुत ।

(ड) अजादौ सार्वधातुके परे केषामङ्गस्य उवर्णस्य स्थाने यणादेशो भवति ?

(ढ) शिति कस्य छादेशः ?

(ण) अङ्भिन्ने अजादौ किति ङिति च प्रत्यये परे केषां धातूनामुपधाया लोपो भवति ?

(त) गम्धातोर्विहितस्य च्लेः स्थाने क आदेशो भवति ?

**३. सोदाहरणं सूत्राणामर्थं लिखत**

(क) ऋतश्च संयोगादेर्गुणः

(ख) रिङ् शयग्लिङ्क्षु

(ग) विभाषा सृजिदृशोः

(घ) इरितो वा

(ङ) न दृशः

(च) सार्वधातुकमपित्

(छ) उतश्च प्रत्ययादसंयोगपूर्वात्

(ज) गमेरिट् परस्मैपदेषु

(झ) सन्लिटोर्जेः

**४. अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत**

(क) स्मृधातोर्लिटि (ख) सृधातोराशीर्लिङि (ग) दृश्तोर्लङि (घ) श्रुधातोर्लोटि

(ङ) गम्धातोर्लुङि (च) त्यज्धातोर्लुटि (छ) रक्षधातोर्विधिलिङि (ज) जिधातोर्लिटि

(झ) जीव्धातोर्लृङि

**८. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) सस्मार (ख) स्मरिष्यति (ग) स्मर्यात् (घ) स्रियात्

(ङ) पश्यन्ति (च) ददृशतुः (छ) ददर्शिथ/दद्रष्ठ (ज) द्रक्ष्यति

(झ) अदर्शत्/अद्राक्षीत् (ञ) शृणोति (ट) शृणुतः

(ठ) शृण्वन्ति (ड) शृण्वः/शृणुवः (ढ) शृणु/शृणुतात् (ण) शृणुयुः

(त) गच्छति (थ) जग्मतुः (द) जगमिथ/जगन्थ (ध) गमिष्यति

(न) अगमत् (प) जिगाय (फ) जिग्यतुः (ब) अत्यक्ष्यत्

**९. अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दशत**

(क) स्मर्यासम् (ख) असार्षीः (ग) द्रष्टा (घ) अशृणुत (ङ) अगमाव

(च) तत्यक्थ (छ) रक्षेतम् (ज) जेष्यामः (झ) अजीविष्यम्

**१०. सिद्धपदानि दर्शयत**

(क) स्मृ + लुट् (तस्) (ख) सृ + लोट् (सिप्) (ग) दृश् + विधिलिङ् (झि)

(घ) श्रु + लृट् (तिप्) (ङ) गम् + लङ् (वस्) (च) त्यज् + आशीर्लिङ् (मिप्)

(छ) रक्ष् + लुङ् (थस्) (ज) जि + लिट् (थ) (झ) जीव् + लट् (मस्)

**११. पदानां वाक्ये प्रयोगं निदर्शयत**

(क) स्मरन्तु (ख) असरः (ग) द्रक्ष्यामि (घ) शृणुयात् (ङ) अगमिष्यन्

(च) त्यजाम (छ) रक्षथः (ज) अजयत झ) जीवन्तु

## अष्टमः पाठः

### आत्मनेपदिनोः एध्-कम्-धात्वोः प्रयोगसिद्धिनिदर्शनम्

सामान्यतया अनुदात्तेतो ङकारेतश्च धातव आत्मनेपदिनो भवन्ति । अर्थवशादुपसर्गयोगाच्च केचिद्धातव आत्मनेपदिनो जायन्ते । कौमेद्या आत्मनेपदप्रक्रियानाम्नि प्रकरणे धातूनामात्मनेपदित्वव्यवस्था वर्तते । आत्मनेपदिभ्यो धातुभ्यो विहितस्य लकारस्य स्थाने आत्मनेपदसंज्ञका एव लादेशा आदिश्यन्ते । आत्मनेपदसंज्ञका लादेशाः-

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | त | आताम् | झ |
| मध्यमपुरुषः | थास् | आथाम् | ध्वम् |
| उत्तमपुरुषः | इट् | वहि | महिङ् |

**एध वृद्धौ ।**

वृद्ध्यर्थे वर्तमानस्य 'एध'शब्दस्य धातुत्वे अनुदात्तस्य अकारस्यानुबन्धलोपे च 'एध्' इति जाते लटि अनुदात्तेत्त्वाद् 'अनुदात्तङित आत्मनेपदम्' इति सूत्रनियमेन लः स्थाने आत्मनेपदसंज्ञके प्रथमपुरुषस्यैकवचने 'त'आदेशे 'एध् त' इति जाते सार्वधातुकत्वेन शपि वर्णसम्मेलने 'एधत' यति जाते अन्त्यस्य अकारस्य टिसंज्ञायाम्-

**टित आत्मनेपदानां टेरे ३।४।७९।**

**टितो लस्यात्मनेपदानां टेरेत्वम् । एधते ।**

(टिल्लकारसम्बद्धानाम् आत्मनेपदानां टेः एत्वं भवति ।)

इति टिसंज्ञकस्य अकारस्य एत्वे 'एधते' इति रूपं सिध्यति ।

प्रथमपुरुषस्य द्विवचने आतामि शपि 'एध आताम्' इति जाते अपित्त्वाद् 'आताम्' इत्यस्य ङित्त्वे-

**आतो ङितः ७।२।८१।**

**अतः परस्य ङितामात इय् स्यात् । एधेते । एधन्ते ।**

(अकारात् परस्य ङित्प्रत्ययसम्बद्धस्य आकारस्य स्थाने 'इय्'आदेशो भवति ।)

इति सूत्रेण आकारस्य स्थाने 'इय्'आदेशे गुणे 'एधेय् ताम्' इति जाते 'लोपो व्योर्वलि' इति यकारस्य लोपे 'आम्' इत्यस्य टिसंज्ञायां टेरेत्वे च 'एधेते' इति रूपं जायते ।

प्रथमपुरुषस्य बहुवचने झे शपि 'एध झ' इत्यत्र झकारस्य अन्तादेशे पररूपे च 'एधन्त' इत्यत्र अन्त्यस्य अकारस्य टिसंज्ञायां टेरेत्वे च 'एधन्ते' इति रूपं सिध्यति ।

मध्यमपुरुषस्यैकवचने थासि शपि 'एधथास्' इत्यत्र-

**थासः से ३।४।८०।**

**टितो लस्य थासः से स्यात् । एधसे । एधेथे । एधध्वे । एधे । एधावहे । एधामहे ।**

(टिल्लकारसम्बद्धस्य 'थास्' इत्यस्य स्थाने 'से'आदेशो भवति ।)

इति सूत्रेण थासः स्थाने 'से'आदेशे 'एधसे' इति रूपं जायते ।

मध्यमपुरुषस्य द्विवचने आथामि आतामि इव 'एधेथे' इति रूपं सिध्यति । मध्यमपुरुषस्य बहुवचने ध्वमि शपि 'एधध्वम्' इत्यत्र 'अम्' इत्यस्य टिसंज्ञायां टेरेत्वे च 'एधध्वे' इति रूपं निष्पद्यते ।

उत्तमपुरुषस्यैकचने इटि शपि 'एध इ' इत्यत्र इकारस्य टिसंज्ञायां टेरेत्वे च 'एध ए' इति जाते अतो गुणे पररूपे 'एधे' इति रूपं जायते । उत्तमपुरुषस्य द्विवचने वहौ शपि 'एध वहि' इति जाते 'अतो दीर्घो यञि' इति अकारस्य दीर्घे इकारस्य टिसंज्ञायां टेरेत्वे च 'एधावहे' इति रूपं जायते । बहुवचने महिङि च एवमेव 'एधामहे' इति रूपं भवति ।

लिटि 'एध् ल्' इति जाते-

**इजादेश्च गुरुमतोऽनृच्छः ३।१।३६।**

**इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्तत आम् लिटि ।**

(इजादिधातुः गुरुवर्णेन युक्तोऽपि वर्तते चेत् लिटि परे तादृशाद् धातोः 'आम्'प्रत्ययो भवति, 'ऋच्छ्'धातोस्तु न भवति ।)

इति सूत्रेण इजादित्वाद् गुरुमत्त्वाच्च 'एध्'धातोः लिटि परे 'आम्'प्रत्यये वर्णसम्मेलने 'एधाम् ल्' इति जाते 'आमः' इति सूत्रेण लस्य लुकि 'एधाम्' इति जाते मान्तत्वाद् अव्ययत्वेन समुदायाद् विहितस्य सुपो लुकि 'एधाम्' इति जाते सुबन्तत्वेन पदत्वे 'कृञ्चानुप्रयुज्यते लिटि' इति सूत्रेण सलिट्कस्य कृधातोः अनुप्रयोगे 'एधाम् कृ ल्' इति जाते-

**आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य १।३।६३।**

**आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यात् ।**

(आमः प्रकृतिभूतस्य धातोरनुसारेण अनुप्रयुज्यमानात् कृधातोः परस्य लकारस्य स्थाने आत्मनेपदं परस्मैपदं वा भवति । आमः प्रकृतिभूतो धातुः परस्मैपदी वर्तते चेद् अनुप्रयुज्यमानात् कृधातोरपि परस्मैपदं भवति, आमः प्रकृतिभूतो धातुः आत्मनेपदी वर्तते चेद् अनुप्रयुज्यमानात् कृधातोरपि आत्मनेपदं भवति । अत आत्मनेपदिन एध्धातोः अनुप्रयुज्यमानात् कृधातोः परस्य लकारस्य स्थाने आत्मनेपदादेश एव भवति ।)

इति सूत्रनियमेन लः स्थाने आत्मनेपदसंज्ञके प्रथमपुरुषस्यैकवचने 'त'आदेशे 'एधाम् कृ त' इति जाते-

**लिटस्तझयोरेशिरेच् ३।४।८१।**

**लिडादेशयोस्तझयोरेश् इरेच् एतौ स्तः । एकारोच्चारणं ज्ञापकं, 'तङादेशानां टेरेत्वं ने'ति । तेन डारौरसां न । एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे । एधाञ्चकृषे । एधाञ्चक्राथे ।**

(लिट्लकारस्य स्थाने विहितयोः 'त''झ' एतयोः स्थाने क्रमेण 'एश्''इरेच्' आदेशौ भवतः । अत्र शकारचकारयोः इत्त्वात् 'ए' 'इरे' एतौ अवशिष्येते । अत्र एकारोच्चारणेन तङादेशानां टेरेत्वं न भवतीति ज्ञापितमस्ति । तेन 'डा, रौ, रस्' एतेषु टेरेत्वं न भवति ।)

इति सूत्रेण 'त' इत्यस्य स्थाने 'एश्' आदेशेऽनुबन्धलोपे 'एधाम् कृ ए' इति जाते प्राप्तस्य यणो 'द्विर्वचनेऽचि' इति निषेधे ततो द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे च 'एधाम् चकृ ए' इत्यत्र अपित्त्वात् कित्त्वेन गुणनिषेधे यणि 'एधाम् चक्रे' इति जाते अनुस्वारे विकल्पेन परसवर्णे च 'एधाञ्चक्रे' इति रूपं सिध्यति, परसवर्णाभावे 'एधां चक्रे' इति रूपं भवति ।

प्रथमपुरुषस्य द्विवचने आतामि पूर्ववद् गुणनिषेधं यावद् विहिते 'एधाम् चकृ आताम्' इत्यत्र यणि 'आम्' इत्यस्य टिसंज्ञायां टेरेत्वे च 'एधाम् चक्राते' इति जाते अनुस्वारे विकल्पेन परसवर्णे च 'एधाञ्चक्राते' इति रूपं जायते, परसवर्णाभावे 'एधां चक्राते' इति रूपं भवति । प्रथमपुरुषस्य बहुवचने झस्य स्थाने 'इरेच्' आदेशे पूर्ववद् 'एधाञ्चक्रिरे/एधां चक्रिरे' इति रूपं जायते । मध्यमपुरुषस्यैकवचने थासि थासः 'से'आदेशे एकाच्त्वाद् इडागमनिषेधे च कृते पूर्ववद् 'एधाञ्चकृषे/एधां चकृषे' इति रूपद्वयं सिध्यति । आथामि आतामि इव रूपद्वयं जायते । ध्वमि 'एधाम् चकृ ध्वम्' इति जाते-

**इणः षीध्वं लुङ्लिटां धोऽङ्गात् ८।३।७८।**

**इणन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य ढः । एधाञ्चकृढ्वे । एधाञ्चक्रे । एधाञ्चकृवहे । एधाञ्चकृमहे । एधाम्बभूव । एधामास । अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न, अन्यथा हि 'कृञ्चानुप्रयुज्यते' इति, 'कृभ्विति' वा ब्रूयात् । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे ।**

(इण् अस्ति अन्ते यस्य अङ्गस्य तस्मात् परस्थानां आशीर्लिङ्-लुङ्-लिट्लकाराणां धकारस्य स्थाने ढकारादेशो भवति ।)

इति सूत्रेण धकारस्य स्थाने ढकारादेशे 'एधाम् चकृ ढ्वम्' इति जाते 'अम्' इत्यस्य टिसंज्ञायां टेरेत्वे च 'एधाम् चकृढ्वे' इति जाते अनुस्वारे विकल्पेन परसवर्णे च 'एधाञ्चकृढ्वे/एधां चकृढ्वे' इति रूपद्वयं सिध्यति । इटि अपित्त्वात् कित्त्वेन गुणनिषेधे 'एधाम् चकृ इ' इत्यत्र टिसंज्ञायां टेरेत्वे च 'एधाम् चकृ ए' इति जाते यणि अनुस्वारे विकल्पेन परसवर्णे च 'एधाञ्चक्रे/एधां चक्रे' इति रूपद्वयं जायते । वसि मसि च क्रादित्वाद् इडागमाभावे पूर्ववद् 'एधाञ्चकृवहे/एधां चकृवहे' 'एधाञ्चकृमहे/एधां चकृमहे' इति प्रत्येकं रूपद्वयं सिध्यति । भूधातोरनुप्रयोगे 'एधाम्बभूव' इत्यादीनि, अस्धातोरनुप्रयोगे 'एधामास' इत्यादीनि च रूपाणि भवन्ति ।

लुटि प्रथमपुरुषस्यैकवचने तादेशे शपं प्रबाध्य तासिप्रत्यये आर्धधातुकत्वेन इडागमे 'एधितास् त' इति जाते 'त' इत्यस्य स्थाने 'डा'आदेशेऽनुबन्धलोपे 'आस्' इत्यस्य टिसंज्ञायां डित्त्वसामर्थ्याद् अभस्यापि टेर्लोपे वर्णसम्मेलने 'एधिता' इति रूपं सिध्यति । द्विवचने आतामि 'रौ' आदेशे 'रि च' इति सकारस्य लोपे 'एधितारौ' इति रूपं जायते । एवं बहुवचने 'एधितारः' इति रूपं भवति । मध्यमैकवचने थासि 'से' आदेशे 'तासस्त्योर्लोपः' इति सूत्रेण सकारस्य लोपे 'एधितासे' इति रूपं निष्पद्यते । मध्यमद्विवचने आथामि 'एधितास् आथाम्' इत्यत्र वर्णसम्मेलने 'आम्' इत्यस्य टिसंज्ञायां टेरेत्वे च 'एधितासाथे' इति रूपं सम्पद्यते । मध्यमबहुवचने ध्वमि 'एधितास् ध्वम्' इत्यत्र-

**धि च ८।२।२५।**

**धादौ प्रत्यये सलोपः स्यात् । एधिताध्वे ।**

(धकारादौ प्रत्यये परे सकारस्य लोपो भवति ।)

इति सकारस्य लोपे 'अम्' इत्यस्य टिसंज्ञायां टेरेत्वे च 'एधिताध्वे' इति रूपं जायते । उत्तमैकवचने इटि 'एधितास् इ' इत्यत्र इकारस्य टिसंज्ञायां टेरेत्वे च 'एधितास् ए' इति जाते-

**ह एति ७।४।५२।**

**तासस्त्योः सस्य हः स्यादेति परे । एधिताहे । एधितास्वहे । एधितास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधिष्यसे । एधिष्येथे । एधिष्यध्वे । एधिष्ये । एधिष्यावहे । एधिष्यामहे ।**

(एकारे परे 'तास्' इत्यस्य 'अस्'धातोश्च सकारस्य स्थाने हकारादेशो भवति ।)

इति सूत्रेण सकारस्य स्थाने हकारादेशे 'एधिताहे' इति रूपं जायते । उत्तमद्विवचने वहौ 'एधितास् वहि' इति जाते इकारस्य टिसंज्ञायां टेरेत्वे च 'एधितास्महे' इति रूपं सिध्यति । एवमेव उत्तमबहुवचने महिङि 'एधितास्महे' इति रूपं जायते ।

लृटि प्रथमपुरुषैकवचने तादेशे स्यप्रत्यये आर्धधातुकत्वे इडागमे षत्वे च 'एधिष्यत' इति जाते अकारस्य टिसंज्ञायां टेरेत्वे च 'एधिष्यते' इति रूपं जायते । प्रथमद्विवचनादिषु एवमेव स्यप्रत्यये इडागमे ततो लटि इव कार्येषु सर्वाणि रूपाणि जायन्ते ।

लोटि प्रथमपुरुषैकवचने तादेशे शपि 'एधत' इति जाते अकारस्य टिसंज्ञायां टेरेत्वे च 'एधते' इति जाते-

**आमेतः ३।४।९०।**

**लोट एत आम् । एधताम् । एधेताम् । एधन्ताम् ।**

(लोट्लकारसम्बन्धिन एकारस्य स्थाने 'आम्' आदेशो भवति ।)

इति सूत्रेण एकारस्य स्थाने आमादेशे 'एधताम्' इति रूपं सिध्यति । प्रथमद्विवचने आतामि लटि इव

शबादिकार्ये विहिते 'एधेते' इति जाते 'आमेतः' इति सूत्रेण एकारस्य स्थाने आमादेशे 'एधेताम्' इति रूपं जायते । प्रथमबहुवचने झेऽपि लटि इव शबादिकार्ये विहिते 'एधन्ते' इति जाते 'आमेतः' इति सूत्रेण एकारस्य स्थाने आमादेशे 'एधन्ताम्' इति रूपं भवति । मध्यमैकवचने थासि अपि लटि इव शबादिकार्ये विहिते 'एधसे' इति जाते-

**सवाभ्यां वामौ ३।४।९१।**

**सवाभ्यां परस्य लोडेतः क्रमाद्वाऽमौ स्तः । एधस्व । एधेथाम् । एधध्वम् ।**

(सकारात् परस्य लोट्लकारसम्बन्धिनः एकारस्य स्थाने 'व'आदेशो भवति चेद् वकारात् परस्य लोट्लकारसम्बन्धिनः एकारस्य स्थाने 'अम्' आदेशो भवति ।)

इति सूत्रेण सकारात् परस्य एकारस्य स्थाने 'व'आदेशे 'एधस्व' इति रूपं जायते । आथामि तु आतामि इव 'एधेथाम्' इति रूपं भवति । ध्वमि पूर्ववद् लटि इव शबादिकार्ये विहिते 'एधध्वे' इति जाते अनेनैव सूत्रेण वकारात् परस्य एकारस्य स्थाने अमादेशे 'एधध्वम्' इति रूपं जायते । उत्तमैकवचने इटि लटि इव शबादिकार्ये विहिते 'एध ए' इति जाते-

**एत ऐ ३।४।९३।**

**लोडुत्तमस्य एत ऐ स्यात् । आमोऽपवादः । एधै । एधावहै । एधामहै । आटश्च । ऐधत । ऐधेताम् । ऐधन्त । ऐधथाः । ऐधेथाम् । ऐधध्वम् । ऐधे । ऐधावहि । ऐधामहि ।**

(लोट्लकारसम्बन्धिन उत्तमपुरुषस्य एकारस्य स्थाने ऐकारादेशो भवति ।)

इति सूत्रेण एकारस्य स्थाने ऐकारादेशे 'एध ऐ' इति जाते लोडुत्तमत्वाद् आडागमे 'आटश्च' इति वृद्धौ 'एध ऐ' इति जाते पूर्वपरयोर्वृद्धौ 'एधै' इति रूपं निष्पद्यते । उत्तमद्विवचने वहौ पूर्ववद् लटि इव शबादिकार्ये विहिते 'एध वहे' इति जाते एकारस्य स्थाने ऐकारादेशे 'एध वहै' इति जाते आडागमे सवर्णदीर्घे 'एधावहै' इति रूपं जायते । एवं महिङि 'एधामहै' इति रूपं भवति ।

लङि अजादित्वाद् आडागमे 'आटश्च' इति वृद्धौ 'ऐध् ल्' इति जाते तादेशे शपि वर्णसम्मेलने च 'ऐधत' इति रूपं जायते । आतामि पूर्ववद् 'ऐध आताम्' इति जाते आतामो ङित्त्वेन आकारस्य स्थाने 'इय्'आदेशे गुणे यकारस्य लोपे च 'ऐधेताम्' इति रूपं निष्पद्यते । झे पूर्ववद् 'ऐध झ' इति जाते अन्तादेशे पररूपे च 'ऐधन्त' इति रूपं सम्पद्यते । थासि पूर्ववत् 'ऐधथाः' इति रूपं सिध्यति । आथामि तु आतामि इव 'ऐधेथाम्' इव रूपं भवति । ध्वमि अपि पूर्ववद् 'ऐधध्वम्' इति रूपं सिध्यति । इटि पूर्ववद् 'ऐध इ' इति जाते अकार-इकारयोर्गुणे 'ऐधे' इति रूपं जायते । वहौ पूर्ववद् 'ऐध वहि' इति जाते 'अतो दीर्घो यञि' इति अकारस्य दीर्घे 'ऐधावहि' इति रूपं भवति । महिङि च एवमेव 'ऐधामहि' इति रूपं जायते ।

विधिलिङि तादेशे शपि 'रध त' इति जाते-

**लिङः सीयुट् ३।४।१०२।**

**'लिङः सलोपोऽनन्त्यस्ये'ति सलोपः ।**

(आत्मनेपदस्य लिङादेशस्य 'सीयुट्' आगमो भवति ।)

इति सूत्रेण 'त' इत्यस्य सीयुडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे 'रध सीय् त' इति जाते 'लिङः सलोपोऽनन्त्यस्य' इति सूत्रेण सकारस्य लोपे 'रध ईय् त' इति जाते अकार-ईकारयोर्गुणे 'रधेय् त' इति जाते-

**लोपो व्योर्वलि ६।१।६६।**

**रधेत । रधेयाताम् ।**

(वलि परे वकारयकारयोर्लोपो भवति ।)

इति यकारस्य लोपे च 'रधेत' इति रूपं जायते । आतामि एवमेव 'रधेय् आताम्' इत्यत्र वर्णसम्मेलने 'रधेयाताम्' इति रूपं जायते । झे 'रधेय् झ' इति जाते-

**झस्य रन् ३।४।१०५।**

**लिङो झस्य रन् । रधेरन् । रधेथाः । रधेयाथाम् । रधेध्वम् ।**

(लिङ्लकारसम्बन्धिनो 'झ' इत्यस्य स्थाने 'रन्'आदेशो भवति ।)

इति सूत्रेण झस्य स्थाने 'रन्'आदेशे यकारस्य लोपे च 'रधेरन्' इति रूपं भवति । थासि ते इव 'रधेथाः' इति रूपं सम्पद्यते । आथामि आतामि इव 'रधेयाथाम्' इति रूपं जायते । ध्वमि अपि ते इव 'रधेध्वम्' इति रूपं जायते । इटि पूर्ववद् 'रधेय् इ' इति जाते-

**इटोऽत् ३।४।१०६।**

**लिङादेशस्य इटोऽत्स्यात् । रधेय । रधेवहि । रधेमहि ।**

(लिङः स्थाने आदिष्टस्य इट इकारस्य स्थाने अकारादेशो भवति ।)

इति सूत्रेण इकारस्य स्थाने अकारादेशे वर्णसम्मेलने 'रधेय' इति रूपं जायते । वहौ महिङि च ते इव 'रधेवहि' 'रधेमहि' इति रूपे भवतः ।

आशीर्लिङि लः स्थाने तादेशे आर्धधातुकत्वे सीयुडागमे 'रध् सीय् त' इति जाते यदागमपरिभाषया आर्धधातुकत्वाद् इडागमे 'रधिसीय् त' इति जाते-

**सुट् तिथोः ३।४।१०७।**

**लिङस्तथोः सुट् स्यात् । यलोपः । रधिषीष्ट । रधिषीयास्ताम् । रधिषीरन् । रधिषीष्ठाः । रधिषीयास्थाम् ।**

**एधिषीध्वम् । एधिषीय । एधिषीवहि । एधिषीमहि । ऐधिष्ट । ऐधिषाताम् ।**

(लिङ्लकारसम्बद्धयोः तकारथकारयोः 'सुट्' आगमो भवति ।)

इति तकारस्य सुडागमेऽनुबन्धलोपे टित्त्वादाद्यवयवे 'एधिसीय् स् त' इति जाते 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपे उभयत्र षत्वे उत्तरत्र ष्टुत्वे 'एधिषीष्ट' इति रूपं सिध्यति । आतामि 'एधिसीय् आताम्' इत्यत्र तकारस्य सुडागमे इकारात् परस्य सकारस्य षत्वे वर्णसम्मेने 'एधिषीयास्ताम्' इति रूपं जायते । झे 'एधिसीय् झ' इति इत्यत्र झस्य स्थाने 'रन्'आदेशे यलोपे सकारस्य षत्वे च 'एधिषीरन्' इति रूपं सिध्यति । थासि, आथामि, च पूर्ववद् 'एधिषीष्ठाः' 'एधिषीयास्थाम्' इति रूपे भवतः । ध्वमि यकारस्य लोपे 'एधिषीध्वम्' इति रूपं जायते । इटि 'इटोऽत्' इति इकारस्य स्थाने अकारादेशे 'एधिषीय' इति रूपं निष्पद्यते । वहौ महिङि च यकारस्य लोपे 'एधिषीवहि' 'एधिषीमहि' इति रूपे जायेते ।

लुङि आडागमे वृद्धौ च 'ऐध् ल्' इति जाते लः स्थाने तादेशे च्लौ सिचि आर्धधातुकत्वे इडागमे 'ऐधिस् त' इति जाते षत्वे ष्टुत्वे च 'ऐधिष्ट' इति रूपं जायते । आतामि 'ऐधिस् आताम्' इति जाते षत्वे वर्णसम्मेलने च 'ऐधिषाताम्' इति रूपं सिध्यति । झे 'ऐधिस् झ' इत्यत्र-

**आत्मनेपदेष्वनतः ७।१।५।**

**अनकारात्परस्याऽऽत्मनेपदेषु झस्य अत् स्यात् । ऐधिषत । ऐधिष्ठाः । ऐधिषाथाम् । ऐधिढ्वम् । ऐधिषि । ऐधिष्वहि । ऐधिष्महि । ऐधिष्यत । ऐधिष्येताम् । ऐधिष्यन्त । ऐधिष्यथाः । ऐधिष्येथाम् । ऐधिष्यध्वम् । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि ।**

(अकारभिन्नाद् वर्णात् परस्य आत्मनेपदसम्बद्धस्य झकारस्य स्थाने 'अत्'आदेशो भवति ।)

इति सूत्रेण सकारात् परस्य झकारस्य स्थाने 'अत्'आदेशे वर्णसम्मेलने षत्वे च 'ऐधिषत' इति रूपं जायते । थासि आथामि च पूर्ववद् 'ऐधिष्ठाः' 'ऐधिषाथाम्' इति रूपे भवतः । ध्वमि 'ऐधिस् ध्वम्' इति जाते 'धि च' इति सकारस्य लोपे 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' इति धकारस्य ढत्वे च 'ऐधिढ्वम्' इति रूपं जायते । इटि वहौ महिङि च वर्णसम्मेलने षत्वे च 'ऐधिषि' 'ऐधिष्वहि' 'ऐधिष्महि' इति रूपाणि जायन्ते ।

लृङि आडागमे वृद्धौ च 'ऐध् ल्' इति जाते लः स्थाने तादेशे स्यप्रत्यये इडागमे सस्य षत्वे च 'ऐधिष्यत' इति रूपं सिध्यति । एवं लृङः सर्वाणि रूपाणि पूर्ववद् जायन्ते ।

**कमु कान्तौ ।**

कान्त्यर्थस्य 'कमु'शब्दस्य धातुत्वे उकारस्यानुबन्धलोपे 'कम्' इति जाते-

**कमेर्णिङ् ३।१।३०।**

**स्वार्थे । कामयते ।**

(स्वार्थे 'कम्'धातोः णिङ् प्रत्ययो भवति ।ङकारणकारयोः अनुबन्धलोपानन्तर णिङः इकार एवावशिष्यते ।) इति सूत्रेण णिङ्प्रत्ययेऽनुबन्धलोपे 'कम् इ' इति जाते अकारस्य उपधात्वे उपधाया अकारस्य वृद्धौ वर्णसम्मेलने 'कामि' इति जाते 'सनाद्यन्ता धातवः' इति 'कामि' इत्यस्य धातुसंज्ञायाम् लटि ङित्त्वाद् आत्मनेपदित्वेन लः स्थाने आत्मनेपदसंज्ञके प्रथमपुरुषस्यैकवचने 'कामि त' इति जाते शपि गुणेऽयादेशे अकारस्य टिसंज्ञायां टेरेत्वे च 'कामयते' इति रूपं सिध्यति । एवं लटि अन्यत्रापि रूपाणि जायन्ते । लिटो विवक्षायां विकल्पेन णिङि पूर्ववत् 'कामि' इति जाते धातुत्वेन लिटि 'कास्यनेकाच आम् वक्तव्यो लिटि' इति 'आम्'प्रत्यये 'कामि आम्' इति जाते-

**अयामन्ताल्वाय्येत्न्विष्णुषु ६।४।५५।**

**एषु णेरय् आदेशः । कामयाञ्चक्रे । 'आयादय' इति वा णिङ् । चकमे । चकमाते । चकमिरे । चकमिषे । चकमाथे । चकमिध्वे । चकमे । चकमिवहे । चकमिमहे । कामयिता । कमिता । कामयिष्यते । कमिष्यते । कामयताम् । अकामयत । कामयेत । कामयिषीष्ट । कमिषीष्ट ।**

(आम्, अन्त, आलु, आय्य, इत्नु, इष्णु एषु प्रत्ययेषु परेषु णेः इकारस्य स्थाने 'अय्'आदेशो भवति ।) इति णेः इकारस्य स्थाने अयादेशे वर्णसम्मेलने 'कामयाम् ल्' इति जाते आमः परस्य लस्य लुकि मान्तत्वेन अव्ययत्वात् समुदायाद् विहितस्य सुपो लुकि 'कामयाम्' इति जाते पदत्वे 'कृञ्चानुप्रयुज्यते लिटि' इति सूत्रेण लिटा सहितस्य कृधातोः अनुप्रयोगे 'कामयाम् कृ ल्' इति जाते लः स्थाने तादेशे तस्य स्थाने एशादेशे च पूर्ववत् 'कामयाम् चक्रे' इति जाते अनुस्वारे विकल्पेन परसवर्णे च 'कामयाञ्चक्रे/कामयां चक्रे' इति रूपद्वयं सिध्यति । एवम् आतामादिष्वपि रूपाणि जायन्ते । भूधातोरनुप्रयोगे 'कामयाम्बभूव' इत्यादीनि, अस्धातोरनुप्रयोगे 'कामयामास' इत्यादीनि च रूपाणि भवन्ति ।

णिङोऽभावे तु 'कम्'धातोर्लिटि 'कम् ल्' इति जाते लः स्थाने तादेशे तस्य स्थाने एशादेशे च 'कम् ए' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे चुत्वे वर्णसम्मेलने च 'चकमे' इति रूपं जायते । आतामादिषु अपि एवमेव रूपाणि जायन्ते । थासि, ध्वमि, वहौ, महिङि च इडागमो भवति ।

लुटो विवक्षायामपि विकल्पेन णिङि 'कामि' इति धातोर्लुटि तासिप्रत्यये इडागमे गुणेऽयादेशे च डादिकार्येण 'कामयिता' इति रूपं जायते । णिङोऽभावे 'कमिता' इति रूपं भवति । एवमेव आतामादिषु पूर्ववद् रूपाणि भवन्ति । एवं लृटि 'कामयिष्यते/कमिष्यते' इत्यादीनि रूपाणि सम्पद्यन्ते । लोटि णिङो नित्यत्वे लटि इव कार्येषु विहितेषु 'कामयते' इति जाते एकारस्य स्थाने आमादेशे च 'कामयताम्'

इति रूपं भवति । आतामादिषु पूर्ववद् रूपाणि जायन्ते । लङि अपि णिङो नित्यत्वे लटि इव कार्येषु विहितेषु 'अकामयत' इति रूपं जायते । आतामादिषु पूर्ववद् रूपाणि भवन्ति । विधिलिङि अपि णिङो नित्यत्वे लटि इव कार्येषु विहितेषु 'कामय त' इति जाते सीयुडागमे सकारस्य लोपे गुणे यकारस्य लोपे च 'कामयेत' इति रूपं सम्पद्यते । आतामादिषु पूर्ववद् रूपाणि निष्पद्यन्ते । आशीर्लिङि विकल्पेन णिङि पूर्ववत् 'कामि ल्' इति जाते लः स्थाने तादेशे आर्धधातुकत्वे सीयुडागमे इडागमे च 'कामि इ सीय् त' इति जाते गुणेऽयादेशे सुडागमे यलोपे षत्वे ष्टुत्वे च 'कामयिषीष्ट' इति रूपं सिध्यति । णिङोऽभावे तु 'कमिषीष्ट' इति रूपं भवति । लुङि विकल्पेन णिङि 'कामि ल्' इति जाते अडागमे तादेशे च्लौ च 'अ कामि च्लि त' इति जाते प्राप्तं सिचं प्रबाध्य-

**णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ३।१।४८।**

**ण्यन्तात्, श्र्यादिभ्यश्च च्लेश्चङ् कर्त्रर्थे लुङि । अ कामि अ त इति स्थिते-**

(कर्त्रर्थके लुङि परे ण्यन्तधातुभ्यः, श्रि-द्रु-स्रुधातुभ्यश्च विहितस्य च्लेः स्थाने 'चङ्' आदेशो भवति । चकारङकारयोः अनुबन्धलोपेन अकार एवावशिष्यते ।)

इति सूत्रेण च्लेः स्थाने 'चङ्' आदेशेऽनुबन्धलोपे 'अकामि अ त' इति जाते-

**णेरनिटि ६।४।५१।**

**अनिडादावार्द्धधातुके परे णेर्लोपः ।**

(यस्य आर्धधातुकस्य आदौ इडागमो न भवति, तस्मिन् आर्धधातुके परे णेः इकारस्य लोपो भवति ।)

इति सूत्रेण णेः इकारस्य लोपे 'अ काम् अ त' इति जाते आकारस्य उपधात्वे-

**णौ चङ्युपधाया ह्रस्वः ७।४।१।**

**चङ्परे णौ यदङ्गं, तस्योपधाया ह्रस्वश्चङि ।**

(चङ्परः अस्ति यस्मात् तादृशे णौ परे अङ्गस्य उपधाया ह्रस्वो भवति चङि परे ।)

प्रत्ययलोपेऽपि प्रत्ययलक्षणात् णिपरत्वेन उपधाया आकारस्य ह्रस्वे 'अ कम् अ त' इति जाते 'चङि' इति सूत्रेण 'कम्' इत्यस्य द्वित्वेऽभ्यासत्वे हलादिशेषे चुत्वे च 'अ चकम् अ त' इति जाते-

**सन्वल्लघुनि चङ्परेऽनग्लोपे ७।४।९३।**

**चङ्परे णौ यदङ्गं, तस्य योऽभ्यासो लघुपरस्तस्य सनीव कार्यं स्याण्णावग्लोपेऽसति ।**

(चङ्परके णौ परे यदङ्गम्, तस्याङ्गस्य लघुपरो योऽभ्यासः, णेर्निमित्तेन अग्लोपो विहितो नास्ति चेत् णौ परे तस्य अभ्यासस्य सनि इव कार्यं भवति ।)

इति सूत्रेण सन्वद्भावे-

**सन्यतः ७।४।७९**

**अभ्यासस्याऽत इत्सनि ।**

(सनि परे अभ्यासस्य अकारस्य स्थाने इकारादेशो भवति ।)

इति सूत्रेण अभ्यासस्य अकारस्य स्थाने इकारादेशे 'अ चिकम् अ त' इति जाते-

**दीर्घो लघोः ७।४।९४।**

**लघोरभ्यासस्य दीर्घः, सन्वद्भावविषये । अचीकमत ।**

(सन्वद्भावो यत्र विहितो भवति, तत्र अभ्यासस्य लघोर्वर्णस्य स्थाने दीर्घादेशो भवति ।)

इति सूत्रेण अभ्यासस्य इकारस्य दीर्घे वर्णसम्मेलने च 'अचीकमत' इति रूपं भवति । आतामादिषु अपि एवमेव चङादिविधानेन रूपाणि जायन्ते ।

णिङभावपक्षे 'कम्'धातोर्लुङि अडागमे लः स्थाने तादेशे च्लौ 'अ कम् च्लि त' इति जाते प्राप्तं सिचं प्रबाध्य-

**वा. कमेश्च्लेश्चङ् वाच्यः**

**णेरभावान्न दीर्घसन्वद्भावौ । अचकमत । अकामयिष्यत । अकमिष्यत ॥**

('कम्'धातोर्विहितस्य च्लेः स्थाने 'चङ्'आदेशो भवति ।)

इति वार्तिकेन च्लेः स्थाने 'चङ्'आदेशेऽनुबन्धलोपे 'अकम् अ त' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे च वर्णसम्मेलने 'अचकमत' इति रूपं सिध्यति । णेः अभावस्य कारणेन सन्वद्भावाभावाद् इत्वदीर्घौ न भवतः । आतामादिषु एवमेव चङादिना पूर्ववद् रूपाणि जायन्ते ।

लृङि विकल्पेन णिङि 'अकामयिष्यत/अकमिष्यत' इत्यादीनि रूपाणि भवन्ति ।

## अभ्यासः

**१. शुद्धमुच्चारणं कुरुत**

(क) इजादेश्च गुरुमतोऽनृच्छः

(ख) आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य

(ग) इणः षीध्वंलुङ्लिटां धोऽङ्गात्

(घ) लोपो व्योर्वलि

(ङ) आत्मनेपदेष्वनतः

(च) अयामन्ताल्वाय्येत्न्विष्णुषु

(छ) णौ चङ्युपधाया ह्रस्वः

(ज) सन्वल्लघुनि चङ्परेऽनग्लोपे

(झ) कमेश्च्लेश्चङ् वाच्यः

**२. अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) कमुधातोः कोऽर्थः ?

(ख) केषां टेरेत्वं भवति ?

(ग) कीदृशस्य थासः स्थाने से आदेशो भवति ?

(घ) लिटस्तझयोः स्थाने कौ आदेशौ भवतः ?

(ङ) धादौ प्रत्यये परे कस्य लोपः ?

(च) सवाभ्यां परस्य लोट एकारस्य स्थाने कौ आदेशौ भवतः ?

(छ) आत्मनेपदस्य लिङादेशस्य क आगमो भवति ?

(ज) लिङो झस्य क आदेशः ?

(झ) 'एध'धातोः कोऽर्थः ?

(ञ) लिङ्लकारसम्बद्धयोः कयोः 'सुट्' आगमो भवति ?

(ट) कम्धातोर्णिङ्प्रत्ययः कस्मिन्नर्थे भवति ?

(ठ) केभ्यः परस्य च्लेः स्थाने चङादेशो भवति ?

(ड) कुत्र लघोरभ्यासस्य दीर्घो भवति ?

**३. सोदाहरणं सूत्राणामर्थं लिखत**

(क) आतो ङितः (ख) धि च (ग) आमेतः (घ) लिङः सीयुट्

(ङ) इटोऽत् (च) कमेर्णिङ् (छ) णेरनिटि (ज) सन्यतः

८. अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत

(क) एध्धातोर्लिटि (ख) एध्धातोर्लोटि (ग) एध्धातोराशीर्लिङि

(घ) कम्धातोर्लटि (ङ) कम्धातोर्लङि (च) कम्धातोर्लुङि

५. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत

(क) एधते (ख) एधेते (ग) एधसे (घ) एधाञ्चक्रे (ङ) एधाञ्चकृढ्वे

(च) एधिताध्वे (छ) एधिताहे (ज) एधताम् (झ) एधस्व (ञ) एधध्वम्

(ट) एधै (ठ) ऐधत (ड) एधेत (ढ) एधेरन्

(ण) एधेय (त) एधिषीष्ट (थ) ऐधिष्ट (द) ऐधिषत (ध) ऐधिष्यत

(न) कामयते (प) कामयाञ्चक्रे/चकमे (प) अचीकमत/अचकमत

९. अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दशत

(क) एधेथे (ख) एधितासे (ग) एधामहै (घ) एधेयाथाम्

(ङ) ऐधिष्यन्त (च) चकमिरे (छ) कामयिष्ये (ज) अकामयध्वम्

(झ) कमिषीरन् (ञ) अचकमे

१०. सिद्धपदानि दर्शयत

(क) एध् + लुट् (महिङ्) (ख) कम् + लोट् (वहि) (ग) एध् + विधिलिङ् (इट्)

(घ) कम् + लृट् (ध्वम्) (ङ) एध् + लङ् (आथाम्) (च) कम् + आशीर्लिङ् (थास्)

(छ) एध् + लुङ् (झ) ज) कम् + लिट् (आताम्) (झ) एध् + लट् (त)

११. पदानां वाक्ये प्रयोगं निदर्शयत

(क) एधध्वे (ख) एधितारः (घ) एधिष्ये (ङ) एधध्वम् (च) ऐधे

(छ) कामये (ज) कामयेत झ) अकामयिष्यन्त

## नवमः पाठः

# क्षमूष्प्रभृतीनां धातूनां रूपसिद्धिनिदर्शनम्

क्षमूष् सहने । क्षमते । चक्षमे । चक्षमिषे-चक्षंसे । चक्षमाथे । चक्षमिवहे ।

सहनार्थकस्य 'क्षमूष्'शब्दस्य धातुत्वे ऊकार-षकारयोः अनुबन्धलोपे ततो लटि तादेशे टिसंज्ञायां टेरेत्वे च 'क्षमते' इति रूपं जायते । लिटि तादेशे एशि द्वित्वेऽभ्यासत्वे हलादिशेषे वर्णसम्मेलने 'चक्षमे' इति रूपं जायते । आतामि झे च पूर्ववदेव रूपे भवतः । थासि 'स्वरति-सूति-सूयति-धूञूदितो वा' इति सूत्रेण ऊदित्त्वाद् विकल्पेन इडागमे 'चक्षमिषे' इडागमाभावे च अनुस्वारेण 'चक्षंसे' इति रूपद्वयं जायते । आथामि पूर्ववद् रूपं भवति । ध्वमि अपि इटो वैकल्पिकत्वाद् 'चक्षमिध्वम्/चक्षन्ध्वम्' इति रूपं सिध्यति । इटि पूर्ववत् 'चक्षमे' इति रूपं भवति । वहौ विकल्पेन इडागमे 'चक्षमिवहे' इति रूपं भवति, इडागमाभावे 'चक्षम् वहि' इत्यत्र-

**म्वोश्च ८।२।६५।**

**मान्तस्य धातोर्मस्य नः स्यात् म्वोः परयोः । चक्षण्वहे । चक्षमिमहे/चक्षण्महे ॥**

(मकारे वकारे च परे मकारान्तस्य धातोर्मकारस्य स्थाने नकारादेशो भवति ।)

इति सूत्रेण मकारस्य स्थाने नकारादेशे नकारस्य णत्वे इकारस्य टिसंज्ञायां टेरेत्वे च 'चक्षण्वहे' इति रूपं सिध्यति । महिङि च एवमेव रूपद्वयं भवति ।

लुटि इडागमस्य वैकल्पिकत्वेन 'क्षमिता/क्षन्ता' इत्यादीनि रूपाणि जायन्ते । लृटि च एवमेव 'क्षमिष्यते/क्षंस्यते' इत्यादीनि रूपाणि भवन्ति । लोटि लङि विधिलिङि च शबादिना पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि अपि इडागमस्य वैकल्पिकत्वेन 'क्षमिषीष्ट/क्षंसीष्ट' इत्यादीनि रूपाणि जायन्ते । लुङि अपि इडागमस्य वैकल्पिकत्वेन 'अक्षमिष्ट/अक्षंस्त' इत्यादीनि रूपाणि सिध्यन्ति । लृङि अपि इडागमस्य वैकल्पिकत्वेन 'अक्षमिष्यत/अक्षंस्यत' इत्यादीनि रूपाणि निष्पद्यन्ते ।

**स्पदि किञ्चिच्चलने । स्पन्दते । स्पन्देते । पस्पन्दे ॥**

किञ्चिच्चलनार्थकस्य 'स्पदि' इति शब्दस्य धातुत्वेन इकारस्यानुबन्धलोपे 'स्पद्' इति जाते इदित्त्वाद् नुमागमेऽनुबन्धलोपे मित्त्वादन्त्यादचः परे तस्यैवावयवे 'स्पन्द्' इति जाते लटि तादेशे शपि टिसंज्ञायां टेरेत्वे च 'स्पन्दते' इति रूपं सिध्यति । लिटि तादेशे एशि च 'स्पन्द् ए' इति जाते द्वित्वेऽभ्यासत्वे 'शर्पूर्वाः खयः' इति सूत्रेण पकारस्य शेषे वर्णसम्मेलने 'पस्पन्दे' इति रूपं जायते । एवं लुडादिषु लकारेषु तु पूर्ववद् रूपाणि भवन्ति ।

**मुद हर्षे । मोदते । मुमुदे ।**

हर्षार्थे वर्तमानस्य 'मुद' शब्दस्य धातुत्वे अकारस्यानुबन्धलोपे च 'मुद्' इति जाते । लटि तादेशे शपि लघूपधगुणे टिसंज्ञायां टेरेत्वे च 'मोदते' इति रूपं सिध्यति । लिटि तादेशे एशि च 'मुद् ए' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे च 'मुमुद् ए' इति जाते अपित्त्वात् कित्त्वेन लघूपधगुणनिषेधे वर्णसम्मेलने 'मुमुदे' इति रूपं जायते । एवं लुडादिषु लकारेषु तु पूर्ववद् रूपाणि भवन्ति ।

**यती प्रयत्ने । यतते । येते ।**

प्रयत्नार्थकस्य 'यती'शब्दस्य धातुत्वेन ईकारस्यानुबन्धलोपे 'यत्' इति जाते लटि तादेशे शपि टिसंज्ञायां टेरेत्वे च 'यतते' इति रूपं जायते । लिटि तादेशे एशि च 'यत् ए' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे च प्राप्ते 'अत एकहल्मध्येऽनादेशादेर्लिटि' इति सूत्रेण अभ्यासस्य लोपे अनभ्यासस्य एत्वे च वर्णसम्मेलने 'येते' इति रूपं सिध्यति । लुडादिषु तु पूर्ववद् रूपाणि भवन्ति ।

**शकि शङ्कायाम् । शङ्कते । शशङ्के ।**

शङ्कार्थकस्य 'शकि'शब्दस्य धातुत्वे इकारस्यानुबन्धलोपे च 'शक्' इति जाते इदित्त्वाद् नुमागमेऽनुबन्धलोपे नस्यानुस्वारे परसवर्णे च 'शङ्क्' इति जाते ततो लटि तादेशे शपि टिसंज्ञायां टेरेत्वे च 'शङ्कते' इति रूपं जायते । लिडादिषु पूर्ववद् रूपाणि भवन्ति ।

**श्लाघृ कत्थने । श्लाघते । शश्लाघे ।**

कत्थनार्थकस्य 'श्लाघृ'शब्दस्य धातुत्वे ऋकारस्यानुबन्धलोपे च 'श्लाघ्' इति जाते ततो लटि तादेशे शपि टिसंज्ञायां टेरेत्वे च 'श्लाघते' इति रूपं जायते । लिडादिषु पूर्ववद् रूपाणि भवन्ति ।

**कपि चलने । कम्पते ।**

चलनार्थकस्य 'कपि'शब्दस्य धातुत्वे इकारस्यानुबन्धलोपे च 'कप्' इति जाते इदित्त्वाद् नुमागमेऽनुबन्धलोपे नस्यानुस्वारे परसवर्णे च 'कम्प्' इति जाते ततो लटि तादेशे शपि टिसंज्ञायां टेरेत्वे च 'कम्पते' इति रूपं जायते । लिडादिषु पूर्ववद् रूपाणि भवन्ति ।

**भिक्ष भिक्षायाम् । भिक्षते । बिभिक्षे ॥**

भिक्षार्थे वर्तमानस्य 'भिक्ष'शब्दस्य धातुत्वे अकारस्यानुबन्धलोपे च 'भिक्ष्' इति जाते ततो लटि तादेशे शपि टिसंज्ञायां टेरेत्वे च 'भिक्षते' इति रूपं जायते । लिडादिषु पूर्ववद् रूपाणि भवन्ति ।

**ऊह वितर्के । ऊहते । ऊहाञ्चक्रे ।**

वितर्कार्थकस्य 'ऊह'शब्दस्य धातुत्वे अकारस्यानुबन्धलोपे च 'ऊह्' इति जाते ततो लटि तादेशे शपि टिसंज्ञायां टेरेत्वे च 'ऊहते' इति रूपं जायते । लिटि इजादित्वाद्

गुरुमत्त्वाच्च 'आम्'प्रत्यये 'एध्'धातोरिव 'ऊहाञ्चक्रे' इत्यादीनि रूपाणि जायन्ते । लुडादिषु तु पूर्ववद् रूपाणि भवन्ति ।

**अय गतौ । अयते ॥**

गत्यर्थकस्य 'अय'शब्दस्य धातुत्वे अकारस्यानुबन्धलोपे 'अय्' इति जाते ततो लटि तादेशे शपि टिसंज्ञायां टेरेत्वे च 'अयते' इति रूपं जायते । 'प्र'उपसर्गपूर्वकाद् 'अय्'धातोर्लटि 'प्र अयते' इत्यत्र, 'परा'उपसर्गपूर्वकाद् 'अय्'धातोर्लटि 'परा अयते', इत्यत्र च -

**उपसर्गस्याऽयतौ ८।२।१९।**

**अयतावुपसर्गरेफस्य लत्वम् । प्लायते । पलायते ।**

(अय्धातौ परे उपसर्गस्थस्य रेफस्य स्थाने लकारादेशो भवति ।)

इति सूत्रेण रेफस्य स्थाने लकारादेशे सवर्णदीर्घे च 'प्लायते' 'पलायते' इति रूपे सिध्यतः ।

अय्धातोर्लिटि 'अय् ल्' इति जाते-

**दयायासश्च ३।१।३७।**

**एभ्य आम्लिटि । अयाञ्चक्रे । अयिता । अयिष्यते । अयताम् । आयत । अयेत । अयिषीष्ट ।**

(लिटि दय्, अय्, आस् एभ्यो धातुभ्यः परस्य 'आम्'प्रत्ययो भवति ।)

इति सूत्रेण 'आम्'प्रत्यये जाते 'एध्'धातोरिव 'अयाञ्चक्रे' इत्यादीनि रूपाणि सिध्यन्ति । लुडादिषु अपि 'एध्'धातोरिव रूपाणि भवन्ति । आशीर्लिङि ध्वमि यलोपं यावद् विहिते सति 'अयिषीध्वम्' इति जाते-

**विभाषेटः ८।३।७९।**

**इणः परो य इट्, ततः परेषां षीध्वंलुङ्लिटां धस्य वा ढः । अयिषीढ्वम्/अयिषीध्वम् । आयिष्ट । आयिढ्वम्/आयिध्वम् । आयिष्यत ।**

(इणः परे इट् अस्ति, ततः परे 'षीध्वम्' इति वर्तते, लुङ्लकारसम्बद्धो धकारो वर्तते उत लिट्लकारसम्बद्धो धकारो वा वर्तते चेत् तत्रस्थस्य धकारस्य स्थाने विकल्पेन ढकारादेशो भवति ।)

इति सूत्रेण धकारस्य विकल्पेन ढत्वे 'अयिषीढ्वम्' इति रूपं जायते । ढत्वाभावे तु 'अयिषीध्वम्' इति रूपं भवति । लुटि अपि अस्य धातोः 'एध्'धातोरिव रूपाणि भवन्ति । ध्वमि तु अत्रापि विकल्पेन ढत्वं भवति । लृङि अपि 'एध्'धातोरिव रूपाणि भवन्ति ।

**द्युत दीप्तौ । द्योतते ।**

दीप्त्यर्थकस्य 'द्युत'शब्दस्य धातुत्वेन अकारस्यानुबन्धलोपे 'द्युत्' इति जाते लटि तादेशे शपि लघूपधगुणे वर्णसम्मेलने च 'द्योतते' इति रूपं जायते । लिटि तादेशे एशि द्वित्वेऽभ्यासत्वे च 'द्युत् ए' इति जाते-

**द्युतिस्वाप्योः सम्प्रसारणम् ७।४।६७।**

**अभ्यासस्य । दिद्युते । द्योतिता । द्योतिष्यते । द्योतताम् । अद्योतत । द्योतेत । द्योतिषीष्ट ।**

('द्युत्'धातोः 'स्वप्'धातोश्च अभ्यासस्य सम्प्रसारणं भवति ।)

इति सूत्रेण सम्प्रसारणे यकारस्य स्थाने इकारादेशे 'दि उत् द्युत् ए' इति जाते 'सम्प्रसारणाच्च' इति पूर्वरूपे 'दित् द्युत् ए' इति जाते हलादिशेषे वर्णसम्मेलने च 'दिद्युते' इति रूपं सिध्यति । एवं लिटि अन्यत्रापि भवति । लुटमारभ्य आशीर्लिङं यावद् अस्य धातोः 'मुद्'धातोरिव रूपाणि भवन्ति । लुङि अडागमे 'अद्युत् ल्' इत्यत्र-

**द्युद्भ्यो लुङि १।३।९१।**

**द्युतादिभ्यः परस्मैपदं वा स्याल्लुङि । 'पुषादी'त्यङ् । अद्युतत्/अद्योतिष्ट । अद्योतिष्यत ।**

(द्युतादिगणपठितेभ्यो धातुभ्यः परस्य लुङः स्थाने विकल्पेन परस्मैपदादेशो भवति ।)

इति विकल्पेन परस्मैपदसंज्ञके प्रथमपुरुषस्यैकवचने तिबादेशे 'अ द्युत् ति' इति जाते च्लौ प्राप्तं सिचं प्रबाध्य 'पुषादिद्युताद्यलृदितः परस्मैपदेषु' इति सूत्रेण च्लेः स्थाने 'अङ्'आदेशेऽनुबन्धलोपे 'अद्युत् अ ति' इति जाते प्राप्तस्य लघूपधगुणस्य ङित्त्वाद् निषेधे वर्णसम्मेलने इकारस्य लोपे च 'अद्युतत्' इति रूपं सिध्यति । परस्मैपदाभावे आत्मनेपदस्य प्रथमपुरुषैकवचने तु मुद्धातोरिव 'अद्योतिष्ट' इति रूपं जायते । लृङि अपि मुद्धातोरिव रूपाणि जायन्ते ।

**वृतु वर्तने । वर्तते ।**

वर्तनार्थकस्य 'वृतु'शब्दस्य धातुत्वे उकारस्यानुबन्धलोपे लटि तादेशे शपि लघूपधगुणे च 'वर्तते' इति रूपं सिध्यति । लिटि तादेशे एशि च 'वृत् ए' इति जाते द्वित्वेऽभ्यासत्वे अत्वे रपरत्वे हलादिशेषे च 'ववृत् ए' इति जाते 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वप्रतिषेधेन' इति वार्तिकेन गुणात् पूर्वविप्रतिषेधेन 'ए' इत्यस्य कित्त्वे लघूपधगुणनिषेधे वर्णसम्मेलने च 'ववृते' इति रूपं सिध्यति । लुटि पूर्ववत् 'वर्तिता' इति रूपं सिध्यति । लृटि-

**वृद्भ्यः स्यसनोः १।३।९२।**

**वृतादिभ्यः पञ्चभ्यो वा परस्मैपदं स्ये, सनि च ।**

(स्यप्रत्यये, सन्प्रत्यये च वृतु, वृधु, शृधु, स्यन्दु, कृपु एभ्यो धातुभ्यः परस्य लकारस्य स्थाने परस्मैपदादेशो विकल्पेन भवति ।)

इति सूत्रेण स्यस्य विवक्षायाम लस्य स्थाने परस्मैपदसंज्ञके प्रथमपुरुषस्यैकवचने तिबादेशे स्यप्रत्यये आर्धधातुकत्वे इडागमे प्राप्ते-

**न वृद्भ्यश्चतुर्भ्यः ७।२।५९।**

**वृतु वृधु-शृधु-स्यन्दभ्यः सादेरार्द्धधातुकस्येण्न स्यात्तङानयोरभावे । वर्त्स्यति/वर्त्तिष्यते । वर्त्तताम् ।**

**अवर्त्तत । वर्त्तेत । वर्त्तिषीष्ट । अवृतत् । अवर्त्तिष्ट । अवर्त्स्यत्/अवर्त्तिष्यत ।**

(तङ्प्रत्याहारस्य, शानच्-कानच्प्रत्यययोश्च अभावे अर्थात् परस्मैपदे परे वृतु, वृधु, शृधु, स्यन्दु एभ्यो धातुभ्यः परस्य सकारादेः आर्धधातुकस्य इडागमो न भवति ।)

इति सूत्रेण इडागमनिषेधे लघूपधगुणे वर्णसम्मेलने च 'वर्त्स्यति' इति रूपं सिध्यति । परस्मैपदाभावे आत्मनेपदसंज्ञके प्रथमपुरुषस्यैकवचने तादेशे स्यप्रत्यये इडागमे लघूपधगुणे च 'वर्तिष्यते' इति रूपं जायते । लोटमारभ्य लुङं यावत् पुनः पूर्ववद् रूपाणि जायन्ते । लृङि स्यस्य विवक्षायाः कारणेन विकल्पेन परस्मैपदादेशे 'अवर्त्स्यत्/अवर्त्तिष्यत' इत्यादीनि द्विविधानि रूपाणि भवन्ति ।

**रमु क्रीडायाम् । रमते । रेमे । रन्ता ।**

क्रीडार्थस्य 'रमु'शब्दस्य धातुत्वे उकारस्यानुबन्धलोपे लटि तादेशे शपि टिसंज्ञायां टेरेत्वे च 'रमते' इति रूपं सिध्यति । लिटि तादेशे एशि द्वित्वेऽभ्यासत्वे हलादिशेषं प्रबाध्य अभ्यासस्य लोपे अनभ्यासस्य एत्वे वर्णसम्मेलने च 'रेमे' इति रूपं जायते । लुटि इडागमनिषेधे अनुस्वारे परसवर्णे च 'रन्ता' इति रूपं जायते । एवं लृडादिषु अपि पूर्ववद् रूपाणि जायन्ते ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) म्वोश्च (ख) उपसर्गस्याऽयतौ

(ग) द्युतिस्वाप्योः सम्प्रसारणम् (घ) न वृद्भ्यश्चतुर्भ्यः

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) ऊहधातोः कोऽर्थः ?

(ख) किञ्चिच्चलनार्थे को धातुरस्ति ?

(ग) अय्धातोर्लिटि कः प्रत्ययो भवति ?

(घ) कीदृशस्य धस्य विकल्पेन ढत्वं भवति ?

(ङ) लुङि परे आत्मनेपदिभ्योऽपि केभ्यो धातुभ्यः परस्मैयदं भवति ?

(च) कयोः परयोः वृतादिभ्यः पञ्चभ्यः परस्मैपदं भवति ?

(छ) रम्धातोः कोऽर्थः ?

३. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) दयायासश्च (ख) विभाषेटः (ग) द्युद्भ्यो लुङि (घ) वृद्भ्यः स्यसनोः

४. **अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत**

(क) क्षम्धातोर्लुटि (ख) स्पदिधातोर्लिटि (ग) मुद्धातोराशीर्लिङि

(घ) यत्धातोर्विधिलिङि (ङ) शकिधातोर्लङि (च) श्लाघ्धातोर्लृङि
(छ) कपिधातोर्लुङि (ज) भिक्षधातोर्लोटि (झ) ऊह्धातोर्लिटि
(ञ) अय्धातोराशीर्लिङि ट) द्युत्धातोर्लुङि ठ) वृत्धातोर्लृटि
(ड) रम्धातोर्लृङि

५. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) चक्षण्वहे/चक्षमिमहे (ख) अक्षमिष्ट/अक्षंस्त (ग) पस्पन्दे (घ) मोदेत
(ङ) यतिषीष्ट (च) शङ्कते (छ) अश्लाघिष्ट (ज) चकम्पे
(झ) भिक्षताम् (छ) ऊहाञ्चक्रे (ज) अयाञ्चक्रे
(झ) अयिषीढ्वम्/अयिषीध्वम् (ञ) आयिढ्वम्/आयिध्वम्
(ट) दिद्युते (ठ) अद्युतत्/अद्योतिष्ट (ड) वर्त्स्यति/वर्तिष्यते
(ढ) अवृतत्/अवर्तिष्ट (ण) रेमे

६. **'पलायते' इत्यस्य कथं रेफस्य लत्वम् ? स्फुटीकुरुत ।**

७. **अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दशत**

(क) क्षमध्वम् (ख) पस्पन्दिरे (ग) अमोदिषत (घ) यतध्वे
(ङ) शङ्केयाताम् (च) अश्लाघेताम् (छ) अकम्पिष्ये (ज) भिक्षितासाथे
(झ) औहन्त (ञ) आयत (ट) द्युत्सीष्ट (ठ) वर्तस्व
(ड) रंसीरन्

८. **सिद्धपदानि दर्शयत**

(क) क्षम् + लुट् (आताम्) (ख) स्पदि + लोट् (वहि) (ग) मुद् + विधिलिङ् (इट्)
(घ) यत् + लृट् (ध्वम्) (ङ) शकि + लङ् (आताम्) (च) श्लाघ् + आशीर्लिङ् (महिङ्)
(छ) कपि + लुट् (झ) (ज) भिक्ष् + लिट् (थास्) (झ) ऊह् + लट् (वहि)
(ञ) अय् + लृङ् (ध्वम्) (ट) द्युत् + लुङ् (आथाम्) (ठ) वृत् + विधिलिङ् (थास्)
(ड) रम् + लोट् (इट्)

९. **पदानां वाक्ये प्रयोगं निदर्शयत**

(क) क्षमताम् (ख) अस्पन्दिषत (ग) भिक्षामहै (घ) मोदै
(ङ) यतामहे (च) अशङ्कथाः (छ) अयतध्वम् (ज) रंस्येते
(झ) पलायन्ते (ञ) अद्युतन् (ट) वर्तेथे

# दशमः पाठः

## श्रिञादीनामुभयपदिधातूनां रूपसिद्धिनिदर्शनम्

**अथोभयपदिनः**

स्वरितेतो ञितश्च धातवः कर्तृगे क्रियाफले आत्मनेपदिनो भवन्ति चेत् परगे क्रियाफले तु परस्मैपदिनो भवन्ति । एते धातव उभयपदिनः कथ्यन्ते । उभयपदिभ्यो धातुभ्यो विहितानां लकाराणां स्थाने परस्मैपदादेशोऽपि भवति, आत्मनेपदादेशोऽपि भवति ।

**श्रिञ् सेवायाम् ।**

सेवार्थे वर्तमानस्य 'श्रिञ्'शब्दस्य धातुत्वे ञकारस्यानुबन्धलोपे लटि ञित्त्वात् परगामिनि क्रियाफले लः स्थाने तिपि शपि गुणेऽयादेशे श्रयति इति रूपं जायते । कर्तृगामिनि क्रियाफले तु लः स्थाने तादेशे शपि गुणेऽयादेशे टिसंज्ञायां टेरेत्वे च 'श्रयते' इति रूपं जायते । एवं लिटि परगामिनि क्रियाफले तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे णिति इकारस्य वृद्धौ आयादेशे च 'शिश्राय' इति रूपं सिध्यति । कर्तृगामिनि क्रियाफले तादेशे एशि द्वित्वेऽभ्यासत्वे हलादिशेषे कित्त्वे गुणनिषेधे इयङादेशे च 'शिश्रिये' इति रूपं सिध्यति । एवं लुटि तिपि तादेशे च 'श्रयिता' इति रूपं भवति । लुटि सिपि 'श्रयितासि' इति भवति चेत् थासि 'श्रयितासे' इति रूपं भवति । एवमेव उभयोः पदयोः लृटि 'श्रयिष्यति' 'श्रयिष्यते', लोटि 'श्रयतु' 'श्रयताम्', लङि 'अश्रयत्' 'अश्रयत' विधिलिङि 'श्रयेत्' 'श्रयेत' आशीर्लिङि 'श्रीयात्' 'श्रयिषीष्ट' इत्यादीनि रूपाणि निष्पद्यन्ते । लुङि परगामिनि क्रियाफले लः स्थाने तिपि च्लौ सिचं प्रबाध्य 'णि-श्रि-द्रु-स्रुभ्यः कर्तरि चङ्' इति सूत्रेण च्लेः स्थाने चङि अनुबन्धलोपे 'अ श्रि अ ति' इति जाते 'चङि' इति द्वित्वेऽभ्यासत्वे हलादिशेषे 'अशिश्रि अति' इति जाते गुणनिषेधे इकारस्य स्थाने 'इयङ्'आदेशे इकारस्य लोपे च 'अशिश्रियत्' इति रूपं सिध्यति । कर्तृगामिनि क्रियाफले तु लः स्थाने तादेशे च्लौ चङि द्वित्वेऽभ्यासत्वे हलादिशेषे गुणनिषेधे इकारस्य स्थाने 'इयङ्'आदेशे 'अशिश्रियत' इति रूपं जायते । लृङि तिपि 'अश्रयिष्यत्' इति, तादेशे 'अश्रयिष्यत' इति च रूपे जायेते ।

**भृञ् भरणे ।**

भरणार्थे वर्तमानस्य 'भृञ्' शब्दस्य धातुत्वे ञकारस्यानुबन्धलोपे च 'भृ' इति जाते लटि परस्मैपदे 'भरति' इत्यादीनि, आत्मनेपदे 'भरते' इत्यादीनि च रूपाणि सिध्यन्ति । लिटि अनुप्रयुक्तस्य कृधातोरिव परस्मैपदे 'बभार' 'बभ्रतुः' 'बभ्रुः' इत्यादीनि रूपाणि, आत्मनेपदे च 'बभ्रे' 'बभ्राते' बभ्रिरे' इत्यादीनि रूपाणि भवन्ति।लुटमारभ्य विधिलिङं यावत् पूर्ववदेव 'भर्तासि/भर्तासे' 'भरिष्यति/भरिष्यते' 'भरतु/भरताम्' 'अभरत्/अभरत' ' भरेत्/भरेत' इत्यादीनि रूपाणि जायन्ते । आशीर्लिङि तिपि सृधातोरिव 'भ्रियात्' इति

रूपं जायते । आशीर्लिङि तादेशे आर्धधातुकत्वे सीयुडागमे 'भृ सीय् त' इति जाते एकाच्त्वाद् इडागमनिषेधे-

**उश्च १।२।१२।**

**ऋवर्णात्परौ झलादी लिङ्-आत्मनेपदपरः सिच्चेत्येतौ कितौ स्तः । भृषीष्ट । भृषीयास्ताम् । अभार्षीत् ।**

(ऋवर्णात् परस्थस्य झलादेर्लिङः, आत्मनेपदपरस्य सिचश्च कित्त्वं भवति ।)

इति सूत्रेण 'सीय् त' इत्यस्य कित्त्वे प्राप्तस्य गुणस्य निषेधे 'भृसीय् त' इति जाते यलोपे सुडागमे उभयत्र षत्वे उत्तरत्र ष्टुत्वे च 'भृषीष्ट' इति रूपं जायते । लुङि अडागमे परस्मैपदे स्मृधातोरिव 'अभार्षीत्' इत्यादीनि रूपाणि जायन्ते चेत् आत्मनेपदस्य तादेशे च्लौ सिचि आर्धधातुकत्वे एकाच्त्वाद् इडागमनिषेधे 'उश्च' इति सिचः कित्त्वाद् गुणनिषेधे च 'अभृस् त' इति जाते-

**ह्रस्वादङ्गात् ८।२।२७।**

**सिचो लोपो झलि । अभृत । अभरिष्यत्/अभरिष्यत ॥**

(झलि परे ह्रस्वान्ताद् अङ्गात् परस्य सिचो लोपो भवति ।)

इति सूत्रेण सिचो लोपे 'अभृत' इति रूपं सम्पद्यते, आतामि तु सिज्लोपाभावे 'अभृषाताम्' इति रूपं जायते । झे झस्य 'अत्'आदेशे 'अभृषत' इति रूपं निष्पद्यते । एवमन्यत्रापि रूपाणि भवन्ति । लृङि 'अभरिष्यत्/अभरिष्यत' इत्यादीनि रूपाणि सिध्यन्ति ।

हृञ् हरणे । हरति । हरते । जहार । जह्रतुः । जह्रुः । जहर्थ । जह्रिव । जह्रिम । जह्रे । जह्रिषे । हर्त्ता । हर्तासि । हर्तासे । हरिष्यति । हरिष्यते ॥

हरणार्थे वर्तमानस्य 'हृञ्' इति शब्दस्य धातुत्वे ञकारस्यानुबन्धलोपे च लडादिना उभयोः पदयोः रूपाणि भृधातोरिव जायन्ते ।

**धृञ् धारणे । धरति ॥**

एवं धारणार्थकस्य 'धृञ्'शब्दस्यापि धातुत्वेन ञकारस्यानुबन्धलोपे लडादिषु रूपाणि सिध्यन्ति ।

**णीञ् प्रापणे । नयति । नयते । निनाय ।**

प्रापणार्थे वर्तमानस्य 'णीञ्' इति शब्दस्य धातुत्वे ञकारस्यानुबन्धलोपे धात्वादेर्णस्य नकारे 'नी' इति जाते लटि 'नयति/नयते' इत्यादीनि रूपाणि भवन्ति । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे ह्रस्वे वृद्धौ आयादेशे च 'निनाय' इति रूपं जायते चेत् तादेशे तु एशि द्वित्वेऽभ्यासत्वे ह्रस्वे अपित्त्वाद् ङित्त्वेन गुणनिषेधे यणि 'निन्ये' इति रूपं जायते । लुटि लृटि च इडागमनिषेधे जिधातोरिव 'नेतासि/नेतासे' इत्यादीनि, 'नेष्यति/नेष्यते' इत्यादीनि च रूपाणि सिध्यन्ति चेत् लोटि, लङि, विधिलिङि च शबादिना

पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि तु 'नीयात्/नेषीष्ट' इत्यादीनि रूपाणि भवन्ति । लुङि परस्मैपदे जिधातोरिव 'अनैषीत्' इत्यादीनि रूपाणि निष्पद्यन्ते चेत् आत्मनेपदे इडागमनिषेधाद् 'अनेष्ट' इत्यादीनि रूपाणि भवन्ति । लृङि अपि इडागमनिषेधस्य कारणेन 'अनेष्यत्/अनेष्यत' इत्यादीनि रूपाणि जायन्ते ।

**डुपचष् पाके । पचति । पचते । पपाच । पेचिथ/पपक्थ । पेचे । पक्ता । पक्ष्यति । पक्ष्यते । अपक्त । अपक्षाताम् ।**

पाकार्थकस्य 'डुपचष्' शब्दस्य धातुत्वे 'डु' इत्यस्य, अकारषकारयोश्चानुबन्धलोपे 'पच्' इति जाते स्वरितेत्त्वाद् उभयपदित्वेन लटि 'पचति/पचते' इत्यादीनि रूपाणि भवन्ति । लिटि परस्मैपदे 'नद्'धातोरिव 'पपाच' 'पेचतुः' इत्यादीनि रूपाणि भवन्ति । सिपि थलि भारद्वाजस्य मते इडागमे 'थलि च सेटि' इति सूत्रेण अभ्यासस्य लोपे, अनभ्यासस्य एत्वे च 'पेचिथ' इति रूपं भवति चेद् अन्येषां मते इडागमाभावे हलादिशेषानन्तरं चकारस्य कुत्वे 'पपक्थ' इति रूपं जायते । लिटि आत्मनेपदे तु 'रम्'धातोरिव 'पेचे' 'पेचाते' इत्यादीनि रूपाणि जायन्ते । लुटि अपि इडागमनिषेधे चकारस्य कुत्वेन 'पक्तासि/पक्तासे' इत्यादीनि रूपाणि भवन्ति । लृटि चकारस्य कुत्वानन्तरं सकारस्य षत्वे कषसंयोगेन क्षादेशे 'पक्ष्यति/पक्ष्यते' इत्यादीनि रूपाणि निष्पद्यन्ते ।  लोटि, लङि, विधिलिङि च शबादिना पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि परस्मैपदे पूर्ववत् 'पच्यात्' इत्यादीनि रूपाणि भवन्ति चेद् आत्मनेपदे सीयुडागमे इडागमनिषेधे कुत्वे षत्वे क्षत्वे ततः सुडागमादिना 'पक्षीष्ट' इत्यादीनि रूपाणि सम्पद्यन्ते । लुङि परस्मैपदे 'त्यज्'धातोरिव 'अपाक्षीत्' इत्यादीनि रूपाणि भवन्ति चेद् आत्मनेपदे तादेशे कुत्वानन्तरं 'झलो झलि' इत्यनेन सकारलोपे 'अपक्त' इति रूपं भवति । आतामादौ तु सलोपाभावे षत्वे क्षत्वे भ 'अपक्षाताम्' इत्यादीनि रूपाणि भवन्ति । लृङि तु पूर्ववद् 'अपक्ष्यत्/अपक्ष्यत' इत्यादीनि रूपाणि भवन्ति ।

भज सेवायाम् । भजति । भजते । भेजे । भक्ता । भक्तासि । भक्तासे । भक्ष्यति । भक्ष्यते । भजतु । भजताम् । अभाक्षीत् । अभक्त । अभक्षाताम् । अभक्ष्यत् । अभक्ष्यत ।

सेवार्थकस्य 'भज'शब्दस्य धातुत्वेन अकारस्यानुबन्धलोपे 'भज्' इति जातेस्वरितेत्त्वाद् उभयपदित्वेन लडादिषु सर्वेषु लकारेषु उभयोः पदयोः 'पच्'धातोरिव रूपाणि भवन्ति ।

**यज देवपूजा-सङ्गतिकरण-दानेषु । यजति । यजते ।**

देवपूजा-सङ्गतिकरण-दानार्थेषु वर्तमानस्य 'यज'शब्दस्य धातुत्वेन अकारस्यानुबन्धलोपे 'यज्' इति जाते स्वरितेत्त्वाद् उभयपदित्वेन लटि 'यजति/यजते' इत्यादीनि रूपाणि जायन्ते । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे च 'यज् यज् अ' इति जाते-

**लिट्यभ्यासस्योभयेषाम् ६।१।१७।**

**वच्यादीनां, ग्रहयादीनां चाऽभ्यासस्य संप्रसारणं स्याल्लिटि । इयाज ।**

(लिटि परे 'वच्'आदीनां धातूनां 'ग्रह्'आदीनां धातूनां च अभ्यासस्य सम्प्रसारणं भवति । वच्, स्वप्, यज्, वप्, वह्, वस्, वेञ्, व्येञ्, ह्वेञ्, वद्, श्वि एते धातवो वच्यादयो धातवः सन्ति चेद् ग्रह्, ज्या, वय्, व्यध्, व्यष्ट्, विच्, व्रश्च्, प्रच्छ्, भ्रस्ज् एते धातवो ग्रहयादयः सन्ति ।)

इति सूत्रेण अभ्यासस्य यकारस्य सम्प्रसारणे पूर्वरूपे हलादिशेषे उपधावृद्धौ च 'इयाज' इति रूपं सिध्यति । तसि अतुसि अतुसः कित्त्वे च 'यज् अतुस्' इति जाते-

**वचिस्वपियजादीनां किति ६।१।१५।**

**वचिस्वप्योर्यजादीनां च सम्प्रसारणं, किति ।**

**'यजिर्वपिर्वहिश्चैव वसि-वेञ्-व्येञ् इत्यपि ।**

**ह्वेञ्वदी श्वयतिश्चैव यजाद्याः स्युरिमे नव ।।' १।।**

ईजतुः । ईजुः । इयजिथ-इयष्ठ । ईजे । यष्टा । 'षढोः कः सि' । यक्ष्यति । यक्ष्यते । यजतु । यजताम् । अयजत् । अजयत । यजेत् । यजेत । इज्यात् । यक्षीष्ट । अयाक्षीत् । अयष्ट ।

('वच्'धातोः, 'स्वप्'धातोः यजादीनां नवानां धातूनां च यकारवकारयोः सम्प्रसारणं भवति ।)

इति सूत्रेण यकारस्य सम्प्रसारणे पूर्वरूपे च 'इज् अतुस्' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे च सवर्णदीर्घे पदत्वे रुत्वे विसर्गे च 'ईजतुः' इति रूपं सिध्यति । एवं झौ 'ईजुः' इति रूपं भवति । सिपि थलि अनुदात्तत्वेन भारद्वाजस्य मते इडागमे 'इयजिथ' इति रूपं सिध्यति चेद् अन्येषां मते जकारस्य षत्वे थकारस्य ष्टुत्वे च 'इयष्ठ' इति रूपं जायते । एवं पूर्ववत् थसादौ अपि रूपाणि जायन्ते । आत्मनेपदे तादेशे एशि कित्त्वे सम्प्रसारणे पूर्वरूपे द्वित्वेऽभ्यासत्वे हलादिशेषे सवर्णदीर्घे वर्णसम्मेलने च 'ईजे' इति रूपं सिध्यति । आतामादिष्वपि एवमेव रूपाणि भवन्ति ।

लुटि तिपि तासिप्रत्यये अनुदत्तत्वाद् इडागमनिषेधे जकारस्य षत्वे तकारस्य ष्टुत्वे ततो डादेशादिना च 'यष्टा' इति रूपं जायते । एवं तादेशेऽपि भवति । लृटि स्यस्य इडागमनिषेधे जकारस्य षत्वे, षकारस्य कत्वे, सकारस्य षत्वे कषसंयोगेन क्षत्वे च 'यक्ष्यति/यक्ष्यते' इत्यादीनि रूपाणि भवन्ति । लोटि, लङि, विधिलिङि च शबादिना पूर्ववद् रूपाणि भवन्ति । आशीर्लिङि परस्मैपदे यासुटः कित्त्वेन सम्प्रसारणे 'इज्यात्' इत्यादीनि रूपाणि भवन्ति चेत् आत्मनेपदे सीयुडागमे इडागमनिषेधे कुत्वादिना 'यक्षीष्ट' इत्यादीनि रूपाणि जायन्ते । लुङि परस्मैपदे पच्धातोरिव 'अयाक्षीत्' इत्यादीनि रूपाणि भवन्ति चेत् आत्मनेपदे तादेशे 'झलो झलि' इति सकारस्य लोपे जकारस्य षत्वे तकारस्य ष्टुत्वे च जकारस्य षत्वे तकारस्य ष्टुत्वे च 'अयष्ट' इति रूपं सिध्यति, तत आतामादिषु पच्धातोरिव 'अयक्षाताम्' इत्यादीनि रूपाणि सिध्यन्ति । लृङि अपि पूर्ववद् 'अयक्ष्यत्/अयक्ष्यत' इत्यादीनि रूपाणि जायन्ते ।

**वह प्रापणे । वहति । वहते । उवाह । ऊहतुः । ऊहुः । उवहिथ । 'हो ढः' । झषस्तथोर्धोऽधः । ष्टुना ष्टुः ।**
प्रापणार्थे वर्तमानस्य 'वह'शब्दस्य धातुत्वे अकारस्यानुबन्धलोपे ततो लटि 'वहति/वहते' इत्यादीनि रूपाणि सिध्यन्ति । लिटि तिपि तसि झौ च यज्धातोरिव 'उवाह' 'ऊहतुः' 'ऊहुः' इति रूपाणि सिध्यन्ति । सिपि थलि भारद्वाजस्य मते इडागमे पूर्ववद् 'उवहिथ' इति रूपं सिध्यति । अन्येषां मते इडागमाभावे पूर्ववद् 'उवह् थ' इति जाते 'हो ढः' इति हकारस्य ढकारे 'झषस्तथोर्धोऽधः' इति थकारस्य धकारे धकारस्य ष्टुत्वेन ढकारे 'उवढ् ढ' इति जाते-

**ढो ढे लोपः ८।३।१३।**

**ढस्य लोपः स्याड्ढे परे ।**

(ढकारे परे ढकारस्य लोपो भवति ।)

इति पूर्वढकारस्य लोपे 'उव ढ' इति जाते 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रेण अकारस्य दीर्घे प्राप्ते-

**सहिवहोरोदवर्णस्य ६।३।११२।**

**अनयोरवर्णस्य ओत्स्यात् ढलोपे । उवोढ । ऊहे । वोढा । वक्ष्यति । वक्ष्यते । वहतु । वहताम् । अवहत् । अवहत । वहेत् । वहेत । उह्यात् । वक्षीष्ट । अवाक्षीत् । अवोढाम् । अवाक्षुः । अवाक्षीः । अवोढम् । अवोढ । अवाक्षम् । अवाक्ष्व । अवाक्ष्म । अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवक्षाथाम् । अवोढ्वम् । अवक्षि । अवक्ष्वहि । अवक्ष्महि । अवक्ष्यत् । अवक्ष्यत ।**

(ढलोपे विहिते सति सह्धातोः, वह्धातोश्च अवर्णस्य स्थाने ओकारादेशो भवति ।)

इति अकारस्य स्थाने ओकारादेशे 'उवोढ' इति रूपं जायते । थसादिषु तु पूर्ववद् रूपाणि भवन्ति । लुटि इडागमनिषेधानन्तरं 'वह् तास् ति' इति जाते हकारस्य ढत्वे, तकारस्य धत्वे, धकारस्य ष्टुत्वे, ढकारस्य लोपे, अकारस्य ओत्वे च 'वोढास् ति' इति जाते डादेशादिना 'वोढा' इति रूपं जायते । एवं लुटः अन्यानि अपि रूपाणि सिध्यन्ति । लृटि इडागमनिषेधानन्तरं हकारस्य ढत्वे, ढकारस्य कत्वे, सकारस्य षत्वे, कषयोः क्षत्वे च 'वक्ष्यति/वक्ष्यते' इत्यादीनि रूपाणि सिध्यन्ति । लोटि, लङि, विधिलिङि च शबादिना पूर्ववद् रूपाणि जायन्ते । आशीर्लिङि परस्मैपदे 'यज्'धातोरिव रूपाणि भवन्ति, आत्मनेपदे इडागमनिषेधानन्तरं इति जाते हकारस्य ढत्वे, ढकारस्य कत्वे, सकारस्य षत्वे, कषयोः क्षत्वे च सुडादिना 'वक्षीष्ट' इत्यादीनि रूपाणि भवन्ति । लुङि अडागमे तिपि च्लौ सिचि इडागमनिषेधे हलन्तलक्षणवृद्धौ हकारस्य ढत्वे, ढकारस्य कत्वे, सकारस्य षत्वे, कषयोः क्षत्वे, इकारलोपे, अपृक्तत्वे, ईडागमे च 'अवाक्षीत्' इति रूपं जायते । तसि इडागमनिषेधानन्तरं तसस्तामादेशे 'अवह् स् ताम्' 'झलो झलि' इति सकारस्य लोपे हकारस्य ढत्वे, तकारस्य धत्वे, धकारस्य ष्टुत्वे, ढकारस्य लोपे, अकारस्य ओत्वे च 'अवोढाम्' इति रूपं जायते । एवमन्यत्रापि रूपाणि भवन्ति । आत्मनेपदे

तादेशे च्लौ सिचि इडागमनिषेधानन्तरं सकारस्य लोपे 'अवह् त' इत्यत्र हकारस्य ढत्वे, तकारस्य धत्वे, धकारस्य ष्टुत्वे, ढकारस्य लोपे, अकारस्य ओत्वे च 'अवोढ' इति रूपं जायते । आतामि तु सलोपाभावे हलन्तलक्षणवृद्धौ 'अवाह् स् आताम्' इति जाते हकारस्य ढत्वे, ढकारस्य कत्वे, सकारस्य षत्वे, कषयोः क्षत्वे च 'अवाक्षाताम्' इति रूपं सिध्यति । एवमन्यत्रापि रूपाणि सिध्यन्ति । लृङि पूर्ववद् 'अवक्ष्यत्/अवक्ष्यत' इत्यादीनि रूपाणि भवन्ति ।

**वेञ् तन्तुसन्ताने । वयति । वयते ।**

तन्तुसन्तानार्थे वर्तमानस्य 'वेञ्'शब्दस्य धातुत्वे ञकारस्यानुबन्धलोपे च लटि 'वयति/वयते' इत्यादीनि रूपाणि सम्पद्यन्ते । लिटि तिपि णलि 'वे अ' इति जाते-

**वेञो वयिः २।४।४१।**

**स्याल्लिटि । इकार उच्चारणार्थः । उवाय ।**

(लिटि परे 'वेञ्'धातोः स्थाने 'वय्'आदेशो भवति । सूत्रे 'वयि' इति इकारस्य उच्चारणार्थं निक्षेपः ।)

इति 'वय्'आदेशे 'वय् अ' इति जाते द्वित्वेऽभ्यासत्वे अभ्यासस्य सम्प्रसारणे पूर्वरूपे हलादिशेषे उपधावृद्धौ च 'उवाय' इति रूपं सिध्यति । तसि अतुसि वयादेशे अतुसः कित्त्वे च 'वय् अतुस्' इति जाते-

**ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च ६।१।१६**

**चात्किति सम्प्रसारणम् । इति यकारस्य प्राप्ते-**

(किति ङिति च प्रत्यये परे ग्रह्, ज्या, वय्, व्यध्, व्यष्ट्, विच्, व्रश्च्, प्रच्छ्, भ्रस्ज् एषां धातूनां सम्प्रसारणं भवति ।)

इति यकारस्य सम्प्रसारणे प्राप्ते

**लिटि वयो यः ६।१।३८।**

**वयो यस्य सम्प्रसारणं न स्याल्लिटि । ऊयतुः । ऊयुः ।**

(लिटि वय्धातोर्यकारस्य सम्प्रसारणं न भवति ।)

इति यकारस्य सम्प्रसारणनिषेधे वकारस्य सम्प्रसारणे पूर्वरूपे च 'उय् अतुस्' इति जाते द्वित्वेऽभ्यासत्वे हलादिशेषे सवर्णदीर्घे 'ऊय् अतुस्' इति जाते-

**वश्चास्यान्यतरस्यां किति ६।१।३९।**

**वयो यस्य वो वा स्यात्किति लिटि । ऊवतुः । ऊवुः । वयस्तासावभावात्थलि नित्यमिट् । उवयिथ । स्थानिवत्त्वेन ञित्त्वात्तङ् । ऊये । ऊवे ।**

(किति लिटि परे 'वय्'धातोर्यकारस्य स्थाने विकल्पेन वकारादेशो भवति ।)

इति यकारस्य स्थाने विकल्पेन वकारे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'ऊवतुः' इति रूपं सिध्यति, वकारादेशाभावे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'ऊयतुः' इति रूपं सिध्यति । एवमन्यत्रापि रूपाणि

जायन्ते । सिपि थलि तासौ अनिट्त्वस्य अभावात् इडागमस्य नित्यत्वाद् 'उवयिथ' इति रूपं भवति । आत्मनेपदेऽपि एवमेव 'ऊये/ऊवे' इत्यादीनि रूपाणि सिध्यन्ति ।
वयादेशाऽभावे धातोः एकारस्य आत्वे लिटि सम्प्रसारणे प्राप्ते

**वेञः ६।१।४०।**

**वेञः संप्रसारणं न स्याल्लिटि ।**

**ववौ । ववतुः । ववुः । वविथ । ववाथ/ववे । ववाते । वविरे । वाता । ऊयात् । वासीष्ट । इट्सकौ । अवासीत् । अवासिष्टाम् । अवासिषुः । अवास्त । अवासाताम् ।**

(लिटि 'वेञ्'धातोः सम्प्रसारणं न भवति ।)
इति सम्प्रसारणनिषेधे आकारान्तस्य धातोरिव परस्मैपदे 'ववौ' 'ववतुः' 'ववुः' इत्यादीनि रूपाणि जायन्ते चेत् आत्मनेपदे 'ववे' 'ववाते' 'वविरे' इत्यादीनि रूपाणि सिध्यन्ति । आत्वेन लुटि 'वातासि/वातासे' इत्यादीनि रूपाणि भवन्ति चेद् लृटि 'वास्यति/वास्यते' इत्यादीनि रूपाणि जायन्ते ।

**राजृ दीप्तौ । राजति । राजते । रराज ।**

दीप्त्यर्थकस्य 'राजृ' शब्दस्य धातुत्वे, ऋकारस्यानुबन्धलोपे लटि 'राजति/राजते' इत्यादीनि रूपाणि सम्भवन्ति । लिटि तिपि णलि द्वित्वेऽभ्यासत्वे हलादिशेषे ह्रस्वे वर्णसम्मेलने च 'रराज' इति रूपं सिध्यति । तसि अतुसि द्वित्वेऽभ्यासत्वे हलादिशेषे प्राप्ते-

**फणां च सप्तानाम् ६।४।१२५**

**एषामेत्वाभ्यासलोपौ वा स्तो क्ङिति लिटि सेटि थलि च । रेजतुः । रराजतुः । रेजुः । रराजुः । रेजे । रराजे ।**

(फण गतौ, राजृ दीप्तौ, टुभ्राजृ दीप्तौ, टुभ्राशृ दीप्तौ, टुभ्लाशृ दीप्तौ, स्यमु शब्दे, स्वन शब्दे इत्येते फणादयः सप्त । किति ङिति लिटि, सेटि थलि च परे एषां धातूनां अवर्णस्य विकल्पेन एत्वं भवति, अभ्यासस्य लोपश्च भवति ।)
इति सूत्रेण विकल्पेन अभ्यासस्य लोपे अनभ्यासस्य आकारस्य एत्वे वर्णसम्मेलने पदत्वे रुत्वे विसर्गे च 'रेजतुः' इति रूपं सिध्यति । तदभावे 'रराजतुः' इति रूपं भवति । एवं झौ 'रेजुः/रराजुः' इति रूपद्वयं सिध्यति । एवमेव अन्यानि अपि रूपाणि सिध्यन्ति । आत्मनेपदेऽपि एवमेव 'रेजे/रराजे' इत्यादीनि रूपाणि जायन्ते । लिडादिषु परस्मैपदे 'जीव्'धातोरिव, आत्मनेपदे 'श्लाघ्'धातोरिव च रूपाणि निष्पद्यन्ते ।

**टुयाचृ याच्ञायाम् । याचति । याचते ।**

याच्ञार्थकस्य 'टुयाचृ'शब्दस्य धातुत्वे 'टु' इत्यस्य, ऋकारस्य चानुबन्धलोपे 'याच्' इति जाते ततो

लटि 'याचति/याचते' इत्यादीनि रूपाणि सिध्यन्ति । लिटि तु 'ययाच/ययाचे' इत्यादीनि रूपाणि भवन्ति । लुडादिषु तु 'राज्'धातोरिव रूपाणि जायन्ते ।

**बुधिर् बोधने । बोधति । बोधते । इरित्त्वादङ् वा । अबुधत्/अबोधीत् । अबोधिष्ट ॥**

बोधनार्थकस्य 'बुधिर्'शब्दस्य धातुसंज्ञायाम् 'इर्' इत्यस्यानुबन्धलोपे 'बुध्' इति जाते लटि लघूपधगुणेन 'बोधति/बोधते' इत्यादीनि रूपाणि भवन्ति । लिटि तिपि लघूपधगुणेन 'बुबोध' इति रूपं जायते, तसि तु अपित्त्वेन कित्त्वाद् गुणनिषेधे 'बुबुधतुः' इति रूपं भवति । एवम् अन्यत्रापि रूपाणि जायन्ते । आत्मनेपदेऽपि एवमेव 'बुबुधे' इत्यादीनि रूपाणि सिध्यन्ति । लुटमारभ्य आशीर्लिङं यावत् पूर्ववद् रूपाणि निष्पद्यन्ते । लुङि परस्मैपदे 'इरितो वा' इति सूत्रेण विकल्पेन अङि लघूपधगुणनिषेधे च 'अबुधत्' इत्यादीनि रूपाणि सिध्यन्ति, अङोऽभावे सिचि इडागमे लघूपधगुणे इकारलोपे अपृक्तत्वे ईडागमे सलोपे सवर्णदीर्घे च 'अबोधीत्' इति रूपं सिध्यति । तसादौ तु उभयत्र पूर्ववदेव रूपाणि निष्पद्यन्ते । आत्मनेपदे 'मुद्'धातोरिव रूपाणि जायन्ते । लृङि पूर्ववत् 'अबोधिष्यत्/अबोधिष्यत' इत्यादीनि रूपाणि सम्पद्यन्ते ।

**खनु अवदारणे । खनति । खनते । चखान । चख्नतुः । चख्नुः । चख्ने ।**

अवदारणार्थे वर्तमानस्य 'खनु'शब्दस्य धातुत्वेन उकारस्यानुबन्धलोपे लटि 'खनति/खनते' इत्यादीनि रूपाणि जायन्ते । लिटि परस्मैपदे 'गम्'धातोरिव 'चखान' 'चख्नतुः' इत्यादीनि रूपाणि निष्पद्यन्ते चेद् आत्मनेपदे उपधालोपादिना 'चख्ने' 'चख्नाते' इत्यादीनि रूपाणि सम्पद्यन्ते । लुटमारभ्य विधिलिङं यावत् पूर्ववदेव रूपाणि सिध्यन्ति । आशीर्लिङि तिपि यासुडागमे 'खन् यास् ति' इति जाते

**ये विभाषा ६।४।४३**

**जनसनखनामात्वं वा यादौ क्ङिति । खायात्/खन्यात् ।**

(यकारादौ किति ङिति च प्रत्यये परे जनसनखनाम् अन्त्यस्य नकारस्य स्थाने विकल्पेन आकारादेशो भवति ।)

इति नकारस्य विकल्पेन आत्वे सवर्णदीर्घे इकारस्य लोपे सकारतकारयोः संयोगत्वे संयोगादेः सकारस्य लोपे 'खायात्' इति रूपं सिध्यति, आत्वाभावे 'खन्यात्' इति रूपं जायते । लुङि परस्मैपदे 'अतो हलादेर्लघोः' इति अकारस्य वृद्धौ 'अखानीत्' इत्यादीनि रूपाणि भवन्ति, आत्मनेपदे 'अखनिष्ट' इत्यादीनि रूपाणि जायन्ते । लृङि 'अखनिष्यत्/अखनिष्यत' इत्यादीनि रूपाणि भवन्ति ।

**धावु गतिशुद्ध्योः । धावति । धावते ।**

गत्यर्थे शुद्ध्यर्थे च वर्तमानस्य 'धावु'शब्दस्य धातुत्वे उकारस्यानुबन्धलोपे 'धाव्' इति जाते ततो लडादिषु 'याच्'धातोरिव रूपाणि जायन्ते ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) लिट्यभ्यासस्योभयेषाम्

(ख) ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च

(ग) वश्चास्यान्यतरस्यां किति

(घ) सहिवहोरोदवर्णस्य

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) श्रिञ्धातोः कोऽर्थः ?

(ख) तन्तुसन्तानार्थे को धातुरस्ति ?

(ग) कीदृशा धातव उभयपदिनः ?

(घ) ऋवर्णाते परौ कौ इतौ भवतः ?

(ङ) यज्धातोः केऽर्थाः ?

(च) लिटि परे केषामभ्यासस्य सम्प्रसारणं भवति ?

(छ) ढकारे परे कस्य लोपो भवति ?

(ज) लिटि परे कस्य सम्प्रसारणं न भवति ?

(झ) के फणादयः सप्त ?

(ञ) यादौ क्ङिति कस्य आत्वम् ?

३. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) उश्च (ख) वचिस्वपियजादीनां किति (ग) वेञो वयिः

(घ) वेञो वयिः (ङ) ये विभाषा

४. **अधस्तनानां धातूनां निर्दिष्टलकारेषु रूपाणि विलिखत**

(क) श्रिधातोरात्मनेपदे लिटि (ख) भृधातोः परस्मैपदे लुटि

(ग) हृधातोरात्मनेपदे लृटि (घ) धृधातोः परस्मैपदे लोटि

(ङ) नीधातोरात्मनेपदे लङि (च) पच्धातोः परस्मैपदे विधिलिङि

(छ) भज्धातोरात्मनेपदे आशीर्लिङि (ज) वेञ्धातोः परस्मैपदे लुङि

(झ) वह्धातोरात्मनेपदे लृङि (ञ) यज्धातोः परस्मैपदे लटि

(ट) याच्धातोरात्मनेपदे लुङि　　(ठ) राज्धातोः परस्मैपदे लिटि

(ड) खन्धातोरात्मनेपदे आशीर्लिङि　　(ढ) बुध्धातोः परस्मैपदे लङि

(ण) धाव्धातोरात्मनेपदे विधिलिङि

**५. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) शिश्रिये　(ख) भृषीष्ट　(ग) अहृत　(घ) अनैषीत्

(ङ) पेचे　(च) भक्ष्यते　(छ) इयाज　(ज) ईजतुः

(झ) यष्टा　(छ) उवोढ　(ज) उवाय/ववौ

(झ) ऊयतुः/ऊवतुः/ववतुः　(ञ) रेजतुः/रराजतुः　(ट) अबुधत्/अबोधीत्

(ठ) खायात्/खन्यात् ।　(ड) अधाविष्ट

**६. के यजादयः ? सप्रमाणं स्फुटीकुरुत ।**

**७. अधस्तनपदानां धातुलकारपुरुषवचनानि निर्दशत**

(क) अश्रयन्त　(ख) बभ्रे　(ग) अहरिष्यः　(घ) पक्षीष्ट

(ङ) यक्ष्ये　(च) वोढाहे　(छ) अभक्षाताम्　(ज) ईजुः

(झ) अवोढम्　(ञ) वविरे　(ट) अराजे　(ठ) यजेरन्

(ड) अबुधाव　(ढ) चख्नतुः　(ण) अधाविष्यत

**८. सिद्धपदानि दर्शयत**

(क) श्रि + लुट् (थास्)　(ख) भृ + लोट् (वस्)　(ग) हृ + विधिलिङ् (मिप्)

(घ) पच् + लृट् (थ)　(ङ) यज् + लङ् (आताम्)　(च) वह् + आशीर्लिङ् (महिङ्)

(छ) भज् + लुट् (झ)　(ज) वेञ् + लिट् (तस्)　(झ) राज् + लट् (वस्)

(ञ) यज् + लृङ् (ध्वम्)　(ट) बुध् + लुङ् (आथाम्)　(ठ) खन् + विधिलिङ् (थस्)

(ड) धाव् + लोट् (इट्)

**९. पदानां वाक्ये प्रयोगं निदर्शयत**

(क) श्रयिष्यते　(ख) बभ्रे　(ग) हरिष्यति　(घ) नयते　(ङ) भक्तासे

(च) यजेत　(छ) अवासीत्　(ज) बुबुधतुः　(झ) अखनिष्ट

## एकादशः पाठः

# अथ अदादिप्रकरणम्- १

तिङन्तप्रकरणे भ्वादिगणनिरूपणानन्तरमदादिगणस्थक्रियापदानां रूपसिद्धिप्रकारो विचार्यते । तिङन्तेषु विकरणभेदेन रूपभेदो ज्ञेयम् । अदादिप्रकरणे शपो लुग् भवतीति लुग्विकरणम् अर्थाद् विकरणप्रत्ययाभावोऽत्र विशेषः । यथा अद्+ति=अत्ति । आरम्भे अदधातोः पाठाद् अदादिरिति प्रकरणस्यास्य संज्ञा ।

**अद भक्षणे ।**

अद इति धातुर्भक्षणेऽर्थे वर्तते । अस्य दकारोत्तरवर्ती अकार उदात्तोऽनुनासिकश्च, आद्योऽकारस्तु अनुदात्तः । उदात्तस्येत्संज्ञकतया धातुरयं परस्मैपदी, एवमनुदात्ततया अनिट्, भक्षणार्थतया सकर्मकश्च वर्तते (अनिट्, सकर्मकः, परस्मैपदी) । अद् इत्यस्माद् वर्तमानक्रियावृत्तौ लटि, लस्य स्थाने तिप्यनुबन्धलोपे 'अद् + ति' इति जाते तिपः सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति शप्यनुबन्धलोपे 'अद्+अ+ति' इत्यवस्थायाम्-

**अदिप्रभृतिभ्यः शपः २।४।७२।**

**लुक् स्यात् । अत्ति । अत्तः । अदन्ति । अत्सि । अत्थः । अत्थ । अद्मि । अद्वः । अद्मः ।**

अदादिगणपठिताद्धातोर्विहितस्य शपो लुग्भवतीति सूत्रार्थः । अनेन सूत्रेण शपो लुकि 'अद्+ति' इति जाते 'खरि च' इति दकारस्य चर्त्वे 'अत्ति' इति सिद्ध्यति । तसादावपि शपो लुगेव विशेषः, झोऽन्तादेशादिविधयस्तु पूर्ववत् प्रवर्तन्त एव ।

**लिट्यन्यतरस्याम् २।४।४०।**

**अदो घस्लृ वा स्याल्लिटि । जघास । उपधालोपः । घस्य चर्त्वे ।**

लिटि परे सति अद्-धातोः स्थाने घस्लृ इत्यादेशो विकल्पेन विधीयत इति सूत्रार्थः । घस्लृ इत्यस्य लृकार इत् । अद्-धातोर्लिटि अनेन घस्लादेशपक्षे तिपि, णलि, द्वित्वे, अभ्यासकार्ये 'ज घस् अ' इत्यवस्थायाम् 'अत उपधायाः' इति उपधावृद्धौ 'जघास' इति । अद्-धातोर्लिटि घस्लादेशपक्षे तसि, अतुसि, अभ्यासकार्ये 'ज घस् अतुस्' इत्यवस्थायां 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्यनेन उपधालोपे घकारस्य चर्त्वेन ककारे 'ज क् स् अतुस्' इत्यवस्थायाम्-

**शासिवसिघसीनां च ८।३।६०।**

**इण्कुभ्यामेषां सस्य षः । जक्षतुः । जक्षुः । घसस्तासावभावात्थलि नित्यमिट्- जघसिथ ॥ आद । आदतुः । आदुः । 'इडत्यर्तिव्ययतीना'मिति नित्यमिट्- आदिथ । अत्ता । अत्स्यति । अत्तु । अत्तात् । अत्ताम् । अदन्तु ॥**

इण्-प्रत्याहारस्थवर्णेभ्यः कवर्गस्थवर्णेभ्यश्च परस्य शास्-वस्-घस्-धातूनामपदान्तस्य सकारस्य स्थाने षकारादेशो भवतीति सूत्रार्थः । शासु अनुशिष्टौ इति अदादिगणस्थो धातुः । वस निवासे, घस्लृ अदने च भ्वादिगणस्थौ धातू । अद्-धातोर्लिटि 'लिट्यन्यतरस्याम्' इत्यनेन यो वैकल्पिको घस्लादेशो भवति, तस्यापि अत्र ग्रहणं भवति । अनेन सूत्रेण सस्य षत्वे, कषसंयोगे क्षे, सकारस्य रुत्वे विसर्गे च 'जक्षतुः' इति सिद्ध्यति । अद्-धातोस्तासिप्रत्यये घस्लादेशाभावात् थलि क्रादिनियमान्नित्यमेव इडागमो भवति । अद्-धातोर्लिटि घस्लादेशपक्षे सिपि, थलि, इटि, अभ्यासकार्ये 'जघसिथ' इति । जक्षिव, जक्षिम इत्येतयोस्तु उपधालोपोऽपि भवति । घस्लभावपक्षे तु अत सातत्यगमने इति धातुवद् 'आद' इति रूपम् । थलि 'इडत्यर्तिव्ययतीताम्' इति नित्यमिडागमे 'आदिथ' इति । आदिव, आदिम इत्येतयोः क्रादिनियमान्नित्यमिडागमः । लुटि लृटि च इण्निषेधे अत्ता, अत्स्यति इत्यादीनि रूपाणि जायन्ते । लोटि शपो लुकि पूर्ववत्प्रक्रियया अत्तु/अत्तात्, अत्ताम्, अदन्तु इति प्रथमपुरुषस्य रूपाणि । सिपि तु शपो लुकि, सेर्ह्यादेशे 'अद्+हि' इत्यवस्थायाम्-

**हुझल्भ्यो हेर्धिः ६।४।१०१।**

**होर्झलन्तेभ्यश्च हेर्धिः स्यात् । अद्धि/अत्तात् । अत्तम् । अत्त । अदानि । अदाव । अदाम ।**

हु-धातोः, झलन्तेभ्यो धातुभ्यश्च परस्य 'हि' इत्यस्य स्थाने 'धि' इत्यादेशो भवतीति सूत्रार्थः । अनेन ध्यादेशे 'अद्धि' इति । आशिषि तु हेस्तातङि - अत्तात् । उत्तमपुरुषे 'आडुत्तमस्य पिच्च' इति आडागमे- अदानि, अदाव, अदाम इति रूपाणि । लुङि-

**अदः सर्वेषाम् ७।३।१००।**

**अदः परस्याऽपृक्तसार्वधातुकस्य अट् स्यात् सर्वमतेन । आदत् । आत्ताम् । आदन् । आदः । आत्तम् । आत्त । आदम् । आद्व । आद्म । अद्यात् । अद्याताम् । अद्युः । अद्यात् । अद्यास्ताम् । अद्यासुः ।**

अद्-धातोः परस्य अपृक्तसंज्ञकस्य सार्वधातुकस्य सर्वेषां व्याकरणकाराणां मतेन अडागमो भवतीति सूत्रार्थः । तिप्, सिप्, मिप् इत्येतेषु इतश्चेति इलोपानन्तरमपृक्तत्वाद् अनेन सूत्रेण नित्यमडागमो भवति । अजादित्वाद् आडजादीनामिति लङि, लुङि, लृङि च अटं बाधित्वा धातोराडागमः, आटश्चेति वृद्धिश्च । लङि शपो लुक् च विशेषः । अद् लङ्, अद् ल्, आ अद् ल्, आद् ल्, आद् तिप्, आद् ति, आद् शप् (अ) ति, आद् ति, आद् त्, आद् अट् (अ) त्, आदत् । एवम् आदः, आदम् इत्यत्रापि । तसादि-द्वि-बहुवचनयोस्तु शपो लुगेव विशेषः । विधिलिङि शापो लुक्, यासुट्, यासः सलोपश्च सर्वत्रैव विधीयन्ते । आशीर्लिङि तु यासुडागमस्य सस्य तिप्सिपोरेव लोप इति पूर्ववत्प्रक्रिया ज्ञेया ।

**लुङ्सनोर्घस्लृ २।४।३७।**

**अदो घस्लृ स्याल्लुङि सनि च । लृदित्त्वादङ् । अघसत् । आत्स्यत् ॥**

लुङ्-लकारे, सन्-प्रत्यये च परे अद्-धातोः स्थाने 'घस्लृ' इत्यादेशो भवतीति सूत्रार्थः । घस्लादेशस्य लृदित्वाद् 'पुषादिद्युताद्यलृदितः परस्मैपदेषु' इति सूत्रेण च्लेः स्थाने सिचं बाधित्वा अङादेशो भवति । लुङो विवक्षायामनेन घस्लादेशे तस्य हलादित्वाद् अडागम एव । अद् लुङ्, अद् ल्, घस् ल्, अघस् ल्, अघस् तिप्, अघस् ति, अघस् च्लि ति, अघस् अङ् (अ) ति, अघस् अ त्, अघसत् । तसादौ अघसताम्, अघसन् इत्यादीनि रूपाणि जायन्ते । लृङि पूर्ववत्कार्ये आत्स्यत् इत्यादि ।

**हन हिंसागत्योः । हन्ति ।**

हन्-धातुः हिंसार्थे गत्यर्थे च वर्तते (अनिट्, सकर्मकः, परस्मैपदी) । लटि, तिपि, शपो लुकि हन् ति इत्यवस्थायां नस्यानुस्वारे परसवर्णे च 'हन्ति' इति रूपं भवति । तसि तु अपित्सार्वधातुकत्वान् ङित्वे सिद्धे अनुनासिकस्य नस्य लोपार्थं विशेषमाह-

**अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ६।४।३७।**

'अनुनासिके'ति लुप्तषष्ठीकं वनतीतरेषां विशेषणम् । अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति परे । यमि-रमि-नमि-गमि-हनि-मन्यतयोऽनुदात्तोपदेशाः । तनु-षणु-क्षणु-क्षिणु-ऋणु-तृणु-घृणु-वनु-मनु-तनोत्यादयः । हतः । घ्नन्ति ।

ये धातवोऽनुनासिकान्ता अनुदात्तोपदेशाश्च सन्ति तेषाम् अङ्गस्य, वन् इति धातोरङ्गस्य, तनोत्यादिधातूनामङ्गस्य च अनुनासिकस्य लोपो भवति, झलादौ किति ङिति च प्रत्यये परे इति सूत्रार्थः । अत्र, येषां धातूनामन्तिमवर्ण अनुनासिकोऽस्ति तथा च औपदेशिकावस्थायामुदात्तस्वरो विद्यते, ते एव अनुनासिकान्ता अनुदात्तोपदेशाश्च धातवः सन्ति । धातुपाठे एतादृशाः षड् धातवः पठ्यन्ते- यम (यम्) उपरमे, रमु (रम्) क्रीडायाम्, णम (नम्) प्रह्वत्वे शब्दे च, गम्लृ (गम्) गतौ, हन (हन्) हिंसागत्योः, मन (मन्) ज्ञाने इति । वनतेरित्यनेन वन (वन्) सम्भक्तौ इति भ्वादिगणस्य धातोर्ग्रहणं भवति । अनुनासिकास्तनोत्यादय इत्यनेन तनादिगणपठिता अनुनासिकान्ता धातवः स्वीक्रियन्ते । ते च तन्, क्षण्, क्षिण्, ऋण्, तृण्, घृण्, वन्, मन् सन्ति । अत्र निर्दिष्टो वन्-धातुस्तनादिगणस्य अस्तीति स्मर्तव्यम् । तनादिगणस्थस्य अनुनासिकान्तस्य षणु (सन्) दाने धातोस्तु अनुनासिकलोपं बाधित्वा 'जनसनखनां सञ्झलोः' इत्यनेन आकारान्तादेशो विधीयते ।

हन् लट्, हन् तस्, हन् शप् (अ) तस्, हन् तस् इत्यवस्थायां तसोऽपित्सार्वधातुकत्वेन ङित्वादनेन अनुनासिकस्य नकारस्य लोपे हतस्, हतर्, हतः इति रूपं साधु । लटः स्थाने झौ - हन् झि, हन् अन्ति हन् शप् (अ) अन्ति, हन् अन्ति इत्यवस्थायां गमहन इत्यादिना सूत्रेण उपधाया लोपे ह्न् अन्ति इति स्थिते 'हो हन्तेर्ञ्णिन्नेषु' इत्यनेन हकारस्य कुत्वे घ्नन्ति इति रूपम् । सिपि नस्यानुस्वारः - हंसि । थसि थे च अनुनासिकलोपः - हथः, हथ । मिबादौ शपो लुगेव विशेषः - हन्मि, हन्वः, हन्मः ।

**वमोर्वा ८।४।२३।**

**उपसर्गस्थान्निमित्ताद्धन्तेर्नस्य णो वा स्याद्वमोः परयोः ।**

प्रहण्मि । प्रहन्मि । प्रहण्वः । प्रहन्वः । प्रहण्मः । प्रहन्मः । जघान । जघ्नतुः । जघ्नुः ।

**अभ्यासाच्च ७।३।५५।**

**अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् । जघनिथ । जघन्थ । जघ्नथुः । जघ्न । जघान । जघन । जघ्निव । जघ्निम । हन्ता । हनिष्यति । हन्तु । हतात् । हताम् । घ्नन्तु ।**

सूत्रेस्मिन् हो हन्तेरित्यनुवर्त्यते । ऋतो भारद्वाजस्य इति नियमादिड्विकल्पः ।

**हन्तेर्जः ६।४।३६।**

**हन्तेर्जः स्यात् हौ परे ।**

हन्-धातोर्लोर्टि, सिपि, शपो लुकि, सेर्ह्यादिशे, अनेन सूत्रेण हन् इत्यस्य स्थाने जादेशे कृते 'ज+हि' इत्यवस्थायाम् 'अतो हेः' इत्यनेन हेर्लुकि प्राप्ते-

**असिद्धवदत्राऽऽभात् ६।४।२२।**

**इत ऊर्ध्वमापादपरिसमाप्तेराभीयम् ।**

**समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात् । इति जस्याऽसिद्धत्वान्न हेर्लुक् । जहि/हतात् । हतम् । हत । हनानि । हनाव । हनाम । अहन् । अहताम् । अघ्नम् । अहन् । अहतम् । अहत । अहनम् । अहन्म । हन्यात् ।**

आभीयम् इति पदेन तत् कार्य बोध्यते यद् अस्मिन् अधिकारे उक्तमस्ति । अस्मात् सूत्रादारभ्य षष्ठाध्यायस्य चतुर्थपादस्य परिसमाप्तिपर्यन्तमसिद्धत्वं भवति, समानाश्रये एवेति सूत्रार्थः । कस्यापि कार्यस्य यः स्थानी, यच्च निमित्तम्, तयोः सामान्यनाम आश्रयः । यदि स्थानी न स्याद् उत निमित्तं न स्यात्तर्हि सूत्रस्य कार्यमेव भवितुं नार्हति । अतः 'आश्रयः' इति सूत्रकार्यस्य आश्रयभूता ये सन्ति तेषां संज्ञा । यत्र द्वयोः सूत्रयोः कश्चन आश्रयः समानोऽस्ति तर्हि ते समानाश्रये सूत्रे । असिद्धम् इति तत् कार्य यन्न दृश्यते । यदि द्वयोराभीयकार्ययोः समाश्रयोऽस्ति तर्हि तौ परस्परयोः कृते असिद्धौ भवत इति सूत्रस्यास्य फलितार्थः ।

अनेन सूत्रेण जादेशस्यासिद्धत्वान्न हेर्लुक्, जहि/हतात् इति । थसादौ हतम्, हत, हनानि, हनाव, हनाम इति रूपाणि । लङि- अहन्+ति इत्यवस्थायाम् इकारलोपे, तकारस्य संयोगान्तलोपे अहन् इति । अहताम्, अघ्नन् । अहन्, अहतम्, अहत । अहनम्, अहन्व, अहन्म । विधिलिङि 'लिङः सलोपोऽनन्त्यस्य' इत्यनेन सर्वत्रैव यासुटः सलोपः, हन्यात्, हन्याताम् । झौ तु 'उस्यपदान्तात्' इति पररूपे 'हन्युः' इति सिद्ध्यति ।

**आर्द्धधातुके ६।४।४६।**

इत्यधिकृत्य

**हनो वध लिङि ६।४।४२।**

हन्-धातोः स्थाने 'वध' इत्यादेशो भवति आर्धधातुके लिङि परे इति सूत्रार्थः ।

**लुङि च ६।४।४३।**

वधादेशोऽदन्तः । 'आर्द्धधातुके' इति विषयसप्तमी, तेनाऽर्द्धधातुकोपदेशेऽकारान्तत्वादतो लोपः । वध्यात् । वध्यास्ताम् । अवधीत् । अवधीष्टाम् । अवधीषुः । अहनिष्यत् ॥

हन्-धातोः स्थाने 'वध' इत्यादेशो भवति लुङि परे इति सूत्रार्थः । अत्र विहितो वधादेशोऽदन्तो वर्तते, तस्य च 'अतो लोपः' इत्यनेन लोपो भवति । आशीर्लिङि सर्वत्रैव हन्-धातोः स्थाने वधादेशे, यासुडादिकार्ये, वधस्यान्त्याकारस्य लोपे वध्यात्, वध्यास्ताम्, वध्यासुः इत्यादीनि रूपाणि जायन्ते ।

लुङितिपि-सिजादिकार्ये,वधादेशस्यानेकच्त्वाद्एकाच इति निषेधाभावाद्इटि,वधस्यान्त्याकारलोपे,'अवध् इ स् ई त्' इत्यवस्थायाम् 'अतो हलादेर्लघोः' इत्यनेन वृद्धौ प्राप्तायाम् 'अचः परस्मिन् पूर्वविधौ' इति अल्लोपस्य स्थानिवत्वान्न वृद्धौ, सिज्लोपे, दीर्घे च कृते 'अवधीत्' इति सिद्ध्यति । तसादौ अवधिष्टाम्, अवधिषुः इत्यादि । लृङि अहनिष्यत् इत्यादि ।

या प्रापणे । याति । यातः । यान्ति । ययौ । याता । यास्यति । यातु । अयात् । अयाताम् ।

प्रापणार्थको या-धातुरनिट्, सकर्मकः, परस्मैपदी च वर्तते ।

**लङः शाकटायनस्यैव ३।४।१११।**

**आदन्ताल्लङो झेर्जुस्वा । अयुः । अयान् । यायात् । यायाताम् । यायुः । यायात् । यायास्ताम् । यायासुः । अयासीत् । अयासिष्टाम् । अयास्यत् । भा दीप्तौ । विद ज्ञाने ।**

आकारान्तादुत्तरस्य लङादेशस्य झेः स्थाने जुसादेशो भवति, शाकटायनस्य आचार्यस्य मतेन इति सूत्रार्थः । अनेन सूत्रेण विकल्पेन झेर्जुसि, पररूपे- अयुः, पक्षान्तरे झोऽन्तादेशे, इकारतकारयोर्लोपे, सवर्णदीर्घे- अयान् इति रूपद्वयम् । विधिलिङि- यायात्, यायाताम्, यायुः । आशीर्लिङि- यायात्, यायास्ताम्, यायासुः । लुङि- 'यमरमनमातां सक् च' इति सकि, इटि, सलोपे, दीर्घे- अयासीत्, अयासिष्टाम्, अयासिषुः । लृङि- अयास्यत्, अयास्यताम्, अयास्यन् ।

दीप्त्यर्थको भा-धातुरनिडकर्मकः परस्मैपदी च वर्तते । तस्य च भाति, भातः, भान्ति इत्यादीनि रूपाणि जायन्ते ।

ज्ञानार्थको विद (विद्) इति धातुः सेट्, सकर्मकः, आत्मनेपदी । तस्माल्लटि, तिपि शपो लुकि 'विद्+ति' इत्यवस्थायाम्-

**विदो लटो वा ३।४।८३।**

**वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । पक्षे- वेत्ति । वित्तः । विदन्ति ।**

विद्-धातोर्लट्-लकारस्य विषये परस्मैपदसंज्ञकप्रत्ययानां स्थाने विकल्पेन णल्, अतुस्, उस्, थल्, अथुस्, अ, णल्, व, म, इत्येते आदेशाः क्रमाद् भवन्तीति सूत्रार्थः । अनेन सूत्रेण तिपो णलि, लघूपधगुणे- वेद । तसाद्यपित्सु तु ङित्त्वाद् गुणाभावे- विदतुः, विदुः । वेत्थ, विदथुः, विद । वेद, विद्व, विद्म । णलाद्यादेशाभावपक्षे- वेत्ति, वित्तः, विदन्ति इत्यादीनि रूपाणि जायन्ते ।

**उषविदजागृभ्योऽन्यतरस्याम् ३।१।३८।**

**एभ्यो लिट्यां वा स्यात् । विदेरदन्तत्वप्रतिज्ञानादामि न गुणः । विदाञ्चकार । विवेद । वेदिता । वेदिष्यति ।**

उष (उष्) दाहे, विद ज्ञाने, जागृ निद्राक्षये, इत्येतेभ्यो धातुभ्यो विकल्पेन आम्-प्रत्ययो भवति, लिटि परे इति सूत्रार्थः । विद इति अकारान्तस्वीकरणात् आमि लघूपधगुणो न भवति, 'अतो लोपः' इत्यनेन कृतस्य अल्लोपस्य स्थानिवत्वादिति स्मर्तव्यम् । आमि, गुणभावे, लिटो लुक्, लिट्परकस्य कृधातोर नुप्रयोगादिपूर्ववत्प्रक्रियया- विदाञ्चकार, पक्षे- विवेद ।

**विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ३।१।४१।**

**वेत्तेर्लोट्याम्, गुणाभावो, लोटो लुक्, लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते । पुरुषवचने न विवक्षिते । इतिशब्दात् ।**

'विदाङ्कुर्वन्तु' इति प्रयोगो विकल्पेन निपात्यते इति सूत्रस्थपदार्थः । विद्-धातोर्लोटि आम्-प्रत्ययः, गुणाभावः, लोटो लुक्, लोट्परस्य कृञश्च अनुप्रयोगो विकल्पेन निपात्यन्ते इति फलितार्थः । न केवलं प्रथमपुरुषबहुवचनं सर्वाण्येव लोट्-वचनानि अनुप्रयुज्यन्ते, विदाङ्करोतु, विदाङ्कुरुतात्, विदाङ्कुर्वन्तु इत्यादि ।

**तनादिकृञ्भ्य उः ३।१।७९।**

**तनादेः, कृञश्च उप्रत्ययः स्यात् । शपोऽपवादः । विदाङ्करोतु ।**

कर्त्र्यर्थे विहिते सार्वधातुकसंज्ञके प्रत्यये परे सति तनादिगणपठितेभ्यो धातुभ्यः, डुकृञ् (कृ) करणे इति धातोश्च 'उ' इति प्रत्ययो भवतीति सूत्रार्थः । सार्वधातुकलकारेषु शपं बाधित्वा अनेन सूत्रेण उ-प्रत्ययो विधीयते । विद्+लोट्, विद्+ति, इत्यवस्थायां पूर्वसूत्रेण आमादिचतुर्णां निपातनाद् 'विदाम् कृ+ल्' इति जाते, लस्य तिपि, शपं बाधित्वा अनेन सूत्रेण उ-प्रत्यये 'विदाम् कृ+उ+ति', एरुरिति उत्वे, उभयत्र गुणे 'विदाम् करोतु', मस्यानुस्वारे वैकल्पिके परसवर्णे च- विदाङ्करोतु, विदांकरोतु इति । आशिषि तु-

**अत उत्सार्वधातुके ।६।४।११०।**

**उप्रत्ययान्तस्य कृञोऽत उत्स्यात्सार्वधातुके क्ङिति । विदाङ्कुरुतात् । विदाङ्कुरुताम् । विदाङ्कुर्वन्तु । 'उतश्चे'ति हेर्लुक् । आभीयत्वेन लुकोऽसिद्धत्वादुत्त्वम् । विदाङ्कुरु । विदाङ्करवाणि । वेत्तु । अवेत् । अवित्ताम् । अविदुः ।**

यस्यान्ते उकारान्त-प्रत्ययोऽस्ति तादृशस्य कृ-धातोरङ्गस्य अकारस्य स्थाने उकारादेशो भवति, किति ङिति च प्रत्यये परे । तातङादेशपक्षे विदाम् कृ उ+तात्, इत्यवस्थायां ङित्वाद् परस्य गुणनिषेधे, पूर्वस्य गुणे 'विदाम् करु+तात्', अनेन सूत्रेण अकारस्य उत्वे, अनुस्वारपरसवर्णे- विदाङ्कुरुतात्, विदांकुरुतात्। उत्तमपुरुषे तु आडागमस्य पित्वाद् ङित्वाभावे अस्य सूत्रस्य अप्रवृत्तौ- विदाङ्करवाणि, विदाङ्करवाव, विदाङ्करवाम । आमादीनां निपातनाभावे तु पूर्ववत् प्रक्रियया वेत्तु/वित्तात्, वित्ताम्, विदन्तु । सिपि सेर्हौ, हुझल्भ्यो इति धौ, तस्य स्थानिवत्वेन ङित्वाल्लघूपधगुणनिषेधे- विद्धि/वित्तात्, वित्तम्, वित्त । उत्तमपुरुषे आटः पित्वाल्लघूपधगुणे- वेदानि, वेदाव, वेदाम । लाङि- अविद्+त्, लघूपधगुणे, तकारस्य हल्ङ्यादिलोपे, दकारस्य वैकल्पिके चर्त्वे- अवेत्/अवेद्, अवित्ताम् । झौ 'सिजभ्यस्तविदिभ्यश्च' इति जुसि- अविदुः । सिपि 'अवेद्+स्' इत्यवस्थायां सकारस्य हल्ङ्यादिलोपे-

**दश्च ।८।२।७५।**

**धातोर्दस्य पदान्तस्य सिपि रुर्वा । अवेः । अवेत् । विद्यात् । विद्याताम् । विद्युः । विद्यात् । विद्यास्ताम् । विद्यासुः । अवेदीत् । अवेदिष्यत् ।**

अनेन सूत्रेण दकारस्य वैकल्पिके रुत्वे, रेफस्य विसर्गे- अवेः, रुत्वाभावे दकारस्य वैकल्पिके चर्त्वे- अवेत्/अवेद् ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) गमहनजनखनघसां लोपः क्ङित्यनङि ।

(ख) अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ।

(ग) उषविदजागृभ्योऽन्यतरस्याम् ।

(घ) उतो वृद्धिर्लुकि हलि ।

(ङ) विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ।

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) अद्-धातुः कस्मिन्नर्थे वर्तते ?

(ख) अद्-धातुः कस्मिन् पदे प्रयुज्यते ? सकारणं लिखत ।

(ग) लिट्-लकारे अद्-धातोः स्थाने कः आदेशो भवति ?

(घ) अद्धि इत्यत्र हेर्धिविधायकं सूत्रं किम् ?

(ङ) अदः सर्वेषामिति सूत्रेण कुत्र कुत्र अडागमो विधीयते ?

(च) घस्लृ इत्यादेशे लृदित्करणस्य फलं किम् ?

(छ) अद्यातम् इत्यत्र सलोपविधायकं सूत्रं किम् ?

(ज) हन्-धातोः उत्तमपुरुषे कानि रूपाणि जायन्ते ?

(झ) 'घ्नन्ति' इत्यत्र को लकारः का च विभक्तिः ?

(ञ) हन्-धातोः स्थाने वधादेशः कस्मिन् कस्मिन् लकारे भवति ?

(ट) हौ परे हनो जादेशकं सूत्रं किम् ?

(ठ) विद्युः इति पदं प्रयुज्य वाक्यमेकं रचयत ।

(ड) अत उत् सार्वधातुके इति सूत्रं किं करोति ?

(ढ) अनुनासिकान्तास्तनादयो धातवः कति सन्ति ? के च ते ?

(ण) या+लिट्(तिप्) इत्यत्र किं रूपं जायते ?

**३. सोदाहरणं सूत्राणामर्थं लिखत**

(क) इडत्यर्त्तिव्ययतीताम् । (ख) शासिवसिघसीनां च ।

(ग) विदो लटो वा । (घ) तनादिकृञ्भ्य उः ।

(ङ) विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ।

**४. विद्-धातोः कर्तरि लटि सविकल्पं रूपाणि लिखत ।**

**५. प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) जघास (ख) आदत् (ग) वध्यात् (घ) विद्युः

**६. सूत्रार्थसङ्घटनपूर्वकं रूपसिद्धिप्रकारं निदर्शयत**

(क) विदाङ्करोतु (ख) अघसत् (ग) जहि (घ) अयुः

**८. भा दीप्तौ धातोः कर्तरि लोटि रूपाणि लिखत ।**

**९. अनुनासिकान्ता अनुदात्तोपदेशा धातवः के ? तेषामनुनासिकलोपविधायकं सूत्रं निर्दिशत ।**

**१०. पदानां वाक्ये प्रयोगं निदर्शयत**

(क) याहि (ख) अदन्ति (ग) विवेद (घ) अवधीत्

## द्वादशः पाठः

### अदादिप्रकरणम्- २

**अस् भुवि ।**

अस्-धातुः भुवि (सत्तायाम्) अर्थे वर्तते (सेट्, अकर्मकः, परस्मैपदी) । लटि, तिपि, शपो लुकि- अस्ति । तसि- अस्+तस्, शपो लुकि, तसः 'सार्वधातुकमपित्' इति ङित्वे जाते-

**श्नसोरल्लोपः ६।४।१११।**

**श्नस्याऽस्तेश्चाऽतो लोपः, सार्वधातुके क्ङिति । स्तः । सन्ति । 'तासस्त्यो'रिति सलोपः । असि । स्थः । स्थ । अस्मि । स्वः । स्मः ।**

श्नम्-विकरणस्य, अस्-धातोश्च अङ्गस्य अकारस्य लोपो भवति, सार्वधातुकसंज्ञके किति ङिति च प्रत्यये परे । अनेन अकारस्य लोपे, सकारस्य रुत्वविसर्गे- स्तः, सन्ति । सिपि 'तासस्त्योर्लोपः' इति सलोपे- असि, स्थः, स्थ । अस्मि, स्वः, स्मः । लिटि 'अस्+ल्' इत्यवस्थायाम्-

**अस्तेर्भूः ६।४।५६।**

**अस्तेर्भूः आर्धधातुके । बभूव । भविता । भविष्यति । अस्तु/स्तात् । स्ताम् । सन्तु ।**

अस्-धातोः स्थाने 'भू' इत्यादेशो भवति, आर्धधातुकस्य विवक्षायामित्यर्थः । अनेन 'भू' इत्यादेशे ततो भूधातौ प्राक्तप्रक्रियानुसारेण- वभूव । अनेन सूत्रेण आर्धधातुकस्य विवक्षायां अस्-धातोः स्थाने भ्वादेशे कृते सर्वेषु आर्धधातुकलकारेषु अस्-धातो रूपाणि भू-धातुवदेव जायन्ते । लोटि- अस्तु, तातङ्पक्षे ङित्वाद् अलोपे- स्तात्, स्ताम्, सन्तु । सिपि सेह्यदिशे कृते 'अस्+हि' इत्यवस्थायाम्-

**घ्वसोरेद्धावभ्यासलोपश्च ६।४।११९।**

**घोरस्तेश्चैत्वं स्याद्धौ परेऽभ्यासलोपश्च । आभीयत्वाद्धेर्धिः । एधि/स्तात् । स्तम् । स्त । असानि । असाव । असाम । आसीत् । आस्ताम् । आसन् । स्यात् । स्याताम् । स्युः । भूयात् । अभूत् । अभविष्यत् ।**

हौ परे घुसंज्ञकधातोरस्धातोश्च एत्वं भवति, अभ्यासस्य लोपश्च भवतीति सूत्रार्थः । अस्य एत्वमभ्यासलोपश्चेतिद्वयोःकार्ययोरत्रएत्वस्यैवप्रवृत्तिर्नत्वाभ्यासलोपस्य,अस्धातोर्हौअभ्यासस्याभावात्। जुहोत्यादिगणे हि-परकानां घुसंज्ञकधातूनान्तु अभ्यासलोपोऽपि भवत्येव । 'अलोऽन्त्यस्य' इत्यनेन अन्त्यस्यालः सकारस्य स्थाने एत्वम् । आभीयत्वेन 'असिद्धवदत्राभात्' इति एत्वस्यासिद्धत्वाद् 'हुझल्भ्यो हेर्धिः' इति हेर्ध्यादिशो भवति, हेरपित्वात् स्थानिवत्वेन ङित्वे 'श्नसोरल्लोपः' इति अलोपश्च । अ ए+हि, अए+धि, एधि । तातङ्पक्षे तु परत्वात् एत्वं बाधित्वा तातङि पूर्ववत्- स्तात्, स्तम्, स्त । असानि, असाव, असाम । लङि 'अस्तिसिचोऽपृक्ते' इति ईडागमः- अस्+ल्, आटि, वृद्धौ, तिपि, शपि, लुकि,

इलोपे 'आस्+त्' इत्यवस्थायाम् ईटि- आसीत् । तसि 'आ अस्+तस्' इत्यवस्थायां ङित्वात् श्नसोरिति अलोपे, तसः तामादेशे- आस्ताम्, आसन् इत्यादि । विधिलिङि यासुटो ङित्वात् सर्वत्रैव अलोपे- स्यात्, स्याताम्, स्युः इत्यादि ।

**उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ८।३।८७।**

**उपसर्गेणः प्रादुसश्च परस्याऽस्तेः सस्य षो यकारेऽचि च परे । निष्यात् । प्रादुःष्यात् । निषन्ति । प्रादुः-षन्ति । यच्परे किम् ? अभिस्तः ।**

उपसर्गस्थाद् निमित्ताद् इण्-प्रत्याहारात् प्रादुस्-शब्दाच्च उत्तरस्य यकारपरकस्य, अच्परकस्य च अस्-धातोः सकारस्य स्थाने षकारादेशो भवतीत्यर्थः ।

**इण् गतौ । एति । इतः ।**

गत्यर्थक इण् (इ) इति धातुरर्थवशात् सकर्मकोऽकर्मकश्च, अनिट्, परस्मैपदी । लटि, तिपि, शपि, लुकि, सार्वधातुकेति गुणे- एति । तसो ङित्वाद् गुणनिषेधे- इतः । झौ 'इ+अन्ति' इत्यवस्थायाम् 'अचि श्नु.' इत्यादिना प्राप्तमियङं बाधित्वा-

**इणो यण् ६।४।८१।**

**अजादौ प्रत्यये परे । इयङोऽपवादः । यन्ति ।**

अजादौ प्रत्यये परे इण्-धातोः स्थाने यण् इत्यादेशो भवतीत्यर्थः । यणो णकार इत् । 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यनेन प्राप्तमियङं बाधित्वा अनेन यण् विधीयत इत्यर्थः । अनेन इणो यणि 'य+अन्ति' इत्यवस्थायाम् 'अतो गुणे' इति पररूपे- यन्ति । एषि, इथः, इथ । एमि, इवः, इमः । लिटि धातोर्द्वित्वे 'इ इ+अ' इति जाते 'अचो ञ्णिति' इति वृद्धौ 'इ ऐ+अ' इत्यवस्थायाम्-

**अभ्यासस्यासवर्णे ६।४।७८।**

**अभ्यासस्य इ-उवर्णयोरियङुवङौ स्तोऽसवर्णेऽचि परे । इयाय ।**

अनेन सूत्रेण इयङादेशेऽनुबन्धलोपे, आयादेशे- इयाय । अतुसि 'इ इ+अतुस्' इत्यवस्थायाम्-

**दीर्घ इणः किति ७।४।६९।**

**इणोऽभ्यासस्य दीर्घः स्यात् किति लिटि परे । ईयतुः । ईयुः । इययिथ । इयेथ । एता । एष्यति । एतु । ऐत् । ऐताम् । आयन् । इयात् । ईयात् ।**

अत्र दीर्घविधानसामर्थ्याद् 'ह्रस्वः' इत्यनेन अभ्यासस्य ह्रस्वो न भवतीति बोद्धव्यम् । 'येन नाव्यवधानं तेन व्यवहितेऽपि' इति न्यायेन अनेन सूत्रेण अभ्यासस्य दीर्घे, ई इ+अतुस्, 'इणो यण्' इति यणादेशे, पररूपे- ईयतुः, ईयुः । थलि भारद्वाजमेत इडागमे, द्वित्वे 'इ इ+इथ' इति जाते अभ्याससोत्तरस्य

इकारस्य गुणेन एकारे, अयादेशे 'अभ्यासस्यासवर्णे' इति इयङि 'इययिथ' इति सिद्ध्यति । इडभावे तु अनभ्यासस्य इकारस्य गुणे, अभ्यासस्य इयङादेशे 'इयेथ' इति रूपम् । अत्र इयङ्विधानसामर्थ्याद् हलादिशेषो नेति ज्ञेयम् । आशीर्लिङि सर्वत्रैव 'अकृत्सार्वधातुकयोर्दीर्घः' इत्यनेन दीर्घे कृते ईयात्, ईयास्ताम्, ईयासुः इत्यादीनि रूपाणि जायन्ते ।

**एतेर्लिङि ६।४।६७।**

**उपसर्गात्परस्य इणोऽणो ह्रस्वः स्यादार्द्धधातुके किति लिङि । निरियात् ।**

निर् इत्युपसर्गपूर्वकाद् इण्-धातोराशीर्लिङि 'निर्+ईयात्' इत्यवस्थायामनेन सूत्रेण ईकारस्य ह्रस्वे- निरियात् ।

**अन्तादिवच्च ६।१।८५।**

**योऽयमेकादेशः स पूर्वस्याऽन्तवत्परस्याऽऽदिवत्स्यात् ।**

उभयत आश्रयणे नान्तादिवत् आभीयात् । अणः किम् ? सभेयात् । 'समीया'दिति प्रयोगस्तु भौवादिकस्य । 'एकः पूर्वपरयोः' इत्यस्मिन्नधिकारे पूर्व-परशब्दस्थयोर्वर्णान्तरेणाव्यवहितवर्णयोः स्थाने एकादेशो विधीयते । एकादेशोऽयं पूर्वशब्दस्यावयवरूपेण स्वीकरणीय उत परशब्दस्येति जिज्ञासायाम्- 'एकः पूर्वपरयोः' इत्यस्मिन्नधिकारे उक्त एकादेशः पूर्वस्य अन्तिमवर्णवत्, परस्य आदिवर्णवच्च व्यवहर्तव्य इति सूत्रार्थः । अभि+ईयात्, इत्यत्र सवर्णदीर्घे, पूर्वपरयोः स्थाने ईकार एकादेशे, तस्य अनेन सूत्रेण पूर्वान्तवद्भावेन उपसर्गस्यावयवत्वे, परादिवद्भावेन च धातोरवयवत्वे 'एतेर्लिङि' इत्यनेन ह्रस्वे प्राप्ते- उभयत आश्रयणे नान्तादिवत् इति परिभाषा । उभयत आश्रये = पूर्वान्तवद्भावस्य, परादिवद्भावस्य चोभयोराश्रये क्रियमाणे 'अन्तादिवच्च' इति सूत्रं न प्रवर्तत इति परिभाषार्थः । अनया निषेधेन 'अभीयात्' इत्यत्र ह्रस्वो न । लुङि- इ+ल् इत्यवस्थायाम्-

**इणो गा लुङि ।**

इणो गादेशः स्याल्लुङि ।

**'गातिस्थे'ति सिचो लुक् । अगात् । अगाताम् । अगुः । ऐष्यत् । वच परिभाषणे । वक्ति । वग्धि । वच्यात् । उच्यात् ।**

लुङि परे इण्-धातोः स्थाने गा इत्यादेशो भवतीति सूत्रार्थः । अनेन गादेशे कृते 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इत्यनेन सिचो लुग् विधीयते । गा+ल्, इत्यवस्थायाम् अटि, तिपि, च्लौ, सिचि, सिचो लुकि, इलोपे- अगात्, अगाताम्, अगुः इत्यादीनि रूपाणि जायन्ते । लृङि- ऐष्यत्, ऐष्याताम्, ऐष्यन् इत्यादि ।

परिभाषणार्थको वच (वच्) इति धातुरनिट्, सकर्मकः, परस्मैपदी वर्तते । लटि, तिपि, शपो लुकि,

चोः कुरित्यनेन चकारस्य कुत्वे- वक्ति । लोटि सेर्हिः, हेर्धिः, कुत्वं जश्त्वञ्च । आशीर्लिङि कित्वाद् वचिस्वपीति वकारस्य सम्प्रसारणे- उच्यात् आदि । लुङि-

**अस्यतिवक्तिख्यातिभ्योऽङ् ३।१।५२।**

एभ्यश्च्लेरङ् स्यात् ।

असु (अस्) क्षेपणे, वच (वच्) परिभाषणे, ख्या प्रकथने, एतेभ्यो धातुभ्यः परस्य च्लि-प्रत्ययस्य स्थाने अङ् इत्यादेशो भवतीति सूत्रार्थः । अङो ङकार इत् । सिचं बाधित्वा अनेन अङ् विधीयते । वच्+ल्, अवच्+ल्, अवच्+ति, अवच्+त्, अवच् च्लि+त्, अवच् अ+त् इत्यवस्थायाम्-

**वच उम् ७।४।२०।**

**वच उमागमः स्यात् अङि । अवोचत् । अवक्ष्यत् । मृजू शुद्धौ ।**

अङि परे वच्-धातोः उम् इत्यागमो भवतीत्यर्थः । मित्वादन्त्यादचोऽकारात् परे उमि कृते 'व उच् अ+त्' इति जाते, गुणे- अवोचत् । लृङि- अवक्ष्यत् ।

शुद्ध्यर्थक ऊदिद् मृजू (मृज्) धातुर्वेट्, सकर्मकः, परस्मैपदी वर्तते । लटि, तिपि, शपो लुकि 'मृज्+ति' इति जाते-

**मृजेर्वृद्धिः ७।२।११४।**

**मृजेरिको वृद्धिः स्याद्धातुप्रत्यये । 'व्रश्चे'ति षः । मार्ष्टि । मृष्टः । (क्ङित्यजादौ वेष्यते) मार्जन्ति । मृजन्ति । मार्क्षि । ममार्ज । ममृजतुः । ममार्जतुः । ममार्जिथ । ममार्ष्ठ । मार्जिता । मार्ष्टा । मार्ष्टु । मृड्ढि । अमार्ट् । अमार्ड् । अमार्जम् । अमार्जीत् । 'षढो कः सि' अमार्क्षीत् । अमार्क्ष्यत् । अमार्जिष्यत् । रुदिर् अश्रुविमोचने ।**

मृज्-धातोरङ्गस्य इकः स्थाने गुणो भवति, सार्वधातुके आर्धधातुके च प्रत्यये परे । धातुप्रत्यये इत्युक्ते धातोर्विहिताः प्रत्ययाः सन्ति ते च सार्वधातुकसंज्ञका आर्धधातुकसंज्ञकाश्च । अनेन लघूपधगुणो बाध्यते । व्रश्चभ्रस्जेत्यादिना सूत्रेण मृज्-धातोर्जकारस्य षत्वं भवतीत्यर्थः । मृज्-धातोर्लटि, तिपि, शपि, शपो लुकि 'मृज्+ति' इत्यवस्थायां गुणं बाधित्वा अनेन सूत्रेण वृद्धौ, रपरत्वे 'मार्ज्+ति' इति जाते, व्रश्चभ्रश्जेति जकारस्य षत्वे, तकारस्य ष्टुत्वे- मार्ष्टि । तसि ङित्वाद् वृद्धिगुणनिषेधे- मृष्टः ।

'क्ङित्यजादौ वेष्यते' इति भाष्यवचनम्, तस्य च इयं वृद्धिः किति ङिति च अजादौ प्रत्यये परे विकल्पेन भवतीत्यर्थः । झौ 'मृज्+अन्ति' इत्यवस्थायां क्ङित्यजादाविति वृद्धिविकल्पे- मार्जन्ति, पक्षान्तरे गुणनिषेधे- मृजन्ति । सिपि आर्-वृद्धौ, जस्य षत्वे 'मार् ष्+सि' इत्यवस्थायां 'षढोः कः सि' इति कत्वे 'मार् क्+सि' इति जाते, कात् परस्य सस्य षत्वे, कषसंयोगे क्षे- मार्क्षि, मृष्ठः, मृष्ठ । मार्जिम, मृज्वः, मृज्मः । लिटि- णलि अनेन वृद्धौ- ममार्ज । अतुसादौ अजादौ किति वृद्धिविकल्पे- ममार्जतुः/ममृजतुः,

ममार्जुः/ममृजुः । ऊगित्वाद् वलादौ इड्विकल्पः । सिपि पित्वाद् इट्पक्षे इडभावे च अनेन सूत्रेण नित्यं वृद्धिर्भवति । इट्पक्षे- ममार्जिथ, इडभावे जस्य व्रश्चभ्रस्जेति षत्वे, थस्य ष्टुत्वेन ठकारे- ममार्ष्ठ, ममार्जथुः/ममृजथुः, ममार्ज, ममृज । उत्तमपुरुषेऽपि णलि- ममार्ज । वसि (वे), मसि (मे) तु इटः, वृद्धेश्च विकल्पनात् प्रत्येकं त्रीणि रूपाणि- ममार्जिव/ममृजिव/ममृज्व, ममार्जिम/ममृजिम/ममृज्म । लुटि, लृटि च इड्विकल्पः, इडभावे मृजेर्वृद्धिश्चेति बोध्यः ।

इरितो रुदिर्-धातुरश्रुविमोचनेऽर्थे वर्तते (सर्वधातुकलकारेष्वपि सेट्, अकर्मकः, परस्मैपदी) ।

**रुदादिभ्यः सार्वधातुके ७।२।७६।**

**रुद् स्वप् श्वस् अन् जक्ष् एभ्यो वलादेः सार्वधातुकस्येट् स्यात् । रोदिति । रुदितः । हौ- परत्वादिटि धित्वं न । रुदिहि ।**

अनेन रुदादिधातूनां विषये सार्वधातुकलकारेषु इडागमो भवति । लटि, तिपि, अनेन इटि, लघूपधगुणे- रोदिति । तसादौ ङिति गुणभावे रुदितः, रुदन्ति इत्यादि । लोटि, सिपि, हौ, परत्वादनेन इटि हेर्ध्यादिशाभावे- रुदिहि इति रूपम् । लङि तु-

**रुदश्च पञ्चभ्यः ७।३।९८।**

**रुदादेः परस्य हलादेः पितः सार्वधातुकस्याऽपृक्तस्य ईट स्यात् ।**

रुद्, स्वप्, श्वस्, अन्, जक्ष् इत्येतेभ्यः पञ्चेभ्यो धातुभ्यः परस्य अपृक्त-हल्-पित्-सार्वधातुकप्रत्ययस्य ईडागमो भवतीति सूत्रार्थः । पूर्वसूत्रेण प्राप्तम् इडं बाधित्वा अनेन ईडागमो विधीयते ।

**अड् गार्ग्यगालवयोः ।७।३।९९।**

**अरोदीत् । अरोदत् । अरुदिताम् । अरुदन् । अरोदीः । अरोदः । प्रकृतिप्रत्ययविशेषाऽपेक्षाभ्यामडीड्भ्यामन्तरङ्गत्वाद्यासुट्, 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषणात् । रुद्यात् । अरुदत् । अरोदीत् । अरोदिष्यत् । ञिष्वप् शये । स्वपिति । स्वपितः । सुष्वाप । सुषुपतुः । सुष्वपिथ । सुष्वथ ।**

गार्ग्यः, लागवश्च एतौ पाणिनेः प्राचीनौ वैयाकरणौ, एतयोर्मतेन रुद्, स्वप्, श्वस्, अन्, जक्ष् इत्येतेभ्यः पञ्चेभ्यो धातुभ्यः परस्य अपृक्त-हल्-पित्-सार्वधातुकप्रत्ययस्य अडागमो भवतीति सूत्रार्थः । ईटं बाधित्वा अनेन अडागमपक्षे- अरोदत्, पक्षान्तरे इटं बाधित्वा पूर्वसूत्रेण ईटि- अरोदीत् । तसि तु तामादेशे रुदादिभ्य इति इटि, ङित्वाद् गुणाभावे- अरुदिताम्, अरुदन् । अरोदीः/अरोदः, अरुदितम्, अरुदित । अरोदम्, अरुदिव, अरुदिम । विधिलिङि अन्तरङ्गत्वाद् यासुटि रुद्यात्, रुद्याताम्, रुद्युः इत्यादि । आशीर्लिङि रुद्यात्, रुद्यास्ताम्, रुद्यासुः इत्यादि । लुङि अरोदीत्/अरुदत्, अरुदताम्/अरोदिष्टाम्,

अरुदन्/अरोदिषु इत्यादि । लृङि अरोदिष्यत्, अरोदिष्यताम्, अरोदिष्यन् इत्यादि ।

शयनार्थको ञिष्वप् (स्वप्) इति धातुः सार्वधातुके सेट्, आर्धधातुके अनिट्, अकर्मकः, परस्मैपदी वर्तते । आदिभूतस्य ञि इत्यस्य आदिर्ञिटुडव इतीत्वम्, ततः धत्वादेः षः स इति षस्य सत्वम् । लघूपधगुणं विहाय रुद्-धातुवदेव प्रक्रियया अस्यापि रूपाणि सिद्ध्यन्ति । सोपसर्गकस्य तु-

**सुविनिर्दुर्भ्यः सुपिसूतिसमाः ८।३।८८।**

**एभ्यः सुप्यादेः सस्य षः स्यात् । 'पूर्वं धातुरुपसर्गेण युज्यते' । किति लिटि- परत्वात्सम्प्रसारणे, षत्वे च कृते द्वित्वम् । पूर्वत्रासिद्धीयमद्विर्वचने । सुषुषुपतुः । सुषुषुपुः । अकिति तु- द्वित्वेऽभ्यासस्य सम्प्रसारणम् । षत्वस्यासिद्धत्वात्ततः पूर्वं 'हलादिः शेषः' नित्यत्वाच्च । ततः सुपिरूपाभावान्न षः । सुसुष्वाप । सुस्वप्ता । अस्वपीत् । अस्वपत् । स्वप्यात् । सुप्यात् । सुप्यास्ताम् । सुषुप्यात् । अस्वाप्सीत् । अस्वप्स्यत् ।**

सु, वि, निर्, दुर्, इत्येतेभ्य उत्तरस्य सुपि, सूति, सम, इत्येतेषां सकारस्य स्थाने षकारादेशो भवतीति सूत्रार्थः । अत्र सुपि इति स्वप्-धातोः कृतसम्प्रसारणो गृह्यते । सूति इति स्वरूपग्रहणम् ।

जागृ निद्राक्षये । जागर्ति । जागृतः । जाग्रति । 'उषविदजागृभ्योऽन्यतरस्याम्' इत्याम्वा । जागराञ्चकार । जजागार ।

अनेकाचो जागृ-धातुर्निद्राक्षयेऽर्थे वर्तते । लटि, तिपि, शपि, शपो लुकि, सार्वधातुकेति गुणे रपरत्वे- जागर्ति । तसि गुणाभावे- जागृतः । झौ 'जक्षित्यादयः षट्' इत्यनेन अभ्यस्तसंज्ञायाम्, झोऽन्तादेशं बाधित्वा 'अदभ्यस्तात्' इति अदादेशे 'जागृ+अति' इति जाते, ङित्वाद् गुणनिषेधे, ऋकारस्य यणि- जाग्रति । जागर्षि, जागृथः, जागृथ । जागर्मि, जागृवः, जागृमः । लिटि तिपि णलि उषविदेति वैकल्पिके आम्-प्रत्यये पूर्ववत् प्रक्रियया जागराञ्चकार/जागराम्बभूव/जागरामास इत्यादीनि रूपाणि जायन्ते । आमभावे णलि- जजागार । अतुसि तु-

**जाग्रोऽविचिण्णल्ङित्सु ७।३।८५।**

**जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन्वृद्धिविषये, प्रतिषेधविषये च । जजागरतुः । जजागरुः । जागरिता । जागरिष्यति । अजागः । अजागृताम् । अभ्यस्तत्वाज् जुस् च ।**

जागृ इत्येतस्य अङ्गस्य गुणो भवति वि, चिण्, णल्, ङित्, इत्येतेभ्यो भिन्ने वृद्धिविषये, प्रतिषेधविषये चेत्यर्थः । वृद्धिविषये प्रतिषेधविषये च स्यादिति आशयेन जागृधातोरयं गुण आरभ्यते । तस्मिन् कृते या अत उपधाया इति वृद्धिः प्राप्ता सा न भवति । अनेन कित्वेऽपि गुणे- जजागरतुः, जजागरुः इत्यादि । लङि झौ, अन्तादेशं बाधित्वा अभ्यस्तत्वात् सिजभ्यस्तेति जुसि 'अजागृ+उस्' इत्यवस्थायाम्-

**जुसि च ७।३।८३।**

**अजादौ जुसि इगन्ताङ्गस्य गुणः स्यात् । अजागरुः । अजादौ किम् ? जागृयुः । आशिषि तु जागर्यात् ।**

**जागर्यास्ताम् । जागर्यासुः । अजागरीत् । दरिद्रा दुर्गतौ । दरिद्राति ।**

अनेन सूत्रेण गुणे रपरत्वे- अजागरुः । विधिलिङि यासुटो ङित्वाद् गुणाभावे- जागृयात्, जागृयाताम् । झौ- झेर्जुसि, यासुटि, सलोपे 'जागृ या+उस्' इत्यवस्थायाम् उस्यपदान्तादिति पररूपे 'जागृ युस्' इत्यवस्थायां जुसौ अजादित्वाभावाद् गुणाभावे- जागृयुः । आशीर्लिङि किदाशिषीति यासुटः कित्वाद् 'जाग्रोऽविचिण्णल्ङित्सु' इत्यनेन गुणो विधीयते । लुङि तिपि पूर्ववत् 'अजागृ+इस्+ईत्' इत्यवस्थायां यणं बाधित्वा सार्वधातुकेति गुणे प्राप्ते, तं बाधित्वा सिचि वृद्धिरिति वृद्धौ प्राप्तायाम्, तां बाधित्वा जाग्रोऽविचिण्णल्ङित्सु इति गुणे रपरत्वे कृते 'अजागर् इस् ईत्' इत्यवस्थायाम्, वदव्रजेति वृद्धौ प्राप्तायाम्, नेटीति तन्निषेधे, अतो हलादेरिति सूत्रं बाधित्वा अतो ल्रान्तस्येति वृद्धौ प्राप्तायाम्, ह्यमन्तेति निषेधे, सिचः सलोपे, सवर्णदीर्घे- अजागरीत् ।

आदन्तोऽनेकाचो दरिद्रा-धातुर्दुर्गत्यर्थे वर्तते (सेट्, अकर्मकः, परस्मैपदी), दुर्गतिश्च धनहीनीभवनम् । लटि, तिपि- दरिद्राति । तसि तु-

**इद्दरिद्रस्य ६।४।११४।**

**दरिद्रातेरिकारः स्याद्धलादौ क्ङिति सार्वधातुके । दरिद्रितः ।**

दरिद्रा-धातोराकारस्य स्थाने इकारादेशो भवति हलादौ सार्वधातुके किति ङिति च प्रत्यये परे । अनेन आकारस्य इत्वे- दरिद्रितः । झौ जक्षित्यादित्वाद् अभ्यस्तत्वाद् अन्तादेशं बाधित्वा अदभ्यस्तादिति अदादेशे कृते 'दरिद्रा+अति' इति जाते-

**श्नाभ्यस्तयोरातः ६।४।११२।**

**श्नाऽभ्यस्तयोरातो लोपः स्यात् क्ङिति सार्वधातुके । दरिद्रति । अनेकाच्त्वादाम् । दरिद्राञ्चकार । 'आत औ णलः' इत्यत्र 'ओ' इत्येव सिद्धे 'औ' विधानं दरिद्रातेरालोपे कृते श्रवणार्थम् अत एव ज्ञापकादाम्नेत्येके । ददरिद्रौ । (दरिद्रातेरार्द्धधातुके विवक्षिते आलोपो वाच्यः । लुङि वा) (सनि, ण्वुलि, ल्युटि च न) दरिद्रिता । अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । दरिद्रियात् । दरिद्र्यात् । अदरिद्रीत् । पक्षे-इट्सकौ । अदरिद्रासीत् । चकासृ दीप्तौ । चकास्ति । चकास्तः । चकासति । चकासाञ्चकार । चकासिता । चकास्तु । 'धि चे'ति सलोपः सिच एवेत्येके । तन्मते-चकाद्धि । 'चकाधि' इत्येव तु भाष्यम् ।**

श्ना-विकरणस्य, अभ्यस्तस्य च आकारस्य लोपो भवति सार्वधातुके किति ङिति च प्रत्यये परे । अनेन सूत्रेण आकारलोपे- दरिद्रति । दरिद्रासि, दरिद्रिथः, दरिद्रिथ । दरिद्रामि, दरिद्रिवः, दरिद्रिमः । लिटि अनेकाच्त्वात् कास्यनेकाच इति आमि पूर्ववद् 'दरिद्राञ्चकार' इत्यादि । आमभावपक्षस्वीकर्तॄणां मते तु आर्धधातुकविवक्षायाम् धातोराकारलोपे, लिटस्तिपि, णलि, तस्य 'आत औ णलः' इति औकारादेशे, अनेकाज्हलादित्वात् प्रथमस्यैकाचो द्वित्वे- ददरिद्रौ । लुट्याद्यार्धधातुकलकारेषु आतो लोपः, लुङि

तु 'लुङि वा' इत्यनेन आतो लुग्विकल्पः । लुङि तिपि आल्लोपपक्षे पूर्ववत्प्रक्रियया- अदरिद्रीत्, आल्लोपाभावे तु यमरमनमातामिति इट्सकौ पूर्ववत्प्रक्रियया- अदरिद्रासीत् ।

ऋदिदनेकाच्च चकासृ (चकास्) इति धातुर्दीप्त्यर्थकः, सेट्, अकर्मकः, परस्मैपदी च वर्तते । लटि झौ जक्षित्यादित्वाद् अभ्यस्तत्वेन झकारस्य अदादेशो बोध्यः । लिटि अनेकाच्त्वादामि । लोटि, सिपि, शपि, शपो लुकि, सेर्हौ, हेर्धिभावे 'चकास्+धि' इत्यवस्थायां 'धि च' इत्यस्य प्रवृत्तिवेलायां मतान्तरेण पक्षद्वयं स्वीक्रियते । धि चेति सिच एव सलोप इति पक्षे झस्परत्वात् सकारस्य जश्त्वेन दकारे- चकाद्धि इति तेषां मते सिद्ध्यति । सिद्धान्तस्तु सलोप एव, तेन 'चकाधि' इति रूपम् ।

**तिप्यनस्तेः ८।२।७३।**

**पदान्तस्य सस्य दः स्यात्तिपि, नत्वस्तेः । अचकात् । अचकाद् । अचकास्ताम् । अचकासुः ।**

तिपि परे सति अस्-धातुभिन्नस्य पदान्तस्य सकारस्य स्थाने अनेन सूत्रेण दकारादेशो विधीयते । चकास्-धातोर्लङि, अटि, तिपि, शपि, शपो लुकि, इलोपे 'अचकास्+त्' इत्यवस्थायां हल्ङ्यादिलोपे 'अचकास्' इति जाते, ससजुषोरिति प्राप्तं रुत्वं बाधित्वा प्रत्ययलक्षणमाश्रित्य अनेन सकारस्य दत्वे, अवसाने चर्त्वविकल्पे- अचकात्/अचकाद् इति । अभ्यस्तत्वाद् झौ जुस्भावो बोध्यः । सिपि 'अचकास्+स्' इत्यत्र हल्ङ्यादिलोपे 'अचकास्' इत्यवस्थायाम्-

**सिपि धातो रुर्वा ८।२।७४।**

**पदान्तस्य धातोः सस्य रुर्वा स्यात्सिपि । पक्षे दः । अचकाः । अचकात् । अचकाद् ।**

पूर्वसूत्रेण प्राप्तं दत्वं प्रबाध्य अनेन सूत्रेण वैकल्पिके रुत्वे- अचकाः, पक्षे बाधकाभावे सकारस्य दत्वे, चर्त्वविकल्पे- अचकात्/अचकाद् ।

**शासु अनुशिष्टौ । शास्ति ।**

उदितः शासु (शास्) इति धातुरनुशिष्टार्थकः, सेट्, सकर्मकः, परस्मैपदी वर्तते । लटि, तिपि, शपि, शपो लुकि- शास्ति । तसि अपित्सार्वधातुकत्वाद् ङित्वे-

**शास इदङ्हलोः ६।४।३४।**

**शास उपधाया इत्स्यादङि, हलादौ क्ङिति च । 'शासिवसी'ति षः । ष्टुत्वम् । शिष्टः । शासति । शशास । शशासतुः । शास्तु, शिष्टात् । शिष्टाम् । शासतु ।**

शास्-धातोरुपधायाः स्थाने इकारादेशो भवति अङि परे, हलादौ किति ङिति च प्रत्यये परेऽपीत्यर्थः । अनेन सूत्रेण उपधाया आकारस्य इत्वे कृते 'शिस्+तस्' इति जाते, इणः परत्वात् 'शासिवसिघसीनां च' इत्यनेन सकारस्य षत्वे- शिष्टः । झौ जक्षित्यादित्वाद् अभ्यस्तसंज्ञायां झस्य अदादेशे- शासति । आशिष्यर्थे लोटि तुह्योस्तातङ्पक्षे ङित्वादनेन आकारस्य इत्वम्, सस्य च षादेशः, तस्य योगे तकारस्य च ष्टुत्वेन टकारः । विध्यर्थे, तातङभावाशिषि च सिपि तु-

**शा हौ ६।४।३५।**

**शास्तेः शादेशः स्याद्धौ परे । तस्याऽऽभीयत्वेनासिद्धत्वाद्धेर्धिः । शाधि । अशात्/अशाद् । अशिष्टाम् । अशासुः । अशाः । अशात् । शिष्यात् ।**

हौ परे शास्-धातोरङ्गस्य शा इत्यादेशो भवतीत्यर्थः । शादेशस्य आभीयत्वेन 'असिद्धवदत्राभात्' इत्यनेन असिद्धत्वाद् 'हुझल्भ्यो हेर्धिः' इत्यनेन हलन्तत्वस्यैव दर्शनाद् हेर्ध्यादिशो भवतीति अत्र स्मर्तव्यम् । लङि चकास्-धातुवदेव प्रक्रिया अत्रापि ज्ञेया । लुङि तु विशेषः-

**सर्तिशास्त्यर्तिभ्यश्च ३।१।५६।**

**एभ्यश्चेरङ् स्यात्कर्त्रर्थे लुङि । अशिषत् । अशासिष्यत् ।**

कर्तरि अर्थे विहिते लुङि परे सृ, शास्, ऋ, इत्येतेभ्यो धातुभ्यः परस्य च्लि-प्रत्ययस्य स्थाने अङ् इत्यादेशो भवतीति सूत्रार्थः । औत्सर्गिकं सिचं बाधित्वा अनेन च्लेः स्थाने अङादेशे कृते 'अशास् अ त्' इत्यवस्थायाम् अङो ङित्वेन शास उपधाया पूर्ववद् इत्वे, ततः सस्य षत्वे च- अशिषत् ।

इति परस्मैपदप्रक्रिया

अदादिगणपठितानां परस्मैपदिधातूनां रूपसिद्धिप्रक्रिया अत्र समाप्ता ।

अथाऽऽत्मनेपदप्रक्रिया । शीङ् स्वप्ने ।

अथ अदादिगणपठितानाम् आत्मनेपदिधातूनां रूपसिद्धिप्रक्रिया प्रारभ्यते । आत्मनेपदसंज्ञकानां लादेशानां तङां कस्यापि पित्वाभावात् सर्वत्रैव ङित्वमिति स्मर्तव्यो विषयः । शीङ्-धातोर्ङकार इत् वर्तते, तेन धातुरयम् अनुदात्तङितेत्यादिना सूत्रेण आत्मनेपदी । स्वप्ने = शयनेऽर्थे विद्यमानोऽयं धातुः सेट्, अकर्मकश्चास्ति । अनुबन्धविनिर्मुक्तात् शीधातोः कर्तरि लटि, लस्य स्थाने आत्मनेपदसंज्ञके त इत्यादेशे, सार्वधातुकत्वेन शपि, अदादित्वात् शपो लुकि जाते 'शी+त' इति जाते, त इत्यस्य अपित्सार्वधातुकत्वेन ङित्वात् सार्वधातुकेति प्राप्तस्य गुणस्य क्ङिति चेति निषेधे सिद्धे गुणविधानार्थं निषेधाद् बलवत्तरं सूत्रमाह-

**शीङः सार्वधातुके गुणः ७।४।२१।**

**शीङो गुणः स्यात्सार्वधातुके । 'क्ङिति चे'त्यस्यापवादः । शेते । शयाते ।**

सार्वधातुकलकारेषु सत्यपि ङित्वे निषेधं बाधित्वा अनेन विशेषविधानेन शीङ्धातोरिकः स्थाने गुणो विधीयते । अनेन गुणे, टेरेत्वे- शेते । आतामि गुणोऽयादेशश्च । बहुवचने लस्य झादेशे, झोऽन्तादेशं बाधित्वा 'आत्मनेपदेष्वनतः' इति अदादेशे, अनेन गुणे, टेरेत्वे 'शे+अते' इत्यवस्थायाम्-

**शीङो रुट् ७।१।६।**

**शीङः परस्य झादेशस्यातो रुट् । शेरते । शेषे । शयाथे । शेध्वे । शये । शेवहे । शेमहे । शिश्ये । शयिता ।**

**शयिष्यते । शेताम् । अशेत । अशयाताम् । अशेरत । शयीत । शयीयाताम् । शयीरन् । शयिषीष्ट । अशयिष्ट । अशयिष्यत । इङ् अध्ययने । इङिकावध्युपसर्गतो न व्यभिचरतः । अधीते । अधीयाते । अधीयते ।**

शीङ्-धातोः परस्य झस्य स्थाने आदिश्यमानस्य अत् इत्यस्य रुट् (र्) इत्यागमो भवतीति सूत्रार्थः । रुट उकारटकारौ इतौ स्तः, टित्वादाद्यवयवत्वम् । अनेन रुडागमेऽनुबन्धलोपे- शेरते । शेषे, शयाथे, शेध्वे । शये, शेवहे, शेमहे । लिटि- तिपः स्थाने एशादेशे, द्वित्वादिकार्ये 'शिशी+ए' इत्यवस्थायाम् इयङादेशं बाधित्वा 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि- शिश्ये, शिश्याते, शिश्यिरे इत्यादि । लुटि, लृटि च इटि, सार्वधातुकेति गुणे, अयादेशे- शयिता, शयिष्यते इत्यादि । लोटि- आमेतः - शेताम्, शयाताम्, शेरताम् इत्यादि । लङि- पूर्वसूत्रेण गुणे- अशेत, अशयाताम्, अशेरत । विधिलिङि सीयुटि कृते- शयीत, शयीयाताम्, शयीरन् इत्यादि । आशीर्लिङि सीयुटि, सुटि, इटि च- शयिषीष्ट, शयिषीयास्ताम्, शयिषीरन् । ध्वमि तु- विभाषेटः - शयिषीढ्वम्/शयिषीध्वम् । लुङि- अशयिष्ट, अशयिषाताम्, अशयिषत इत्यादि । लृङि- अशयिष्यत, अशयिष्येताम्, अशयिष्यन्त इत्यादीनि रूपाणि जायन्ते ।

अध्ययनार्थक इङ् (इ) इति धातुरनिट्, सकर्मकः, आत्मनेपदी वर्तते । इङ्-धातुः, इक्-धातुश्च अधि इति उपसर्गपूर्वकेन एव (अधि+इ, इत्येव रूपेण) प्रयुज्येते, तमुपसर्ग विहाय एतौ धातू नैव प्रयुज्येते इत्यर्थः । अनुबन्धविनिर्मुक्ताद् अध्युपसर्गपूर्वकाद् अध्ययनार्थकाद् इ-धातोर्लटि, ते, शपो लुकि, ङित्वाद् गुणनिषेधे, टेरेत्वे, सवर्णदीर्घे- अधीते । आतामादौ अजादिप्रत्यये परे इकारस्य इयङादेशे, ततो दीर्घे- अधीयाते, अधीयते इत्यादीनि रूपाणि जायन्ते । लिटि- अधि इ+ल्, इत्यवस्थायाम्-

**गाङ् लिटि ६।४।६९।**

**इङो गाङ् स्याल्लिटि । अधिजगे । अध्येता । अध्येष्यते । अधीताम् । अधीष्व । अधीयाथाम् । अधीध्वम् । अध्ययै । अध्ययावहै । अध्ययामहै । अध्यैत । अध्यैयाताम् । अध्यैयत । अध्यैथाः । अध्यैयाथाम् । अध्यैध्वम् । अध्यैयि । अध्यैवहि । अध्यैमहि । अधीयीत । अधीयीयाताम् । अधीयीरन् । अधीयीध्वम् । अध्येषीष्ट ।**

लिटि परे इङ्-धातोः स्थाने गाङ् इत्यादेशो भवतीति सूत्रार्थः । गाङो ङकार इत् । अनेन गाङादेशे, लस्य ते, तस्य एशि, धातोर्द्वित्वे, अभ्यासकार्ये 'अधि ज गा+ए' इति जाते 'आतो लोपः' इत्यनेन आलोपे- अधिजगे, अधिजगाते, अधिजगिरे इत्यादि । लङादिषु अडाडौ आगमौ धातोः पूर्व भवति न तु उपसर्गादिति अत्रापि स्मर्तव्यम् । लङि- आडागमे, आटश्चेति वृद्धौ, ततो यणि- अध्यैत, अध्यैयाताम्, अध्यैयत इत्यादि । विधिलिङि- सीयुटि, इयङि च- अधीयीत, अधीयीयाताम्, अधीयीरन् इत्यादि । आशीर्लिङि- अध्येषीष्ट इत्यादि । लुङि- अधि इ+ल्, इति स्थिते-

**विभाषा लुङ्लृङोः २।४।५०।**

**इणो गाङ् ।**

लुङि, लृङि च परे इङ्-धातोः स्थाने विकल्पेन गाङ् इत्यादेशो भवतीति सूत्रार्थः । अनेन सूत्रेण वैकल्पिके गाङादेशे, गाङोऽजादित्वाद् अडागमे, लस्य ते, च्लौ, च्लेः सिजादेशे, इण्णिषेधे 'अधि अगा स् त' इति जाते-

**गाङ्कुटादिभ्योऽञ्णिन्ङित् १।२।१**

**गाङादेशात्कुटादिभ्यश्चाऽञ्णितः प्रत्ययाः ङितः स्युः ।**

आदिश्यमानाद् गाङ्-धातोः, कुटादिभ्यो धातुभ्यश्च परस्य ञित्-णित्-भिन्नानां प्रत्ययानां ङिद्वद्भावो भवतीत्यर्थः । अनेन सिचो ङित्वे-

**घु-मा-स्था-गा-पा-जहाति-सां हलि ६।४।६६।**

**एषामात ईत्स्याद्धलादौ क्ङित्यार्द्धधातुके । अध्यगीष्ट । अध्यैष्ट । अध्यगीष्यत । अध्यैष्यत ।**

घुसंज्ञकानां धातूनाम्, मा, स्था, गा, पा, ओहाक् (हा), षो (सा) इत्येतेषां धातूनाञ्च आकारस्य स्थाने ईकारादेशो भवति, आर्धधातुकसंज्ञके हलादौ किति ङिति च प्रत्यये परे इति सूत्रार्थः । अनेन सूत्रेण आकारस्य ईत्वे 'अधि गी स् त' इति जाते, यणि, सस्य षत्वे, तकारस्य ष्टुत्वे- अध्यगीष्ट, अध्यगीषाताम्, अध्यगीषत इत्यादि । गाङादेशाभावपक्षे अजादित्वाद् आटि, वृद्धौ, पूर्ववत्कार्ये- अध्यैष्ट, अध्यैषाताम्, अध्यैषत इत्यादि । लृङि- गाङ्पक्षे- अध्यगीष्यत इत्यादि, गाङभावे- अध्यैष्यत इत्यादि बोध्यम् ।

आस उपवेशने आस्ते । 'दयायासश्चे'त्याम् । आसाञ्चक्रे । आस्स्व । आध्वम् । आसिष्ट । आङः शासु इच्छायाम् । आशास्ते । आशासाते । आशासे ।

उपवेशनार्थक आस (आस्) इति धातुः सेट्, अकर्मकः, आत्मनेपदी च वर्तते । लटि पूर्ववत्प्रक्रियया- आस्ते, आसाते, आसते इत्यादि । लिटि- 'दयायासश्च' इत्यनेन आमि पूर्ववत् - आसाञ्चक्रे इत्यादि । शेषलकारेषु विशेषो नास्ति ।

**दुह प्रपूरणे । 'दादेधातोर्घः' इति हस्य घः ।**

प्रपूरणार्थकस्य दुह इति धातोर्हकारोत्तरवर्ती अकारः स्वरितः, अनुनासिकश्च, अतोऽयं स्वरितेद् धातुः (अनिट्, सकर्मकः) । स्वरितेत्वाद् अस्माद् धातोः 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्यनेन कर्तृगामिनि क्रियाफले आत्मनेपदं भवति, परगामिनि क्रियाफले तु 'शेषात्कर्तरि परस्मैपदम्' इत्यनेन परस्मैपदं भवति । तेन धातुरयम् उभयपदी वर्तते ।

**झषस्तथोर्धोऽधः । इति दोग्धि । दुग्धः । दुहन्ति । 'एकाचो वशो भषि'ति दकारस्य धकारः । धोक्षि ।**

**दुग्धेः । दुग्ध । दोह्मि । दुह्वः । दुह्मः । दुग्धे । दुहाते । दुहते । धुक्षे । दुहाथे । धुग्ध्वे । दुहे । दुह्वहे । दुह्महे । दुदोह । दुदुहे । दोग्धा । धोक्ष्यति । धोक्ष्यते । दोग्धु । दुग्धात् । दुग्धाम् । दुहन्तु । दुग्धि । दुग्धात् । दुग्धम् । दुग्ध । दोहानि । दुग्धाम् । दुहाताम् । दुहताम् । धुक्ष्व । दुहाथाम् । धुग्ध्वम् । दोहै । दोहावहै । दोहामहै । अधोक् । अधोग् । अदुग्धाम् । अदुहन् । अदोहम् । अदुग्ध । अदुहाताम् । अदुहत । अदुग्धाः । अदुहाथाम् । अधुग्ध्वम् । दुह्यात् । दुहीत । 'लिङ्सिचावात्मनेपदेषु' । धुक्षीष्ट । 'शल इगुपधे'ति क्सः । अधुक्षत् ।**

लटि क्रियाफलेऽकर्तृगे परस्मैपदे- तिपि, शपि, शप्लुकि कृते 'दुह्+ति', लघूपधगुणे 'दोह्+ति', झल्परकत्वाद् 'दादेर्धातोर्घः' इत्यनेन हस्य घत्वे, 'झषस्तथोर्धोऽधः' इत्यनेन तकारस्य धत्वे, पूर्वधकारस्य जश्त्वे- दोग्धि, दुग्धः, दुहन्ति । सिपि एकाच इति भष्भावे च- धोक्षि, दुग्धः, दुग्ध । होह्मि, दुह्वः, दुह्मः ।

क्रियाफले कर्तृगे तु आत्मनेपदे- ङित्वात् सर्वत्र गुणनिषेधे- दुग्धे, दुहाते, दुहते । धुक्षे, दुहाथे, धुग्ध्वे । दुहे, दुह्वहे, दुह्महे ।

लिटि- दुदोह । दुदुहे । लुटि सिपि- दोग्धासि । दोग्धासे । लृटि- सर्वत्रैव भष्भावे- धोक्ष्यति । धोक्ष्यते । लोटि- परस्मैपदे- दोग्धु/दुग्धात्, दुग्धाम्, दुहन्तु । दुग्धि/दुग्धात्, दुग्धम्, दुग्ध । दोहानि, दोहाव, दोहाम । आत्मनेपदे- दुग्धाम्, दुहाताम्, दुहताम् । धुक्ष्व, दुहाथाम्, धुग्ध्वम् । दोहै, दोहावहै, दोहामहै । लङि- परस्मैपदे- अधोक्, अदुग्धाम्, अदुहन् । अधोक्, अदुग्धम्, अदुग्ध । अदोहम्, अदुह्व, अदुह्म । आत्मनेपदे- अदुग्ध, अदुहाताम्, अदुहत । अदुग्धाः, अदुहाथाम्, अधुग्ध्वम् । अदुहि, अदुह्वहि, अदुह्महि । विधिलिङि- परस्मैपदे- दुह्यात्, दुह्याताम्, दुह्युः इत्यादि । आत्मनेपदे- दुहीत, दुहीयाताम्, दुहीरन् इत्यादि । आशीर्लिङि- परस्मैपदे- दुह्यात्, दुह्यास्ताम्, दुह्यासुः इत्यादि । आत्मनेपदे- सीयुटि, सुटि च 'दुह् सीय् स्+त' इत्यवस्थायाम् अनिट्त्वाद् इडभावे, लघूपधगुणे प्राप्ते 'लिङ्सिचावात्मनेपदेषु' इति कित्वेन गुणनिषेधे, घत्वे, भाष्भावे, सन्धिकार्ये- धुक्षीष्ट, धुक्षीयास्ताम्, धुक्षीरन् इत्यादि । लुङि- परस्मैपदे- अटि, तिपि, इलोपे, च्लौ 'अ दुह् च्लि त्' इत्यवस्थायां प्राप्तं सिचं बाधित्वा 'शल इगुपधादनिटः क्सः' इत्यनेन क्सादेशे 'अ दुह् स त्' इत्यवस्थायाम्-

**लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ७।३।७३।**

**एषां क्सस्य लुग्वा, दन्त्ये तङि । अधुक्षत-अदुग्ध ।**

दुह्, दिह्, लिह्, गुह्, इत्येतेषां धातुरूपाङ्गानाम् (एतत्सम्बन्धी) क्सप्रत्ययस्य लुग् भवति, दन्तस्थानिकवर्णादौ तङि परे इत्यर्थः । अनेन क्सस्य लुकि, घत्वादिकार्ये- अदुग्ध, पक्षान्तरे घत्वभष्भावादिकार्ये- अधुक्षत इति । आतामि- अ दुह् स आताम्, इत्यत्र 'आतो ङितः' इत्यनेन इयादेशे प्राप्ते-

**क्सस्याचि ७।३।७२।**

**अजादौ तङि क्सस्य लोपः स्यात् । अधुक्षाताम् । अधुक्षन्त । अधुक्षथाः-अदुग्धाः । अधुक्षाथाम् । अधुक्षध्वम्-अधुग्ध्वम् । अधुक्षि । अधुक्षावहि-अदुह्वहि । अधुक्षामहि । अधोक्ष्यत् । अधोक्ष्यत ।**

**ब्रूञ् व्यक्तायां वाचि ।**

'अलोऽन्त्यस्य' इति सहकारेण अनेन सूत्रेण क्सस्य अन्त्यस्यालोऽकारस्य लोपे, पूर्ववत्कार्ये- अधुक्षाताम्, अधुक्षन्त । अदुग्धाः/अधुक्षथाः, अधुक्षाथाम्, अधुग्ध्वम् । अधुक्षि, अदुह्वहि/अधुक्षावहि, अधुक्षामहि । लृङि- परस्मैपदे- अधोक्ष्यत्, अधोक्ष्यताम्, अधोक्ष्यन् इत्यादि । आत्मनेपदे- अधोक्ष्यत, अधोक्ष्येताम्, अधोक्ष्यन्त इत्यादि ।

ब्रूञ्-धातुर्व्यक्तायां वाचि अर्थे वर्तते (आर्धधातुकेऽनिट्, सकर्मकः, ञित्वादुभयपदी) । तत्र लटि क्रियाफलेऽकर्तृगे परस्मैपदे ब्रू ति इत्यवस्थायां शपो लुकि कृते-

**ब्रुवः पञ्चानामादित आहो ब्रुवः ३।४।८४।**

**ब्रुवो लटस्तिबादीनां पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्चाऽऽहादेशः । अकार उच्चारणार्थः । आह । आहतुः । आहुः ।**

ब्रू-धातोर्विहितानां लडादेशानाम् तिप्, तस्, झि, सिप्, थस् इत्येतेषां पञ्चानां स्थाने क्रमाद् णल्, अतुस्, उस्, थल्, अथुस् इत्येते पञ्च विकल्पेन आदिश्यन्ते, ब्रू इति अङ्गस्य स्थाने आह् इत्यादेशश्च भवतीति सूत्रार्थः । अनेन ब्रू-धातोः स्थाने आह् इत्यादेशे तिपः स्थाने णलादेशश्च कृतेऽनुबन्धलोपे- आह्+अ, आह, आहतुः, आहुः । सिपि आह्+थ, इति कृते-

**आहस्थः ८।२।३५।**

**चर्त्वम् । आत्थ । आहथुः ।**

झलि परे आह् इत्यस्य स्थाने थकारादेशो भवतीत्यर्थः । अलोऽन्त्यस्येत्यनेन अन्त्यस्यालो हस्य स्थाने थादेशो भवति । अनेन हस्य थकारे 'आथ् थ' इति जाते, पूर्वथकारस्य चत्वेन तकारे- आत्थ, आहथुः । णलादीनामभावपक्षे तु-

**ब्रुव ईट् ७।३।९३।**

**ब्रुवः परस्य हलादेः पित ईट् स्यात् । ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रूते । ब्रुवाते । ब्रुवते ।**

तिपि, शपो लुकि, अनेन ईटि, गुणेऽवादेशे- ब्रवीति, गुणनिषेधे- ब्रूतः, झोऽन्तादेशे उवङि- ब्रुवन्ति, इत्यादि । आत्मनेपदे- गुणनिषेधे- ब्रूते, अजादिषु उवङि- ब्रुवाते, ब्रुवते, इत्यादि । लिटि- ब्रू+ल् इति जाते-

**ब्रुवो वचिः २।४।५३।**

**ब्रुवो वच्यादेशः स्यादार्द्धधातुके । उवाच । ऊचतुः । ऊचुः । उवचिथ-उवक्थ । ऊचे । वक्ता ।**

**वक्ष्यति-वक्ष्यते । ब्रवीतु । ब्रूतात् । ब्रूताम् । ब्रुवन्तु । ब्रूहि-ब्रूतात् । ब्रूतम् । ब्रूत । ब्रवाणि । ब्रवाव । ब्रवाम । ब्रूताम् । ब्रवै । अब्रवीत् । अब्रूताम् । अब्रूत । ब्रूयात् । ब्रुवीत । उच्यात् । वक्षीक्ष्ट । अवोचत् । अवोचत । अवक्ष्यत् ।**

आर्धधातुकस्य विवक्षायां ब्रू-धातोः स्थाने वचि (वच्) इत्यादेशो भवतीति सूत्रार्थः । अनेन ब्रू इत्यस्य वच् इत्यादेशे, ततो तिपि, णलि 'वच्+अ', धातोर्द्वित्वादिकार्ये, अभ्यासस्य 'लिट्यभ्यासस्योभयेषाम्' इत्यनेन सम्प्रसारणे, पूर्वरूपे, अनभ्यासस्य उपधावृद्धौ- उवाच । अतुसि तु द्वित्वात् प्रागेव 'वचिस्वपी'ति सम्प्रसारणे, पूर्वरूपे, ततो द्वित्वादिकार्ये- ऊचतुः, ऊचुः । थलि वैकल्पिके इटि- उवचिथ, इडभावे चो कुरिति कुत्वे- उवक्थ, इत्यादि । आत्मनेपदे- प्रागेव सम्प्रसारणे- ऊचे, ऊचाते, ऊचिरे इत्यादि । लोटि-ब्रवीतु/ब्रूयात्, ब्रूताम्, ब्रुवन्तु । ब्रूहि/ब्रूतात्, ब्रूतम्, ब्रूत । ब्रवाणि, ब्रवाव, ब्रवाम । आत्मनेपदे- ब्रूताम्, ब्रुवाताम्, ब्रुवताम् इत्यादि । लङि- अब्रवीत् । अब्रूत । अजादौ उवङादेशः । विधिलिङि- ब्रूयात् । ब्रुवीत । आशीर्लिङि- परस्मैपदे यासुटः कित्वाद् वाचिस्वपीति सम्प्रसारणे- उच्यात् इत्यादि । आत्मनेपदे- वक्षीष्ट, वक्षीयास्ताम्, वक्षीरन् इत्यादि । लुङि- वच्यादेशादिकार्ये कृते 'अ वच् च्लि त्' इत्यवस्थायाम् 'अस्यतिवक्तिख्यातिभ्योऽङ्' इत्यनेन च्लेरङि 'अ वच् अ त्' इति जाते 'वच उम्' इत्यनेन वच उमागमे, मित्वाद् अन्त्यादचः परावयवत्वे 'अ व उच् अ त्' इति जाते, गुणे- अवोचत्, अवोचताम्, अवोचन् इत्यादि । आत्मनेपदे- पूर्ववत्प्रक्रियया अवोचत, अवोचताम्, अवोचन्त इत्यादि । लृङि- अवक्ष्यत् । अवक्ष्यत ।

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) श्नसोरल्लोपः ।

(ख) ब्रवः पञ्चानामादित आहो ब्रुवः ।

(ग) घ्वसोरेद्धावभ्यासलोपश्च ।

(घ) अस्यतिवक्तिख्यातिभ्योऽङ् ।

(ङ) जाग्रोऽविचिण्णल्ङित्सु ।

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) जक्षुः इति रूपं कस्माद् धातोः कस्यां विभक्तौ निष्पद्यते ?

(ख) दुह्-धातुः कस्मिन्नर्थे वर्तते ?

(ग) केषां सूत्राणम् आभीयसंज्ञा ?

(घ) आशाञ्चक्रे इत्यत्र आम्विधायकं सूत्रं किम् ?

(ङ) रुदादयः धातवः के ?

(च) इणः गा आदेशः कुत्र विधीयते ?

(छ) ब्रुवः केषां स्थाने णलादयः आदेशाः विधीयन्ते ?

(ज) नन्द्राः संयोगादयः इति सूत्रं किं कार्यं करोति ?

(झ) शास्-धातोर्लटि तसि किं रूपम् ?

(ञ) शीङ् स्वप्ने धातोङित्परकत्वेऽपि कुत्र कुत्र केन गुणो भवति ?

३. **सोदाहरणं सूत्राणामर्थं लिखत**

(क) लुङ्सनोर्घस्लृ ।

(ख) अस्तेर्भूः ।

(ग) ब्रुवो वचि ।

(घ) इणो गा लुङि ।

(ङ) अदभ्यस्तात् ।

४. **दुह्-धातोः कर्तरि लृटि उभयोः पदयोर्निष्पन्नानि रूपाणि लिखत ।**

५. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) यन्ति (ख) जागर्ति (ग) शेरते (घ) आह

(ङ) आसीत् (च) अध्यगीष्ट

६. **निर्दिष्टधातूनां रूपाणि दर्शयत**

(क) इण्धातोर्लुङि (ख) दरिद्राधातोर्लोटि (ग) रुद्धातोर्लटि णलाद्यादेशपक्षे

(घ) अस्धातोर्लोटि (ङ) गत्यर्थकेण्धातोर्लटि (च) जागृधातोर्लटि

(छ) शीङ् धातोर्लटि

७. **अदादिगणस्थप्रयोगवैशिष्ट्यं दर्शयत ।**

८. **इङ्इकौ कंमुपसर्गं न व्यभिचरत । तेन च को रूपभेदः ? इति लिखत ।**

९. **लुग्वा दुहदिह.... इत्यादिसूत्रस्य प्रयोगस्थलं तत्कार्यञ्च प्रदर्शयत ।**

१०. **पदानां वाक्ये प्रयोगं निदर्शयत**

(क) अचकाः (ख) अवोचत् (ग) अगुः (घ) शये (ङ) अध्यगीष्ट

## त्रयोदशः पाठः

# अथ जुहोत्यादिप्रकरणम्

जुहोत्यादिप्रकरणे श्लुविकरणो भवति । श्लु इति लोपस्य संज्ञा । तेनात्र शपः श्लुशब्देन लोपो भवति । लोपे सत्यपि श्लौ इत्यादिसूत्रेण विधीयमानानि द्वित्वादिकार्याणि भवन्ति । अत्र प्रत्ययस्य लुक्श्लुलुपः इति सूत्रनिर्देशात् श्लुसंज्ञायां प्रत्ययलोपे प्रत्ययलक्षणम् इति प्राप्तं प्रत्ययलक्षणकार्यं तु न लुमताङ्गस्य इति सूत्रेण निषिद्ध्यते । अतः श्लुकरणात् शपो न स्थानिवद्भावः, तेन लुप्तस्य शपः शित्व-पित्वबलात् प्रवर्त्यमानानि कार्याणि अत्र न जायन्ते । एवमेव सार्वधातुकलकारेषु शपः श्लौ धातोर्द्वित्वे प्रथमस्य अभ्याससंज्ञा, उभयोश्च अभ्यस्तसंज्ञा भवतीति तत्प्रयुक्तकार्याणि विधीयन्ते । तत्र अभ्यस्तत्वाद् झोऽन्तादेशं बाधित्वा अदादेशो भवति ।

हु दानाऽऽदनयोः ।

हु-धातुः दानेऽर्थे अदने (भक्षणे) अर्थे च वर्तते ।

**जुहोत्यादिभ्यः श्लुः २।४।७५।**

**जुहोत्यादिभ्यः परस्य शपः श्लुः स्यात् ।**

जुहोत्यादिगणपठितेभ्यो धातुभ्यो विहितस्य शप्प्रत्ययस्य श्लुर्भवतीति सूत्रार्थः । अनेन श्लु-शब्देन लुप्तत्वाद् वक्ष्यमाणसूत्रेण धातोर्द्वित्वं भवति, शपः स्थानिवत्वञ्च न ।

**श्लौ ६।१।१०**

**धातोर्द्वे स्तः श्लौ । जुहोति । जुहुतः । 'हुश्नुवो'रिति यण् । जुह्वति ।**

श्लौ परे सति धातोर्द्वित्वं भवतीति सूत्रार्थः । हु-धातोर्लटि, तिपि, शपि 'हु अ ति' इत्यवस्थायां पूर्वसूत्रेण शपः श्लौ 'हु ति' इति जाते, अनेन सूत्रेण धातोर्द्वित्वे 'हु हु ति' इत्यवस्थायां द्विरुक्तस्य पूर्वस्य अभ्याससंज्ञायां हस्य कुत्वे 'जु हु ति' इति जाते 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'जुहोति' इति रूपम् । तसि तु ङित्वाद् गुणनिषेधः । झौ तु 'जु हु झि' इत्यवस्थायाम् 'उभे अभ्यस्तम्' इति सूत्रेण अभ्यस्तसंज्ञायां झोऽन्तादेशं बाधित्वा 'अदभ्यस्तात्' इति सूत्रेण झकारस्य अदादेशे 'जु हु अति' इति जाते ङित्वाद् गुणनिषेधे, उवङादेशं बाधित्वा 'हुश्नुवोः सार्वधातुके' इत्यनेन यणि 'जुह्वति' इति सिद्ध्यति । सिबादौ शपः श्लुरेव विशेषः, द्वित्वाभ्यासकार्य-गुण-गुणनिषेधादिकार्याणि तु पूर्ववद् भवन्त्येव । तेन सिबादौ जुहोषि, जुहुथः, जुहुथ, जुहोमि, जुहुवः, जुहुमः इति रूपाणि जायन्ते ।

**भीह्रीभृहुवां श्लुवच्च ३।१।३९।**

**एभ्यो लिट्याम् वा स्यादामि श्लाविव कार्यं च । जुहवाञ्चकार । जुहाव । होता । होष्यति । जुहोतु ।**

**जुहुतात् । जुहुताम् । जुहवतु । हेर्द्धिः । जुहुधि । आटि परत्वाद् गुणः । जुहवानि । अजुहोत् । अजुहुताम् । परत्वाज्जुसि चेति गुणः । अजुहवुः । जुहुयात् । हूयात् । अहौषीत् । अहोष्यत् ।**

लिटि परे सति ञिभी (भी) भये, ह्री लज्जायाम्, डुभृञ् (भृ) धारणपोषणयोः, हु दानादनयोः, इति चतुर्भ्यो धातुभ्य आम्-प्रत्ययो विकल्पेन भवति, अस्मिन् (आमि) श्लौ इव कार्यं च भवतीति सूत्रार्थः । हु-धातोर्लिटि 'हु ल्' इत्यवस्थायाम् अनेन सूत्रेण वैकल्पिके आम्-प्रत्यये तस्य श्लुवद्भावे च 'हु आम् ल्' इति जाते, श्लुवत्वाद् धातोर्द्वित्वे, अभ्यासकार्ये 'जुहु आम् ल्' इति जाते, आर्धधातुकसंज्ञायां गुणे, अवादेशे 'जुहवाम् ल्' इत्यवस्थायाम् 'आमः' इति आमो लुकि, पूर्ववद् लिट्परकस्य कृ-धातोरनुप्रयोगादिकार्ये 'जुहवाञ्चकार/जुहवांचकार' इति । अस्-धातोर्भू-धातोश्चानुप्रयोगे सति पूर्ववत्प्रक्रियया 'जुहवामास, जुहवाम्बभूव/जुहवांबभूव' इति रूपाण्यपि भवन्त्येव । एवं तसादावपि बोध्यम् । आमभावपक्षे तु लिटि, तिपि, णलि, द्वित्वे, अभ्यासकार्ये 'जुहु अ' इत्यवस्थायां णित्वाद् 'अचो ञ्णिति' इत्यनेन वृद्धौ, आवादेशे 'जुहाव' इति सिद्ध्यति । तसि, झौ, थसि, थे च अतुसाद्यादेशानन्तरम् अजादित्वाद् ङित्वेन गुणनिषेधाच्च उवङादेशे जुहुवतुः, जुहुवुः इत्यादीनि रूपाणि जायन्ते । सिपः स्थाने थलि भारद्वाजमतेन इडागमस्य विकल्पनात् पक्षद्वयेऽपि गुणे, इट्पक्षे अवादेशे च 'जुहविथ/जुहोथ' इति । मिपः स्थाने णलि 'णलुत्तमो वा' इति णित्वविकल्पनात् णित्वपक्षे वृद्धौ, णित्वपक्षे च गुणे, आववौ च 'जुहाव/जुहव' इति रूपे । वस्मसौ तु क्र्यादिनियमान्नित्यमेव इटि, उवङादेशे जुहुविव, जुहुविम इति सिद्ध्यतः । हु-धातोर्विध्यर्थे लोटि, सिपि, शपो लुकि, द्वित्वेऽभ्यासकार्ये, सेर्ह्यादेशे, हेरपित्वाद् ङिद्वद्भावे, गुणनिषेधे 'जुहु हि' इत्यवस्थायां 'हुझल्भ्यो हेर्धिः' इत्यनेन हेर्ध्यादेशे 'जुहुधि' इति सिद्ध्यति । आशिषि तु हेर्वैकल्पिके तातङि 'जुहुतात्' इत्यपि सिद्धम् । उत्तमपुरुषे 'आडुत्तमस्य पिच्च' इति आटः पित्वाद् सर्वत्रैव गुणो भवति । लङि- अजुहोत्, अजुहुताम्, झौ- अदादेशं बाधित्वा सिजभ्यस्तेति जुसि, शपः श्लौ, द्वित्वादिकार्ये 'अजुहु+उस्' इत्यवस्थायां यणं बाधित्वा सवर्णदीर्घे प्राप्ते, तं बाधित्वा उवङि प्राप्ते, तं बाधित्वा सार्वधातुकेति गुणे प्राप्ते, ङित्वात् तन्निषेधे, पुनरुवङि प्राप्ते, तं बाधित्वा हुश्नुवोरिति यणि प्राप्ते, तमपि बाधित्वा जुसि चेति गुणे, अवादेशे- अजुहवुः । विधिलिङि- जुहुयात्, जुहुयाताम्, जुहुयुः इत्यादि । आशीर्लिङि- अकृत्सार्वधातुकयोरिति दीर्घे- हूयात्, हूयास्ताम्, हूयासुः इत्यादि । लुङि- सिचि वृद्धिरिति वृद्धौ- अहौषीत् (अश्रौषीत् इतिवत्), अहौष्टाम्, अहौषुः इत्यादि । लृङि- अहोष्यत्, अहोष्यताम्, अहोष्यन् इत्यादि ।

**एवं ञिभी भये । बिभेति ।**

ञिभी (भी) धातुर्भयार्थे वर्तते । भी-धातोर्लटि, तिपि, शपि, शपः श्लौ, धातोर्द्वित्वे, अभ्यासकार्ये 'बिभी+ति' इत्यवस्थायां सार्वधातुकेति गुणे 'बिभेति' इति सिद्ध्यति ।

**भियोऽन्यतरस्याम् ६।४।११५।**

**भिय इद्वा स्याद्धलादौ सार्वधातुके क्ङिति । बिभितः/बिभीतः । 'एरनेकाचो' इति यण् । बिभ्यति । बिभयाञ्चकार । बिभाय । भेता । भेष्यति । बिभेतु/बिभितात्/बिभीतात् । बिभिताम्/बिभीताम् । अबिभेत् । बिभियात्/बिभीयात् । भीयात् । अभैषीत् । अभेष्यत् । ह्री लज्जायाम् । जिह्रेति । जिह्रीतः । जिह्रियति । जिह्रयाञ्चकार । जिह्राय । ह्रेता । ह्रेष्यति । जिह्रेतु जिह्रीयात् । अजिह्रेत् । जिह्रीयात् । ह्रीयात् । अह्रैषीत् । अह्रेष्यत् । पृ- पालनपूरणयोः ।**

भी-धातोः ईकारस्य स्थाने इकारादेशो विकल्पेन भवति, किति ङिति च सार्वधातुकसंज्ञके प्रत्यये परे इत्यर्थः । तसि अनेन वैकल्पिके ह्रस्वे कृते- बिभितः, पक्षान्तरे- बिभीतः । झेर्ङित्वाद् गुणनिषेधानन्तरम् 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि- बिभ्यति । लिटि 'भी ल्' इत्यवस्थायाम् 'भीह्रीभृहुवां श्लुवच्चे'ति वैकल्पिके आम्-प्रत्यये तस्य श्लुवद्भावे च पूर्ववत्प्रक्रियया 'बिभयाञ्चकार' इत्यादि, आमभावे- बिभाय ।

लज्जार्थको ह्री-धातुरनिट्, अकर्मकः, परस्मैपदी च वर्तते । तस्माज्जसि गुणनिषेधे, इयङादेशेन 'जिह्रियति' इति रूपं भवति । लिटि भीधातुवद् आम्विकल्पः ।

पालनेऽर्थे पूरणेऽर्थे च विद्यमानः पृ-धातुः सेट्, सकर्मकः, परस्मैपदी वर्तते ।

**अर्तिपिपर्त्योश्च ७।४।७७।**

**अभ्यासस्य इत्स्यात् श्लौ । पिपर्त्ति ।**

ऋ-धातोः, पृ-धातोश्चाभ्यासस्य स्थाने इकारादेशो भवति श्लौ परे इत्यर्थः । पृ+लट्(ल्), पृ+तिप्(ति), पृ शप्(अ)+ति, पृ+ति, पृ पृ+ति, इत्यवस्थायामनेन सूत्रेण अभ्यासस्य इत्वे रपरत्वे, अनभ्यासस्य ऋकारस्य गुणे रपरत्वे- पिपर्ति । तसि- पृ पृ+तस्, इत्यवस्थायामनेन अभ्यासस्य ऋकारस्य इत्वे रपरत्वे, हलादिशेषे 'पिपृ+तस्' इति जाते-

**उदोष्ठ्यपूर्वस्य ७।१।१०२।**

**अङ्गावयवौष्ठ्यपूर्वो य ॠत् तदन्तस्याङ्गस्य उत्स्यात् ।**

यस्मिन् धातौ अन्त्यवर्णो दीर्घ ॠकारो भवति, तस्मात् पूर्ववर्णश्च ओष्ठस्थानी भवति, तस्य धातोः ॠकारस्य स्थाने उकारादेशो भवत्यर्थः । रपरत्वेन उर् इत्यादेशे 'पिपुर्+तस्' इति जाते-

**हलि च ८।२।७७।**

**रेफवान्तयोर्धातोरुपधाया इको दीर्घो हलि । पिपूर्तः । पिपुरति । पपार ।**

अनेन रेफस्योपधाया उकारस्य दीर्घे- पिपूर्तः । झौ तु झोऽदादेशे कृते हल्परत्वाभावाद् अनेन दीर्घाभावे- पिपुरति । लिटि, तिपि, णलि, धातोर्द्वित्वे, अभ्यासकार्ये, अचो ञ्णितीति वृद्धौ, रपरत्वे- पपार । तसि- पूर्ववत् 'पपृ+अतुस्' इत्यवस्थायाम्-

**शृदॄप्रां ह्रस्वो वा ७।४।१२।**

**शृदॄप्रां ह्रस्वो वा स्यात् किति लिटि । पप्रतुः । पप्रुः ।**

शृ-धातोः, दॄ-धातोः, पॄ-धातोश्च विकल्पेन ह्रस्वो भवति किति लिटि परे इत्यर्थः । अनेन सूत्रेण वैकल्पिके ह्रस्वे 'पपृ+अतुस्' इति जाते, कित्त्वाद् गुणनिषेधे, ततः यणि- पप्रतुः, झौ- पप्रुः । अनेन ह्रस्वाभावे तु 'पपॄ+अतुस्' इत्यवस्थायाम्-

**ऋच्छत्यॄताम् ७।४।११**

**तौदादिकऋच्छेर्ऋधातोर्ॠतां च गुणो लिटि । पपरतुः । पपरुः ।**

लिटि परे तुदादिगणपठितस्य ऋच्छ्-धातोः, ऋ-धातोः, ॠकारान्तधातूनां च गुणो भवतीत्यर्थः । अनेन गुणे, रपरत्वे- पपरतुः, पपरुः इत्यादि ।

**वृतो वा ७।२।३८।**

**वृङ्वृञ्भ्यामृदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि । परिता । परीता । परिष्यति । परीष्यति । पिपर्त्तु । पिपुरतु । पिपूर्हि । अपिपः । अपिपूर्त्ताम् । अपिपरुः । पिपूर्यात् । पिपूर्युः । पूर्यात् । अपारीत् ।**

वृङ्-धातोः, वृञ्-धातोः, ॠकारान्तेभ्यो धातुभ्यश्च परस्य इडागमस्य विकल्पेन दीर्घो भवति, लिटि परे तु अयं दीर्घो न भवतीति सूत्रार्थः । पॄ+लुट्(ल्), लस्य तिपि, तिपो डाभावे, तासिप्रत्यये, इटि, टिलोपे 'पॄ+इता' इत्यवस्थायाम् अनेन सूत्रेण वैकल्पिके दीर्घे, उदोष्ठ्यपूर्वस्येति प्राप्तं उत्वं बाधित्वा सार्वधातुकेति गुणे- परीता/परिता । लृट्यपि दीर्घविकल्प एव विशेषः । लोटि ङिति गुणनिधेषे जाते उदोष्ठ्येति उत्वम्, हलादौ विभक्तौ हलि चेति दीर्घश्चेति बोध्यम्, उत्तमपुरुषे तु आडागमस्य पित्वाद् गुणो भवत्येव । लङि तिपि 'अपिपर्+त्' इत्यवस्थायां तकारस्य हल्ङ्यादिलोपे, रेफस्य विसर्गे- अपिपः, एवं सिप्यपि । तसि गुणनिषेधे उदोष्ठ्येति उत्वे रपरत्वे, हलि चेति दीर्घः । झौ अभ्यस्तत्वात् सिजभ्यस्तेति जुसि, जुसि चेति गुणे- अपिपरुः । लुङि, अटि, तिपि, च्लौ, च्लेः सिचि, इटि, इलोपे, ईटि 'अपॄ इस् ईत्' इति जाते, वक्ष्माणसूत्रेण इटो दीर्घस्य निषेधे, सिचि वृद्धिरिति वृद्धौ, सलोपादिपूववत्कार्ये- अपारीत् ।

**सिचि च परस्मैपदेषु ७।२।४०।**

**अत्र वृत इटो न दीर्घः । अपारिष्टाम् । अपरीष्यत् । अपरिष्यत् ।**

परस्मैपदपरके सिचि परे वृङ्-धातोः, वृञ्-धातोः, ॠकारान्तेभ्यो धातुभ्यश्च परस्य इडागमस्य दीर्घो न भवतीति सूत्रार्थः । पूर्वसूत्रेण वैकल्पिके दीर्घे प्राप्तेऽनेन निषिध्यते । तसि अनेन सूत्रेण दीर्घनिषेधे, पूर्ववत्- अपारिष्टाम् इत्यादि ।

अथोभयपदिनः

**डुभृञ् धारण-पोषणयोः । बिभर्त्ति । बिभृतः । बिभ्रति । बिभृते । बिभ्राते । बिभ्रते । बिभराञ्चकार । बभार । बभर्थ । बभृव । बभृम । बिभराञ्चक्रे । बभ्रे । भर्त्ता । भरिष्यति । भरिष्यते । बिभर्तु । बिभृहि । बिभराणि । बिभृताम् । बिभृध्वम् । अबिभः । अबिभृताम् । अबिभरुः । अबिभृत । बिभृयात् । बिभ्रीत । 'रिङ्शये'ति रिङ् । भ्रियात् । ('उश्च') । भृषीष्ट । अभार्षीत् । 'ह्रस्वादङ्गात्' । अभृत । अभरिष्यत् । अभरिष्यत ।**

**डुदाञ् दाने । प्रणिददाति । दत्तः । ददति । दत्ते । ददाते । ददते । ददौ । ददे । दाता । दास्यति । दास्यते । ददातु ।**

**'ध्वसोरेद्धावभ्यासलोपश्च' देहि । दत्ताम् । अददात् । अदत्ताम् । अददुः । अदत्त । दद्यात् । ददीत । 'एर्लिङि' । देयात् । दासीष्ट । 'गातिस्थे'ति सिचो लुक् । अदात् । अदाताम् । अदुः ।**

धारणे, पोषणे चार्थे विद्यमानो डुभृञ् (भृ) इति धातुरनिट्, सकर्मकः, उपयपदी वर्तते । तस्माल्लटि, तिपि, शपि, तस्य श्लौ, द्वित्वे, अभ्यासकार्ये 'बभृ+ति' इति जाते 'भृञामित्' इत्यनेन इत्वे, सार्वधातुकेति गुणे- बिभर्ति, बिभृतः, बिभ्रति इत्यादि । आत्मनेपदे तु सर्वत्रैव ङित्वाद् गुणनिषेधो ज्ञेयः । लिटि भीह्रीभृहुवामिति वैकल्पिक आम् बोध्यः ।

दानार्थको डुदाञ् (दा) इति धातुरनिट्, सकर्मकः, उभयपदी च वर्तते । तसि श्नाभ्यस्तयोरात इति आलोपः, झौ अदभ्यस्तादिति अदादेशश्च ।

**स्थाघ्वोरिच्च ।१।२।१७।**

**अनयोरिदन्तादेशः स्यात्, सिच्च कित्स्यादात्मनेपदेषु । अदित । अदास्यत् । अदास्यत ।**

डुधाञ् धारण-पोषणयोः । दधाति ।

आत्मनेपदसंज्ञके प्रत्यये परे स्था-धातोर्घुसंज्ञकधातूनाञ्च अन्त्यस्यालः स्थाने इकारादेशो भवति, सिचः किद्वद्भावश्च भवतीत्यर्थः । लुङि, अटि, आत्मनेपदे ते, च्लौ, सिचि, इण्निषेधे 'अदा स् त' इत्यवस्थायाम् अनेन सूत्रेण आकारस्य इत्वे सिचः कित्वे च कृते, कित्वाद् इकारस्य गुणनिषेधे, ह्रस्वादङ्गादिति सिचो लुकि- अदित ।

डुधाञ् (धा) इति धातुर्धारणेऽर्थे पोषणेऽर्थे च वर्तते (अनिट्, सकर्मकः, उभयपदी) ।

**दधस्तथोश्च ।८।२।३८।**

**द्विरुक्तस्य झषन्तस्य धाञो बशो भष्, तथयोः स्ध्वोश्च परतः । धत्तः । दधति । दधासि । धत्थः । धत्ते । दधाते । धत्से । धद्ध्वे । 'ध्वसो'रित्येत्त्वम् । धेहि । अदधात् । अधत्ताम् । अदधुः । अदधाः । अधत्तम् । अधत्त । अदधाम् । अदध्व । अदध्म । अधत्त । अदधाताम् । अदधत । अधत्थाः । अदधाथाम् । अधद्ध्वम् । अदधि । अदध्वहि । अदध्महि । दध्यात् । दधीत । दधीयाताम् । धेयात् । धासीष्ट । अधात् । अधाताम् । अधित्त । अधिषाताम् । अधास्यत् । अधास्यत ।**

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) भीह्रीभृहुवां श्लुवच्च ।

(ख) अर्तिपिपर्त्योश्च ।

(ग) ऋच्छत्यृताम् ।

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) हुधातोर्लिटि कानि रूपाणि भवन्ति ?

(ख) भियोऽन्यतरस्याम् इति सूत्रं किं कार्यं करोति ? ।

(ग) जुहवाञ्चकार इत्यत्र आम् विधायकं सूत्रं किम् ?

(घ) पिपर्ति इत्यत्र अभ्यासस्य इत्वं केन सूत्रेण भवति ?

(ङ) ई हल्यघोः इति सूत्रं कुत्र प्रवर्तते ?

३. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) जुहाव (ख) बिभर्ति (ग) धत्त (घ) पपरतुः

४. **निर्दिष्टधातूनां रूपाणि दर्शयत**

(क) हुधातोर्लटि (ख) पृधातोर्लोटि (ग) भृञ्धातोरात्मनेपदे लटि णलाद्यादेशपक्षे

५. **जुहोत्यादिगणस्थप्रयोगवैशिष्ट्यं दर्शयत ।**

६. **पदानां वाक्ये प्रयोगं निदर्शयत**

(क) जुहुधि (ख) पिपर्ति (ग) जहौ (घ) देहि

## चतुर्दशः पाठः

# अथ दिवादिप्रकरणम्

प्रकरणेऽस्मिन् श्यन्-विकरणधातूनां निरूपणं भवति । प्रारम्भे दिव्-धातोः पाठाद् दिवादिरिति प्रकरणस्यास्य संज्ञा । अस्मिन् सार्वधातुकलकारेषु शपं बाधित्वा धातोः श्यन्-प्रत्ययो भवति । श्यन्नित्यस्य शकारनकारौ इतौ, य इत्येव शिष्यते । शित्वात् सार्वधातुकसंज्ञा तत्प्रयुक्तकार्याणि च विधीयन्ते परमपित्सार्वधातुकत्वेन ङित्वाद्गुणनिषेधो भवति ।

दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु ।

दिवु-धातुः क्रीडायाम्, विजिगीषायाम्, व्यवहारे, द्युतौ, स्तुतौ, मोदने, मदे, स्वप्ने, कान्तौ, गतौ चार्थेषु वर्तते । तस्य उकार उदात्त इच्च । उदात्तेत्वात् परस्मैपदी, सेट् च । धातुरयमर्थानुसारेण सकर्मकोऽकर्मश्च भवति ।

**दिवादिभ्यः श्यन् ३।१।६९।**

**दिवादिभ्यः श्यन्प्रत्ययः स्यात् कर्तरि सार्वधातुके । शपोऽपवादः । 'हलि चे'ति दीर्घः । दीव्यति । दिदेव । देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत् । दीव्यात् । अदेवीत् । अदेविष्यत् ।**

कर्त्रर्थे विहिते सार्वधातुकसंज्ञके प्रत्यये परे सति दिवादिगणपठितेभ्यो धातुभ्यः श्यन्-प्रत्ययो विधीयत इति सूत्रार्थः । श्यन्-प्रत्ययस्य आद्यशकारस्य 'लशक्वतद्धिते' इत्यनेन अन्त्यनकारस्य च 'हलन्त्यम्' इत्यनेनेत्संज्ञायामुभयोर्लोपो भवति । दिवादिधातूनां विषये 'कर्तरि शप्' इत्यनेन प्राप्तः शबनेन बाध्यते । दिव् इति वान्तधातुत्वाद् हलि परे 'हलि च' इत्यनेन उपधाया दीर्घो भवति ।

दिव्-धातोर्लटि, तिपि, शपं बाधित्वा अनेन सूत्रेण श्यनि 'दिव् य ति' इत्यवस्थायां 'हलि च' इत्यनेन उपधाया दीर्घे 'दीव्यति' इति रूपम् । एवं प्रकारेणैव दीव्यतः, दीव्यन्ति इत्यादीनि रूपाण्यपि सिद्ध्यन्ति । लिटि पिद्विभक्तिषु पुगन्तलघूपधस्य चेति गुणो विधीयते । लुटि, लृटि, लुङि, लृङि च सर्वत्रैव लघूपधगुणो भवति । लुङि वदव्रजेति प्राप्तां वृद्धिं नेटीति निषेधाद् लघूपधगुणः सुलभः ।

**एवं षिवु तनुसन्ताने ।**

षिवु-धातोरन्त्योकारः इत्, आद्यस्य षकारस्य धात्वादेरिति सकारादेशः, सिव् इत्यस्मिन् व्यवहारो भवति (सेट्, सकर्मकः) । अस्य धातो रूपाणि दिव्-धातुवदेव जायन्ते, तेषां सिद्धिप्रक्रिया च तद्वदेव भवति ।

**सिवादीनां वाऽड्व्यवायेऽपि ८।३।७१ ।**

**परिनिविभ्यः परेषामेषामड्व्यवायेऽपि वा सस्य षः । पर्यषीव्यत् । पर्यसीव्यत् । नृती गात्रविक्षेपे । नृत्यति । ननर्त । नर्तिता ।**

सिवु, सह, सुट्, स्तु, स्वञ्ज इति पञ्च सिवादयः । परि, नि, वि इत्येतेभ्य उपसर्गेभ्य उत्तरेषां सिवादीनां सकारस्य स्थाने षकारादेशो विकल्पेन भवति, अट्-प्रत्याहारस्थवर्णेन व्यवधाने कृते सत्यपीति सूत्रार्थः । परि इत्युपसर्गपूर्वकात् सिव्-धातोर्लङि, अडागमे, तिपि, शपं बाधित्वा श्यनि, इतश्चेति इलोपे, हलि चेति उपधादीर्घे 'परि+असीव्यत्' इत्यवस्थायाम् अनेन सूत्रेण सकारस्य वैकल्पिके षत्वे, यणि 'पर्यषीव्यत्, पर्यसीव्यत्' इति रूपद्वयम् ।

नृती (नृत्) इति धातुर्गात्रविक्षेपे (नर्तने) अर्थे वर्तते (सेट्, अकर्मकः) । तस्य लटि दिव्धातुवदेव रूपाणि भवन्ति । लिटि पिद्विभक्तिषु ऋकारस्य अर्-गुणानन्तरं रेफात् परस्य तकारस्य 'अचो रहाभ्यां द्वे' इति वैकल्पिकं द्वित्वं भवति, लुटि तु सर्वत्रैव गुणो द्वित्वञ्च ।

**सेऽसिचिकृतचृतछृदतृदनृतः ७।२।५७।**

**एभ्यः सिज्भिन्नस्य सादेरार्द्धधातुकस्येड् वा स्यात् । नर्तिष्यति । नर्त्स्यति । नृत्यात् । अनर्तीत् । अनर्तिष्यत् । अनर्त्स्यत् । त्रसी उद्वेगे । 'वा भ्राशे'ति श्यन्वा । त्रस्यति । त्रसति । तत्रास ।**

कृत, चृत, छृद, तृद, नृत इत्येतेभ्यो धातुभ्यो परस्य सिच्-भिन्नस्य सकारादेरार्धधातुकस्य इडागमो वा भवतीति सूत्रार्थः । अनेन सूत्रेण नित्यमिडागमं बाधित्वा विकल्पेन इटि कृते लृटि लृङि च नृत्-धातुर्वेड् भवति, तेन लृटि नर्तिष्यति, नर्त्स्यति, लृङि च अनर्तिष्यत्, अनर्त्स्यत् इत्यादीनि रूपाणि जायन्ते । शेषलकारेषु दिव्धातुवदेव प्रक्रियया अस्य रूपाणि निष्पद्यन्ते ।

त्रसी (त्रस्) इति धातुरुद्वेगे (भये) अर्थे वर्तते । दिवादिगणस्थत्वात् सार्वधातुकलकारेषु नित्यमेव श्यनि प्राप्ते 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' इत्यनेन शपं बाधित्वा विकल्पेन श्यन्-प्रत्ययो भवति, श्यनभावे शपि भ्यादिगणस्थधातुवच्च अस्य रूपाणि जायन्ते । यथा- त्रस्+लट्(ल्), त्रस्+तिप्(ति), त्रस् श्यन्(य)+ति (वा श्यन्-प्रत्यये), त्रस्यति । श्यनभावे- त्रस्+लट्(ल्), त्रस्+तिप्(ति), त्रस् शप्(अ)+ति (कर्तरि शप्), त्रसति । एवं त्रस्यतः, त्रसतः इत्यादीन्यपि ।

**वा जृभ्रमुत्रसाम् ६।४।१२४।**

**एषां किति लिटि सेटि, 'थलि' च एत्वाभ्यासलोपौ वा स्तः । त्रेसतुः/तत्रसतुः । त्रेसिथ/तत्रसिथ । त्रसिता ।**

किति लिटि, सेटि थलि च परे सति जृष् (जृ), भ्रमु (भ्रम्), त्रस (त्रस्) इत्येतेषां धातूनां अकारस्य स्थाने विकल्पेन एकारादेशो भवति, अभ्यासस्य लोपो च भवतीति सूत्रार्थः । लिटि, तसि, अतुसि 'त्रस् त्रस् + अतुस्' इत्यवस्थायामनेन सूत्रेण एत्वाभ्यासलोपे, वर्णयोगे, सकारस्य रुत्वविसर्गे 'त्रेसतुः' इति सिद्ध्यति । एत्वाभ्यासलोपाभावपक्षे अभ्यासकार्ये 'तत्रसतुः' इति । एवं सिपि, इडागमे कृते त्रेसिथ/तत्रसिथ इति । लुटि तिपि - त्रसिता ।

**पुष पुष्टौ । पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । 'पुषादी'त्यङ्-आपरस्मैपदात् । अपुषत् । अपोक्ष्यत् । णश अदर्शने । नश्यति । ननाश । नेशतुः । नेशुः ।**

पुष्ट्यर्थकस्य पुष इति धातोरन्त्याकार इत् (अनिट्, अकर्मकः) । पुष्-धातोर्लुङि, अटि, तिपि, इलोपे 'अपुष् + त्' इत्यवस्थायां शपं बाधित्वा च्लौ, च्लेरिस्थाने सिचं बाधित्वा 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इत्यनेन अङादेशेऽनुबन्धलोपे 'अपुषत्' इति सिद्ध्यति ।

अदर्शनार्थकस्य णश इति धातोरन्त्याकारस्य इत्संज्ञायां लोपे, आद्यणकारस्य च 'णो नः' इत्यनेन नत्वे 'नश्' इत्यस्मिन् व्यवहारो भवति (वेट्, अकर्मक) । तस्माल्लिटि, तसि, अतुसि 'नश् नश् अतुस्' इत्यवस्थायाम् 'अत एकहल्मध्ये...' इत्यादिना सूत्रेण एत्वाभ्यासलोपे 'नेशतुः' इति । सिपि तु थलादेशे 'नश् थ' इत्यवस्थायां नित्यमिडागमे प्राप्ते-

**रधादिभ्यश्च ७।२।४५।**

रध् नश् तृप् दृप् द्रुह् मुह् ष्णुह् ष्णिह् एभ्यो वलाद्यार्द्धधातुकस्य वेट् स्यात् । नेशिथ ।

अनेन सूत्रेण वैकल्पिके इडागमे 'नश् इथ' इति जाते, द्वित्वे 'नश् नश् इथ' इत्यवस्थायां 'थलि च सेटि' इत्यनेन एत्वाभ्यासलोपे 'नेशिथ' इति । इडभावे तु 'नश् थ' इत्यवस्थायाम्-

**मस्जिनशोर्झलि ७।१।६०।**

**मस्जिनशोर्नुम् स्यात् झलि । ननंष्ठ । नेशिव । नेश्व । नेशिम । नेश्म । नशिता । नष्टा । नशिष्यति । नङ्क्ष्यति । नश्यतु । अनश्यत् । नश्येत् । नश्यात् । अनशत् । प्रणश्यति ।**

झलि परे सति मस्ज्-धातोः, नश्-धातोश्च नुमागमो भवतीति सूत्रार्थः । अनेन नुमागमे 'नन्श् थ' इति जाते, द्वित्वे, हलादिशेषे 'न नन्श् थ' इत्यवस्थायां 'व्रश्चभ्रस्जे'ति शस्य षत्वे, थकारस्य ष्टुत्वेन ठकारे, नस्यानुस्वारे 'ननंष्ठ' इति साधु । मिपि- उत्तमपुरुषे णलो णित्वविकल्पनाद् णित्वपक्ष एव उपधाया अकारस्य वृद्धौ 'ननाश, ननश' इति रूपद्वयम् । वसि मसि च वैकल्पिके इटि इट्पक्षे इडभावे चापि एत्वाभ्यासलोपे क्रमाद् 'नेशिव, नेश्व', 'नेशिम, नेश्म' इति रूपाणि । लुटि लृङि च सर्वत्रैव वैकल्पिके इटि, तदभावे झलादित्वादनेन सूत्रेण नुमागमो भवति । लुङि पुषादित्वात् च्लेरङ् ।

**नशेः षान्तस्य ८।४।३६।**

**षान्तस्य नशेर्णत्वं न स्यात् । प्रनंष्टा । 'अन्त' ग्रहणं भूतपूर्वप्रतिपत्यर्थम् । प्रनङ्क्ष्यति । रध हिंसासराद्ध्योः । रध्यति ।**

षकारान्तस्य नश्-धातोर्नकारस्य णत्वं न भवतीति सूत्रार्थः । अत्र 'अन्त' ग्रहणं षान्तभूतपूर्वमात्रस्य अपि यथा स्यात् अर्थात् पूर्वं षकारस्य सत इदानीमादेशवशेन षान्तत्वाभावेऽपि णत्वनिषेधप्राप्त्यर्थमन्तग्रहणं बोध्यम्, तेन प्रनङ्क्ष्यति, परिनङ्क्ष्यति इत्यादावपि णत्वनिषेधो भवत्येव । षान्तस्य इत्युक्तत्वात्

प्रणश्यति, परिणश्यति इत्यादिषु तु णत्वं भवत्येव, अत्र ‘उपसर्गादसमासेऽपि णोपदेशस्य’ इत्यनेन णत्वम् ।

रध धातुः हिंसायाम्, संराद्धौ (निष्पत्तौ) च अर्थयोः प्रयुज्यते । अस्य सार्वधातुकलकारेषु विशेषप्रक्रिया नास्ति । रधादिधातुत्वाद् ‘रधादिभ्यश्च’ इति वेट् ।

**रधिजभोरचि ७।१।६१।**

**रधिजभोरचि नुम् स्यात् । ररन्ध । ररन्धतुः । ररन्धिथ । ररद्ध । ररन्धथुः । ररन्धिव । रेध्व ।**

रध (रध्) हिंसासंराद्ध्योरिति दिवादिगणस्थो धातुः । जभी (जभ्) गात्रविनामे इति भ्यादिगणस्थः धातुः । एतयोर्धात्वोर्नुमागमो भवति, अजादि-प्रत्यये परे सतीति सूत्रार्थः । लिटि, तिपि, णलि ‘रध्+अ’ इत्यवस्थायाम् अनेन सूत्रेण नुमागमे ‘रन्ध्+अ’ इति जाते, द्वित्वे, अभ्यासकार्ये ‘ररन्ध’ इति । ररन्धतुः इत्यादौ एत्वाभ्यासलोपौ बाधित्वा परत्वान्नुमि, संयोगात्परत्वेन अकित्वान्नलोपो न । थलि तु रधादित्वाद् वेटि, इट्पक्षे नुमि ‘ररन्धिथ’ इति, इडभावे अच्परकत्वाभावान्नुमोऽप्राप्तौ ‘ररध्+थ’ इत्यवस्थायां ‘झषस्तथोर्धोऽधः’ इति थस्य धत्वे, पूर्वधकारस्य जश्त्वे ‘ररद्ध’ इति सिद्ध्यति ।

**नेट्यलिटि रधेः ७।१।६२।**

**लिड्वर्जे इटि रधेर्नुम् न स्यात् । रधिता । रद्धा । रधिष्यति । रत्स्यति । अङि नुम् । ‘अनिदिता’मिति नलोपः । अरधत् । तृप प्रीणने । तृप्यति । ततर्प । ततृपतुः । ततृपुः । रधादित्वाद्वेट् । तत्रप्थ-ततर्पिथ-ततर्प्थ । तर्पिता-तर्प्ता-त्रप्ता । (स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः) अतर्पीत्-अत्राप्सीत्-अतार्प्सीत्-अतृपत् ।**

लिड्भिन्नेषु आर्धधातुकलकारेषु वैकल्पिके इटि कृते ‘रधिजभोरचि’ इत्यनेन प्राप्तो नुमनेन सूत्रेण निषिध्यते । रध्-धातोर्लुङि तु पुषादित्वात् सिचं बाधित्वा च्लेरङि नुमागमो भवत्येव, तत्र तिपि ‘अनिदितां हल उपधाया क्ङिति’ इत्यनेन नलोपे ‘अरधत्’ इति रूपम् ।

दृष हर्ष-मोहनयोः । मोहनं-गर्वः । दृप्यति इत्यादि । ‘रधादित्वादिमौ वेट्कावमर्थमनुदात्तता’ द्रुह् जिघांसायाम् । द्रुह्यति । दुद्रोह । दुद्रुहतुः । दुद्रुहुः । ‘वा द्रुहे’ति वा घः । पक्षे ढः । ‘झषस्तथोर्धोऽधः’ दुद्रोहिथ-दुद्रोग्ध-दुद्रोढ । दुद्रुहथुः । दुद्रुह । दुद्रोह । दुद्रुहिव । दुद्रुहिम । द्रोहिता-द्रोग्धा । द्रोढा । द्रोहिष्यति-ध्रोक्ष्यति । ढत्वघत्वयोस्तुल्यं रूपम् । अद्रुहत् । अद्रोहिष्यत्-अध्रोक्ष्यत् । मुह् वैचित्त्ये । वैचित्यम्-अविवेकः । मुह्यति । मुमोह । मुमुहतुः । मुमुहुः । मुमोहिथ-मुमोग्ध-मुमोढ । मोहिता-मोग्धा-मोढा । मोहिष्यति-मोक्ष्यति । मुह्यतु । अमुह्यत् । मुह्येत् । मुह्यात् । अमुहत् । अमोहिष्यत्-अमोक्ष्यत् । ष्णुह उद्गिरणे । स्नुह्यति । सुष्णोह । सुस्नुहतुः । सुस्नुहुः । सुष्णोहिथ-सुष्णोग्ध-सुग्णोढ । सुष्णुहथुः । सुष्णुह । सुष्णोह । सुष्णुहिव-सुष्णुह्व । सुष्णुहिम-सुष्णुह्म । स्नोहिता-स्नोग्धा-स्नोग्धा-स्नोढा ।

स्नोहिष्यति-स्नोक्ष्यति । स्नुह्यतु । अस्नुहत्-अस्नोहिष्यत्-अस्नोक्ष्यत् । ष्णिह् प्रीतौ । स्निह्यति । सिष्णेह । सिष्णिहतुः । सिष्णिहुः । सिष्णोहिथ-सिष्णोग्ध-सिष्णौढ । स्नेहिता-स्नेग्धा-स्नोढा । स्नोहिष्यति-स्नोक्ष्यति । स्नुह्यतु । अस्नुहत्-अस्नोहिष्यत्-अस्नेक्ष्यत् । वृत् । रधादयः समाप्ताः । तुष तुष्टौ । तुष्यति । तुतोष । तोष्टा । तोक्ष्यति । तुष्यतु ।

क्रुध क्रोधे । क्रुध्यति । चुक्रोध । क्रोद्धा । क्रोत्स्यति । क्रुध्वतु । शमु उपशमे ।

**शमामष्टानां दीर्घः श्यनि ७।३।७४।**

**शम्-तम्-दम्-श्रम्-भ्रम्-क्षम्-क्लम्-मदामचो दीर्घः श्यनि । प्रणिशाम्यति । शशाम । शेमतुः । शेमुः । शेमिथ । शमिता । शमिष्यति । शाम्यतु । अशमत् । अशमिष्यत् ।**

**अथ आत्मनेपदिनः**

षूङ् प्राणिप्रसवे । सूयते । सुषुवे । 'स्वरती'ति विकल्पं बाधित्वा 'श्र्युकः किती'ति निषेधे प्राप्ते । क्रादिनियमान्नित्यमिट् । सुषुविषे । सुषुविवहे । सुषुविमहे । सोता । सविता । सविष्यते । सोष्यते । दूङ परितापे । दूयते । दुदुवे ।

षूङ् (सू) इति धातुः प्राणिप्रसवे (प्राण्युत्पादने) अर्थे वर्तते (सेट्, सकर्मकः) । ङित्वादात्मनेपदम् । धातुरयं क्रादिनियमात् सेड् भवति ।

**जनी प्रादुर्भावे ।**

जनी (जन्) इति धातुः प्रादुर्भावे (जनने) अर्थे वर्तते (सेट्, अकर्मकः, आत्मनेपदी) ।

**ज्ञाजनोर्जा ७।३।७९।**

**अनयोर्जादेश स्यात् शिति परे । जायते । 'गमहनजने'त्युपधाया लोपः । 'स्तोः श्चुना श्चुः' । जज्ञे । जनिता । जनिष्यते ।**

शिति प्रत्यये परे सति ज्ञा-धातोः, जन्-धातोश्च स्थाने 'जा' इत्यादेशो भवतीति सूत्रार्थः ।सार्वधातुकलकारेषु अनेन जादेशो विधीयते । लटि जायते, जायेते, जायन्ते इत्यादीनि, लोटि जायताम्, जायेताम्, जायन्ताम् इत्यादीनि, लङि अजायत, अजायेताम्, अजायन्त इत्यादीनि, विधिलिङि जायेत, जायेयाताम्, जायेरन् इत्यादीनि रूपाणि भवन्ति । लिडाद्यार्धधातुकलकारेषु तु 'जन्' इत्यस्मिन्नेव व्यवहारः । जन्-धातोः सेट्त्वाल्लिटि हलादिषु विभक्तिषु सर्वत्रैव इडागमो भवति, तेन सर्वा विभक्तयोऽजादित्वं प्राप्नुवन्ति । तथा च सर्वासामपित्वादसंयोगादित्वाच्च कित्वम् । अत एव 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्यनेन सर्वत्रैव उपधाया लोपः, नकारस्य श्चुत्वेन ञकारः, जञोर्ज्ञश्च सर्वत्रैव विधीयन्ते । जन्+लिट्(ल्), जन्+त, जन्+एश्(ए), जन् जन्+ए, ज जन्+ए, ज ज्न्+ए (उपधाया लोपः), ज ज्ञ्+ए, जज्ञ्+ए, जज्ञे । शेषरूपाणि- जज्ञाते, जज्ञिरे, जज्ञिषे, जज्ञाथे, जज्ञिध्वे, जज्ञे, जज्ञिवहे, जज्ञिमहे । लुटि, लृटि,

आशीर्लिङि, लृङि च विशेषकार्याभावाद् एध्-धातुवदेव अस्यापि रूपाणि जायन्ते, लृङि हलादित्वाद् अडाडागमयोरेव पार्थक्यम् । लुङि तु-

**दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ३।१।६१।**

**एभ्यश्च्लेश्चिण्वा स्यादेकवचने तशब्दे परे ।**

दीपी (दीप्) दीप्तौ, जनी (जन्) प्रादुर्भावे, बुध (बुध्) अवगमने, पूरी (पूर्) आप्यायने, तायृ (ताय्) सन्तानपालनयोः, ओप्यायी (प्याय्) वृद्धौ, इत्येतेभ्यो धातुभ्यः परस्य च्लेः स्थाने विकल्पेन 'चिण्' इत्यादेशो भवति, एकवचनसंज्ञके 'त'शब्दे परे इति सूत्रार्थः । चिणित्यस्य चकारणकारौ इतौ, तेन 'इ' इत्येव अवशिष्यते ।

जन्-धातोर्लुङि, अडागमे, लस्य स्थाने तादेशे 'अजन् त' इत्यवस्थायां शपं बाधित्वा च्लौ, सिजादेशं बाधित्वा अनेन सूत्रेण विकल्पेन च्लेश्चिणयनुबन्धलोपे 'अजन् इ त' इत्यवस्थायाम्-

**चिणो लुक् ६।४।१०४।**

**चिणः परस्य तशब्दस्य लुक् स्यात् । 'अत उपधाया' इति वृद्धौ प्राप्तायाम्**

अनेन सूत्रेण तशब्दस्य लुकि 'अजन् इ' इति जाते, णित्वाद् 'अत उपधायाः' इत्यनेन उपधाया अकारस्य वृद्धौ प्राप्तायाम्-

**जनिवध्योश्च ७३।३५।**

**जनिवध्योश्च न वृद्धिश्चिणि, ञ्णिति कृति च । अजनि । अजनिष्ट । अजनिष्यत् । दीपी दीप्तौ । दीप्यते । दिदीपे । दीपिता । अदीपि । अदीपिष्ट । अदीपिष्यत ।**

जन्-धातोर्वध्-धातोश्च उपधायाः स्थाने वृद्धिर्न भवति, चिणि परे, ञकार-णकारेति कृत्प्रत्यये परे चेति सूत्रार्थः ।

अनेन सूत्रेण वृद्धिनिषेधे 'अजनि' इति सिद्धम् । चिणभावे तु च्लेः सिचि 'अजन् स् त' इत्यवस्थायां सिचो इडागमेऽनुबन्धलोपे 'अजन् इस् त' इति जाते, सकारस्य षत्वे, तकारस्य ष्टुत्वेन टकारे 'अजनिष्ट' इत्यपि सिद्ध्यति । आतामादिषु शेषविभक्तिषु नित्यं सिजादेशः, सस्य षत्वञ्च भवतः । थासि थस्य ष्टुत्वमपि भवति । ध्वमि धि चेति सलोपः, इणः षीध्वमिति धस्य ढत्वञ्च । जन्-धातोर्लुङि रूपाणि - अजनि/अजनिष्ट, अजनिषाताम्, अजनिषत, अजनिष्ठाः, अजनिषाथाम्, अजनिढ्वम्, अजनिषि, अजनिष्वहि, अजनिष्महि ।

दीप्त्यर्थको दीपी (दीप्) इति धातुः सेट्, अकर्मकः, आत्मनेपदी च वर्तते ।

विद सत्तायाम् । विद्यते । विविदे । वेत्ता । वित्सीष्ट । अवित्त ।

सत्तार्थको विद (विद्) इति धातुरनिट्, अकर्मकः, आत्मनेपदी च वर्तते ।

इति दिवादिप्रकरणम्

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) सेऽसिचिकृतचृतछृदतृदनृतः ।

(ख) नेट्यलिटि रधेः ।

(ग) दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) वा जृभ्रमुत्रसाम् इति सूत्रं कुत्र प्रवर्तते ?

(ख) मस्जिनशोर्झलि इति सूत्रं किं कार्य करोति ?

(ग) शमादयो धातवः के ?

(घ) त्रेशतुः इत्यत्र एत्वमभ्यासलोपश्च केन सूत्रेण भवति ?

(ङ) अजनि इत्यत्र तशब्दस्य लुक् कथम् ?

३. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) दीव्यति (ख)त्रेसतुः (ग) ररन्ध (घ) मुह्यति (ङ) जायते

४. **निर्दिष्टधातूनां रूपाणि दर्शयत**

(क) नृतेर्लृटि (ख) नशधातोर्लोटि (ग) षूङ्धातोरात्मनेपदे लटि

५. **नेशिथ/ननंष्ठ अत्र इडागमविकल्पः केन सूत्रेण भवति ?**

६. **दिवधातोरर्थभेदान् निर्दिश्य तदनुकूलान् प्रयोगान् प्रदर्शयत ।**

७. **पदानां वाक्ये प्रयोगं निदर्शयत**

(क) ननर्त (ख) रधिता (ग) नेशिथ (घ) अजनि

## पञ्चदशः पाठः

# अथ स्वादिप्रकरणम्

स्वादिप्रकरणे सार्वधातुकलकारेषु शपं प्रबाध्य 'श्नु' इति विकरणप्रत्ययो भवति । श्नु इत्यत्र शकारस्य इत्संज्ञायां तस्य लोपे 'नु' इत्यवशिष्यते । शकारस्य इत्संज्ञा भवतीति अत्र सार्वधातुकमपित् इति ङिद्वद्भावे क्ङिति च इति पूर्वस्य गुणनिषेधो भवति । 'श्नु' इत्यत्र स्थितस्य उकारस्य गुणे तु न कापि समस्या । 'श्नु' इत्यस्य उकारस्य अजादिसार्वधातुके प्रत्यये परे 'हुश्नुवोः सार्वधातुके' इत्यनेन यण् भवति । प्रकरणारम्भे 'सु' इति धातुपाठात् स्वादि इति प्रकरणस्य नाम ।

षुञ् अभिषवे । अभिषवः- स्नपनं पीडनं स्नानं सुरासन्धानं च । तत्र स्नानेऽकर्मकः । धात्वादेः षः सः । षुञ् (सु) इति धातुः अभिषवेऽर्थे वर्तते । अभिषवश्च स्नपनम् (जलादिनाऽभिषेककरणम्), पीडनम् (शस्यादीनां मर्दनम्), स्नानम् (शोधनम्), सुरासन्धानम् (मदिरोत्पादनक्रिया) चेति । धातुरयं चतुर्ष्वर्थेषु स्नानेऽर्थेऽअकर्मकः, शेषेषु त्रिष्वर्थेषु सकर्मको वर्तते । आद्यषकारस्य 'धात्वादेः षः सः' इत्यनेन सत्वे, अन्त्यञकारस्य चेत्संज्ञायां लोपे 'सु' इत्येवावशिष्यते । ञित्वादुभयपदी ।

**स्वादिभ्यः श्नुः ३।१।७३।**

**स्वादिभ्यः श्नुः स्यात् कर्तरि सार्वधातुके । शपोऽपवादः । सुनोति । सुनुतः । 'हुश्नुवो'रिति यण् । सुन्वन्ति । सुनोषि । सुनुथः । सुनुथ । सुनोमि । 'लोपश्चास्ये'ति प्रत्ययोतो लोपः । सुन्वः/सुनुवः । सुन्मः/सुनुमः । सुनुते । सुन्वाते । सुन्वते । सुनुषे । सुन्वाथे । सुनुध्वे । सुन्वे । सुन्वहे-सुनुवहे । सुन्महे-सुनुमहे । सुषाव । सुषुवे । सोता । सोता । सोष्यति । सोष्यते । सुनोतु । 'उतश्चे'ति हेर्लुक् । सुनु । सुनवानि । सुनवाव । सुनवाम । सुनुताम् । सुनवै । सुनवावहै । सुनवामहै । असुन्वि । सुनुयात् । सूयात् । सोषीष्ट ।**

स्वादिगणपठितेभ्यो धातुभ्यः श्नु-प्रत्ययो विधीयते, कर्तरि अर्थे विहिते सार्वधातुकसंज्ञके प्रत्यये परे सतीति सूत्रार्थः । शपं बाधित्वा अनेन सूत्रेण श्नु-प्रत्ययो भवति ।

सु-धातोर्लटि 'सु+ल्' इत्यवस्थायां क्रियाफलेऽकर्तृगे सति लस्य स्थाने परस्मैपदसंज्ञके तिपि 'सु+ति' इति जाते, तिपः सार्वधातुकसंज्ञायां शपं बाधित्वा अनेन सूत्रेण श्नु-प्रत्ययेऽनुबन्धलोपे 'सु नु+ति' इति जाते, शित्वात् श्नु इत्यस्यापि सार्वधातुकसंज्ञायां तस्य अपित्वाद् ङिद्वद्भावे 'सार्वधातुकार्धधातुकयोः' इत्यनेन उभयत्र उकारयोर्गुणे प्राप्ते, ङित्परत्वात् पूर्वस्योकारस्य 'क्ङिति च' इति गुणनिषेधे, परस्योकारस्य गुणे 'सुनोति' इति सिद्ध्यति । अनयैव रीत्या सिपि, मिपि च सुनोषि, सुनोमि इत्येते रूपे जायेते । तसादिषु अपिद्विभक्तिषु तु श्नोस्तिङश्च ङित्वादुभयत्र गुणनिषेधो बोध्यः । तसि- सुनुतः । झौ झस्यन्तादेशे 'सु नु+अन्ति' इत्यवस्थायामियङादेशं बाधित्वा 'हुश्नुवोः सार्वधातुके' इत्यनेन यणि 'सुन्वन्ति' इति रूपम् ।

थसि, थे च सुनुथः, सुनुथ इत्येते रूपे । वसि, मसि तु 'लोपश्चास्यान्यतरस्यां म्वोः' इत्यनेन वैकल्पिके उकारलोपे 'सुन्वः/सुनुवः', 'सुन्मः/सुनुमः' इति ।

क्रियाफले कर्तृगे तु आत्मनेपदे, तङां सर्वेषामपित्वात् सर्वत्रैव गुणनिषेधो भवति । अजादिषु विभक्तिषु हुश्नुवोरिति यण् विधीयते । ते- सुनुते । आतामि- सु नु+आताम्, सु नु+आते (टेरेत्वम्), सु न् य्+आते (हुश्नुवोरिति यण्), सुन्वाते । झे- सु नु+झ, सु नु+अत (आत्मनेपदेष्वनतः), सु नु+अते, सु न् व्+अते, सुन्वते । वसि मसि च 'लोपश्चास्यान्यतरस्यां म्वोः' इति विकल्पेन उलोपः । लिटि- सिपि थलि भारद्वाजमतेन वैकल्पिके इटि 'सुषविथ/सुषोथ' इति । उत्तमपुरुषे णलि णिद्विकल्पनाद् वैकल्पिक्यां वृद्धौ 'सुषाव/सुषव' इति । वस्मसौ तु वमावादेशयोः क्रादिनियमान्नित्यमिटि सुषुविव, सुषुविम इत्येते रूपे जायेते । आत्मनेपदे हलादिषु विभक्तिषु नित्यमेव इडागमो भवति । लोटि विध्यर्थे सिपि, सेर्ह्यादिशे 'सु नु+हि' इत्यवस्थायां हेरपित्वाद् ङिद्वद्भावेन गुणनिषेधे 'उतश्च प्रत्ययादसंयोगपूर्वात्' इत्यनेन हेर्लुकि 'सुनु' इति सिद्ध्यति । लुङि तु-

**स्तुसुधूञ्भ्यः परस्मैपदेषु ७।२।७२।**

**एभ्यः सिच इट् स्यात्परस्मैपदे । असावीत् । असोष्ट । अभिषुणोति । 'प्राक्सिता'दिति षत्वम् । 'अभ्यषुणोत्' ।**

स्तु, सु, धूञ् (धू), इत्येतेभ्यो धातुभ्यः परस्य परस्मैपदपरकस्य सिच इडागमो भवतीति सूत्रार्थः ।

सु-धातोर्लुङि, अडागमे, लस्य तिपि, शपं बाधित्वा च्लौ, च्लेः सिचि 'असु स्+ति' इत्यवस्थायाम् अनेन सूत्रेण सिच इटि 'असु इस्+ति' इति जाते, इतश्चेति इलोपे, 'अस्तिसिचोऽपृक्ते' इति ईडागमे, सिचि वृद्धिरिति वृद्धौ, आवादेशे, सलोपे, सवर्णदीर्घे 'असावीत्' इति सिद्ध्यति । आत्मनेपदे तु इडभावे, गुणे, सन्ध्यादिकार्ये 'असोष्ट' इति ।

उपसर्गयोगे 'अभिषुणोति' इत्यत्र 'उपसर्गात् सुनोती'त्यादिना सूत्रेण षत्वं भवति, परं 'अभ्यषुणोत्' इत्यत्र तु अटा (अकारेण) व्यवधानात् 'प्राक्सितादड्व्यवायेऽपि' इत्यनेन सकारस्य षत्वमित्यर्थः ।

**सुनोतेः स्यसनोः ८।३।११७।**

**स्ये, सनि च परे सुञः सस्य षो न स्यात् । विसोष्यति ।**

'विसोष्यति' इत्यत्र स्य-परत्वात् सु-धातोः सकारस्य उपसर्गात् सुनोती'त्यादिना प्राप्तं षत्वमनेन सूत्रेण निषिद्ध्यते ।

चिञ् चयने । प्रणिचिनोति । चिनुते ।

चिञ् (चि) इति धातुश्चयनेऽर्थे वर्तते (अनिट्, सकर्मकः) । ञित्वादुभयपदी ।

**विभाषा चेः ८।३।५८।**

**अभ्यासाच्चेः कुत्वं वा स्यात् सनि, लिटि च । चिकाय । चिचाय । चिक्ये । चिच्ये । अचैषीत् । अचेष्ट ।**

**स्तृञ् आच्छादने । स्तृणोति । स्तृणुते । तस्तार । तस्तरतुः । तस्तरुः । 'ऋतश्च संयोगादे'रिति गुणः । तस्तरे । 'गुणोर्ती'ति गुणः । स्तर्यात् ।**

अभ्यासात् परस्य 'चि' इति धातुरूपस्य अङ्गस्य चकारस्य स्थाने कवर्गादेशो विकल्पेन भवति, सन्-प्रत्यये लिट्-लकारे च परे सतीति सूत्रार्थः ।

स्तृञ् (स्तृ) इति धातुराच्छादनेऽर्थे वर्तते (अनिट्, सकर्मकः, उभयपदी) । अस्माल्लिटि, आत्मनेपदे ते, तस्य एशादेशे, द्वित्वे, अभ्यासकार्ये 'त स्तृ+ए' इत्यवस्थायाम्, ङित्वाद् गुणनिषेधे, पुनः 'ऋतश्च संयोगादेर्गुणः' इत्यनेन गुणे 'तस्तरे' इति सिद्ध्यति । एवं पिद्भिन्नासु परस्मैपदविभक्तिषु आत्मनेपदविभक्तिषु च सर्वत्रैव अनेन गुणो विधीयते । ऋदन्तधातुत्वात् थलि इडागमो न भवति, वे मे तु 'कृसृभृवृ...' इत्यादिना सूत्रेण नित्यमिट् । आत्मनेपदे ध्वमि 'विभाषेटः' इत्यनेन धस्य वा धत्वम् । लृटि, लृङि चोभयोः पदयोः 'ऋद्धनोः स्ये' इत्यनेन नित्यमिडागमो भवति । लिङि परस्मैपदे 'गुणोऽर्तिसंयोगाद्योः' इत्यनेन गुणो भवति । आत्मनेपदे तु-

**ऋतश्च संयोगादेः ७।३।४३।**

**ऋदन्तात्संयोगादेर्लिङ्सिचोरिड् वा स्यात्तङि । स्तरिषीष्ट/स्तृषीष्ट । अस्तरिष्ट/अस्तृत । धुञ् कम्पने । धुनोति । धुनुते । दुधाव । दुधुवे । अधौषीत् । अधोष्यत् । धूञ् कम्पने । धूनोति । धूनुते । 'स्वरतिसृती'ति वेट् । दुधविथ/दुधोथ । किति लिटि तु**

ऋदन्ताद् (ह्रस्व-ऋकारान्ताद्) धातोः संयोगादेरुत्तरयोः स्थितयोर्लिङ्-सिचोर्विकल्पेन इडागमो भवति, आत्मनेपदसंज्ञके तङि पर इति सूत्रार्थः । अनेन इट्पक्षे 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'स्तरिषीष्ट' इति सिद्ध्यति, इडभावे तु 'उश्च' इति कित्वाद् गुणनिषेधे 'स्तृषीष्ट' इति रूपं बोध्यम् । इट्पक्षे गुणः, इडभावे च कित्वाद् गुणनिधेषश्चेत्येते कार्ये लुङ्यात्मनेपदेऽपि स्मर्तव्ये । तत्र झलादौ 'ह्रस्वादङ्गात्' इति सिचो लुगपि भवत्येव ।

धुञ् (धु), धूञ् (धू) इत्येतौ धातू उभावपि कम्पनेऽर्थे वर्तेते (उभयपदिनौ, सकर्मकौ) । ह्रस्वो धु-धातुर्लिटि थलि वेट्, वे मे च सेट्, अन्यत्र तु अनिट् भवति । दीर्घो धू-धातुस्तु वेट् वर्तते, तस्मिन् 'स्वरतिसूतिसयतिधूञूदितो वा' इत्यनेन विकल्पेन इडागमो भवति परन्तु लिटि विशेषप्रक्रियवशात् सेट् भवति । सा च प्रक्रिया यथा-

**श्र्युकः किति ७।२।११।**

**श्रिञ्, एकाच उगन्ताच्च-गित्कितोरिण्न स्यात् । इति प्राप्ते । क्रादिनियमान्नित्यमिट् । दुधुविव । दुधुविम । अधावीत् । अधविष्ट/अधोष्ट । वृञ् वरणे । वृणोति । वृणुते ।**

श्रिञ् (श्रि) इति धातोः, एकाज्भ्य उगन्तेभ्यश्च धातुभ्यः परस्य गितः कितश्च प्रत्ययस्य इडागमो न

भवतीति सूत्रार्थः । अनेन सूत्रेण इण्णिषेधे प्राप्ते, अत्र क्रादिनियमान्नित्यमेव इडागमो भवति । अत्र स्मर्तव्यो विषयो यः- यद्यपि 'श्र्युकः किति ७।२।११' इत्यस्मात् 'स्वरतिसूतिसयतिधूञूदितो वा ७।२।४३' इति सूत्रं परं वर्तते तथापि 'श्र्युकः किति ७।२।११' इत्यनेन 'स्वरतिसूतिसयतिधूञूदितो वा ७।२।४३' इति सूत्रं बाध्यते, पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादिति ।

**बभूथाऽऽततन्थजगृम्भववर्थेति निगमे ७।२।६४।**

**एषा वेदे इडभावो निपात्यते । तेन भाषाया थलीट् । ववरिथ । ववृव । ववृम । ववृवहे । 'वृतो वा' । वरीता । वरिता ।**

बभूथ, आततन्थ, जगृम्भ, ववर्थ, इत्येतानि तिङन्तानि पदानि निपात्यन्ते, वेदविषय एव इति सूत्रार्थः ।

**लिङ्सिचोरात्मनेपदेषु ७।२।४२।**

**वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ्सिचोरिड् वा स्यात्तङि ।**

**न लिङि ७।२।३९।**

**वृतो लिङ इटो न दीर्घः । वरिषीष्ट । वृषीष्ट । अवारीत् । अवरिष्ट । अवरीष्ट । अवृत । अवरिष्यत । अवरीष्यत ।**

## अभ्यासः

१. **शुद्धमुच्चारणं कुरुत**

(क) स्तुसुधूञ्भ्यः सिचः परस्मैपदेषु

(ख) श्र्युकः किति ।

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) सुनोते स्यसनोः इति सूत्रं कुत्र प्रवर्तते ?

(ख) श्र्युकः कितिः इति सूत्रं किं कार्यं करोति ? ।

(ग) अभिषवपदबोध्याः अर्थाः के ?

३. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) सुनोति (ख) असावीत् (ग) स्तरिषीष्ट । स्तृषीष्ट ।

४. **निर्दिष्टधातूनां रूपाणि दर्शयत**

(क) षुञ्धातोर्लटि (ख) चिञ्धातोर्लोटि (ग) धूञ्धातोर्लुङि

## षोडशः पाठः

# अथ तुदादिप्रकरणम्

## तत्रोभयपदिनः ।

तुदादिगणे शपं प्रबाध्य विकरणप्रत्ययः श भवति । शप्रत्यये श् इत्यस्य अनुबन्धलोपे अ इत्यवशिष्यते । शित्त्वात् तिङ्शित्सार्वधातुकम् इति सार्वधातुकसंज्ञा भवति एवञ्च अस्य शस्य अपित्त्वात् सार्वधातुकमपित् इति ङिद्वद्भावः । तेन क्क्ङिति चेति गुणनिषेधः । एवं शपि पित्वे अनुदात्तौ सुप्पितौ इति अनुदात्तस्वरः, शे आद्युदात्तश्चेति उदात्तस्वर इति शब्विकरणप्रयोजनम् । अत्र प्रकरणारम्भे तुदधातुरस्तीति तुदादिरिति प्रकरणस्य नाम । स्वरितेतत्त्वादुभयपदी अनिट् चायं धातुः । ततः वर्तमानक्रियावृत्तित्वविवक्षयाम् लटि, तिपि, शपि प्राप्ते सूत्रमिदमारभ्यते -

तुद व्यथने । (अनिट्, सकर्मकः, उभयपदी)

**तुदादिभ्यः शः ३।१।७७।**

**शपोऽपवादः । तुदति । तुदतः । तुदते । तुतोद । तुतोदिथ । तुतुदे । तोत्ता । तोत्स्यति । तोत्स्यते । तुदतु । तुदताम् । अतौत्सीत् । अतुत्त ।**

तुदादिगणपठितेभ्यः धातुभ्यः शपम्प्रबाध्य शविकरणप्रत्ययो भवति । शकारस्य 'लशक्वतद्धिते' इतीत्संज्ञायां लोपे अकारः शिष्यते । शपश्चानुबन्धलोपे अकार एव शिष्यते । किन्तु शप्विकरणस्य पित्त्वम्, शविकरणप्रत्ययस्य च अपित्त्वम् इति तयोर्भेदः । तस्यापित्त्वात् 'सार्वधातुकमपित्' इति सूत्रेण ङिद्वद्भावः । तथा च सति तुद् इत्यस्योकारस्य लघूपधगुणः प्राप्तः 'क्क्ङिति च' इति निषिध्यते ।

**तुदति -** तुद् ल् (धातुसंज्ञा, लट्लकारोऽनुबन्धलोपश्च), तुद् ति (परमामिनि क्रियाफले परस्मैपदम्, लः स्थाने तिबनुबन्धलोपश्च) तुद् अ ति (शपम्प्रबाध्य शः, अनुबन्धलोपश्च, शविकरणस्यापित्त्वाद् सार्वधातुकमपित् इति ङित्त्वम्, लघूपधगुणनिषेधः) तुदति ।

**तुदतः -** तुद्धातोर्लटि तसि शप्रत्ययेऽनुबन्धलोपे सार्वधातुकत्वे गुणनिषेधे वर्णयोगे पदकार्ये च तुदतः ।

**तुदते -** तुद् ल्, (लट्लकारः) तुद् त (लट्लकारः, लः स्थाने कर्तृगामिनि क्रियाफले आत्मनेपदम्, तप्रत्ययः) तुद् अ त (शपम्प्रबाध्य शः, अनुबन्धलोपः, ङित्त्वम्) तुदते (टेरेत्वम्, पदकार्यञ्च) ।

**तुतोद -** तुद् ल् (लिट्, अनुबन्धलोपश्च) तुद् ति (लिटस्तिप्), तुद् अ (तिपो णलादेशोऽनुबन्धलोपश्च) तुद् तुद् अ (आर्धधातुकसंज्ञा, अभ्यासत्वम्, द्वित्वम्) तु तुद् अ (हलादिशेषः) तुतोद (लघूपधगुणः, वर्णयोगश्च) ।

**तुतोदिथ-** तुद् ल् (लिट्, अनुबन्धलोपश्च) तुद् थ (लिटः सिप् सिपस्थल्, आर्धधातुकसंज्ञा, आर्धधातुकस्येडिति इडागमप्राप्तिः, तस्य एकाच0 इति निषेधः) तुद् इ थ (ऋतो भारद्वाजस्य इति विकल्पेन इडागमः) तुद् इ थ (द्वित्वम्) तु तुद् इ थ (अभ्यासकार्यम्) तुतोदिथ (लघूपधगुणः, वर्णयोगश्च) । इडभावे तु तुद् थ (अभ्यासकार्यम्) तुतोत्थ (लघूपधगुणः, चर्त्वञ्च) ।

**तुतुदे -** तुद् ल् (लिट्, अनुबन्धलोपः), तुद् ए (लिटस्तप्रत्ययः, तस्य एशादेशोऽनुबन्धलोपश्च) तुद् तुद् ए (आर्धधातुकत्वम्, अभ्यासत्वम्, द्वित्वञ्च) तु तुद् ए (हलादिशेषः) तुतुदे (एशः अपित्वेन असंयोगाल्लिट् किदिति कित्त्वम्, लघूपधगुणनिषेधः) ।

**तोत्ता -** तुद् ल् (लुट्लकारः) तुद् ति (लस्य तिप्) तुद् तास् ति (तासिप्रत्ययोऽनुबन्धलोपश्च, तस्य आर्धधातुकसंज्ञा, इडागमप्राप्तिः, एकाच0 इति निषेधः) तुद् तास् आ (तिपो डादेशोऽनुबन्धलोपश्च) तुद् ता (डित्त्वस्य सामर्थ्यादभस्यापि टेर्लोपः) तोत्ता (लघूपधगुणः, चर्त्वञ्च) ।

**तोत्स्यति-** तुद् ति (लृट्, अनुबन्धलोपः, लस्य तिबादेशः) तुद् स्य ति (स्यप्रत्ययः, आर्धधातुकसंज्ञा, इडागमप्राप्तिः, एकाच0 इति निषेधः) तोत्स्यति (लघूपधगुणः, दकारस्य चर्त्वञ्च) ।

**तोत्स्यते -** तुद् त (लृट्, अनुबन्धलोपः, लस्यात्मनेपदम्, तादेशः) तुद् स्य त (स्यप्रत्ययः, आर्धधातुकसंज्ञा, इडागमप्राप्तिः, एकाच0 इति निषेधः) तोत्स्यते (लघूपधगुणः, दकारस्य चर्त्वम्, टेरेत्वञ्च) ।

**तुदतु -** तुद्धातोर्लोटि अनुबन्धलोपे शप्रत्यये तस्य अपित्त्वेन ङित्त्वाद्गुणनिषेधे एरुत्वे च तुदतु ।

**तुदताम् -** तुद्धातोर्लोटि आत्मनेपदि तप्रत्यये शप्रत्ययेऽनुबन्धलोपे तस्य अपित्त्वेन ङित्त्वाल्लघूपधगुणनिषेधे टेरेत्वे तुदते इत्यवस्थायां आमेतः इति एकारस्यामादेशे तुदताम् ।

**अतौत्सीत् । अतुत्त ।**

मिल सङ्गमे (सेट्, सकर्मकः, उभयपदी)

मिलति । मिलते । मिमेल । मिमिले । मेलिता । अमेलीत् ।

मिल्धातोर्लटि तुद्धातोरिव रूपाणि जायन्ते । थलादौ तु इडागमो विशेषः ।

मुच्लृ मोक्षणे । (अनिट्, सकर्मकः, उभयपदी)

**शे मुचादीनाम् ७।१।५९।**

**मुच्लुप्विद्लिप्सिच्कृत्खिद्पिशा नुम् । मुञ्चति । मुञ्चते । मुमुचे । मोक्ता । मोक्ष्यति । मोक्ष्यते । मुच्यात् । 'लिङ्सिचा'विति कित्त्व । मुक्षीष्ट । अमुचत् । अमुक्त । अमुक्षाताम् ।**

शप्रत्यये परे मुच्-लुप्-विद्-सिच्-कृत्-खिद्-पिश् एतेषां धातूनां नुमागमः भवति ।

मुच्धातोः पदान्ते झलि च परे चकारस्य कुत्वम् । अनुदात्तत्वाद् इण्निषेधः ।

मुञ्चति - मुच् ति (लट्, तिप्) मुच् अ ति (शप्रत्ययः) मुन् च् अ ति (नुमागमः) मुञ्च् अ ति (अनुस्वारपरसवर्णौ) मुञ्चति (वर्णयोगः) । एवं मुञ्चते ।

**मुमुचे तुतुदेवत् । मोक्ता तोत्तावत् ।**

मोक्ष्यति - मुच् स्य ति (लृट्, तिप्, शपम्प्रबाध्य स्यः) मुच् स्य ति (आर्धधातुकसंज्ञा, इडागमनिषेधः) मोक् स्य ति (लघूपधगुणः, चकारस्य कुत्वम्) मोक् ष्य ति (सकारस्य षत्वम्) मोक्ष्यति (कषसंयोगे क्षः) । एवं मोक्ष्यते ।

**मुच्यात् तुद्याद्वत् ।**

अमुचत् इत्यत्र लृदित्त्वाद् पुषादीति सिचः अङादेशः ।

अमुक्त - अ मुच् त (मुच्धातोर्लुङ् अडागमः त) अ मुच् स् त (सिच्, आर्धधातुकत्वम्, इण्निषेधः, झलो झलीति सिचः सकारस्य लोपः, कुत्वम्) अमुक्त (कुत्वम्) ।

अमुक्षाताम् - अ मुच् आताम् (लुङ्, अडागमः, लस्य आताम्) अमुच् स् आताम् (लिङ्सिचाविति सिचः कित्त्वम्, गुणनिषेधः) अ मुक् स् आताम् (कुत्वम्) अमुक्षाताम् (सकारस्य षत्वम्, क्षत्वम्, वर्णयोगश्च) ।

लिप उपदेहे । उपदेहो-वृद्धिः । (अनिट्, सकर्मकः, उभयपदी)

**लिम्पति । लिलेप । लिलिपे । लेप्ता । लेप्स्यति । लेप्स्यते । 'लिपिसिचिहवश्चे'त्यङ् । अलिपत् । अलिपत । अलिप्त । इत्युभयपदिनः ।**

लिप्धातोः मृच्लृधातोरिव रूपाणि जायन्ते ।

**अथ परस्मैपदिनः ।**

कृती छेदने । (सेट्, सकर्मकः, परस्मैपदी)

**कृन्तति । चकर्त । कर्तिता । 'सेऽसिची'ति वेट् । कर्तिष्यति । कर्त्स्यति । अकर्तीत् ।**

शप्रत्यये परे शे मुचादीनामिति नुमागमः । सकारादौ आर्धधातुके परे सेऽसिचि0 इति सूत्रेण नित्यमिडागमम्प्रबाध्य विकल्पेन इट् । अतः स्यप्रत्यये परे कर्तिष्यति, कर्त्स्यति इति रूपद्वयं जायते ।

**लुभ विमोहने । (सेट्, सकर्मकः, परस्मैपदी)**

लुभति । लुलोभ । 'तीषसहे'ति वेट् । लोभिता । लोब्धा । लोभिष्यति ।

तासौ तीषसहलुभरुषरिषः इति सूत्रेण विकल्पेन इडागमः । इडागमपक्षे लोभिता, इडभावे लोब्धा ।

तृप तृम्फ तृप्तौ । (सेट्, अकर्मकः, परस्मैपदी)

तृपति । ततर्प । तर्पिता । अतर्पीत् । तृम्फति । शस्य ङित्वादनिदितामिति नलोपः । (शे तृम्फादीनां नुम्वाच्यः ।) आदिशब्दः प्रकारे । प्रकारो भेदसादृश्ये । तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः । ततृम्फ । तृफ्यात् ।

तृम्फति - तृम्फधातोर्लटि तिपि शप्रत्यये शस्यापित्त्वेन सार्वधातुकमपिदिति ङिद्वद्भावेन अनिदितां हल उपधायाः क्ङिति इति सूत्रेण उपधानकारस्य लोपे तृफ् अ ति इति जाते शे तृम्फादीनामिति नुमागमेऽनुबन्धलोपेऽनुस्वाारपरसवर्णयोः वर्णसम्मेलने च तृम्फति इति सिद्ध्यति ।

तृम्फधातोर्लिटि तिपि णलादेशे अभ्याससंज्ञायां द्वित्वे ऋकारस्य अत्वे हलादिशेषे ततृम्फ इति सिद्ध्यति ।

तृफ्यात् -तृम्फ्धातोराशिषि लिङ्यनुबन्धलोपे तिपि आर्धधातुकसंज्ञायां यासुडागमे यासुटो ङित्त्वेन अनिदितामिति उपधानकारस्य लोपे तृफ्यादिति रूपं सिद्ध्यति ।

इष इच्छायाम् । (सेट्, सकर्मकः, परस्मैपदी)

'इषुगमी'ति छः । इच्छति । इयेष । 'तीषे'ति वेट् । एषिता । एष्टा । एषिष्यति । इष्यात् । ऐषीत् । ऐषिष्यत् ।

इच्छति - इष्धातोर्लटि तिपि शपम्प्रबाध्य शप्रत्यये षकारस्य छत्वे तुगागमे श्चुत्वे वर्णयोगे च इच्छति ।

तासौ तीषसहलुभरुषरिषः इति वेट् । एषिता, एष्टा । इति विशेषः ।

स्फुट विकसने । (सेट्, अकर्मकः, परस्मैपदी)

स्फुटति । पुस्फोट । स्फुटिता ।

टुमस्जो शुद्धौ । (अनिट्, अकर्मकः, परस्मैपदी)

मज्जति । ममज्ज । 'मस्जिनशो'रिति नुम् । (मस्जेरन्त्यात्पूर्वो नुम्वाच्यः ।) संयोगादिलोपः । ममङ्क्थ । ममज्जिथ । मङ्क्ता । मङ्क्ष्यति । 'चोः कु'रिति कुत्वेन जस्य गः । तस्य 'खरि चे'ति कः । 'अनुस्वारस्य ययी'त्यनुस्वारस्य ङः । अमाङ्क्षीत् । अमाङ्क्ताम् । अमाङ्क्षुः ।

मस्ज्धातोर्लटि तिपि शप्रत्यये सकारस्य श्चुत्वेन शकारे तस्य जश्त्वेन जकारे मज्जति यति रूपम् । लिटि तिपि णलि द्वित्वेऽभ्यासकार्ये म मस्ज् अ सकारस्य श्चुत्वेन शकारे तस्य 'झलां जश् झशि' इति जश्त्वेन जकारे ममज्ज ।

ममङ्क्थ -मस्ज्धातोर्लिटि सिपि थलि इण्निषेधे मस्जिनशोर्झलीति नुमागमे मस्जेरन्त्यात्पूर्वो नुम्वाच्यः इति नियमेन तस्य जकारपूर्वत्वे

प्रच्छ ज्ञीप्सायाम् । 'ग्रहिज्ये'ति संप्रसारणम् । पृच्छति । पप्रच्छ । पप्रच्छतुः । पप्रच्छुः । प्रष्टा । प्रक्ष्यति । अप्राक्षीत् ॥ इति परस्मैपदिनः ।

पृच्छति - प्रच्छ्धातोर्लटि तिपि शप्रत्ययेऽनुबन्धलोपे तस्य ङित्त्वेन ग्रहिज्या0 इति सूत्रेण प्रच्छधातोः रेफस्य सम्प्रसारणे पृ अ च्छ ति इति जाते सम्प्रसारणाच्चेति पूर्वरूपे पृच्छति ।

प्रष्टा - प्रच्छ्धातोर्लुटि तिपि तासौ तिपो डादेशे प्रच्छ् तास् आ इति जाते छकारस्य 'व्रश्चभ्रस्ज0' इति षत्वे, सकारस्य संयोगादिलोपे तासः टिलोपे वर्णयोगे प्रष् ता इत्यत्र ष्टुत्वे प्रष्टा इति रूपम् ।

अप्राक्षीत्- प्रच्छ्धातोर्लुङि अटि तिपि च्लौ सिचि 'व्रश्चभ्रस्ज0' इति सूत्रेण छस्य षत्वे 'षढोः कः सि' इति षस्य कत्वे सस्य षत्वे तिप इलोपे 'अस्तिसिचोऽपृक्ते' इति ईटि 'वदव्रजहलन्त्यस्याचः' इति वृद्धौ अप्राक्षीत् ।

## ॥ अथाऽऽत्मनेपदिनः ॥

मृङ् प्राणत्यागे । (अनिट्, अकर्मकः, आत्मनेपदी)

**म्रियतेर्लुङ्लिङोश्च १।३।६१।**

**लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङानौ, नान्यत्र । द्वित्वं स्वरार्थम् । 'रिङ्शयग्लिङ्क्षु ।' इयङ् ।**

**म्रियते । ममार । ममर्थ । मम्रिव । मम्रिम । मर्त्ता । मरिष्यति । मृषीष्ट । अमृत । अमरिष्यत् ।**

यद्यपि मृङ्धातोः ङित्त्वेन आत्मनेपदम् सिद्धम्, तथापि अनेन सूत्रेण सर्वत्र न अपि तु लुङि, लिङि, शिति विकरणे च विवक्षिते एव आत्मनेपदं भवतीति नियम्यते । एतेन लिटि, लुटि, लृटि, आशीर्लिङि, लृङि च परस्मैपदमेव ।

**म्रियते -** मृङ्धातोर्लटि लटः स्थाने 'म्रियतेर्लुङ्लिङोश्च' इति तप्रत्यये शप्रत्ययेऽनुबन्धलोपे 'रिङ् शयग्लिङ्क्षु' इति ऋकारस्य रिङादेशेऽनुबन्धलोपे 'अचिश्नुधातु०' इति सूत्रेण इकारस्य इयङादेशे टेरेत्त्वे म्रियते ।

लिटि, लुटि च हृधातोः परस्मैपदस्येव रूपाणि जायन्ते । स्ये च 'ऋद्धनोः स्ये' इति हृधाताविव इडागमः । मृषीष्ट, अमृत इत्यत्रात्मनेपदि हृषीष्ट इतिवद् रूपम् ।

**पृङ् व्यायामे ।**

प्रायेणाऽत्र 'व्याङ्'पूर्वः । व्याप्रियते । व्यापप्रे । व्यापप्राते । व्यापरिष्यते । 'ह्रस्वादङ्गा'दिति सिज्लोपः । व्यापृत । व्यापृषाताम् ।

पृङ्धातोः प्रायशः व्याङ्पूर्वक एव प्रयोगः दृश्यते । शप्रत्यये परे रिङ्शयग्लिङ्क्षु इति रिङादेशः । शप्रत्ययाभावे हृधातोरात्मनेपदस्येव रूपाणि जायन्ते ।

जुष प्रीतिसेवनयोः । (सेट्, सकर्मकः, आत्मनेपदी)

**जुषते । जुजुषे । जोषिता ।**

**ओविजी भयसञ्चलनयोः । (सेट्, अर्कमकः, सकर्मकः, आत्मनेपदी)**

प्रायेणायमुत्पूर्वः । उद्विजते ।

**विज इट् १।२।२।**

**विजेः पर इडादिप्रत्ययो ङिद्वत् स्यात् । उद्विजिता । उद्विजिष्यते ।**

अनेन सूत्रेण इडादिप्रत्ययस्य ङिद्वद्भावेन गुणो निषिध्यते ।

उद्विजिता- उदुपसर्गपूर्वकाद् विज्धातोर्लुटि तप्रत्यये तासौ तस्य डादेशे उद् विज् तास् आ इति जाते, तास आर्धधातुकत्वेन इडागमे विज इट् इति सूत्रेण तासः ङित्त्वे प्राप्तस्य लघूपधगुणस्य निषेधे उद् विज् इ तास् आ इति जाते तासस्टेर्लोपे वर्णयोगे च उद्विजिता । एवम् उद्विजिष्यते इत्यत्रापि गुणनिषेधः ।

ओलजी ओलस्जी व्रीडायाम् । (सेट्, अकर्मकः, आत्मनेपदी)

**लजते । लेजे । लज्जते । ललज्जे ।**

ओकारस्य ईकारस्य च इत्संज्ञायां लोपे लज्, लस्ज् इति शिष्येते । लज्धातोः लजते इत्यादिरूपाणि । लिटि एकहल्मध्यस्थत्वादकारस्य एत्वम् । लज्ज्धातोस्तु मस्ज्धातोरिव श्चुत्वं जश्त्वञ्च । लिटि एत्वं न एकहल्मध्यस्थत्वाभावात् ।

लज्जते - लस्ज्धातोर्लटि तप्रत्यये शप्रत्ययेऽनुबन्धलोपे लस्ज् अ त इति जाते सकारस्य श्चुत्वेन शकारे तस्य जश्त्वेन जकारे वर्णयोगे टेरेत्वे च लज्जते ।

## अभ्यासः

१. **सोदाहरणं सूत्रार्थं लिखत**

(क) तुदादिभ्यः शः (ख) शे मुचादीनाम् (ग) म्रियतेर्लुङ्लिङोश्च

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) तुद्धातुः कस्मिन्नर्थे प्रयुज्यते ?

(ख) मुचादयः के ? शप्रत्यये परे मुचादिषु को विशेषः ?

(ग) 'लोभिता, लोब्धा' इत्यत्र केन सूत्रेण इडागमविकल्पः ?

(घ) इष्धातोः षकारस्य छत्वं केन ?

(ङ) 'ममङ्क्थ' इत्यादौ मस्ज्धातोः नुमागमः कुत्र ?

(च) 'ललज्जे' इत्यत्र कथमेत्वाभ्यासलोपौ न ?

(छ) मृङ्धातोः कुत्र कुत्र आत्मनेपदम् ?

(ज) पृङ्धातुः प्रायः किम्पूर्वः प्रयुज्यते ? भूधातोर्लटि मध्यमपुरुषे कानि रूपाणि जायन्ते ?

(झ) प्रायः विज्धातुना सह क उपसर्गः युज्यते ?

(ञ) 'तृफ्यात्' इत्यादौ नलोपविधायकं सूत्रं किम् ?

३. **तुद्धातोर्लुङि परस्मैपदे सर्वाणि रूपाणि लिखत ।**

४. **मृङ्धातोर्लटि सर्वाणि रूपाणि लिखत ।**

५. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) तुतोदिथ (ख) मुञ्चति (ग) कर्त्तिष्यति । कर्त्स्यति । (घ) तृफ्यात्

(ङ) ममज्ज (च) अप्राक्षीत् (छ) म्रियते (ज) व्यापृत

(झ) उद्विजिता (ञ) लज्जते

८. **तुदादिगणपठितेभ्यः पञ्च सेट्धातून्, पञ्च अनिट्धातूंश्च अन्विष्य लिखत ।**

९. **तुदादिगणपठितेभ्यो धातुभ्यो निर्मितानि क्रियापदानि प्रयुज्य पञ्च वाक्यानि रचयत ।**

**सप्तदशः पाठः**

# अथ रुधादिप्रकरणम्

रुधिर् आवरणे । (अनिट्, सकर्मकः, उभयपदी)

**रुधादिभ्यः श्नम् ३।१।७८।**

**रुधादिभ्यः श्नं स्यात्, कर्त्रर्थे सार्वधातुके परे । शपोऽपवादः । मित्वादन्त्यादचः परः । नित्यत्वाद् गुणं बाधते । रुणद्धि । 'श्नसोरल्लोपः' । 'झरो झरी'ति धलोपः । णत्वस्याऽसिद्धत्वादनुस्वारः । परसवर्णः । तस्याऽसिद्धत्वाण्णत्वं न । 'न पदान्ते'ति सूत्रेणाऽसिद्धत्वादनुस्वारः । परसवर्णः । तस्याऽसिद्धत्वाण्णत्वं न । 'न पदान्ते'ति सूत्रेणाऽनुस्वारपरसवर्णयोरल्लोपो न स्थानिवत् । रुन्द्धः । रुन्द्धन्ति । रुणत्सि । रुन्द्धः । रुन्द्ध । रुणध्मि । रुन्ध्वः । रुन्ध्मः । रुन्धे । रुन्धाते । रुन्धते । रुन्त्से । रन्धाथे । रुन्द्ध्वे । रुन्धे । रुन्ध्वहे । रुन्ध्महे ।**

रुधादिभ्यो धातुभ्यः श्नम्विकरणप्रत्ययो जायते । शकारस्य लशक्वतद्धिते इति, मकारस्य च हलन्त्यमिति इत्संज्ञायां लोपे न इत्येव शिष्यते । तस्य मित्त्वाद् अन्त्यादचः परत्वम् ।

रुणद्धि - रुध् (रुधिर् आवरणे) इति धातोर्लटि तिपि शपम्प्रबाध्य 'रुधादिभ्यः श्नम्' इति श्नम्प्रत्ययेऽनुबन्धलोपे 'मिदचोऽन्त्यात् परः' इति सूत्रबलाद् अन्त्यादचः परे रुनध् ति इत्यवस्थायां 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति नस्य णत्वे रुणध् ति इति जाते 'झषस्तथोर्धोऽधः' इति तिपस्तस्य धत्वे पूर्वधकारस्य 'झलां जश् झशि' इति जश्त्वे च रुणद्धि इति रूपम् ।

**रुरोध । रुरुधे । रोद्धा । रोत्स्यति । रोत्स्यते । रुणद्धु । रुन्धात् । रुन्द्धाम् । रुन्धन्तु । रुन्धि । रुणधानि । रुणधाव । रुणधाम । रुन्द्धाम् । रुन्धाताम् । रुन्धताम् । रुन्त्स्व । रुणधै । रुणधावहै । रुणधावहै । अरुणत्-द् । अरुन्धाम् । अरुन्धन् । 'दश्चे' ति रुः । अरुणः । अरुणत्-द् । अरुन्धम् । अरुन्द्ध । अरुणधम् । अरुन्ध्व । अरुन्ध्म । अरुन्द्ध । अरुन्धताम् । अरुन्धत । अरुन्धाः । अरुन्धाथाम् । अरुन्ध्वम् । अरुन्धि । अरुन्ध्वहि । अरुन्ध्महि । सामानाश्रये आभीयत्वेन अल्लोपस्याऽसिद्धत्वादनिदितामिति नलोपो न । रुन्ध्यात् । रुन्धीत । रुध्यात् । रुत्सीष्ट । अरुधत् । अरौत्सीत् । 'लिङ्सिचा'विति कित्त्वम् । अरुद्ध । अरोत्स्यत् । अरोत्स्यत ।**

**अरुधत्, अरौत्सीत्, अरुद्ध,**

रुधधातोर्लुङि रुध्+ल्, अडागमे, तिपि, च्लिप्रत्यये, तत्र सिजादेशे प्राप्ते, (इरितो वा) विकल्पेन च्लेरङि, अनुबन्धलोपे ङित्त्वात् लघूपधगुणनिषेधे, (इतश्च) इकारस्य लोपे अरुधत् । अङादेशाभावे सिचि अरुध्+स्+ति, इकारलोपे, तकारस्य अपृक्तसंज्ञायाम्, (अस्तिसचोऽपृक्ते) ईडागमे अरुध्+स्+ई+त्

(वदव्रजहलन्तस्याचः) उकारस्य वृद्धौ) अरौध्+सीत् (खरि च) चर्त्वे अरौत्सीत् । आत्मनेपदे तु लुङि, ते, अटि, सिचि, अरुध्+स्+त, (लिङ्सिचा0) सिचः कित्त्वे, (झलो झलि) सलोपे, (झषस्तथो.) तस्य धकारे, जश्त्वे च अरुद्ध ।

## अथ परस्मैपदिनः

तृह हिसि हिंसायाम् । (सेटौ, सकर्मकौ, परस्मैपदिनौ)

**तृणह इम् ७।३।९२।**

**तृहः श्नमि कृते इम् स्याद्धलादौ पिति । तृणेढि । तृण्ढः । ततर्ह । तर्हिता । अतृणेट् ।**

हलादौ पिति परे तृह्धातोः श्नम्प्रत्यये परे सति इम् इति आगमो भवति । तिप्प्रत्ययः पित् हलादिश्च वर्तते । अतः तस्मिन् परे इम् आगम्यते । इमो मकारस्य इत्संज्ञायां मित्त्वादन्त्यादचः परत्त्वम् । विकरणसहितस्याङ्गत्वाद् श्नमः अकारात्पर इमागमः ।

तृणेढि -तृह्धातोः लटि तिपि शपम्प्रबाध्य श्नमि तृ न ह् ति इति जाते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति णत्वे तृ ण ह् ति इत्यवस्थायां 'तृणह इम्' इति इमागमेऽनुबन्धलोपे मित्वादन्त्यादचः परे तृण इ ह् ति इत्यवस्थायां गुणे तृणेह् ति इति जाते 'हो ढः' इति हकारस्य ढत्वे तृणेढ् ति इति जाते तिपस्तकारस्य 'झषस्तथोर्धोऽधः' इति धत्वे तस्य श्चुत्वेन ढकारे तृणेढ् ढि इति जाते पूर्वढकारस्य 'ढो ढे लोपः' इति लोपे तृणेढि इति सिद्धम् ।

तृण्ढः - तृह्धातोर्लटि तसि श्नमि णत्वे तसोऽपित्त्वाद् ङिद्वद्भावे श्नमोऽकारस्य लोपे हकारस्य ढत्वे तकारस्य धत्वे ष्टुत्वे पूर्वढकारस्य लोपे तृण्ढः ।

**श्नान्नलोपः ६।४।२३।**

**श्नमः परस्य नस्य लोपः स्यात् । हिनस्ति । जिहिंस । हिंसिता ।**

हिसिधातोः इदित्त्वाद् 'इदितो नुम् धातोः' इति नुमागमो भवति । श्नम्प्रत्यये विहिते सति श्नमः अन्त्यादचः परत्वाद् हि न न् स् ति इति स्थितिः भवति । एतस्यामवस्थायां श्नमः परस्य नुमो नकारस्य लोपो भवति इति बोध्यम् ।

हिसिधातोर्लटि तिपि श्नमि नुमागमे च विहिते हि न न् स् ति इति जाते 'श्नान्नलोपः' इति नुमो नकारस्य लोपे हिनस्तीति सिद्धम् ।

भुज पालनाऽभ्यवहारयोः । (अनिट्, सकर्मकः, परस्मैपदी)

**भुनक्ति । बुभोज । भोक्ता । भोक्ष्यति । भुनक्तु । अभुनक् ।**

भुज्धातोर्लटि तिपि श्नमि 'चो कुः' इति जकारस्य कुत्वे चर्त्वे च भुनक्ति इति रूपम् ।

**भुजोऽनवने १।३।६६।**

**भुजोऽनवने तङानौ स्तः । ओदनं भुङ्क्ते । अनवने किम् ? मही भुनक्ति ।**

**अवनम् पालनं रक्षणं वा, एतदर्थं विहाय अन्येष्वर्थेषु भुज्धातोरात्मनेपदं भवति इत्यर्थः । ओदनं भुङ्क्ते इत्यर्थः भुज्धातुः रक्षणार्थो नास्ति अपि तु भक्षणार्थः । अतोऽत्र आत्मनेपदम् । मही भुनक्ति इत्यत्र तु भुज्धातोरवनार्थत्वात्परस्मैपदमेव ।**

भुङ्क्ते - भुज्धातोर्लटि 'भुजोऽनवने' इति आत्मनेपदे तप्रत्यये श्नमि भुनज् त इति जाते तप्रत्ययस्य अपित्त्वाद् ङित्त्वेन 'श्नसोरल्लोपः' इति अकारलोपे जकारस्य कुत्वचर्त्वयोः नकारस्यानुस्वारपरसवर्णयोः भुङ्क् त इत्यवस्थायां टेरेत्वे वर्णयोगे च भुङ्क्ते इति रूपम् ।

## अभ्यासः

१. **सोदाहरणं सूत्रार्थं लिखत**

(क) रुधादिभ्यः श्नम् (ख) श्नसोरल्लोपः (ग) भुजोऽनवने

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) रुध्धातुः सकर्मकः अकर्मको वा ?

(ख) हिसिधातुः कस्मिन्नर्थे प्रयुज्यते ?

(ग) रुध्धातोर्लुङि तिपि परस्मैपदे कानि रूपाणि ?

(घ) तृह्धातौ को विशेषः ?

(ङ) भुज्धातोरर्थः कः ?

(च) 'भुङ्क्ते' इत्यत्र केन सूत्रेण आत्मनेपदम् ?

(छ) 'हिनस्ति' इत्यत्र केन सूत्रेण नुमो नकारस्य लोपः ?

३. **निर्देशानुसारं सर्वाणि रूपाणि लिखत**

(क) रुध्धातोर्लटि परस्मैपदे (ख) तृह्धातोर्लङि (ग) भुज्धातोर्लटि आत्मनेपदे

४. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) रुणद्धि (ख) रुन्द्धः (ग) अरुणत् (घ) तृणेढि (ङ) हिनस्ति

(च) जिहिंस (छ) बुभोज (ज) अभुनक् (झ) भुङ्क्ते

५. **अधस्तनपदानां वाक्ये प्रयोगं कुरुत**

(क) रोत्स्यति (ख) हिनस्ति (ग) भुनक्ति (ग) भुङ्क्ते

# अष्टादशः पाठः

## अथ तनादिप्रकरणम्

## (अथ स्वरितेतो, ञितश्च-उभयपदिनः) ।

तनादिप्रकरणे शपं प्रबाध्य उ इति विकरणप्रत्ययो भवति । तनु विस्तारे इत्यत्र धातुपाठस्थ उकारः स्वरितः । तनुप्रभृतयः स्वरितेत्त्वात् डुकृञ् इत्यादयो ञित्त्वाच्चोभयपदिनः सन्ति । अत्र तनादिधातूनां सिद्धिप्रकारः प्रदर्श्यते ।

तनु विस्तारे । (सेट्, सकर्मकः, उभयपदी)

**तनादिकृञ्भ्यः उः ।३।१।७९।**

**तनादेः, कृञश्च उः प्रत्ययः स्यात्कर्त्रर्थे सार्वधातुके । तनोति । तनुते ।**

तनादिगणपठितेभ्यो धातुभ्यः कृञ्धातोश्च कर्त्रर्थे सार्वधातुके परे शपम्प्रबाध्य उप्रत्ययो विधीयते इति सूत्रार्थः ।

तनोति, तनुते - विस्तारार्थकात् तनुधातोरुकारस्यानुबन्धलोपे लटि, परस्मैपदे तिपि, सार्वधातुकसंज्ञायाम्, शपम्प्रबाध्य (तनादिकृञ्भ्य उः) उप्रत्यये, तन्+उ+ति, (सार्वधातुकार्धधातुकयोः) गुणे, वर्णयोगे, तनोति इति रूपसिद्धिः । आत्मनेपदे तु तन् लट्, त, ङिद्वद्भावे, उप्रत्यये, तन+उ+त (ङित्वाद् गुणनिषधे, अकारस्य (अचोऽन्त्यादि टिः) टिसंज्ञायाम्, (टित आत्मनेपदानां ..) टेरेत्वे तनुते ।

ततान । तेने । तनिता । तनिष्यति । तनिष्यते । तनोतु । तनुताम् । अतनोत् । अतनुत । तनुयात् । तन्वीत । तन्यात् । तनिषीष्ट । अतनीत् । अतानीत् ।

ततान इत्यादि स्पष्टमेव । अतनीत्, अतानीत् इत्यत्र तु 'अतो हलादेर्लघोः' इति सूत्रेण विकल्पेन वृद्धिः । वृद्धिपक्षे अतानीत्, वृद्ध्यभावे अतनीत् ।

**तनादिभ्यस्तथासोः ।२।४।७९।**

**तनादेः सिचो वा लुक् स्यात्तथासोः । 'अनुदात्तोपदेशे'ति नलोपः । अतत । अतनिष्ट । अतथाः । अतनिष्ठाः । अतनिष्यत् । अतनिष्यत ।**

तप्रत्यये, थास्प्रत्यये च परे तनादिगणपठितेभ्यो धातुभ्यः परस्य सिचो विकल्पेन लुग् भवतीति सूत्रार्थः ।

अतत - तन्धातोर्लुङ्यडागमे आत्मनेपदे तप्रत्यये अ तन् त इति जाते सार्वधातुकसंज्ञायां शपम्प्रबाध्य च्लौ च्लेः सिजादेशेऽनुबन्धलोपे अ तन् स् त इति जाते 'अकृतव्यूहाः

पाणिनीयाः' इति परिभाषया सिज्लुकि विधास्यमाने इडागमाद्यभावे 'तनादिभ्यस्तथासोः' इति सूत्रेण तप्रत्यये परे सिचो विकल्पेन लुकि अ तन् त इत्यवस्थायां त इत्यस्यापित्त्वेन ङित्त्वात् तस्मिन् परे 'अनुदात्तोपदेशवनति0' इत्यादिसूत्रेण नकारस्य लोपे अतत इति रूपम् । सिज्लुगभावे अ तन् स् त इत्यवस्थायां सिच इडागमे अ तन् इ स् त सकारस्य षत्वे तकारस्य ष्टुत्वे वर्णयोगे च अतनिष्ट इति रूपम् ।

डुकृञ् करणे । (अनिट्, सकर्मकः, उभयपदी)

करोति । अत उत्सार्वधातुके' । कुरुतः । 'हलि चे'ति दीर्घे प्राप्ते-

कृधातोः उप्रत्यये तस्य 'आर्धधातुकं शेषः' इति आर्धधातुकसंज्ञा भवति । आर्धधातुकसंज्ञके उप्रत्यये परे कृ इत्यस्य ऋकारस्य 'सार्वधातुकार्धधातुकयोः' इति गुणः भवति । तिबादौ सार्वधातुके परे उकारस्यापि गुणो भवति ।

करोति - कृधातोर्लटि परस्मैपदे तिपि शपम्प्रबाध्य उप्रत्यये तस्यार्धधातुकसंज्ञायां ऋकारस्य सार्वधातुकार्धधातुकयोरिति गुणे उकारस्यापि गुणे करोतीति रूपम् । कुरुतः इत्यत्र तु तसः अपित्त्वेन सार्वधातुकमपिदिति ङित्त्वेन उकारस्य गुणो न जायते । ऋकारस्य गुणे करुतः इत्यवस्थायां 'अत उत्सार्वधातुके' इति सूत्रेण अकारस्य उकारे कुरुतः इति रूपम् ।

बहुवचने झिप्रत्यये कृ उ झि इत्यत्र झस्यान्तादेशे गुणे कर् उ अन्ति इत्यवस्थायां अत उत्वे यणि कुर् व् अन्ति इत्यवस्थायां उकारस्य 'हलि च' इति उपधादीर्घे प्राप्ते-

**न भकुर्छुराम् ।८।२।७९।**

**भस्य, कुर्छुरोश्चोपधाया न दीर्घः । कुर्वन्ति ।**

भसंज्ञकस्योपधायाः, कुर् छुर् इत्यनयोश्चोपधायाः दीर्घादेशो न भवति इत्यर्थः । एतेन दीर्घनिषेधे कुर्वन्ति इति रूपं सिद्धम् ।

**नित्यं करोतेः ।६।४।१०८।**

**करोतेः प्रत्ययोकारस्य नित्यं लोपो, म्वोः । कुर्वः । कुर्मः । कुरुते । चकार । चकर्थ । चकृव । चकृम । चक्रे । कर्ता । करिष्यति । करिष्यते । करोतु । कुरुताम् । अकरोत् । अकुरुत ।**

मकारे वकारे च परे करोतेः (डुकृञ् करणे इति धातोः) प्रत्ययोकारस्य नित्यं लोपो भवति इत्यर्थः । कृ उ वस्, कृ उ मस् इत्युभयत्र ऋकारस्य आर्धधातुकगुणे अत उत्त्वे च कुरुवस्, कुरुमस् इति अवस्था सञ्जायते । वकारे मकारे च परे प्रत्ययोकारस्य लोपे पदकार्ये च कुर्वः, कुर्मः इति रूपे सिद्ध्यतः । कुरुते इत्यत्र कृधातोर्लटि आत्मनेपदे तप्रत्यये उप्रत्यये ऋकारस्यार्धधातुकगुणे रपरत्वे तप्रत्ययस्य

ङिद्वद्भावे अत उत्वे च उकारस्य गुणनिषेधे टेरेत्वे च कुरुते इति रूपम् सिद्धम् । लिटि क्रादिनियमेन नित्यमिण्निषेधः । स्ये तु 'ऋद्धनोः स्ये' इतीडागमः ।

**ये च ६।४।१०९।**

**कृञ उलोपो, यादौ प्रत्यये । कुर्यात् । कुर्वीत । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत । अकरिष्यत् । अकरिष्यत ।**

यकारादौ प्रत्यये परे करोतेः प्रत्ययोकारस्य लोपो भवतीत्यर्थः । तथा च सति कुर्याद् इत्यादौ उकारस्य नित्यं लोपः । कुर्वीत इत्यत्र नित्यं करोतेः इति उलोपः । क्रियात् इत्यत्र 'रिङ्शयग्लिङ्क्षु' अनेन रिङ् । लुङि, लृङि च हृधातोरिव रूपाणि ।

**संपरिभ्यां करोतौ भूषणे ६।१।१३८**

**समवाये च ६।१।१३८।**

**आभ्यां परस्य करोतेः सुट् भूषणे, सङ्घाते चार्थे । संस्करोति । अलङ्करोतीत्यर्थः । संस्कुर्वन्ति । सङ्घीभवन्तीत्यर्थः । संपूर्वस्य क्वचिदभूषणेऽपि सुट् । 'संस्कृतं भक्षाः' इति ज्ञापकात् ।**

भूषणे समूहे चार्थे सम्, परि इत्येताभ्यां उपसर्गाभ्यां परस्य कृधातोः सुडागमः भवति इत्यर्थः । उकारस्य टकारस्य च इत्संज्ञायां लोपे च सकार एव शिष्यते । तस्य च टित्त्वादाद्ययवयवत्वम् । तथा च सति समुपसर्गात् कृधातौ परे संस्कृ इति, पर्युपसर्गात् कृधातौ च परे परिष्कृ इति प्रकृतिर्भवति । संस्करोति, परिष्करोतीत्यादिरूपाणि च यथायथं सिद्ध्यन्ति ।

**उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च ६।१।१३९।**

**कृञः सुट् स्याच्चात्प्रागुक्तयोरर्थयोः ।प्रतियत्नो - गुणाधानम् । विकृतमेव वैकृतं-विकारः । वाक्याध्याहारः- आकाङ्क्षितैकदेशपूरणम् । उपस्कृता कन्या । उपस्कृता ब्राह्मणाः । एधोदकस्योपस्कुरुते । उपस्कृतं भुङ्क्ते । उपस्कृतं ब्रूते ।**

उपोपसर्गात् परस्य कृधातोः प्रतियत्नादिष्वलङ्कारादिषु चार्थेषु सुडागमो भवति इत्यर्थः । उपस्कृता कन्या, अलङ्कृता इत्यर्थः । उपस्कृता ब्राह्मणाः, समुदिता इत्यर्थः । एधो दकस्योपस्कुरुते, गुणाधानं करोति इत्यर्थः । उपस्कृतं भुङ्क्ते, विकृतमित्यर्थः । उपस्कृतं ब्रूते, वाक्याध्याहारेण ब्रूते इत्यर्थः ।

**मनु अवबोधने । (सेट्, सकर्मकः, आत्मनेपदी)**

**मनुते । मेने । मनिता । मनिष्यते । मनुताम् । अमनुत । मन्वीत । मनिषीष्ट ॥**

मन्धातोस्तन्धातोरात्मनेपदस्येव रूपाणि जायन्ते ।

## अभ्यासः

१. **सोदाहरणं सूत्रार्थं लिखत**

((क) तनादिकृञ्भ्य उः

((ख) न भकुर्छुराम्

((ग) सम्परिभ्यां करोतौ भूषणे

२. **अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) तनादिभ्यो धातुभ्यः को विकरणः ?

(ख) तनुधातुः कस्मिन्नर्थे प्रयुज्यते ?

(ग) अतत इत्यत्र नलोपविधायकं सूत्रं किम् ?

(घ) अतनीत्/अतानीत् इत्यत्र केन वृद्धिविकल्पः ?

(ङ) 'कुर्वन्ति' इत्यत्र उपधादीर्घनिषेधः केन ?

(च) 'कुर्वः, कुर्मः' इत्यनयोः उलोपविधायकं सूत्रं किम् ?

(छ) समुपसर्गात् परस्य कृधातोः कयोरर्थयोः सुडागमः ?

(ज) 'मनु अवबोधने' इति धातोः कतमं पदम् ?

३. **निर्देशानुसारं रूपाणि लिखत**

(क) तन्धातोर्लुङि आत्मनेपदे (ख) कृधातोर्लटि परस्मैपदे

(ग) कृधातोर्लुङि परस्मैपदे (घ) मन्धातोराशीर्लिङि

४. **प्रमुखसूत्रनिदर्शनपूर्वकं रूपसिद्धिप्रकारं प्रदर्शयत**

(क) तनोति (ख) तेने (ग) अतत/अतनिष्ट (घ) कुर्वन्ति (ङ) कुर्वः

(च) चक्रे (छ) अकार्षीत् (ज) संस्कुर्वन्ति (झ) मन्वीत

५. **अधस्तनपदानां वाक्ये प्रयोगं कुरुत**

(क) तनोति (ख) चकार (ग) अकार्षीत् (ग) मनुते

## एकोनविंशः पाठः

# अथ क्र्यादिप्रकरणम्

क्र्यादिप्रकरणे सार्वधातुकलकारेषु शपं बाधित्वा श्ना (ना) इति विकरणप्रत्ययो विधीयते, तस्य च शित्वात् सार्वधातुकसंज्ञा भवति । अपित्सार्वधातुकत्वाद् ङिद्वद्भावे अङ्गस्य गुणनिषेधो भवति । आरम्भे डुक्रीञ् (क्री) इति धातोः पाठात् प्रकरणस्य नाम क्र्यादि इति जातम् ।

**डुक्रीञ् द्रव्यविनिमये ।**

द्रव्यविनिमयार्थको डुक्रीञ् (क्री) इति धातुरनिट्, सकर्मकः, उभयपदी वर्तते ।

**क्र्यादिभ्यः श्ना ३।१।८१।**

**क्र्यादिभ्यः श्ना स्यात्, कर्त्रर्थे सार्वधातुके परे । शपोऽपवादः । क्रीणाति । 'ई हल्यघोः' । क्रीणीतः । 'श्नाभ्यस्तयोरातः' । क्रीणन्ति । क्रीणासि । क्रीणीथः । क्रीणीथ । क्रीणामि । क्रीणीवः । क्रीणीमः । क्रीणीते । क्रीणाते । क्रीणते । क्रीणीषे । क्रीणाथे । क्रीणीध्वे । क्रीणे । क्रीणीवहे । क्रीणीमहे । चिक्राय । चिक्रियतुः । चिक्रियुः । चिक्रयिथ । चिक्रेथ । चिक्रिये । क्रेता । क्रेष्यति । क्रष्यते । क्रीणातु । क्रीणीतात् । क्रीणीताम् । क्रीणीताम् । क्रीणाताम् । क्रीणताम् ॥ क्रीणीयात् । क्रीणीत । क्रीयात् । क्रेषीष्ट । अक्रैषीत् । अक्रेष्ट । अक्रेष्यत् । अक्रेष्यत ।**

क्र्यादिगणपठितेभ्यो धातुभ्यः श्ना इति विकरणप्रत्ययो भवति, कर्तरि अर्थे विहिते सार्वधातुकसंज्ञके प्रत्यये परे इत्यर्थः । क्री-धातोर्लटि, ञित्वात् क्रियाफलेऽकर्तृगे सति परस्मैदे तिपि, सार्वधातुकसंज्ञायाम्, शपम्प्रबाध्य (क्र्यादिभ्यः श्ना) श्ना-प्रत्ययेऽनुबन्धलोपे, शित्वात् सार्वधातुकसंज्ञायाम्, अपित्सार्वधातुकत्वात् (सार्वधातुकमपित्) ङिद्वत्वे, ङित्वाद् धातोर्गुणनिषेधे, (अट्कुप्वाङ्नुम्..) नकारस्य णत्वे- क्रीणाति । तसादिहलादिष्वपिद्विभक्तिषु 'ई हल्यघोः' इति श्ना इत्यस्याकारस्य ईत्वे- क्रीणीतः इत्यादि । झौ अन्तादेशे कृते 'श्नाभ्यस्तयोरातः' इति आकारलोपे, गुणनिषेधे, नकारस्य णत्वे च- क्रीणन्ति । कर्तृगामिनि क्रियाफले तु आत्मनेपदे क्री+त, सार्वधातुकसंज्ञायाम्, शपम्प्रबाध्य श्ना-प्रत्यये, अपित्सार्वधातुकत्वेन ङित्वे, गुणनिषेधे 'क्री+ना+त' अत्र (ई हल्यघोः) श्ना इत्यस्याकारस्येत्वे, णत्वे- क्रीणीते । शेषलकारेषु पूर्ववत्प्रक्रिययैव रुपाणि निष्पद्यन्ते ।

एवं प्रीञ् तर्पणे, कान्तौ च । (अनिट्, तर्पणेऽर्थे सकर्मकः कान्तावर्थे त्वकर्मकः, उभयपदी) प्रीणाति । प्रीणीते ।

पूञ् पवने । (सेट्, सकर्मकः, उभयपदी)

**प्वादीनां ह्रस्वः ७।३।८०।**

**पूञ् लूञ् स्तूञ् क□ञ् व□ञ् धूञ् श□ प□ व□ भ□ म□ द□ ज□ भ□ ध□ न□ क□ ॠ ग□ ज्या री ली ब्ली प्ली एषां चतुर्विंशतेर्ह्रस्वः स्यात् शिति । पुनाति । पुनीते । पविता । लूञ् छेदने । लुनाति । लुनीते । ग्रह उपादाने । गृह्णाति । गृह्णीते । जग्राह । जगृहे ।**

पू-धातोर्लटि, तिपि, शपं बाधित्वा श्ना-प्रत्ययेऽनुबन्धलोपे 'पू ना ति' इत्यवस्थायाम् अनेन सूत्रेण ह्रस्वे, ङित्वाद् गुणनिषेधे- पुनाति, पुनीतः, पुनन्ति इत्यादि । आत्मनेपदे- पुनीते इत्यादि ।

छेदनेऽर्थे वर्तमानो लूञ् (लू) इति धातुः सेट्, सकर्मकः, उभयपदी वर्तते । धातोरस्य पूञ्धातुवदेव प्रक्रियया रुपाणि निष्पद्यन्ते ।

स्वरितेद् ग्रह (ग्रह्) इति धातुरुपादानेऽर्थे वर्तते (सेट्, सकर्मकः, उभयपदी) । ङिति किति च प्रत्यये परे ग्रहिज्येति रेफस्य सम्प्रसारणं भवति । लटि, तिपि, श्नाप्रत्यये 'ग्रह् ना ति' इत्यवस्थायाम् अपित्सार्वधातुकत्वाण्ङित्वे सिद्धे 'ग्रहिज्ये'ति रेफस्य सम्प्रसारणे, पूर्वरुपे 'गृह् ना ति' इति जाते 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति नकारस्य णत्वे- गृह्णाति, गृह्णीतः, गृह्णन्ति इत्यादि । आत्मनेपदे- गृह्णीते इत्यादि । लिटि तिपि णलि लिट्यन्यतरस्यामिति अभ्यासस्य सम्प्रसारणम् । अतुसादौ ङिति द्वित्वात् पूर्वमेव ग्रहिज्येति सम्प्रसारणम् । लुटि- पूर्ववत्प्रक्रियया 'ग्रहिता' इति जाते-

**ग्रहोऽलिटि दीर्घः ७।२।३७।**

**एकाचो ग्रहो विहितस्येटो दीर्घो, न तु लिटि । ग्रहीता । गृह्णातु । गृहाण । गृह्यात् । ग्रहीषीष्ट । 'ह्म्यन्ते'ति न वृद्धिः । अग्रहीत् । अग्रहीष्टाम् । अग्रहीष्ट । अग्रहीषाताम् । इत्युभयपदिनः ।**

अनेन सूत्रेण इकारस्य दीर्घे- ग्रहीता । लिङ्भिन्नेषु लकारेषु यत्रकुत्रापि इड्विधीयतेऽनेन सूत्रेण तस्य दीर्घो भवति । लुङि तिपि तु वृद्धिनिषेध एव विशेषस्तत्र वदव्रजेति प्राप्तां वृद्धिं नेटीत्यनेन निषिद्ध्य पुनः अतो हलादेर्लघोरिति वृद्धौ प्राप्तायां ह्म्यन्तक्षणेत्यादिना सूत्रेण तन्निषेधो बोध्यः ।

**अथ परस्मैपदिनः ।**

ज्ञा अवबोधने । 'ज्ञाजनो'रिति जादेशः । जानाति । जज्ञौ । 'वाऽन्यस्ये'त्येत्त्वम् । ज्ञेयात् । ज्ञातात् । मुष स्तेये । मुष्णाति । मोषिता । पुष पुष्टौ । पुष्णाति । पोषिता । बन्ध बन्धने । बध्नाति । बबन्ध । बबन्धिथ । बबन्द्ध । बन्द्धा । भन्त्स्यति । अभान्त्सीत् । अबान्धाम् । अभान्त्सुः ।

अवबोधनार्थको ज्ञा-धातुरनिट्, सकर्मकः, परस्मैपदी च वर्तते । अस्य च सार्वधातुकलकारेषु 'ज्ञाजनोर्जा' इति सूत्रेण जादेशो भवति, तेन जानाति, जानीतः, जानन्ति इत्यादीनि रुपाणि जायन्ते । आशीर्लिङि वान्यस्य संयोगादेरिति एत्वविकल्पो बोध्यः । लुङि तु यमरमनमातां सक् चेत्यनेन सिच इडागमः, धातोश्च सगागमो विधीयेते ।

स्तेयार्थको मुष (मुष्) इति धातुः, पुष्ट्यर्थकः पुष (पुष्) इति धातुश्च सेटौ, सकर्मकौ, परस्मैपदिनौ च वर्तेते । ततः श्नाप्रत्यये रषाभ्यामिति णत्वम् ।

बन्धनार्थको बन्ध (बन्ध्) धातुरनिट्, सकर्मकः, परस्मैपदी वर्तते । तस्य किति ङिति च प्रत्यये परे अनिदितामित्यादिना सूत्रेण नकारस्य लोपः स्मर्तव्यः । थलि भारद्वाजनियमाद् वेट, वे मे च क्रादिनियमात् सेट् । भन्त्स्यति इत्यादौ सकारे परे झषन्तत्ववेलायाम् एकाचो बशो भष् झषन्तस्य स्ध्वोरित्यनेन भष्भावश्च बोध्यः । लुङि तसि तु झलो झलीति सिज्लोपे कृते प्रत्ययलक्षणं प्रति सिज्लोपस्यासिद्धत्वाद् भष्भावो नेति स्मर्तव्यम् ।

## अथ चुरादिप्रकरणम्

तिङन्तान्तेषु दशषु गणेषु अन्तिमश्चुरादिगणः । अन्येषु गणेषु यादृशो विकरणप्रत्ययो भवति, तादृशो विकरणप्रत्ययोऽत्र नभवति । अत्र लडाद्युत्पत्तेः पूर्वं णिच्प्रत्ययो भवति । अयं णिच् प्रकृतेरेवार्थं द्योतयतीति स्वार्थिकः । णिजन्तप्रकरणस्थस्तु हेतुमान् णिच् । अत्र स्वार्थे णिच्प्रत्यये ण्यन्तस्यैव सनाद्यन्ता धातव इति धातुसंज्ञायां लकाराद्युत्पत्तिरिति विशेषः । चुर स्तेये ।

**सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ३।१।२५।**

**एभ्यो णिच् स्वार्थे । 'पुगन्ते'ति गुणः । 'सनाद्यन्ता' इति धातुत्वम् । तिप्शबादि । गुणाऽयादेशौ । चोरयति ।**

आपुगागमसहितान् सत्य-प्रातिपदिकात्, पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-प्रातिपदिकेभ्यः, चुरादिगणपठितेभ्यो धातुभ्यश्च स्वार्थे णिच्-प्रत्ययो भवतीति सूत्रार्थः । णिच इ इत्येवानुबन्धविनिर्मुक्तस्वरुपम् । चुर्-धातोरनेन सूत्रेण स्वार्थे णिचि अनुबन्धलोपे 'चुर्+इ' इत्यवस्थायां पुगन्तलघूपधस्येति गुणे 'चोरि' इत्यस्य सनाद्यन्ताधातव इति धातुसंज्ञायां लटि, तिपि, शपि, गुणे, अयादेशे 'चोरयति' इति सिद्ध्यति, एवं तसादावपि । अत्र परगामिनि क्रियाफले शेषात्कर्तरीति परस्मैपदं विहितम्, कर्तृगामिनि क्रियाफले तु-

**णिचश्च १।३।७४।**

**णिजन्तादात्मनेपदं स्यात् कर्तृगामिनि क्रियाफले । चोरयते । चोरयामास । चोरयिता । चोर्यात् । चोरयिषीष्ट । 'णिश्री'ति चङ् । 'णौ चङी'ति ह्रस्वः । 'चङी'ति द्वित्वम् । 'हलादिशेषः' । 'दीर्घो लघो'रित्यभ्यासस्य दीर्घः । अचूचुरत् ।**

अनेन सूत्रेण कर्तृगामिनि क्रियाफले आत्मनेपदं भवति, तेन सर्वे णिजन्ता धातव उभयपदिनो भवन्ति । अनेन आत्मनेपदे पूर्ववदेव प्रक्रियया चोरयते, चोरयेते, चोरयन्ते इत्यादीनि रुपाणि निष्पद्यन्ते ।

लिटि अनेकाच्त्वाद् आमादिकं विधेयम् । लुङि अटि तिपि णिश्रिद्रुश्रुभ्यः कर्तरि चङिति सिचं बाधित्वा च्लेश्चङि, णौ चङ्युपधाया ह्रस्व इति ह्रस्वे, चङीति द्वित्वे, हलादिशेषे, दीर्घो लघोरिति अभ्यासस्य दीर्घे- अचूचुरत् इत्यादि ।

चिति स्मृत्याम् । चिन्तयति । अचिचिन्तत् । 'चिन्ते'ति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गम् । तेन 'चिन्त्या'दित्यादौ नलोपो न । चिन्तति । चिन्तेदित्यादि । पीड अवगाहे ।

**भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ७।४।३।**

**एषामुपधाया ह्रस्वो वा, चङ्परे णौ । अपीपिडत् । अपिपीडत् ।**

**तड आघाते । ताडयति । अतीतडत् । पाल रक्षणे । पालयति । अपीपलत् । पूज पूजायाम् । पूजयति । अपूपुजत् । तुल उन्माने । तोलयति । अतूतुलत् ।**

अथाऽदन्ताः

कथ वाक्यप्रबन्धे । अल्लोपः ।

**अचः परस्मिन्पूर्वविधौ १।५।५७।**

**परनिमित्तोऽजादेशः स्थानिवत् स्यात्, स्थानिभूतादच पूर्वत्वेन दृष्टस्य विधौ कर्त्तव्ये । इति स्थानिवत्त्वान्नोपधावृद्धिः । कथयति । अग्लोपित्याद्दीर्घसन्वद्भावौ न । अचकथत् ।**

**कथयति**

कथधातोः स्वार्थे (सत्याप) णिचि, (अतो लोप) धातोरकारलोपे, कथ् इ इत्यत्र उपधासञ्ज्ञायाम्, (अत उपधायाः) उपधावृद्धिस्तु न, (अचः परस्मिन् पूर्वविधौ) अल्लोपस्य स्थानिवत्त्वेन अनपुधत्वाद् वर्णयोगे कथि इत्यस्य (सनाद्यन्ता..) धातसुञ्ज्ञायाम्, लटि, तिपि, शपि, कथि+अ+ति सार्वधातुकसंज्ञायाम्, अङ्गसंज्ञायाम्, (सार्वधातुकार्धधातुकयोः) गुणे, अयादशे कथयति ।

**अचकथत्**

ण्यन्ताद् धातुसंज्ञकाद् कथि इत्यस्माद् लुङि, अडागमे, तिपि, च्लौ, प्राप्तं सिजादेशम्प्रबाध्य (णिश्रिद्रुस्रुभ्यः कर्तरि चङ्) चङादेशे, अकथि ंअंति (इतश्च) इलोपे, (णेरनिटि) णिलोपे, अकथ्+अत् (चङि) धातोर्द्वित्वे, अभ्यासकार्ये, हलादिशेषे, ह्रस्वे, (कुहोश्चुः)ककारस्य चुत्वे, अचकथ्+अत् अग्लोपित्वात् सन्वद्भावदीर्घयोर्नि षेधे अचकथत् ।

गण संख्याने । गणयति ।

**ई च गणः ७।४।९७।**

**गणेरभ्यासस्य ईत्स्यात्, चादत्, चङ्परे णौ । अजीगणत् । अजगणत् ।**

## अथ णिजन्तप्रक्रिया

तिङन्ते धातूनां दश गणाः तेषां रुपसिद्धिप्रक्रिया चाधिगता । तदनन्तरं णिजन्तप्रकरणमारभ्यते । णिच्प्रत्ययः प्रेरणार्थे विधीयते । णिच् अन्ते यस्य स णिजन्तः । दशसु गणेषु पठितेभ्यो धातुभ्य एव प्रेरणार्थे णिचि नवीनो धातुर्निर्मीयते । तस्य च (सनाद्यन्ता धातवः) इति धातुसंज्ञा भवति । णिजन्तधातुभ्यः

कर्तृगामिनि क्रियाफले णिचश्च इति आत्मनेपदम्, क्रियाफले अकर्तृगे तु शेषत्कर्तरि परस्मैपदम् इति परस्मैपदमिति उभयपदव्यवस्था ।

**स्वतन्त्रः कर्त्ता ।१।४।५४।**

**क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् ।**

क्रियासम्पादनार्थ यः स्वातन्त्र्येण प्रवर्तते, सः कर्ता इत्यर्थः ।

**तत्प्रयोजको हेतुश्च ।१।४।५५।**

**कर्तुः प्रयोजको हेतुसंज्ञः, कर्तृसंज्ञश्च स्यात् ।**

क्रियासम्पादनार्थं एकः प्रवर्तते, तं प्रवर्तयितुं यः प्रयतते सः तस्य प्रयोजकः । स त कर्तृसंज्ञको हेतुसंज्ञकश्च भवति । यथा बालकः पुस्तकं पठति, शिक्षकः तं प्रेरयति इत्यत्र पठनकार्ये प्रवृत्तः बालकः स्वतन्त्रकर्ता । शिक्षकः बालकं पठनाय प्रवर्तयति इति शिक्षकः हेतुकर्ता । एतेन कर्ता द्विविधः भवति, स्वतन्त्रकर्ता, हेतुकर्ता चेति ज्ञातं भवति । हेतुकर्ता एव प्रयोजककर्ता इत्यपि उच्यते ।

**हेतुमति च ।३।१।२६।**

**प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच् स्यात् । भवन्तं प्रेरयति- भावयति ।**

प्रयोजकस्य प्रेरणादिव्यापारं बोधयितुं धातोः णिच्प्रत्ययो भवतीत्यर्थः । पुत्रः भवति, पिता तं प्रेरयति इत्यत्र पितुः प्रयोजकस्य व्यापारं बोधयितुं भूधातोः णिच्प्रत्ययः ।

भू+णिच् (हेतुमति च इति णिच्) भू इ (अनुबन्धलोपः) भौ इ (णिचः णित्त्वाद् भूधातोरूकारस्य अचो ञ्णिति इति वृद्धिः) भावि (अवादेशः, सनाद्यन्ता धातवः इति धातुसंज्ञा) भावि ल् (लट्लकारः, अनुबन्धलोपश्च) भावि ति (तिप्प्रत्ययः, सार्वधातुकसंज्ञा) भावि अ ति (शप्, अनुबन्धलोपः) भावे अ ति (सार्वधातुकगुणः) भावयति (अयादेशः) ।

**ओः पुयण्ज्यपरे । ७।४।८०।**

**सनि परे यदङ्गं तदवयवाऽभ्यासोवर्णस्य इत्स्यात्पवर्गयण्जकारेष्ववर्णेषु परतः । अबीभवत् । अपीपवत् ।**

यद् अङ्गं सन्परकं भवति, तस्यावयवः य उवर्णः तस्य इकारादेशः भवति अवर्णपरके पवर्गे, यणि, जकारे च परे इत्यर्थः ।

भू इ (णिच् अनुबन्धलोपश्च, वृद्धिप्राप्तिः, णिच्यच आदेशो न द्वित्वे कर्तव्ये इति निषेधः) भू इ (सनाद्यन्ता धातवः इति धातुसंज्ञा, लुङ् अनुबन्धलोपश्च) भू इ ल् (अडागमः, अनुबन्धलोपः) अ भू इ ल् (लस्य तिप्, सार्वधातुकसंज्ञा, शपम्प्रबाध्य च्लिः) अ भू इ च्लि ति (सिजादेशम्प्रबाध्य णिश्रिद्रुस्रुभ्यः.. इति चङ्, अनुबन्धलोपः) अ भू इ अ ति (इतश्च इति तिप इकारलोपः) अ भू इ अ त् (चङि इति द्वित्वम्, अभ्यासकार्यम्) अ बु भू इ अ त् (णेरनिटि इति णिलोपः, वृद्धिः आवादेशश्च) अ बु भाव् अत्

(णौ चङ्युपधायाः ह्रस्व इति ह्रस्वः) अ बु भव् अ त् (सन्वल्लघुनि चङ्परेऽनग्लोपे इति सन्वद्भावः, ओः पुयण्0 इति अभ्यासोकारस्य इत्वम्) अ बि भव् अ त् (दीर्घो लघोः इति इकारस्य दीर्घः, वर्णयोगः) अबीभवत् ।

**एवम् अपीपवत् ।**

## रूपसिद्धिप्रकारनिदर्शनम्

## भावयति

देवदत्तः भवति, भवन्तं देवदत्तं यज्ञदत्तः प्रेरयति इत्यर्थे (प्रेरणार्थे) सत्तार्थकभूधातोः (तत् प्रयोजको हेतुश्च) कर्तुः प्रयोजकस्य हेतुसंज्ञायां कर्तृसंज्ञायां च, (हेतुमति च) प्रयोजकव्यापारे प्रेरणार्थे च णिच्प्रत्यये, (चुटू) णकारस्य (हलन्त्यम्) चकारस्य च इत्संज्ञायाम्, आर्धधातुकसंज्ञायाम्, भू+इ, (अचो ञ्णिति) उकारस्य वृद्धौ, आवादेशे, भावि इत्यत्र (सनाद्यन्ता..) धातुसंज्ञायाम्, वर्तमाने लटि, तिपि, शपि, भावि+अ+ति, (सार्वधातुकयोः) इगन्तगुणे, आयादेशे भावयति । एवमेवान्येषामपि रुपाणां सिद्धिर्ज्ञेया ।

**अबीभवत्**

प्रेरणार्थे भूधातोः (हेतुमति च) णिचि, अनुबन्धलोपे, (अचो ञ्णिति) वृद्धौ प्राप्तायां, (णिच्यजादेशो न द्वित्वे कर्तव्ये) इति नियमेन वृद्धिनिषेधे, भू+इ इत्यत्र (सनाद्यन्ता धातवः) धातुसंज्ञायाम्, लुङ्, अडागमे, तिपि, च्लौः, प्राप्तं सिजादेशम्प्रबाध्य (णिश्रिदुस्रुभ्यः..) कर्तरि चङि, अनुबन्धलोपे, अभू+इ+अ+ति इत्यत्र (इतश्च) इकारलोपे, (चङि) धातोः द्वित्वे, अभ्यासकार्ये, ह्रस्वे, जश्त्वे, अबुभू+इ+अत् (णेरनिटि) णेर्लोपे, (अचो ञ्णिति) वृद्धौ, आवादेशे, अबुभाव्+अत्, (णौ चङ्युपधाया ह्रस्वः) ह्रस्वे, अबुभव्+अत् (सन्वल्लघुनि चङ्परेऽनग्लोपे) सन्वद्भावे, (ओः पुयण्ज्यपरे) अभ्यासोकारस्य इत्वे, (दीर्घो लघोः) अभ्यासदीर्घे अबीभवत् ।

**हनस्तोऽचिण्णलोः ७।३।३२।**

**हन्तेस्तकारोऽन्तादेशः स्याच्चिण्णल्वर्जे ञिति, णिति च परे । घातयति ।**

हन् इ (णिच्, अनुबन्धलोपः, सनाद्यन्तधातुसंज्ञा च) हन् इ अ ति (लट्, तिप्, शप्) हत् इ अ ति (हनस्तोऽचिण्णलोः इति तादेशः) घत् इ अ ति (हो हन्तेर्ञ्णिन्नेषु इति कुत्वम्) घात् इ अ ति (अत उपधाया इति अकारस्य उपधावृद्धिः) घातयति (सार्वधातुकगुणः, अयादेशश्च) ।

**अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ ७।३।३६।**

**एषां पुक् स्याण्णौ । स्थापयति ।**

ऋधातोः, ह्रीधातोः, ब्लीधातोः, रीधातोः, क्नूयीधातोः, क्ष्मायीधातोः, आकारान्तधातूनां च णौ परे पुगागमः भवति इत्यर्थः । कित्त्वादन्त्यावयवत्वम् ।

स्था इ (णिच्, अनुबन्धलोपः) स्थाप् इ (आकारान्तधातुत्वात् णिचि परे पुगागमः अनुबन्धलोपः, कित्वादन्त्यावयवत्वम्) स्थापि (सनाद्यन्तधातुसंज्ञा, लट्, तिप्, शप्, सार्वधातुकगुणः, अयादेशः, वर्णयोगः) स्थापयति ।

**तिष्ठतेरित् ७।४।५।**

**तिष्ठतेरुपधाया इदादेशः स्याच्चङ्परे णौ । अतिष्ठिपत् । घ्रापयति ।**

स्थाप् इ (स्थाधातोर्णिच्, पुगागमः) अस्थाप् इ ल् (लुङ्, अडागमः) अस्थाप् इ अ ति (लः स्थाने तिप्, सार्वधातुकसंज्ञा, शपम्प्रबाध्य च्लिः, च्लेः सिजादेशम्प्रबाध्य चङ् अनुबन्धलोपः) अ स्थाप् स्थाप् इ अ ति (चङि इति द्वित्वम्, अभ्यासत्वम्, शर्पूर्वा खयः इति सलोपः, अभ्यासह्रस्वः, चर्त्वम्, णौ चङ्पधायाः ह्रस्वः इति उपधाह्रस्वः) अ त स्थाप् इ अ ति (णिलोपः, सन्वल्लघुनि इति सूत्रेण इत्वम्, इतश्च इति तेरिकारलोपः) अ ति स्थाप् अ त् (तिष्ठतेरित् इति इत्वम्, सकारस्य षत्वम्, ष्टुत्वम्) अतिष्ठिपत् ।

**जिघ्रतेर्वा ७।४।६।**

**जिघ्रतेरुपधाया इत्त्वं वा स्याच्चङ्परे णौ । अजिघ्रिपत् । अजिघ्रपत् ।**

**शाच्छासाह्वाव्यावेपां युक् ७।३।३७।**

**एषा युक् स्याण्णौ । शाययति । अशीशयत् । ह्वाययति ।**

शो, च्छो, शो, ह्वेञ्, व्येञ्, वेञ्, पा इत्येतेषां धातूणां णिचि परे युगागमः इत्यर्थः । कित्वादन्त्यावयवत्वम् ।

**रुहः पोऽन्यतरस्याम् ७।३।४३।**

**रुहः पकारोऽन्तादेशो वा स्याण्णौ । रोपयति । रोहयति ।**

रुह्धातोः णिचि परे हकारस्य स्थाने विकल्पेन पकारादेशः भवति इत्यर्थः ।

**दोषो णौ ६।४।९१।**

**दुष्यतेरुपधाया ऊत्स्याद् वा, णौ चित्तविरागे । विरागोऽप्रीतता । दुष वैकृत्ये । चित्तं दूषयति । दोषयति वा कामः ।**

णिचि परे दुष्धातारुपधायाः स्थाने विकल्पेन ऊकारः आदिश्यते इत्यर्थः । दोष इति उल्लिखितत्त्वात् पूर्व लघूपधगुणः ओकारस्य च ऊकारादेशः । ऊत्त्वपक्षे दूषयति, ऊत्त्वाभावपक्षे तु दोषयतीत्येव ।

**उभौ साभ्यासस्य ८।४।२१।**

**साऽभ्यासस्याऽनितेरुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति । प्राणिणत् ।**

अभ्याससहितस्य अन प्राणने इति धातोः उभयोः नकारयोः णत्वम् भवति, णत्वनिमित्तम् उपसर्गादिः पूर्व वर्तते चेद् इत्यर्थः ।

णौ गमिरबोधने २।४।४६।

इणो गमिः स्याण्णावबोधने । गमयति । बोधने तु-प्रत्याययति । घट चेष्टायाम् । (ग) घटादयो मितः । जनीजृष्क्नसुरञ्जोऽमन्ताश्च । एते मितः । (ग) ज्वलह्वलह्मलनमामनुपसर्गाद्वा । अनुपसर्गादिषां मित्त्वं वा । ग्लास्नावनुवमां च । अनुपसर्गादिषां मित्त्वं वा । न कम्यमिचमाम् । अमन्तत्वात्प्राप्तं मित्त्वमेषां न । यमोऽपरिवेषणे । यच्छतेर्भोजनतोऽन्यत्र मित्त्वं न । स्खदिरवपरिभ्यां च । स्खदिरवपरिभ्यां परीभूतो मित् न ।

मितां ह्रस्वः ६।४।९२।

घटादीनां, ज्ञपादीनां च णवुपधाया ह्रस्वः । घटयति । अजीघटत् । ज्ञप ज्ञाने, ज्ञापने च । ज्ञपयति । अजिज्ञपत् ।

## अभ्यासः

१. **अधस्तनसूत्राणां सरलार्थं लिखत**

(क) हेतुमति च

(ख) ओः पुयण्ज्यपरे

(ग) अर्तिह्रीव्लीरीक्नूयोक्ष्माय्यातां पुग्णौ

(घ) रुहः पोऽन्यतरस्याम्

(ङ) मितां ह्रस्वः

२. **अधस्तनप्रश्नानामुत्तराणि लिखत**

(क) कर्ता कतिविधः ?

(ख) कर्तृप्रयोजकस्य के संज्ञे भवतः ?

(ग) हन्धातोः कुत तकारान्तादेशः ?

(घ) दुष्धातोर्णिचि को विशेषः ?

(ङ) णिचि परे केषां धातूनां पुगागमः भवति ? ससूत्रं लिखत ।

३. **अधस्तनरूपाणां ससूत्रं सिद्धिप्रक्रियां दर्शयत**

(क) भावयति

(ख) अबीभवत्

(ग) घातयति

(घ) स्थापयति

(ङ) अतिष्ठिपत्

(च) अजिघ्रिपत्, अजिघ्रपत्

(छ) चित्तं दूषयति

४. **उदाहरणं दृष्ट्वा ण्यन्तरूपाणां प्रयोगेण अधस्तनवाक्यान् प्रेरणार्थे परिवर्तयत**

उदाहरणम् - बालकः शेते माता बालकं शाययति ।

(क) छात्रः पुस्तकं पठति ।

(ख) शिष्यः विद्वान् अभूत् ।

(ग) पुत्री गृहे तिष्ठति ।

५. **ण्यन्तपदानां सम्यक् प्रयोगं विधाय दश वाक्यानि रचयत ।**

## विंशः पाठः

# कारकप्रकरणम् - १

## कारकपरिचयः

**कारकस्वरूपनिरूपणम्**

**उपक्रमः**

मानवसमाजे परस्परं भावनाया आदानाय प्रदानाय च शब्दप्रयोग अपेक्षितो भवति । शब्दश्च वाक्यात्मक एव अर्थबोधको भवति । तत्र वाक्यं किमिति जिज्ञासा सम्भवति । अस्याः जिज्ञासाया निराकरणाय वाक्यविषयकं चिन्तनमपेक्षितं भवति । विशेषतो व्याकरणशास्त्रे वाक्यविषयकं गभीरं सूक्ष्मञ्च चिन्तनमुपलभ्यते । वस्तुतः वाक्यमेकं निरवयवं पूर्णं कथनमस्ति । वाक्यावयवानां पदानां पदावयवानां वर्णानां च निरूपणं तु कल्पनामात्रमिति सिद्धान्तः । परं प्रारम्भ एव तस्मिन् वाक्यस्फोटसिद्धान्ते प्रवेशः कठिन इति वाक्यावयवानां पदादीनां निरूपणं विधीयते । वाक्यलक्षणनिरूपणावसरे कोषकारः कथयति सुप्तिङन्तचयो वाक्यम् इति । परन्तु केषाञ्चन सुबन्तानां तिङन्तानां च पदानां समूहमात्रं वाक्यं भवितुं न शक्नोतीति विचार्य लक्षणान्तरं प्रदर्शितम् क्रिया वा कारकान्विता । कारकसहिता क्रिया वाक्यमिति तत्तात्पर्यम् । तत्र वाक्यकाररूपेण विख्यातः कात्यायनो वाक्यलक्षणमित्थं ब्रूते - आख्यातं साव्ययकारकविशेषणं वाक्यम् इति । आख्यातपदस्यार्थो भवति क्रियापदम् । अव्ययसहितं कारकसहितं विशेषणसहितञ्च आख्यातं वाक्यमित्यच्युते । यथा अव्ययसहितमाख्यातं उच्चैः पठति इति । कारकसहितम् आख्यातं रामः वनं गच्छति इत्यादिः । विशेषणसहितमाख्यातं सुष्ठु पचति इत्यादिः । एकतिङ् वाक्यमित्यपि वाक्यस्य लक्षणम् । एतेन आख्यातद्वयस्य वाक्यत्वं निराकृतम् । परन्तु पश्य मृगो धावति इत्यादौ धावनक्रियाया कर्मादिरूपेणान्वये तु वाक्यत्वं सिद्ध्यत्येव ।

कारकसहितमाख्यातं वाक्यमित्युक्तम् । आख्यातञ्च क्रियापदापरपर्यायं प्रायस्तिङन्तम् । सुबन्तपदानां निदर्शनं सुबन्तप्रकरणे (षड्लिङ्गे) तिङन्तपदानां निरूपणं च तिङन्तप्रकरणे विहितम् । प्रकृते सुबन्तपदानां प्रकृतिभूतस्य कारकस्य निरूपणमपेक्षितम् । तदर्थमत्र कारकप्रकरणारम्भो विधीयते ।

करोति क्रियां निष्पादयति इति वा कारकम् । कृञ्धातोः कर्तरि ण्वुलि कारकशब्दसिद्धिः । साक्षात्क्रिया-जनकत्वं कारकत्वमिति निष्कृष्टं लक्षणम् । क्रियानिष्पादकं यत् साधनम् अथवा क्रियानिष्पादिका या शक्तिः सा कर्तृत्वशक्तिरेका एव । तस्यैवान्तरव्यपारविवक्षायां कर्तृकर्मादिभेदाः प्रतीयन्ते । यथोक्तम्-

निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते । षोढा कर्तृत्वमेवाहुस्तत्प्रवृत्तेर्निबन्धनम् ॥

**कारकभेदनिदर्शनम्**

कारकाणि च कर्तृ-कर्म-करण-सम्प्रदान-अपादान-अधिकरणभेदेन षडेवेति प्रसिद्धम् । यथाहुराचार्याः - कर्ता कर्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणे इत्याहुः कारकाणि षट् ॥

यद्यपि सर्वाणि कारकाणि स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियां निष्पादयन्ति । तत्रापि क्रियाया निष्पत्तौ स्वतन्त्रः मुख्यश्च कर्ता भवति । यः क्रियां निष्पादयति सः कर्ता । अतः सः व्यापाराश्रयो भवति । क्रियासिद्धौ कर्तुरीप्सिततमं कर्म भवतीति सामान्यः नियमः । यत् कार्यं निष्पद्यते, फलाश्रयत्वेन अवगम्यते तत् कर्म भवति । कर्म च कर्तुरीप्सितमनीप्सितञ्चेति द्विधा । एवमपादानादिना अविवक्षितञ्चेत्यादि प्रकारान्तरेण बहुविधम् । यद्द्वारा क्रियानिष्पत्तिस्तत्साधनं करणम् । दानादेरुद्देश्यं सम्प्रदानम् । विभागादेरवधिरपादानम् । कर्तृकर्मद्वारा क्रियाधारोऽधिकरणमिति सामान्यनियमः । विशेषस्तु तत्र तत्र विशेषसूत्रैरवगन्तव्यम् ।

**विभक्तिपरिचयः**

शब्दानां धातूनाञ्चार्थविभागं ये प्रदर्शयन्ति ते विभक्तयो भवन्ति । सुपः, तिङश्चेति विभक्तयो द्विधा भवन्ति । नामशब्देभ्यः सुपः भवन्तीति सुबन्तप्रकरणे प्रदर्शितम् । धातुभ्यस्तिङ्विभक्तयो भवन्तीति तिङन्तप्रकरणस्य विषयः । अत्र सुबादिविभक्तीनामर्थविशेषाः निरूप्यन्ते । अतो विभक्त्यर्थनिरुपणमिति प्रकरणस्य नाम । अत्र विभक्तिद्वारा कारकाणामर्थविशेषाः प्रदर्श्यन्ते ।

**उक्तानुक्तविचारः**

उक्तानुक्ततया द्वेधा कारकाणि भवन्ति । उक्ते तु प्रथमैव स्यात् अनुक्ते तु यथाक्रमम् ।

उक्ते तिङादिना कर्त्राद्यर्थे अभिहिते इति भावः । उदाहरणरूपेण कर्तृकर्मणोः एकैकं वाक्यं विचारयाम । अकर्मकक्रियापदप्रयोगे रामः भवति इत्यत्र क्रियापदस्थः तिप् लः कर्मणि इत्यादिसूत्रेण कर्तरि विहित इति रामः कर्ता क्रियया अभिहित इत्युच्यते । यदि भावे तिङ् विधीयते तर्हि कर्ता अनुक्तः भवतीति अनुक्ते कर्तरि तृतीया भवति । अतः रामेण भूयते इति प्रयोगः । सकर्मकक्रियापदप्रयोगेऽपि रामः ग्रामं गच्छति इत्यत्र उक्ते कर्तरि प्रथमा भवति । कर्मणि तिङ्विधाने तु कर्मण उक्तत्वात् प्रथमा कर्ता अनुक्त इति तत्र तृतीया भवति । तेन रामेण ग्रामो गम्यते इति प्रयोगः । सर्वेषां विभक्तीनामेकत्र निदर्शनं यथा-

रामो राजमणिः सदा विजयते रामं रमेशं भजे, रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम् रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ।

**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ।२।३।४६।**

**नियतोपस्थितिकः प्रातिपदिकार्थः । मात्रशब्दस्य प्रत्येकं योगः । प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये**

**परिमाणमात्रे सङ्ख्यामात्रे च प्रथमा । प्रातिपदिकार्थमात्रे- उच्चैः । नीचैः । कृष्णः । श्रीः । ज्ञानम् । लिङ्गमात्रे- तटः । तटी । तटम् । परिमाणमात्रे-द्रोणो व्रीहिः । वचनं सङ्ख्या । एकः । द्वौ । बहवः ॥**

यस्मिन् प्रातिपदिके उच्चारिते सति यस्यार्थस्य निमयेन भानं स प्रातिपदिकार्थः । लीनं गमयतीति लिङ्गम् । परिमीयते असौ अनेन इति वा परिमाणम् । उच्यते इति वचनम् । एतेषां द्वन्द्वसमासः । प्रतिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्च प्रातिपदिकार्थलिङ्गपरिमाण-वचनानि । तानि एव तन्मात्रम् । तस्मिन् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे । द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बद्ध्यते इति नियमः । तस्माद् मात्रे इति प्रत्येकं युज्यते ।

**सम्बोधने च २३।४७।**

**प्रथमा । हे राम । पराभिमुखस्य स्वाभिमुखीकरणम् सम्बोधनम् ।**

प्रातिपदिकार्थे सम्बोधनमात्राधिक्ये चेति विशेषः ।

सम्बोधने उच्यमाने च प्रथमा विभक्तिर्भवतीति सरलार्थः । यथा रामशब्दात् सम्बोधने विवक्षिते प्रथमा । हे राम ! इति प्रयोगः ।

**कर्तुरीप्सिततमं कर्म १।४।४९।**

**कर्तुः क्रिययाऽऽप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् ।**

कर्ता क्रियाद्वारा यत् सर्वतोऽधिकं प्राप्तुमभिलषते तद्वाचकपदस्य कर्मसंज्ञा भवतीति सूत्रार्थः ।

**कर्मणि द्वितीया २३।२।**

**अनुक्ते । हरिं भजति । अभिहिते तु कर्मादौ प्रथमैव । हरिः सेव्यते । लक्ष्म्या सेवितो हरिः । शतेन क्रीतः शत्यः अश्वः । प्राप्तानन्दश्चैत्रः । अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः । क्वचिन्निपातेनाभिधानम् । 'क्रमादमुं नारद इत्यबोधि सः' ।**

तिङा, कृता, तद्धितेन, समासेन च वा अनभिहितात् कर्मसंज्ञकशब्दाद् द्वितीया विभक्तिर्भवति । यदि च तिङ्प्रत्ययः, कृत्प्रत्ययः, तद्धितप्रत्ययः, समासो वा कर्मण्यर्थे विधीयते, तस्यामवस्थायां कर्म अभिहितं भवति । कर्त्रर्थे प्रत्ययादिषु विधीयमानेषु कर्म अनुक्तं भवति । तादृशाद् अनुक्तात् कर्मसंज्ञकशब्दात् द्वितीया भवति । यथा - देवदत्तः हरिं भजति, इत्यत्र भजनरूपक्रियया देवदत्तः हरिं प्रसादयितुमिच्छतीति तस्य कर्मसंज्ञा । अत्र च भज् (भज सेवायाम्) धातोः कर्त्रर्थे तिङ् । कर्त्रर्थे तिङो विहितत्वात् कर्म अनुक्तमेव । अतः कर्मसंज्ञकात् हरिशब्दादत्र द्वितीया सङ्गच्छते ।

हरिः सेव्यते, लक्ष्म्या सेवितो हरिः इत्यनयोस्तु प्रयोगयोः सेव्धातोः तिङ्-क्तप्रत्ययौ कर्मार्थे विधीयेते, अतस्तदन्तपदद्वारा कर्म अभिहितं भवति । कर्मण उक्तत्वात् अनेन सूत्रेण द्वितीयाया अप्राप्तौ प्रातिपदिकार्थमात्रे प्रथमा विभक्तिरेव जायते ।

**तथायुक्तं चानीप्सितम् १।४।५०।**

**ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् । ग्रामं गच्छन् तृणं स्पृशति । ओदनं भुञ्जानो विषं भुङ्क्ते ।**

यदि एकस्यां क्रियायां प्रयुक्तस्य कर्तुः ईप्सिततमम् अन्यदेव, तस्मिन् प्रसङ्गे यद् अनीप्सितम् तस्यापि कर्मसंज्ञा एव भवति । यथा ग्रामं गच्छन् तृणं स्पृशति इत्यत्र गमनरूपक्रियया आप्तुमिष्टतमस्य ग्रामस्य कर्मसंज्ञायाम्, स्पर्शनरूपक्रियया अनीप्सितस्य तृणस्य च कर्मसंज्ञा भवति । तथैव ओदनं भुञ्जानो विषं भुङ्क्ते इत्यत्र भोजनरूपक्रियया आप्तुमिष्टतमं ओदनम्, विषं तु अनीप्सितम् एव, तस्यापि कर्मसंज्ञैव । ततश्च द्वितीया ।

**अकथितं च १।४।५१।**

**अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् ।**

**दुह्याच्पचदण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।**

**कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥**

गां दोग्धि पयः । बलिं याचते वसुधाम् । तण्डुलानोदनं पचति । गर्गान् शतं दण्डयति । व्रजमवरुणद्धि गाम् । माणवकं पन्थानं पृच्छति । वृक्षमवचिनोति फलानि । माणवकं धर्मं ब्रूते शास्ति वा । शतं जयति देवदत्तम् । सुधां क्षीरनिधिं मथ्नाति । देवदत्तं शतं मुष्णाति । ग्राममजां नयति, हरति, कर्षति, वहति वा । अर्थनिबन्धनेयं संज्ञा । बलिं भिक्षते वसुधाम् । माणवकं धर्मं भाषते, अभिधत्ते, वक्तीत्यादि । (अकर्मधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्) । कुरून् स्वपिति । मासमास्ते । गोदोहमास्ते । क्रोशमास्ते ।

दुह्-याच्-पच्-दण्ड्-रुध्-प्रच्छ्-चि-ब्रू-शास-जि-मथ्-मुष-नी-हृ-कृष्-वह् एतेषां धातूनां योगे अपादानादिभिरविवक्षितमित्यर्थः ।

यत्र अपादानादिविशेषकारकाणां विवक्षा न क्रियते, तादृशं कारकं कर्मसंज्ञकं भवतीति सूत्रार्थः । दुहादिधातूनां प्रयोगे आप्तुमिष्टतमं खलु दुग्धादिकम् । तेषु तु कर्मसंज्ञा सङ्गच्छते एव । किन्तु तत्र तत्र प्रयुक्तानां गवादिपदानां अपादानादिविशेषैः कारकैः सह सङ्गतिर्न लभ्यते, अतस्तेषां अकथितत्वम् । तेषां चानेन सूत्रेण कर्मसंज्ञायां द्वितीया ।

**गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ १।४।५२।**

**गत्याद्यर्थानां शब्दकर्मणाकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात् ।**

**शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत् ।**

**आशयच्चामृतं देवान् वेदमध्यापयद्विधिम् ।**

**आसयत् सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ॥**

गत्यर्थानाम्, बुद्ध्यर्थानाम्, प्रत्यवसानार्थानम्, शब्दकर्मकाणाम्, अकर्मकाणाम् च अण्यन्तप्रयोगेषु यत् कर्तृवाचकं तदेव ण्यन्तप्रयोगे कर्मसंज्ञकं स्यादिति सरलार्थः । प्रत्यवसानं चात्र भक्षणम् । शत्रवः स्वर्गम् अगच्छन्, स्वे वेदार्थम् अविदुः, देवाः अमृतम् आश्नन्, विधिः वेदमध्यैत, पृथ्वी सलिले आस इत्यादयः अण्यन्तप्रयोगाः । तेषु च क्रमशः शत्रु-स्व-देव-विधि-पृथ्वीशब्दाः कर्तृवाचकाः । ते च कर्तृवाचकशब्दाः हरिप्रयोजकीभूतेषु तेषु प्रयोगेषु कर्मसंज्ञकाः भवन्ति । ततश्च द्वितीया ।

(नीवह्योर्न) । नाययति वाहयति वा भारं भृत्येन ॥

गत्यर्थे सत्यपि नीधातोः अण्यन्तप्रयोगस्य कर्ता ण्यन्ते कर्मत्वं न भजते इत्यर्थः । अतः भृत्यशब्दात् न द्वितीया ।

(नियन्तृकर्तृकस्य वहेरनिषेधः) । वाहयति रथं वाहान्सूतः ।

वह्धातोः अण्यन्तकर्तुः ण्यन्तप्रयोगे कर्मत्वस्य निषेधो न भवतीति अर्थः । तथा च सति वाहशब्दस्य कर्मसंज्ञायां द्वितीया ।

(आदिखाद्योर्न) आदयति खादयति वा अन्नं वटुना ।

प्रत्यवसानेऽर्थे सत्यपि आदिखाद्योः अण्यन्तप्रयोगस्य कर्ता ण्यन्तप्रयोगे कर्म न भवतीति सरलार्थः । तथा च सति वटुशब्दस्य कर्मत्वं न सिद्ध्यति । कर्त्रर्थे च कर्तृकरणयोस्तृतीयेति वक्ष्यमाणसूत्रद्वारा तृतीयैव ।

(भक्षेरहिंसार्थस्य न) । भक्षयत्यन्नं वटुना । अहिंसार्थस्य किम् ? भक्षयति बलीवर्दान् सस्यम् ॥

प्रत्यवसानार्थकस्यापि अहिंसार्थस्य भक्ष्धातोः अण्यन्तप्रयोगस्य कर्ता, ण्यन्तप्रयोगे कर्मसंज्ञको न भवतीति सूत्रार्थः । भक्षयत्यन्नं वटुनेत्यादौ हिंसार्थो न दृश्यत इति वटुशब्दात् तृतीया । भक्षयति बलीवर्दान् सस्यम् इत्यत्र तु हिंसार्थकत्वात् बलीवर्दशब्दस्य कर्मत्वमेव ।

(जल्पतिप्रभृतीनामुपसङ्ख्यानम्) । जल्पयति भाष्यति वा धर्मं पुत्रं देवदत्तः ।

जल्पतिप्रभृतीनां धातूनां अण्यन्तस्य यः कर्ताः सः ण्यन्तप्रयोगे कर्म भवति ।

(दृशेश्च) । दर्शयति हरिं भक्तान् ।

दृश्धातोः अण्यन्तस्य कर्ता ण्यन्ते कर्म भवति । अतः भक्तशब्दस्य कर्मत्वे द्वितीया ।

(शब्दायतेर्न) । शब्दायति देवदत्तेन ।

शब्दायधातुः क्यङ्प्रत्ययान्तः । एतस्य च शब्दकर्मकत्वम् एव । शब्दकर्मकत्वे च गतिबुद्धीत्यादिप्राप्तम् अण्यन्तकर्तुः कर्मत्वम् अत्र न भवतीति फलितोऽर्थः ।

**हृक्रोरन्यतरस्याम् १।४।५३।**

**हृक्रोरणौ यः कर्ता स णौ वा कर्म स्यात् । हारयति, कारयति भृत्यं भृत्येन वा कटम् ।**

हृधातोः कृधातोश्च अण्यन्ते यः कर्ता सः ण्यन्तप्रयोगे विकल्पेन कर्म स्यादिति सूत्रार्थः । भृत्यः कटं हरति, करोति वा इति अण्न्तप्रयोगस्य कर्तुर्भृत्यस्य ण्यन्तप्रयोगे कर्मत्वे द्वितीया । कर्मत्वाभावपक्षे तु कर्तृकरणयोरिति तृतीयैव ।

(अभिवादिदृशोरात्मनेपदे वेति वाच्यम्) । अभिवादयते दर्शयते देवं भक्तं भक्तेन वा ।

अभ्युपसर्गपूर्वकात् ण्यन्तात् 'वादि' इति धातोः, दृश्धातोश्च आत्मनेपदे अण्यन्तस्य कर्ता ण्यन्तप्रयोगे कर्मसंज्ञको भवतीति अर्थः ।

**अधिशीङ्स्थासां कर्म १।४।४६।**

**अधिपूर्वकाणामेषामाधारः कर्म स्यात् । अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरिः ।**

अध्युपसर्गपूर्वकाणाम् शीङ्-स्था-आस्धातूनां प्रयोगे आधारवाचकं पदं कर्मसंज्ञकं भवतीति सूत्रार्थः । आधारोऽधिकरणम् इति सूत्रस्यापवादः ।

**अभिनिविशश्च १।४।४७।**

**अभिनीत्येतत्सङ्घातपूर्वस्य विशतेराधारः कर्म स्यात् । अभिनिविशते सन्मार्गम् ।**

अभिनीत्येतयोरुपसर्गयोः युगपत् प्रयुक्तयोः, तत्पूर्वकस्य विश्धातोराधारवाचकं पदं कर्मसंज्ञकं भवति । क्वचिन्न, – पापेऽभिनिवेशः ।

**उपान्वध्याङ्वसः १।४।४८।**

**उपादिपूर्वस्य वसतेराधारः कर्म स्यात् । उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः ।**

उप-अनु-अधि-आङ्उपसर्गपूर्वकस्य वस्धातोराधारः कर्मसंज्ञको भवति ।

(अभुक्त्यर्थस्य न) । वने उपवसति ।

उपाद्युपसर्गप्रयोगेऽपि अभुक्त्यर्थस्य वस्धातोराधारः कर्मसंज्ञको न भवति ।

उभसर्वतसोः कार्या, धिगुपर्यादिषु त्रिषु ।

द्वितीयाम्रेडितान्तेषु, ततोऽन्यत्रापि दृश्यते ॥

उभयतः कृष्णं गोपाः । सर्वतः कृष्णम् । धिक्कृष्णाभक्तम् । उपर्युपरि लोकं हरिः । अध्यधि लोकम् । अधोऽधो लोकम् ।

तसप्रत्ययान्तस्य उभ(य)शब्दस्य सर्वशब्दस्य च योगे, धिक्शब्दस्य योगे, आम्रेडितान्तानां (द्विरुक्तानाम्) उपरि-अधि-अधस्शब्दानां योगे च द्वितीया भवतीति कारिकार्थः । उपर्यादिषु त्रिषु इत्यत्र उपर्यध्यधसस्सामीप्ये इति सूत्रोक्तानि पदान्यूहयानि । एतेभ्योऽन्यत्रापि कुत्रचन द्वितीया दृश्यते ।

(अभितः परितः समया-निकषा-हा-प्रतियोगेऽपि) अभितः कृष्णम् । परितः कृष्णम् । ग्रामं समया । निकषा लङ्काम् । हा कृष्णभक्तम् । ऋते कृष्णम् । बुभुक्षितं न प्रतिभाति किञ्चित् ।

अभितः इत्यादिशब्दानां योगे द्वितीयाविभक्तिर्भवति ।

**अन्तराऽन्तरेण युक्ते ।२।३।४।**

**द्वितीया । अन्तरा त्वां मां वा हरिः । अन्तरेण हरिं न सुखम् ।**

अन्तराशब्देन, अन्तरेणेति शब्देन च युक्तात् शब्दात् द्वितीया भवतीति सूत्रार्थः ।

**कर्मप्रवचनीयाः १।४।८३।**

इत्यधिकृत्य ॥

**अनुर्लक्षणे १।४।८४।**

**लक्षणे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यात् । गत्युपसर्गसंज्ञापवादः ।**

**कर्मप्रवचनीययुक्ते द्वितीया २।३।८।**

**जपमनु प्रावर्षत् । हेतुभूतजपोपलक्षितं वर्षणमित्यर्थः ।**

कर्मप्रवचनीयसंज्ञकस्य योगे द्वितीया भवति । अत्र च अनु-इत्यस्य कर्मप्रवचनीयस्य योगे जपशब्दात् द्वितीया ।

**तृतीयार्थे १।४।८५।**

**अनुरुक्तसंज्ञः । अनु हरिं सुराः, हरेर्हीना इत्यर्थः ।**

**उपोऽधिके च १।४।८७।**

**अधिके हीने च द्योत्ये उपेत्यव्ययं प्राग्वत् । अधिके सप्तमी वक्ष्यते । हीने- उप हरिं सुराः ।**

अधिके हीने चार्थे विवक्षिते उपेत्यव्ययं कर्मप्रवचनीयसंज्ञं भवति । कर्मप्रवचनीयसंज्ञायां सत्यामपि उपेत्यव्ययस्य योगे अधिकेऽर्थे सप्तमी विभक्तिर्भवति । किन्तु हीनेऽर्थे कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीया एव ।

**लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः १।४।९०।**

**उक्तसंज्ञा स्युः । लक्षणे- वृक्षं प्रति पर्यनु वा विद्योतते विद्युत् । इत्थंभूताख्याने भक्तो विष्णुं प्रति पर्यनु वा । भागे- लक्ष्मीर्हरिं प्रति पर्यनु वा, हरेर्भाग इत्यर्थः । वीप्सायाम्- वृक्षं वृक्षं प्रति पर्यनु वा सिञ्चति । एषु किम् ? परिषिञ्चति ।**

लक्षणे द्योत्ये, इत्थंभूताख्याने, भागे, वीप्सायां च प्रति-परि-अनवः कर्मप्रवचनीयसंज्ञकाः स्युः । (लक्षणम् किम् ?, इत्थंभूताख्यानं च किम् ?)

**अभिरभागे १।४।९४।**

**भागवर्जे लक्षणादावभिरुक्तसंज्ञः स्यात् । हरिमभि वर्तते । भक्तो हरिमभि । देवं देवमभिसिञ्चति । अभागे किम् ? यदत्र ममभिष्यात्तद्दीयताम् ॥**

लक्षणे, इत्थंभूताख्याने चार्थे अभिः कर्मप्रवचनीयसंज्ञो भवति ।

**सुः पूजायाम् १।४।९४।**

**सुसिक्तम् । सुस्तुतम् । अनुपसर्गत्वान्न षः । पूजायां किम् ? सुषिक्तं किं तवात्र ? क्षेपोऽयम् ।**

पूजायां द्योत्यमानायां सुः कर्मप्रवचनीयसंज्ञको भवति । सुसिसक्तम्, सुस्तुतम् इत्यत्र सु इत्यस्य क्रियायोगाभावाद् उपसर्गत्वं नास्ति । अतः उपसर्गात्सुनोति0 इत्यादिसूत्रेण धातोः सकारस्य षत्वं न भवति ।

**अतिरतिक्रमणे च १।४।९५।**

**चात्पूजायामतिरुक्तसंज्ञः । अति देवान् कृष्णः ।**

अतिक्रमणे पूजायां चार्थे अतिः कर्मप्रवचनीयसंज्ञो भवति । ततश्च तस्य योगे देवशब्दाद् द्वितीया ।

**कालाध्वनोरत्यन्तसंयोगे २।३।५।**

**इह द्वितीया स्यात् । मासं कल्याणी । मासमधीते । मासं गुडधानाः । क्रोशं कुटिला नदी । क्रोशमधीते । क्रोशं गिरिः । अत्यन्तसंयोगे किम् ? मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः ।**

कालः समयः । अध्वा मार्गः । अत्यन्तसंयोगश्चात्र निरन्तरसंयोगः । कालवाचकशब्दाद् मार्गवाचकशब्दाच्च निरन्तरसंयोगे परिलक्ष्यमाणे द्वितीया विभक्तिर्भवति । अत्र च आद्येषु त्रिषु प्रयोगेषु मासशब्दस्य कालवाचकस्य कल्याणीत्यादिभिः निरन्तरसंयोगः परिलक्ष्यते । तथा च उत्तरवर्तिषु च त्रिषु प्रयोगेषु कुटिलनद्यादीनां अध्वपरिमाणवाचकक्रोशशब्देन निरन्तरसंयोगः । मासस्य द्विरधीते, क्रोशस्यैकदेशे पर्वतः इत्यादौ एकदेशार्थे तु अत्यन्तसंयोगाभावात् द्वितीया न ।

अत्रेदं सङ्गृह्यते-

कर्तृवाच्यप्रयोगे हि द्वितीया कर्मकारके ।
धिक्प्रतीत्यादिभिर्योगे क्रियायाश्च विशेषणे ।
ऋतेविनादिभिश्चैव द्वितीया समता मता ॥

कारकप्रक्रियाप्रदर्शनम्

**हरिं भजति**

'भक्तः हरिं भजति' इत्यत्र कर्तुः भक्तस्य भजनरूपक्रियया आप्तुम् इष्टतमः हरिरिति तस्य 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण कर्मसंज्ञायां 'कर्मणि द्वितीया' इति सूत्रेण हरिशब्दाद् द्वितीयाविभक्तौ स्वादिकार्ये हरिं भजतीति प्रयोगः सिद्ध्यति ।

## अभ्यासः

१. **अधस्तनसूत्राणि पूरयत**

(क) प्रातिपदिकार्थ0 (ख) गतिबुद्धिप्रत्यवसानार्थ0 (ग) लक्षणेत्थंभूताख्यान0

२. **अधस्तनसूत्राणां सोदाहरणम् अर्थान् लिखत**

(क) सम्बोधने च (ख) कर्तुरीप्सिततमं कर्म (ग) उपान्वध्याङ्वसः

(घ) हृक्रोरन्यतरस्याम् (ङ) अकथितं च

३. **अधोनिर्दिष्टानां प्रश्नानामुत्तराणि लिखत**

(क) कारकपरिचयः कः ? कारकाणि च कति ?

(ख) केष्वर्थेषु प्रथमा भवति ? सोदाहरणं लिखत ।

(ग) द्विकर्मकाः धातवः के ? कारिकां विलिख्य पृथक्कुरुत ।

(घ) गतिबुद्ध्याद्यर्थानां उदाहरणानि 'शत्रूनगमयत् स्वर्गम्... श्रीहरिर्गितिः' इत्यतः पृथक्कुरुत ।

(ङ) कालाध्वनोरत्यन्तसंयोगे का विभक्तिः ?

(च) कस्मिन्नर्थे अनुः कर्मप्रवचनीयसंज्ञः ?

(छ) प्रतिपर्यनवः केष्वर्थेषु कर्मप्रवचनीयसंज्ञकाः ?

(ज) कर्मप्रवचनीययुक्ते का विभक्तिः ?

४. **'उभसर्वतसोः कार्या...' इति कारिकां प्रपूर्य सोदाहरणम् अर्थ लिखत ।**

५. **अधस्तनप्रयोगाणां ससूत्रं कारकप्रक्रियां दर्शयत**

(क) भक्तः हरिं भजति ।

(ख) बलिं याचते वसुधाम् ।

(ग) शत्रून् अगमयत् स्वर्गम् ।

(घ) हारयति भृत्यं भृत्येन वा कटम् ।

(ङ) अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरिः ।

६. **प्रथमान्तानां द्वितीयान्तानां च पदानां समुचितप्रयोगं विधायानुच्छेदमेकं रचयत ।**

७. **समुचितकारकाणां प्रयोगं विधाय रिक्तस्थानानि पूरयत**

(क) भक्तः ................ अर्चति । (देवः, देवम्, देवेन)

(ख) माता ............... ओदनं खादयति । (बालकेन, बालकाय, बालकम्)

(ग) मम पिता ....................... अध्यास्ते । (काष्ठमण्डपम्, काष्ठमण्डपे)

(घ) .............. अध्ययनं न ज्ञानम् । (अन्तरम्, अन्तरेण, अन्तराय)

## एकविंशः पाठः

# कारकप्रकरणम् - २

**स्वतन्त्रः कर्ता १।४।५४।**

इति कर्तृसंज्ञा ।

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात् । यः क्रियां कर्तुं मुख्यतः प्रवृत्तः स इत्यर्थः ।

**साधकतमं करणम् १।४।४२।**

**क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात् ।**

क्रियायाः सम्पादने यत् साधनरूपेण प्रयुक्तम् तत् करणसंज्ञकम् भवति ।

**कर्तृकरणयोस्तृतीया २।३।१८।**

**अनभिहिते कर्तरि करणे च तृतीया स्यात् । रामेण बाणेन हतो बाली ।**

अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः इति उक्तम् । रामेण बाणेन हतो बाली इत्यत्र च क्तप्रत्ययः कर्मणि भवति । तस्मात्तेन कर्मभूतो बाली अभिहितो भवति । कर्ता च रामः अनभिहितः । अनभिहितकर्तृत्वेन रामशब्दात् तृतीया । हननक्रियायां बाणस्य साधकतमत्वात् तस्य करणसंज्ञायां ततस्तृतीया । अभिहितकर्मत्वाच्च बालिशब्दात् प्रातिपदिकार्थमात्रे प्रथमा ।

(प्रकृत्यादिभ्य उपसंख्यानम्) ।

प्रकृत्या चारुः । प्रायेण याज्ञिकः । गोत्रेण गार्ग्यः । समेनैति । विषमेणैति । द्विद्रोणेन धान्यं क्रीणाति । पञ्चकेन पशून्गृहणाति । सुखेन दुःखेन वा यातीत्यादि ।

प्रकृत्यादिशब्देभ्यः तृतीया भवति ।

**दिवः कर्म च १।४।४३।**

**दिवः साधकतमं कर्मसंज्ञं स्याच्चात्करणसंज्ञं च । अक्षैरक्षान्वा दीव्यति ।**

दिव्धातोः साधकतमस्य कर्मसंज्ञा, करणसंज्ञा च भवति । कर्मसंज्ञायां द्वितीया, करणसंज्ञायां च तृतीया ।

**पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् २।३।३२।**

**एभिर्योगे तृतीया स्यात् । पञ्चमीद्वितीये च । पृथग् रामेण रामाद् रामं वा । एवं विना, नाना ।**

पृथग्-विना-नानाशब्दानां योगे तृतीया विकल्पेन भवति । तृतीयाभावे च पञ्चमीद्वितीये भवतः ।

**सहयुक्तेऽप्रधाने २।३।१९।**

**सहार्थेन युक्तेऽप्रधाने तृतीया । पुत्रेण सहागतः पिता । एवं साकं सार्धं समंयोगेऽपि । विनापि तद्योगे**

**तृतीया । वृद्धो यूनेति निर्देशात् ।**

**येनाङ्गविकारः २।३।२०।**

**येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया । अक्ष्णा काणः । अक्षिसंबन्धिकाणत्वविशिष्ट इत्यर्थः ॥**

**अपवर्गे तृतीया २।३।६।**

**अपवर्गः फलप्राप्तिः, तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात् । अह्ना क्रोशेन वाऽनुवाकोऽधीतः । अपवर्गे किम् ? मासमधीतो नायातः ।**

**हेतौ १।३।२३।**

**तृतीया । दण्डेन घटः ।**

हेत्वर्थे द्योत्ये तृतीया विभक्तिर्भवति । दण्डेन घट इति प्रयोगे दण्डशब्दः घटस्य हेतुभूतः । तथा च सति घटहेतुभूतो दण्डः इत्यर्थः सङ्गच्छते ।

**इत्थंभूतलक्षणे २।३।२१।**

**तृतीया । जटाभिस्तापसः । जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः ।**

येन लक्षणेन कश्चन विशेषं रूपं ज्ञाप्यते, तस्माल्लक्षणवाचकपदात् तृतीयेत्यर्थः । जटाभिस्तापस इत्यत्र च जटाद्वारा तापसत्वं ज्ञाप्यते, अतः जटाशब्दात् तृतीया ।

**संज्ञोऽन्यतरस्यां कर्मणि २।३।२२।**

**संपूर्वस्य जानातेः कर्मणि तृतीया । पित्रा पितरं वा संजानीते ।**

सम् उपसर्गपूर्वपूर्वकस्य 'ज्ञा अवबोधने' इत्यस्य धातोर्योगे कर्मवाचकपदात् तृतीया विकल्पेन भवति । तृतीयाभावे च 'कर्मणि द्वितीया' इति द्वितीयैव ।

**कर्मणा यमभिप्रैति स सम्प्रदानम् १।४।३२।**

**दानस्य कर्मणा यमभिप्रैति स संप्रदानसंज्ञः ।**

**चतुर्थी सम्प्रदाने २।३।१३।**

**अनुक्ते । विप्राय गां ददाति ।**

अनुक्ते सम्प्रदाने चतुर्थी भवति । अत्र च दानस्य कर्मभूता गौः तया च यजमानः विप्रं सम्बद्धुं इच्छतीति विप्रशब्दाच्चतुर्थी । दानक्रियायाम् आदायकवाचकपदस्य सम्प्रदानत्वमिति फलितोऽर्थः ।

(क्रियया यमभिप्रैति स सम्प्रदानम्) पत्ये शेते ।

कर्ता क्रियाद्वारा यं सम्बद्धुमिच्छति तद्वाचकपदमपि सम्प्रदानसंज्ञकम् । अत्र च शयनरूपक्रियाद्वारा पत्नी पतिं सम्बद्धुमिच्छति ।

**परिक्रयणे सम्प्रदानमन्यतरस्याम् १।४।४४।**

**नियतकालं भृत्या स्वीकरणं परिक्रयणम्, तस्मिन्साधकतमं कारकं सम्प्रदानं वा । शतेन शताय वा परिक्रीतः ।**

साधकतमस्य करणत्वेन तृतीयायां प्राप्तायां तदर्थे विकल्पेन चतुर्थीति भावः ।

तादर्थ्ये चतुर्थी वाच्या (वा.) । मुक्तये हरिं भजति ।

उत्पातेन ज्ञापिते च (वा.) वाताय कपिला विद्युत् ।

हितयोगे च(वा.) ब्राह्मणाय हितम् ।

**स्पृहेरीप्सितः १।४।३६।**

**स्पृहयतेः प्रयोगे इष्टः सम्प्रदानसंज्ञः स्यात् । पुष्पेभ्यः स्पृहयति । ईप्सितः किम् ? पुष्पेभ्यो वने स्पृहयति । ईप्सितमात्रे इयं संज्ञा । प्रकर्षविवक्षायान्तु परत्वात्कर्मसंज्ञा । पुष्पाणि स्पृहयति ।**

**मन्यकर्मण्यनादरे विभाषाऽप्राणिषु २।३।१७।**

**प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे । न त्वां तृणं मन्ये, तृणाय वा । श्यना विभक्तिनिर्देशात्तौदादिकयोगे न । न त्वां तृणं मन्ये, तृणाय वा ।**

**क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः १।४।३७।**

**क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः स उक्तसंज्ञः स्यात् । हरये क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति वा । यं प्रति कोपः किम् ? भार्यामीर्ष्यति । मैनामन्योऽद्राक्षीदिति । क्रोधोऽमर्षः । द्रोहोऽपकारः । ईर्ष्याक्षमा । असूया गुणेषु दोषाविष्करणम् । द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते ।**

क्रुध-द्रुह-ईर्ष्या-असूयार्थानां धातूनां प्रयोगे विधीयमाने यः कोपभाक्, तद्वाचकपदात् चतुर्थी भवति इत्यर्थः । प्रकृतप्रयोगे हरिमुद्दिश्य कोपो विहित इति हरिशब्दाच्चतुर्थी ।

**क्रियार्थोपपदस्य च कर्मणि स्थानिनः २।३।१४।**

**क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात् । फलेभ्यो याति । फलान्याहर्तुं यातीत्यर्थः । नमस्कुर्मो नृसिंहाय । नृसिंहमनुकूलयितुमित्यर्थः । एवं स्वयम्भुवे नमस्कृत्य इत्यादावपि ।**

**नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च २।३।१६।**

**एभिर्योगे चतुर्थी स्यात् । हरये नमः । प्रजाभ्यः स्वस्ति । अग्नये स्वाहा । पितृभ्यः स्वधा । अलमिति पर्याप्त्यर्थग्रहणम् । तेन दैत्येभ्यो हरिरलं, प्रभुः, समर्थः, शक्त इत्यादि ।**

नमः-स्वस्ति-स्वाहा-स्वधा-अलम्-वषट् एतेषां योगे चतुर्थी भवति । अन्यत् उदाहरणे स्पष्टम् ।

सङ्ग्रहकारिका-

**सम्प्रदाने चतुर्थी स्यात् तादर्थ्ये च क्रियायुते ।**

**रुच्यर्थानां प्रीयमाणे नमोयोगे च सा भवेत् ॥**

**ध्रुवमपायेऽपादानम् १।४।२८।**

**अपायो विश्लेषः, तस्मिन् साध्ये ध्रुवम् अवधिभूतम् अपादानसंज्ञं स्यात् ।**

**अपादाने पञ्चमी २।३।२८।**

**ग्रामादायाति । धावतोऽश्वात्पतति इत्यादि ।**

रामो ग्रामाद् आयाति इत्यत्र ग्रामाद् रामो वियुज्यते । अत्र च ग्रामः अवधिभूत इति तस्यापादानत्वम् । अत्रापि धावतोऽश्वात् पतति इत्यत्र धावतः अश्वात् कश्चन वियुज्यत इति धावन् अश्वः अवधिभूत इति तस्यापादानत्वे पञ्चमी ।

**भीत्रार्थानां भयहेतुः १।४।२५।**

**भयार्थानां त्राणार्थानां च प्रयोगे हेतुरपादानं स्यात् । चोराद् बिभेति । चोरात् त्रायते ।**

जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् । (वा.)

पापाज्जुगुप्सते । विरमति । धर्मात् प्रमाद्यति । जुगुप्साद्यर्थानां प्रयोगे अपादानसंज्ञं भवतीत्यर्थः ।

**पराजेरसोढः १।४।२६।**

**पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यात् । अध्ययनात्पराजयते । ग्लायतीत्यर्थः। असोढः किम् ? शत्रून्पराजयते । अभिभवतीत्यर्थः ।**

**वारणार्थानामीप्सितः १।४।२७।**

**प्रवृत्तिविघातो वारणम् । वारणार्थानां धातूनां प्रयोगे ईप्सितोऽथोपादानसंज्ञं स्यात् । यवेभ्यो गां वारयति ।**

**आख्यातोपयोगे १।४।२९।**

**नियमपूर्वकं विद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात् । उपाध्यायादधीते । उपयोगे किम् ? नटस्य गाथां श्रृणोति ।**

**जनिकर्तुः प्रकृतिः १।४।३०।**

**जायमानस्य हेतुरपादानं स्यात् । ब्रह्मणः प्रजाः पजायन्ते ।**

(ल्यब्लोपे कर्मण्यधिकरणे च) ।

ग्रामात्प्रेक्षते । आसनात्प्रेक्षते । प्रासादमारुह्य, आसने उपविश्य प्रेक्षत इत्यर्थः ।

ल्यबन्तस्य शब्दस्य लोपे (अप्रयोगे) सति कर्मणि अधिकरणे च पञ्चमी भवति इत्यर्थः । प्रासादम्

आरुह्य प्रेक्षत इत्यत्र आरुह्येति ल्यबन्तपदस्य अप्रयोगे सति कर्मभूतात् प्रासादशब्दात् पञ्चमी । तथैव उपविश्येति पदस्याप्रयोगे अधिकरणभूतात् आसनशब्दादपि ।

**भुवः प्रभवः १।४।३१।**

**भवनं भूः । भूकर्तुः प्रभवस्तथा । हिमवतो गङ्गा प्रभवति । तत्र प्रकाशते इत्यर्थः ।**

**अपपरी वर्जने १।४।८८।**

**एतौ वर्जनार्थे कर्मप्रवचनीयसंज्ञौ स्तः ।**

**आङ् मर्यादावचने १।४।८९।**

**आङ् मर्यादामुक्तसंज्ञः । वचनग्रहणादभिविधावपि ।**

मर्यादावचने प्रयुज्यमान आङ् कर्मप्रवचनीयसंज्ञो भवतीत्यर्थः ।

**पञ्चमी विभक्ते २।३।४२।**

**विभागो विभक्तम् । निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी । माथुराः पाटलिपुत्रेभ्य आढ्यतराः ।**

**पञ्चम्यपाङ्परिभिः २।३।१०।**

**एतैः कर्मप्रवचनीयैर्योगे पञ्चमी । अप हरेः, परि हरेः संसारः । परिरत्र वर्जने, साहचर्यात् । लक्षणादौ तु- हरिं परि । आ मुक्तेः संसारः । आ सकलाद् ब्रह्म ।**

कर्मप्रवचनीयसंज्ञकैः अप-आङ्-परिभिः सह यस्य योगस्तस्माच्छब्दात् पञ्चमी इत्यर्थः ।कर्मप्रवचनीययुक्ते द्वितीया इत्यस्यापवादः ।

**प्रतिः प्रतिनिधिप्रतिदानयोः १।४।९२।**

**एतयोरर्थयोः प्रतिरुक्तसंज्ञः स्यात् ।**

**प्रतिनिधिप्रतिदानयोः अर्थयोः प्रतिः कर्मप्रवचनीयसंज्ञकः इत्यर्थः ।**

**प्रतिनिधिप्रतिदाने च यस्मात् २।३।११।**

**अत्र कर्मप्रवचनीयैर्योगे पञ्चमी । प्रद्युम्नः कृष्णात् प्रति । तिलेभ्यः प्रतियच्छति माषान् ।**

**प्रतिनिधौ, प्रतिदाने चार्थे कर्मप्रवचनीयेन सह योगे पञ्चमी स्यात् ।**

## अभ्यासः

१. शुद्धमुच्चारयत

(क) कर्तृकरणयोस्तृतीया (ख) तादर्थ्ये चतुर्थी वाच्या

(ग) क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः (घ) पञ्चम्यपाङ्परिभिः

(ङ) अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते

२. **अधस्तनसूत्राणां सोदाहरणं सरलार्थं लिखत**

(क) साधकतमं करणम्
(ख) पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्
(ग) सहयुक्तेऽप्रधाने
(घ) कर्मणा यमभिप्रैति स सम्प्रदानम्
(ङ) ध्रुवमपायेऽपादानम्
(च) जनिकर्तुः प्रकृतिः
(छ) नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च

३. **अधस्तनप्रश्नानामुत्तराणि लिखत**

(क) अनुक्ते कर्तरि का विभक्तिः ?
(ख) अपवर्गशब्दस्य कोऽर्थः ?
(ग) सम्पूर्वस्य जानातेः योगे को विशेषः ?
(घ) किं नाम परिक्रयणम् ? तत्र च का विभक्तिः ?
(ङ) क्रुधद्रुहेत्यादिसूत्रे क्रोधादीनां केऽर्थाः ?
(च) 'ल्यब्लोपे कर्मण्यधिकरणे चे'ति किं विधीयते ?

४. **कर्तृ-करण-सम्प्रदान-अपादानसंज्ञाविधायकानि सूत्राणि सार्थं पूरयत ।**

५. **तृतीया-चतुर्थी-पञ्चम्यन्तानां पदानां साधु प्रयोगं विधाय नातिदीर्घं निबन्धमेकं रचयत ।**

६. **अधस्तनप्रयोगाणां कारकप्रक्रियां प्रदर्शयत**

(क) रामेण बाणेन हतो बाली
(ख) पुत्रेण सहागतः पिता
(ग) जटाभिस्तापसः
(घ) विप्राय गां ददाति
(ङ) मुक्तये हरिं भजति
(च) ग्रामादायाति
(छ) ब्रह्मणः प्रजाः प्रजायन्ते
(ज) प्रासादात्प्रेक्षते

६. **समुचितकारकाणां प्रयोगद्वारा रिक्तस्थानानि पूरयत**

(क) ............. बालाः पाठ्यन्ते । (रामेण, रामः, रामाय)
(ख) कविः ............... कवितां लिखति । (लेखन्या, लेखनीम्, लेखन्याः)
(ग) गुरुः ............. पुस्तकं ददाति । (छात्राय, छात्रम्, छात्रेण)
(घ) वसन्तकाले ............. पुष्पाणि पतन्ति । (वृक्षात्, वृक्षस्य, वृक्षेण)
(ङ) अलसः छात्रः ................ बिभेति । (गुरोः, गुरवे)

## द्वाविंशः पाठः

# कारकप्रकरणम् - ३

**षष्ठी शेषे २।३।५०।**

**कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धविशेषः शेषः । तत्र षष्ठी । राज्ञः पुरुषः । कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव । सतां गतम् । सर्पिषो जानीते । मातुः स्मरति । एधो दकस्योपस्कुरुते । भजे शम्भोश्चरणयोः । फलानां तृप्तः ।**

प्रातिपदिकार्थादौ प्रथमा उक्ता एव । कर्तृ-कर्मादिकारकेषु च द्वितीयातृतीयादयः विभक्तयः उपदिष्टाः । यश्चार्थः न प्रातिपदिकार्थः, न वा कर्त्रादिकारकीभूतः स एव शेषः । तत्र षष्ठी उच्यते । विवक्षातः कारकाणि भवन्तीति नियमः । तथा च सति कर्मादीनामपि यदा सम्बन्धमात्रविवक्षा तदा षष्ठी एव उच्यते । यथा सताम् गतम् इत्यादौ सच्शब्दस्य कर्मभूतस्य गतशब्देन सम्बन्धमात्रस्य विवक्षायां षष्ठी । एवमन्यत्रापि ।

**षष्ठी हेतुप्रयोगे २।३।२६।**

**हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् । अन्नस्य हेतोर्वसति ।**

**सर्वनाम्नस्तृतीया च २।३।२७।**

**सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात्, षष्ठी च । केन हेतुना वसति । कस्य हेतोः ।**

निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् ।

किं निमित्तं वसति । केन निमित्तेन । कस्मै निमित्ताय इत्यादिः । प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः । ज्ञानेन निमित्तेन हरिः सेव्यः । ज्ञानाय निमित्ताय इत्यादिः ।

**कर्तृकर्मणोः कृति २।३।६५।**

**कृद्योगे कर्तरि कर्मणि च षष्ठी । कृष्णस्य कृतिर्जगत् । जगतः कर्ता कृष्णः ।**

कृदन्तशब्दस्य प्रयोगे कर्तृवाचकात्, कर्मवाचकाच्च शब्दात् षष्ठी भवति इत्यर्थः । यथा कृष्णस्य कृतिः इत्यत्र जगत्कर्तृत्वेन कृष्णस्य प्रयोगः अतस्तत्र षठी, जगतः कर्ता कृष्णः इत्यत्र जगत् कर्मभूतम् इति जगत्-शब्दात् षष्ठी ।

**गुणकर्मणि वेष्यते ।**

नेताऽश्वस्य स्रुघ्नं स्रुघ्नस्य वा । कृति किम् ? तद्धिते मा भूत् । कृतपूर्वी कटम् ।

कृदन्तप्रयोगे गौणकर्मणि (अकथितकर्मणि) षष्ठी विकल्पेन भवति ।

**उभयप्राप्तौ कर्मणि २।३।६६।**

**उभयोः प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव षष्ठी । आश्चर्यो गवां दोहोऽगोपेन ।**

कृदन्तप्रयोगे यदि कर्ता कर्म चोभयं दृश्येते, तर्हि कर्मणि एव षष्ठी कर्तरि न इति भावः । अतः आश्चर्यो गवां दोहोऽगोपेन इत्यत्र कर्मभूताद् गोशब्दात् षष्ठी, किन्तु कर्तृभूतादगोपशब्दान्न ।

**कृत्यानां कर्तरि वा २।३।७१।**

**षष्ठी । मया मम वा सेव्यो हरिः ।**

कृत्यप्रत्ययान्तानां प्रयोगे कर्तृवाचकशब्दात् विकल्पेन षष्ठी भवति इत्यर्थः ।

**क्तस्य च वर्तमाने २।३।६७।**

**वर्तमानार्थस्य क्तस्य योगे षष्ठी । 'न लोके'ति वक्ष्यमाणनिषेधस्यापवादः । राज्ञां मतः बुद्धः पूजितो वा ।**

'मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रद्वारा क्तप्रत्ययः भूतार्थे नैव विधीयते, किन्तु वर्तमानार्थे एव । तथाविधस्य क्तप्रत्ययान्तस्य प्रयोगे कर्तृवाचकवदात् षष्ठी भवतीत्यर्थः । 'न लोकाव्ययनिष्ठाखलर्थतृणाम्' इति वक्ष्यमाणस्य निषेधस्य पूर्वमेव अपवादः ।

**अधिकरणवाचिनश्च २।३।६८।**

**क्तस्य योगे षष्ठी ।**

**इदमेषां शयितम् ।**

**अधिकरणवाचिनः क्तप्रत्ययस्य प्रयोगे कर्तरि षष्ठी भवति ।**

**न लोकाव्ययनिष्ठाखलर्थतृनाम् २।३।६९।**

**एषां योगे षष्ठी न । लादेशः । कुर्वन्-कुर्वाणो वा सृष्टिं हरिः । सः– हरिं दिदृक्षुः । अलङ्करिष्णुर्वा । उक-दैत्यान् घातुको हरिः । (कमेरनिषेधः) लक्ष्म्याः कामुको हरिः । अव्ययम्- जगत्सृष्ट्वा । निष्ठा- दैत्यान् हतवान् विष्णुः । विष्णुना हता दैत्याः । खलर्थः- ईषत्करः प्रपञ्चो हरिणा । तृन्निति प्रत्याहारः । शतृशानचाविति तृशब्दादारभ्य आ तृनो नकारात् । शानच् - सोमं पवमानः । चानश - आत्मानं मण्डयमानः । शतृ- वेदमधीयन् । तृन्–कर्ता लोकान् ।**

लादेश-(शतृ-शानचादि)-उ-उक्-अव्यय-निष्ठा-खलर्थ-तृप्रत्ययान्तानां योगे षष्ठी न भवति इत्यर्थः ।

**(द्विषः शतुर्वा)**

मुरस्य मुरं वा द्विषन् ।

शत्रन्तस्य द्विष्धातोः प्रयोगे विकल्पेन षष्ठीनिषेध इत्यर्थः ।

(सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः) ।

शेषे षष्ठी तु स्यादेव । ब्राह्मणस्य कुर्वन् । नरकस्य जिष्णुः ।

'कर्तृकर्मणोः कृति' इत्यादिभिः कर्त्रादिकारकेषु षष्ठीविभक्तिर्विधीयते । षष्ठी शेषे इति तु शेषे । अतः षष्ठी कारके शेषे चार्थे भवति इति बोध्यम् । न लोकाव्ययेत्यादिना कारकषष्ठ्याः एव निषेधः न तु शेषषष्ठ्याः । अतस्तेषां तेषां प्रत्ययानां योगे यदि शेषस्यैव विवक्षा तर्हि षष्ठी नैव निषिध्यते इति भावः ।

**अकेनोर्भविष्यदाधमर्ण्ययोः २।३।७०।**

**भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेनश्च योगे षष्ठी न । सतः पालकोऽवतरति । व्रजं गामी । शतं दायी ।**

भविष्यदर्थे विहितस्य अकः भविष्यति आधमर्ण्यार्थे विधीयमानस्य इनश्च योगे षष्ठी निषिध्यते ।

**षष्ठ्यतसर्थप्रत्ययेन २।३।३०॥**

**ग्रामस्य दक्षिणतः, पुरः पुरस्तात्, उपरि, उपरिष्टात् ।**

अतसर्थस्य प्रत्ययस्य योगे षष्ठी स्यात् इत्यर्थः । यस्य चार्थः दिग्देशकालरूपः, तादृशः प्रत्ययः अतसर्थप्रत्यय उच्यते । अस्तातिप्रभृतयः पञ्च प्रत्ययाः अतसर्थप्रत्यया उच्यन्ते ।

**एनपा द्वितीया २।३।३१।**

**एनेपेति योगविभागात्षष्ठ्यपि । दक्षिणेन ग्रामं ग्रामस्य वा । एवमुत्तरेण ।**

एनप्प्रत्ययान्तस्य योगे द्वितीया भवति इति सरलार्थः । किन्तु योगविभागं विधाय एनपेत्यत्र षष्ठ्या अनुवर्तनं विधाय षष्ठी द्वितीया चोभयं विधीयते इति भावः ।

**दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् २।३।३४।**

**एतैर्योगे षष्ठी पञ्चमी च । दूरं, निकटं वा ग्रामस्य-ग्रामाद्वा ।**

दूरान्तिकार्थानां शब्दानां योगे षष्ठी विकल्पेन भवति । षष्ठ्यभावे पञ्चमी च ।

**दिवस्तदर्थस्य २।३।५८।**

**द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी । शतस्य दीव्यति । तदर्थस्य किम् ? ब्राह्मणं दीव्यति, स्तौतीत्यर्थः ।**

**विभाषोपसर्गे २।३।५९।**

**शतस्य शतं वा प्रतिदीव्यति ।**

**आधारोऽधिकरणम् १।४।४५।**

**कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात् ।**

कर्तृनिष्ठक्रियायाः कर्मनिष्ठक्रियायाश्च आधारः कारकम् अधिकरणसंज्ञं भवतीत्यर्थः ।

**सप्तम्यधिकरणे च २।३।३६।**

**चाद्दूरान्तिकार्थेभ्यः । औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा । कटे आस्ते, स्थाल्यां पचति । मोक्षे इच्छास्ति । सर्वस्मिन् आत्मास्ति । वनस्य दूरेऽन्तिके वा ।**

अधिकरणे दूरान्तिकार्थेषु च शब्देषु सप्तमी विभक्तिर्भवतीति भावः । आधार एव अधिकरणम् इति आधारस्त्रिधा विभज्यते- औपश्लेषिकः, वैषयिकः, अभिव्यापकश्च । कटे आस्ते स्थाल्यां पचतीति द्वयम् औषश्लेषिकस्योदाहरणम् । कटे आस्ते इत्यत्र कटः कर्तृनिष्ठक्रियाया आधारः । स्थाल्यां पचति इत्यत्र स्थाली कर्मनिष्ठक्रियाया आधारः । मोक्षे इच्छास्तीति वैषयिकस्य, सर्वस्मिन् आत्मास्तीति च अभिव्यापकस्य । दूरे अन्तिके वा इति दूरान्तिकार्थशब्देभ्यः सप्तमी, तद्योगे च वनशब्दस्य दूरान्तिकार्थैः ... इत्यादिना षष्ठी ।

(क्तस्येन्विषस्य कर्मण्युपसंख्यानम्)

अधीती व्याकरणे ।

इन्विषयस्य क्तस्य प्रयोगे कर्मणि सप्तमी भवतीत्यर्थः ।

(साध्वसाधुप्रयोगे च) ।

साधुः कृष्णो मातरि । असाधुर्मातुले ।

साध्वसाधुशब्दयोः प्रयोगे सप्तमी विभक्तिर्भवति ।

(निमित्तात्कर्मयोगे) ।

'चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
केशेषु चमरी हन्ति सीम्नि पुष्कलको हतः ॥'

कर्मणा सह निमित्तस्य प्रयोगे निमित्तवाचकशब्दात् सप्तमी भवति इत्यर्थः । चर्मणि द्वीपिनं हन्ति इत्यत्र हनननिमित्तं चर्म । कर्मभूतस्य द्वीपिशब्दस्य योगे तस्मात्सप्तमी ।

**यस्य च भावेन भावलक्षणम् २।३।३७।**

**यस्य क्रियया क्रियान्तरं लक्ष्यते, ततः सप्तमी । गोषु दुह्यमानासु गतः ।**

**षष्ठी चानादरे २।३।३८।**

**अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः । रुदति रुदतो वा प्राव्राजीत् । रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवान् इत्यर्थः ।**

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च

एभिर्योगे षष्ठीसप्तम्यौ स्तः । गवां गोषु वा स्वामी ।

स्वामी-ईश्वर-अधिपति-दायाद-साक्षि-प्रतिभू-प्रसूतशब्दानां योगे षष्ठी सप्तमी च भवतः ।

**आयुक्तकुशलाभ्यां चासेवायाम् २।३।४०।**

**आभ्यां योगे षष्ठीसप्तम्यौ स्तः । आयुक्तो व्यापारितः । आयुक्तः कुशलो वा हरिपूजने-हरिपूजनस्य वा । आसेवायाम् किम् ? आयुक्तो गौः शकटे, ईषयुक्तः इत्यर्थः ।**

**यतश्च निर्धारणम् २।३।४१।**

**जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः । नृणां-नृषु वा ब्राह्मणः श्रेष्ठः । गवां-गोषु वा कृष्णा गौर्बहुक्षीरा । गच्छतां गच्छत्सु वा धावन् शीघ्रः । छात्राणां-छात्रेषु वा मैत्रः पटुः ।**

**साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः २।३।४३।**

**मातरि साधुर्निपुणो वा । अर्चायां किम् ? निपुणो राज्ञो भृत्यः । इह तत्त्वकथने तात्पर्यम् ।**

साधुशब्दस्य निपुणशब्दस्य च योगे सप्तमी भवति अर्चायाम् । प्रति-इत्यस्य योगे न भवति इत्यर्थः । (अप्रत्यादिभिरिति वक्तव्यम्) साधुर्निपुणो वा मातरं वा मातरं प्रति परि, अनु वा ।

अप्रतेः इत्यस्य स्थाने अप्रत्यादिभिः इति वक्तव्यम् इत्यर्थः । प्रतेरेव न अन्येषामपि प्रयोगे सप्तमी नेत्यर्थः ।

**अधिरीश्वरे १।४।९७।**

**स्वस्वामिभावसम्बन्धेऽधिः कर्मप्रवचनीयः ।**

**यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी ।२।३।९।**

**अत्र कर्मप्रवचनीययुक्ते सप्तमी । उप परार्धे हरेर्गुणाः परर्धादधिका इत्यर्थः । ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी । अधि भुवि रामः । अधि रामे भूः ॥**

## अभ्यासः

**१. अधस्तनसूत्राणि शुद्धं पठत**

(क) न लोकाव्ययनिष्ठाखलर्थतृनाम्

(ख) अकेनोर्भविष्यदाधमर्ण्ययोः

(ग) स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च

(घ) साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः

**२. अधस्तनप्रयोगेषु मुख्यसूत्राणि अन्विष्य तेषामर्थ लिखत**

(क) जगतः कर्ता कृष्णः

(ख) आश्चर्यो गवां दोहोऽगोपेन

(ग) राज्ञां मतः बुद्धः पूजितो वा

(घ) शतं दायी

(ङ) दूरं, निकटं वा ग्रामस्य-ग्रामाद्वा

(च) कटे आस्ते

(छ) साधुः कृष्णो मातरि

**३. उत्तराणि लिखत -**

(क) 'षष्ठी शेषे' इत्यत्र शेषशब्दस्य कोऽर्थः ?

(ख) सम्बन्धस्य कारकत्वं कथं नेति सोदाहरणं लिखत ।

(ग) कृष्णस्य कृतिरित्यत्र कथं कृष्णशब्दात् षष्ठी ?

(घ) कर्तृकर्मणोरुभयत्र षष्ठ्यां प्राप्तौ कुत्र षष्ठी ?

(ङ) आधारः कतिविधः ? सोदाहरणं लिखत ।

(च) किं नाम निर्धारणम् ?

**४. 'चर्मणि द्वीपिनं हन्ति..' इति कारिकां प्रपूर्य अत्र को विशेषः ? लिखत ।**

**५. सर्वेषां कारकाणामेकत्र निदर्शनम् उपस्थापयत ।**

**६. अधस्तनप्रयोगाणां ससूत्रं कारकप्रक्रियां प्रदर्शयत**

(क) केन हेतुना वसति

(ख) जगतः कर्ता कृष्णः ।

(ग) मुरस्य मुरं वा द्विषन्

(घ) दूरं, निकटं वा ग्रामस्य-ग्रामाद्वा

(ङ) मोक्षे इच्छास्ति

(च) गोषु दुह्यमानासु गतः

(छ) गवां-गोषु वा कृष्णा गौर्बहुक्षीरा

**७. कारकाणां प्रयोगद्वारा वाक्यानि पूरयत**

(क) लक्ष्मीप्रसादः ............... लेखकः अस्ति । (कविताम्, कवितायाः)

(ख) नारायणः .................. मनो ददाति । (सङ्गीते, सङ्गीताय)

(ग) ................ स आगतवान् । (कार्याणां क्रियमाणानाम्, कार्येषु क्रियमाणेषु)

(घ) .................. अश्वत्थः पवित्रः । (वृक्षाणां वृक्षेषु वा, वृक्षेण वृक्षाय वा)